गोपीनाथकविराज-ग्रन्थमाला

(१)

संस्कारदीपकः

म० म० गोपीनाथकविराजविरचितः



वाराणसेय-संस्कृत-विश्वविद्यालयः

GOPĪNĀTHA KAVIRĀJA GRANTHAMĀLĀ

VOL. 1

GENERAL EDITOR :—

Kshetresachandra Chattopadhyaya

Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.



SAṂSKĀRADĪPAKA

by

Mahāmahopādhyāya Harṣanātha Jhā

VARANASI

1963

DATA ENTERED

Published by :—
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Printed by :—
A. K. Bose,
Indian Press (Private) Ltd.,
Maldahia, Varanasi.

गोपीनाथकविराज-ग्रन्थमाला

(१)

संस्कारदीपकः

महामहोपाध्यायश्रीहर्षनाथझाविरचितः

श्रीरामचन्द्रशास्त्रिखनङ्गकृतटिप्पणीभिः परिष्कृतः


सम्पादकः

श्रीदुर्गाधरझा न्यायाचार्यः

वाराणस्याम्

१८८५ तमे शकाब्दे





२७/१२
73

प्राप्तिस्थानम्—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी-२

S
J559S

मूल्यम्—सप्त रूप्यकाणि

IIAS, Shimla
Library
S 294.538 J 559 S
00007298

॥ श्रीः ॥

विज्ञप्तिः

यस्य निःश्वसितं वेदा
धर्ममूलमिति स्मृताः ।
जना यत्कृपया चापि
तरन्ति भववारिधिम् ॥ १ ॥
तं नत्वा परमं देवं
संस्कारपूतपूजितम् ।
संस्कारदीपकं भूयः
प्रकाशयाम्यहं मुदा ॥ २ ॥
कर्तास्य ग्रन्थरत्नस्य
श्री**हर्षनाथ**संज्ञकः ।
झोपाख्यो बहुशास्त्रज्ञो
विबुधो मैथिलः कविः ॥ ३ ॥
श्वशुरो गुरुवर्याणां
श्री**गङ्गानाथ**शर्मणाम् ।
पुराणन्यायमीमांसा-
धर्मशास्त्रादिसद्विदाम् ॥ ४ ॥
संस्काराणामयं ग्रन्थो
नानार्थपरिबृंहितः ।
वस्वक्षिवसुचन्द्रेऽब्दे (१८२८)
शाके पूर्वं प्रकाशितः ॥ ५ ॥
अधुना नोपलभ्योऽसा
इत्याकुलितमानसः ।
टिप्पण्यादिसमावेशै-
रादिशत्तत्प्रकाशनम् ॥ ६ ॥

विश्वविद्यालयाध्यक्षः

प्रथमो धर्मवित्तमः ।

गुरोः पुत्रः प्रियः शिष्य

आदित्यनाथझाबुधः ॥ ७ ॥

खनङ्ग-रामचन्द्रैश्च

मीमांसाध्यापकैरिह ।

लिखिता टिप्पणी साध्वी

ग्रन्थार्थो यत् स्फुटो भवेत् ॥ ८ ॥

सम्पादनं कृतं सम्यक्

श्रीदुर्गाधरशर्मणा ।

समाप्त्या निर्वृतं चेतः

क्षेत्रेशचन्द्रशर्मणः ॥ ९ ॥

सर्वतन्त्रस्वतन्त्राणां

योगेद्धदिव्यचक्षुषाम् ।

श्री**गोपीनाथ**विप्राणां

कविराजप्रथाभृताम् ॥१०॥

नाम्नैका नूतना नूनं

ग्रन्थमाला प्रवर्तिता ।

अधुनानुपलब्धानां

ग्रन्थानां पुनरेव **च** ॥११॥

प्रकाशार्थं सुसंस्कृत्य

टिप्पणयादिपुरःसरम् ।

तेष्वादरवतां मध्ये

सौलभ्यं तु यथा भवेत् ॥१२॥

मालायाः प्रथमं पुष्पं

संस्कारदीपको ह्ययम् ।

स्वकीयोज्ज्वलरूपेण

चकास्तु बुधसंसदि ॥१३॥

———

भूमिका

सम्पूर्वकात् कृधातोर्घञा निष्पन्नोऽयं संस्कारशब्द आत्मशरीरान्यतरनिष्ठेऽतिशयविशेषे वर्तत इत्यत्रास्ति सर्वेषां वेदानुयायिनामैकमत्यम्। तज्जनिकाश्चानुष्ठानात्मिकाः क्रिया नानागृह्यसूत्रादिषु नानासंख्याका उपलभ्यन्ते। अस्मिन् ग्रन्थे पारस्करगृह्यसूत्रोक्तेषु संस्कारेष्वपि विवाहगर्भाधानपुंसवनसीमन्तोन्नयनजातकर्मनामकरणनिष्क्रमणान्नप्राशनचूडाकरणकर्णवेधोपनयनवेदारम्भसमावर्तनान्तास्त्रयोदश एव संस्कारा विवृताः सन्ति। अत एवैतेषां संस्काराणां तत्सम्बद्धानां सर्वेषां विषयाणां च दीपकवत् प्रकाशकोऽयं ग्रन्थो यद्यपि यजुर्वेदीयमाध्यन्दिनशाखीयानां पारस्करीयाणां कृते एव मुख्यतया लिखितस्तथाप्यन्यशाखिनां कृतेऽपि परमोपयोगीति ग्रन्थदर्शनेनैव व्यक्तीभविष्यति।

सुस्पष्टशैल्या निर्मितोऽप्ययं ग्रन्थः स्वभावत एव पूर्वमीमांसायाः कैश्चिदधिकरणैः संश्लिष्ट इति तत्तत्स्थले काठिन्यमुपलभ्य तन्निवृत्तये वाराणसेयसंस्कृतविश्वविद्यालयीयपूर्वमीमांसाप्रधानाध्यापका अस्मत्सुहृद्वर्याः श्रीरामचन्द्रशास्त्रिखनङ्गमहोदयाः प्रार्थिताः। तैश्च महाभागैर्विषमस्थलेषु टिप्पणीनिर्माणेनोक्तं काठिन्यं दूरीकृतमिति तान् प्रति कृतज्ञतामावेदयामि।

एतद्ग्रन्थकारस्य जीवनं ग्रन्थप्रणयनादिकं चाधिकृत्य किञ्चिदावेदयामि—

एतद्ग्रन्थप्रणेता मैथिलश्रोत्रियसकराढिवंशावतंसः श्रीहर्षनाथशर्मा निजजन्मना मिथिलादेशप्रचलित'सन'समभिधानसंकेतिते व्यतीते त्रिपञ्चोत्तरादित्यसमसंख्यकपरिमिते (१२५३) प्रकृष्टे वर्षे (शकमानेन १७६७ परिमिते वर्षे) मिथिलान्ते 'उजान'नामग्रामविशेषस्योत्तरशीर्षभागे 'धर्मपुर'नामधेयां ग्रामटिकामलञ्चकार। एतस्य दुरदृष्टवशात् तत्पिता श्रीव्रजनाथशर्मा झटित्येव परलोकं गतः। तद्विपत्तौ कुतोऽप्यशरण्या तस्य जननी श्रीशीलवतीदेवी किंकर्तव्यविमूढेव तस्थौ। एतादृशे विषमे समये तस्या मातुलः पण्डितप्रवरश्रीमोदनाथशर्मा स्वसंस्थापिते 'शारदापुर'ग्रामे सपुत्रां तां समस्थापयत।

तत्र स्वायुषः पञ्चदशवर्षं यावदेतद्ग्रन्थप्रणेता श्रीहर्षनाथशर्मा शिक्षया वञ्चित एवासीत्। किन्तु निजमातृमातुलेयादीन् शास्त्राध्ययनमाचरतो वीक्ष्य एतस्यापि पिपठिषा समजायत। ततः पूर्वाभिहितधर्मपुरग्रामटिकानिवासिनो विद्वद्वरान्छ्रीमतो गोपालठक्कुराद्

व्याकरणशास्त्रमधीतवान्। अतः परं काशीमागत्य प्रथमं म० म० श्रीराजारामशास्त्रितः तदनन्तरं च राजकीयसंस्कृतमहाविद्यालये म० म० श्रीबालशास्त्रितोऽपि सपरिष्कारव्याकरण-शास्त्रं तदनु च न्यायवेदान्तसांख्यादिदर्शनान्यधीतवान्। श्रीनृसिंहशास्त्रितश्च साहित्य-ग्रन्थानध्यैष्ट।

अतिचमत्कार्युत्कृष्टप्रणालीपुरस्सरं शास्त्रार्थं कुर्वाणोऽयमासादितकाशिकाजीविका-मप्युपेक्षमाणः प्रतीक्षमाणस्य मिथिलेश्वरस्य जी० सी० आई० ई० इत्यादिपदवीभूषितस्य महाराजश्रीलक्ष्मीश्वरसिंहशर्मणोऽनुरोधेन काशीत आगत्य चतुर्विंशतिवर्षवयस्कः स्वजन्म-भूमावेव तदीयसभां समाजयामास। तत्र च प्रतिदिनं कीर्त्तिरस्य समवर्द्धत।

सर्वसीमाग्रामनिवासिनो मन्त्रशास्त्रवेत्तुः श्रीमहेश्वरठक्कुरशर्मणो श्रीभगवतीनामधेयां कन्यकां परिणीतवान्। ततो द्वौ पुत्रौ तिस्रः कन्यकाश्च समभूवन्। तेषु ज्येष्ठा श्रीमती इन्दुमतीदेवी परमसौभाग्यवती महामहोपाध्यायैर्नानाशास्त्रविशारदैर्विद्यासागर-डाक्टर-नाइट्-प्रभृत्युपाधिभूषितैः श्रीमद्गङ्गानाथझाशर्मभिः परिणीता। तयोश्च पञ्च पुत्रा जाताः पञ्च च कन्यकाः। पुत्रेषु कनिष्ठ आई०सी०एस०श्रीमदादित्यनाथझामहाशयो वाराणसेय-संस्कृतविश्वविद्यालयस्य प्रथमोपकुलपतिर्यत्प्रेरणया ग्रन्थरत्नमिदं टिप्पण्यादिसंनिवेशेन पुनः प्राकाश्यं नीयते।

ग्रथिताश्चानेकविधा ग्रन्था अनेन। ते च व्याकरणे (१) कारकान्तं व्याख्यानं शब्देन्दुशेखरस्य, (२) परिभाषार्थदीपकनामधेयं परिभाषेन्दुशेखरस्य, (३) मनोरमाभावदीपक-(४) शब्दरत्नार्थदीपकनामधेये च।

पुरञ्जनचरितनाटकादिप्रणेतृबालकविश्रीकृष्णदत्तझारचितगीतगोपीपतिकाव्यस्य (गीत-गोविन्दानुसारिणः) टीका। एषा च मुद्रिता सती आद्रियते सहृदयैः।

[1] दृश्यकाव्ये च (१) उषाहरणम् (२) माधवानन्दः (३) सुदामचरितम् (४) राधा-कृष्णमिलनम्।

---

१. अस्य नाटकानां विषये सविशेषमिदं ज्ञातव्यम्। मिथिलायां महाकविविद्यापतेः पूर्वत एव नाटकरचनाया एका विलक्षणा पद्धतिः प्रचलिता आसीत्। तन्नाटकेषु गद्यमयः सर्वोऽपि संवादः संस्कृतनाटकवत् यथायथं संस्कृतप्राकृतयोरेवासीत्। किन्तु पद्यानि प्रायः सर्वाण्येव मिथिलाभाषामयगीतात्मकान्येव। तत्पद्धतिमवलम्ब्यैव सोऽप्युक्त-नाटकानि रचयामास। एतदनन्तरमेव सा पद्धतिः मिथिलातोऽप्यन्तर्हिता। अत एव

एकदा महाराजश्रीलक्ष्मीश्वरसिंहशर्मभिः स्वाश्रिताः सर्वे विद्वांसः परस्परविभिन्न-विषयकनिबन्धादिप्रणयनार्थमाज्ञप्तास्तत्र संस्कारविषयकनिर्मितिरेवानेनाङ्गीकृतेति तदाज्ञावशंवदेनायं संस्कारदीपकनामधेयो निबन्धो विरचितः।

पद्धतिषु—(१) राधाकृष्णप्रतिष्ठा, (२) ताराप्रतिष्ठा, (३) चतुरग्निविधानेन जलाशयोत्सर्गपद्धतिश्च निर्मिताः। तत्र आद्ये द्वे पद्धती अमुद्रिते। तृतीया च मुद्रितापीदानीं सुदुर्लभा।

नायं विद्याक्षेत्र एव पाटवातिशयमधिगतवान्, किन्तु व्यवहारेऽपि कुशलः पराक्रमसम्पन्नश्चासीत्। न केवलमयं धर्मशास्त्रज्ञो धर्मानुष्ठानेऽपि संलग्नचित्तो बभूव। अभ्युदयनिःश्रेयसकरयोरुभयविधयोरेव धर्मयोः श्रद्धां हृदि धारयन् पण्डितवर्योऽसौ "अयं तु परमो धर्मो यद्योगेनात्मदर्शनम्" (१।८) इति याज्ञवल्क्यस्मृतिवचनमनुस्मरन् संसृतितो मुक्तिलाभ एव परमो लाभ इति मन्वानः श्रीयोगदत्तशर्मभ्यो योगशिक्षां कृत्वा मार्गेऽस्मिन् विशिष्टामग्रगतिमासादितवान्।

पञ्चोत्तरत्रयोदशततमे (१३०५) ईशवीयसमभिधानसंकेतिते वर्षे (१८१८ परिमिते शाके) ज्येष्ठकृष्णत्रयोदश्यां तिथौ एकपञ्चाशद्वर्षवयस्को मध्यमे वयस्येव नश्वरं शरीरं त्यजन् परमं धाम जगाम[१]।

सावधानं कृतेऽपि संशोधने ममानवधानादज्ञानाद्वा या अशुद्धय अवशिष्टास्ताः संशोध्य ग्रन्थमिममुपयोक्ष्यन्तु विद्वांस इति साञ्जलि आवेद्य विरमति

विदुषामनुचरः
दुर्गाधरझाशर्मा
वाराणसेयसंस्कृतविश्वविद्यालयीयानुसन्धानसहायकः।

मैथिलीसाहित्यस्य सर्वे मर्मज्ञा विद्वांस उक्तपद्धत्यनुसारिनाटककर्तॄणां कवीनामन्तिमप्रतिनिधिभूतकवित्वेनाप्यैनमभ्यर्थयन्ति। एतन्नाटकस्थकतिपयान्यतिमनोहराणि गीतानि सुप्रसिद्धभारतीयभाषापण्डितेन श्रीयुतग्रियर्सनमहोदयेन आंग्लभाषायामनूदितानि।

१. एतज्जीवनवृत्तं तत्पुत्रेण श्रीमद्विनाथशर्मणा महामहोपाध्यायश्रीमद्गङ्गानाथझासंस्कृताया ईशवीये १९२७ परिमिते वर्षे प्रकाशिताया ग्रन्थकर्तुर्जलाशयोत्सर्गपद्धतेर्भूमिकायां व्यलेखि। ततश्च मया तदाज्ञया तद्वृत्तसंक्षेपः कृतः। एतदाज्ञाप्रदानेन स मे नितरां धन्यवादार्हः।

विषयानुक्रमणिका

मङ्गलाचरणम्	१
मातृकापूजा	२
वसोर्द्धारा	४
आभ्युदयिकम्	५
अत्र मधुदाननिषेधः	७
मधुमन्त्रपाठविचारः	७
अत्र मतव्यवस्था	८
आभ्युदयिकेतिकर्तव्यताविशेषः	८
मात्रादिपिण्डानां प्रवामता	१०
प्रदक्षिणोपचारादिः	१०
तुभ्यंवृद्धिपदप्रयोगः	१०
युग्मब्राह्मणादि	११
देयद्रव्याणि	११
कर्तुः पश्चिमाभिमुखता	११
नान्दीमुखपदप्रयोगः	१२
प्रपितामहपूर्वकत्वखण्डनम्	१२
पित्रादीनां नान्दीमुखत्वम्	१२
पित्रादित्रिके जीवति ततः परभूतानां श्राद्धम्	१३
जीवत्पितृकादौ कर्तरि श्राद्धोद्देश्यविचारः	१३
पिण्डरहितश्राद्धम्	१४
पिण्डरहिते विशेषः	१४
आभ्युदयिककालः	१४
पितुरभावे संस्कार्यक्रमः	१५
पितरि जीवत्यन्यस्य कर्तृत्वे	१६
यागादौ प्रतिनिधिपितॄणां श्राद्धनिरासः	१६
स्त्रीकर्तृके यागादौ तत्पितॄणामेव श्राद्धम्	१६
पितृव्यादीनां संस्कर्तृत्वे	१७
सपिण्डीकरणाधिकारिकर्तृकश्राद्धे	१७
पित्रादीनां वस्वादिरूपेण ध्येयता	१७

आभ्युदयिकस्य कर्माङ्गत्वादिविचारः १८
यत्र श्राद्धस्य नैमित्तिकत्वं तत्र विशेषः १८
अत्र संकल्पविशेषः १८
मातृकापूजाभ्युदयिकापवादः १८
गर्भाधानेऽप्याभ्युदयिकम् १९

समयाशुद्धिप्रकाशः

मकरस्थगुर्वादि २०
गुरुशुक्रयोर्बाल्यादिदिनसंख्या २२
गुर्वतीचारः २३
क्वचिदतीचारादौ दोषाभावमतखण्डनम् २४
अकालवृष्ट्यादि २५
आरब्धे कर्मणि सूतकादिदोषाभावः २९
षोडशसंस्काराः ३०
संस्कारेषु केषाञ्चिन्नित्यत्वम् ३१
गर्भाधानादित्रयस्य क्षेत्रसंस्कारकत्वम् ३१
शूद्रस्यामन्त्रकः संस्कारः ३२
स्त्रीणां विवाहस्यैव समन्त्रकत्वम् ३२

कुशण्डिका

तत्र परिसमूहनम् ३३
उपलेपनम् ३३
उल्लेखनम् ३४
मृदुद्धरणम् ३५
अभ्युक्षणम् ३५
अग्निस्थापनम् ३५
ब्रह्मोपवेशनम् ३६
प्रणीतापात्रे जलकरणम् ३८
परिस्तरणम् ३९
पात्रासादनम् ३९
पवित्रकरणम् ४०
प्रोक्षणीसंस्कारः ४१
आसादितवस्तुसेचनम् ४२
आज्यनिर्वापः ४२

चरुः ४२
आज्याधिश्रयणम् ४३
पर्यग्निकरणम् ४३
स्रुवसंस्कारः ४४
आज्याद्युद्वासनम् ४५
पुनः प्रोक्षणयुत्पवनम् ४६
उपयमनादानम् ४६
समिदाधानम् ४६
अग्निपर्युक्षणम् ४७
होमः, तत्र विशेषविधयः ४७
होमादौ मौनं तदनुकल्पश्च ४६
वह्निसन्दीपनम् ५०
पात्राद्यनादेशे स्रुवादि ५१
देवतोद्देशः ५१
स्रुवधारणम् ५२
होममन्त्राणां प्रणवादिकत्वादि ५२
कर्तुरासीनत्वादि ५३
दक्षिणजानुपातः ५३
दिङ्नियमः ५३
कर्तुरङ्गम् ५३
मन्त्राणामेकश्रुत्या पाठः ५३
रौद्रादिमन्त्रोच्चारणे जलस्पर्शः ५३
उपदर्शितविधेः सर्वहोमसाधारण्यम् ५४
परिसमूहनादौ मन्त्राभावः ५४
आघाराद्यङ्गाहुतयः ५४
मनसा प्राजापत्यम् ५४
आज्येनाघारादयः यावद्धविषा स्विष्टकृत् ५६
आघारादीनामङ्गत्वनिर्वचनम् ५६
आहुतिप्रदेशः ५६
आघारादीनां सर्वहोमेषु कर्तव्यता ५६
व्याहृतिहोमात्पूर्वं क्वचित्स्विष्टकृत् ५६
आघारादिमन्त्रव्याख्या ५६
संस्रवधारणं तत्प्राशनञ्च ५६

ब्रह्मदक्षिणा	५६
अचेतनब्रह्मपक्षे पुरोहिताय तत्प्रतिपत्तिः	६०
पवित्राभ्यां प्रणीताजलेन शिरःसंमार्जनम्	६०
सुमित्रया न इति मन्त्रस्यार्थः	६०
प्रणीतानिक्षेपः	६०
पात्रन्युब्जीकरणम्	६०
दुर्मित्रिया इति मन्त्रस्यार्थः	६०
बर्हिर्होमः	६०
'देवा गातु' इति मन्त्रस्यार्थः	६१
पूर्णाहुतिः	६१
उत्थायैव पूर्णाहुतिं दद्यात्	६१
'मूर्द्धानं दिवो' इति मन्त्रस्यार्थः	६१
स्रुवलग्नभस्मना त्र्यायुषकरणम्	६२
कर्मदक्षिणा	६२
विवाहशब्दार्थः, तस्य लक्षणादिकञ्च	६३
विवाहलक्षणघटकस्वीकारस्य द्वैविध्यम्	६४
अत्र विवेकः	६५
सप्तपदीपरिणयनानन्तरमेव दाम्पत्यनिष्पत्तिः	६५
दाम्पत्यनिष्पत्त्यनन्तरं वरमरणे कन्याया न पुनर्विवाहः	६६
विधवोद्वहननिषेधः	६६
कलिवर्ज्यानि	६८
नियोगो युगान्तरविषयः	६६
'नष्टे मृते प्रव्रजिते' इत्यादिपराशरवचनं वाग्दत्तायाः पुनरुद्वाहज्ञापकम्	६६
कन्यायाः पितृगोत्रनिवृत्तिः पतिगोत्रप्राप्तिश्च	७०
विवाहस्याष्टौ भेदाः	७१
तेषां गुणावगुणाः	७१
कन्याया विवाहे धनग्रहणं निषिद्धम्	७५
विवाहसंस्कार आवश्यकः	७७
शूद्रस्याप्याश्रमपरिग्रहः	७८
स्वेच्छया विवाहाकर्तरि ज्येष्ठे कनिष्ठविवाहे परिवेदनदोषो नास्ति	७६
विवाह्यकन्याया लक्षणम्	७६
सापिण्ड्यविचारः	७६
समानगोत्रत्वस्य विचारः	८०

समानप्रवरत्वविचारः ८०
पितृबान्धवविचारः ८०
मातृबान्धवविचारः ८२
कन्याया उद्वाह्यत्वप्रयोजकादिः ८२
एतद्विचारोपसंहारः ८६
कन्यायाः सुलक्षणानि ८७
कन्याया दुर्लक्षणानि ८८
कन्यायाः शुभसूचकचिह्नानि ८९
कन्याया विवाह्यत्वप्रयोजिका परीक्षा ९४
वरमातृनाम्नीकन्या न विवाह्या ९५
वरस्य गुणाः ९७
ब्राह्मणैश्चतुर्णामेव वर्णानां कन्या विवाह्या ९८
क्षत्रियैः क्षत्रियादित्रयाणां वर्णानां कन्या विवाह्या ९८
वैश्यैर्वैश्यशूद्रयोरेव कन्या विवाह्या ९८
शूद्रेण शूद्रकन्या एव विवाह्या ९८
कलिवर्ज्या धर्माः १००
परिवेत्तुः परिवित्तेश्च लक्षणे १००
कस्यां स्थितौ अविवाहिते ज्येष्ठभ्रातरि कनिष्ठस्य विवाहेऽधिकारः १०१
जीवद्भार्यस्य भार्यान्तरपरिग्रहाधिकारविचारः १०३
रजोदर्शनात्प्रागेव कन्यादानं कर्तव्यम् १०४
सकृदेव कन्याया दानम् १०८
एकस्मै दातुं प्रतिज्ञाताप्यन्यस्मै कन्या न दातव्या १०८
त्रिविवाहे कृते चतुर्थविवाह आवश्यकः १११
मातृपितृविहीनस्य विवाहादिसंस्कारपूर्वकस्थिरीकरणे महत्पुण्यम् १११
क्षुते प्राप्तेऽप्यारब्धो विवाहः समाप्यः १११
स्त्रियः सदा पूज्याः ११२
स्त्रीणां कदापि न स्वातन्त्र्यम् ११२
स्त्रीरक्षणोपायाः ११३
बह्वीसु भार्यासु ज्येष्ठयैव सह धर्मं कुर्यात् ११३
स्त्रीपरित्यागे पातकम् ११३
स्त्रीणां दैनिककृत्यानि ११५
स्त्रीणां चारित्र्यभ्रंशकारणानि ११६
पतिव्रतायाः प्रशंसा ११६

व्यभिचारे दोषाः ११६
जामातारो न प्रकोपयितव्याः ११७
अप्रजायाः कन्याया गृहे भोजनं न कर्तव्यम् १७७
कृते विवाहे वर्षमेकं वर्ज्याणि १११
विवाहे विहितवर्षादि १७
विवाहकर्मणः प्रदेशः १२१
मण्डपनिर्माणम् १२१
अर्हणा १२२
आचार्यलक्षणम् १२२
ऋत्विजो लक्षणम् १२२
कन्यादातुः पश्चिमाभिमुखत्वं प्रतिग्रहीतुश्च पूर्वाभिमुखत्वम् १२३
विष्टराहरणम् १२३
पाद्यग्रहणम्, पादप्रक्षालनं च १२६
द्रव्यत्याग ऐशान्यामेव १२७
द्विराचमनस्थानानि १२७
मधुपर्कदानादिविचारः १२८
समन्त्रकममाचनम् १३०
अध्याहारानुषङ्गन्यायः १३०
गौर्गौरित्यादि वाक्योच्चारणं नापितकर्तृकमेव न यजमानकर्तृकम् १३२
तृणच्छेदनविचारः १३२
कलिवर्ज्याणि १३४
वरार्हणञ्च तदीयशाखानुसारेणैव कर्तव्यम् १३४
विवाहेतिकर्तव्यता विचारः १३५
अहतवस्त्रलक्षणम् १३५
सधवा नारी रक्तवस्त्रमेव धारयेत्, विधवा च रक्तवस्त्रं न धारयेत् १३५
कन्यादानाधिकारिणः १३७
अप्रकृतिस्थेन यत्कृतं तदकृतमेव १३८
अङ्गवैकल्येऽपि कृतं प्रधानं न पुनरावर्तते १३८
कन्यादानकालः १३६
कन्यादानफलम् १३६
शुभकर्मणि गीतादिकरणम् १४१
योगसिद्धिन्यायस्वरूपम् १४२
पित्रादिगतफलकामनयापि दानम् १४२

दातृवरयोर्दिङ्नियमादि १४३
गोत्रप्रवराद्यभिधानादि १४३
कन्यादानवाक्ययोजना १४३
शंखस्थतोयादिना दानम् १४५
तत्र तिलबाधश्च १४५
वरहस्तोपरि कन्याहस्तनिधानम् १४५
दानप्रतिग्रहयोर्धर्माः १४६
दक्षिणाया आवश्यकता १४६
रात्रावपि कन्यादानं दानान्तरं च १४६
वैवाहिकप्रदानफलम् १४६
प्रतिग्रहविधिः १४६
कामस्तुतिः १४७
कन्यामादाय निष्क्रमणम् १४७
असाविति नामनिर्देशः १४७
मौनिपुरुषस्कन्धे कलशधारणम् १४८
कन्यावरयोः परस्परसमीक्षणम् १४८
अग्नेः पश्चात् कन्यावरयोरुपवेशनम् १४९
विवाहाङ्गहोमोपक्रमः १४९
अत्र राष्ट्रभृद् जयाभ्यातानानां विधिः १५०
राष्ट्रभृदादावन्वारम्भाद्यभावः १५०
राष्ट्रभृन्मन्त्रास्तदर्थाश्च १५०
जयामन्त्राः १५२
जयामन्त्रव्याख्यानम् १५२
जायानिन्द्रायेतिप्रयोगनिरासः १५३
अभ्यातानमन्त्रास्तदर्थाश्च १५३
अग्नेरैत्वित्याद्याश्चतस्र आहुतयः १५५
परं मृत्यवित्याहुतिः १५५
लाजहोमप्रकरणम् १५५
लाजहोममन्त्रा वधूपठनीयाः १५७
साङ्गुष्ठहस्तग्रहणम् १५७
अश्मारोहणम् १५९
गाथागानम् १५९
अग्निपरिक्रमणम् १६०

ब्रह्मसहितस्याग्नेः प्रदक्षिणीकरणनिरासः १६१
पुनर्वारद्वयं लाजहोमादिविधिः १६१
शूर्पकोणेन चतुर्थं लाजहवनम् १६१
चतुर्थहोमोऽपि हस्तेनैवेति मतखण्डनम् १६१
तूष्णीं चतुर्थपरिक्रमणम् १६३
अवशिष्टप्राजापत्यहोमः १६३
इतरथावृत्तिव्युदासः १६३
सप्तपदाक्रमणम् १६३
पुरुषस्कन्धे कलशधारणम् १६४
वधूमूर्ध्न्यभिषेकः १६४
सूर्योदीक्षणम् १६५
रात्रौ विवाहे ध्रुवदर्शनम् १६५
वधूहृदयालम्भनम् १६६
वध्वाभिमन्त्रणम् १६६
आनुडुहचर्मोपवेशनम् १६७
स्विष्टकृद्धोमादि १६७
सिन्दूरदानम् १६७
स्त्रीव्यवहारप्रामाण्यम् १६७
वधूवरयोस्त्रिरात्रनियमाः १६८
चतुर्थीकर्मोत्तरं विवाहसंपूर्त्तिः १६८
दम्पतिकर्तव्यानि १६९
पत्न्या सह भोजनम् १६९
देवीपूजनम् १७०

अथ चतुर्थीकर्म

पञ्चाहुतयः १७१
सामगयजुर्वेदोश्चतुर्थीकर्मकालभेदः १७१
स्थालीपाकाहुतिः १७२
संस्रवमिश्रितोदकेन वधूमूर्द्धन्यभिषेकः १७२
अवशिष्टसर्वप्रायश्चित्तहोमादि १७२
स्थालीपाकप्राशनम् १७३
वधूहृदयालम्भनम् १७३

गर्भाधानम्

वधूहृदयालम्भः १७५
दारोपगमनकालः १७६
स्त्रीणामार्त्तवे यस्मिन्नर्पितो भावः तच्छीला सन्ततिः १८०
यमकोत्पत्तिः १८१
अस्नातादिगमननिषेधः १८१
देवद्विजाद्याश्रमादिषु मैथुननिषेधः १८१
गर्भिणीगमननिषेधविचारः १८१
दारालङ्कारादि १८१
मैथुनिनः स्नानादि १८२
मैथुनोत्तरं सहशयननिषेधः १८२
गर्भाधाने विहितनक्षत्रादि १८३
ऋतौ नक्षत्रादिनिषेधः १८३
ऋतुयौगपद्ये १८४
गर्भाधानकालातिक्रमे १८४
गृह्ये प्रक्षिप्तपाठः १८४
गर्भाग्रहणे तद्ग्रहणोपायः १८४
गर्भिणीतत्पतिधर्माः १८५
दोहदप्रदानम् १८५
सूतिकागृहं नैर्ऋत्याम् १८६

पुंसवनम्

पुंसवनकालः १८७
तत्र विहिततिथ्यादि १८८
पुंसवनेतिकर्तव्यता १८८
पुंनक्षत्राणि १८९
कालातिक्रमे १८९

सीमन्तोन्नयनम्

सीमन्तोन्नयनकालः १९०
इतिकर्तव्यता १९१

जातकर्म

मुखप्रसवार्थमभिषेकः	१९५
अवरावपतनम्	१९५
पितुः सचैलस्नानादि	१९५
रात्रावपि स्नानदानादि	१९६
नालच्छेदनात् प्रागशौचाभावः पुण्यकालश्च	१९६
पुत्रमुखदर्शनम्	१९६
कालातिक्रमेण तत्करणे विहितनक्षत्रादि	१९७
अशौचे पुत्रोत्पत्तौ	१९७
मेधाजननम्	१९७
अन्ते 'इति' शब्दपाठाद् बहूनामेकमन्त्रत्वम्	१९८
आयुष्यकरणम्	१९८
त्र्यायुषमन्त्रव्याख्या	१९९
कर्तृगताप्याशंसा यजमानगतैव	१९९
दीर्घायुष्करणम्	१९९
वात्सप्रमन्त्राः	१९९
अनुप्राणनम्	२००
जन्मदेशाभिमन्त्रणम्	२०१
बालाभिमर्शनम्	२०१
प्रसूतिकाभिमन्त्रणम्	२०१
बालाय स्तनदानम्	२०१
शिरःप्रदेशे जलपूर्णभाजनधारणम्	२०२
द्वारप्रदेशेऽग्नौ सर्षपप्रक्षेपः	२०२
बालोपद्रवशान्तिः	२०३
प्रसवागारे वह्न्यादिस्थापनम्	२०४
षष्ठरात्रिकृत्यम्	२०४

नामकरणम्

नामकरणकालः	२०५
मुख्यकालातिक्रमे तत्करणे विहितनक्षत्रादिः	२०६
नामधेयं द्व्यक्षरादि	२०६

निष्क्रमणम्

तत्र विहितकालः २०८
सूर्योदीक्षणम् २०९

अन्नप्राशनम्

विहितकालादि २१०
इतिकर्तव्यता २११
प्राशनप्रकारः २१२
काम्यं प्राशनम् २१२
जीविकापरीक्षणम् २१३

चूडाकरणम्

तत्र विहितवर्षादि २१४
क्षौरे दिगादिनियमः २१५
निषिद्धनक्षत्रादि २१५
बुधसोमयोः प्राशस्त्यम्, क्वचिन्निषिद्धकालेऽपि क्षौरे दोषाभावः २१६
निषिद्धकाले केशवादिस्मरणम् २१६
यथाकुलं शिखाधारणम् २१९
गोष्ठादौ लूनकेशप्रक्षेपः २१९

कर्णवेधः

तत्र विहितवर्षादि २२१
षट्कर्णदोषः २२२
कर्णवेधेतिकर्तव्यता २२२
कर्णवेधस्यावश्यकता २२३
अनुपनीतधर्माः २२४

उपनयनम्

विहितवर्षादि २२५
अत्र समुदायार्थः २२७
उपनेतृक्रमः २२८
उपनयने विहितायनादि २२८
संपूर्णकृष्णपक्षनिषेधः २२९
अत्र प्रकरणार्थः २२९

तिथीनां विधिनिषेधौ	२२६
एतत्प्रकरणार्थः	२३२
संक्रान्तिनिषेधः	२३२
अनध्यायाः	२३३
रक्तस्रावादावुपनयननिषेधः	२३५
एतत्प्रकरणार्थः	२३५
नक्षत्राणि	२३६
अत्र समुदायार्थः	२३७
विहितदिनादि	२३७
चन्द्रतारयोः शुद्धिः	२३८
विहिताविहितलग्नानि	२३८
अत्र संक्षेपः	२३६
उपनयनलग्नशुद्धिः	२३६
अत्र संक्षेपः	२४०
जन्मराशिशुद्धिः	२४०
अत्र संक्षेपः	२४१
उपनयनेतिकर्तव्यता	२४१
माणवकभोजनम्	२४१
मुण्डितालङ्कृतमाणवकोपनयनम्	२४२
गुर्वादिलक्षणम्	२४२
ब्रह्मचर्यमागामित्यादिवाचनम्	२४३
वासः परिधापनम्	२४३
मेखलाबन्धनम्	२४३
यज्ञोपवीतम्	२४५
अजिनमुत्तरीयम्	२४७
दण्डः	२४७
जलाञ्जलिपूरणम्	२४७
सूर्योदीक्षणम्	२४७
माणवकहृदयालम्भः	२४७
कोनामासीत्यादिप्रश्नः	२४८
भूतेभ्यः कुमारसमर्पणम्	२४८
कुमारोपवेशनम्	२४८
आज्याहुतयः	२४६

माणवकानुशासनम् २४६
सावित्रीदानम् २४६
गायत्रीव्याख्या २५१
समिदाधानम् २५२
पाणिना मुखमार्जनम् २५४
गात्रालम्भनम् २५४
व्यायुषकरणम् २५५
वैश्वानराद्यभिवादनम् २५५
अभिवादनप्रकारः २५५
भिक्षाचरणम् २५७
प्रणीताविमोकादयः २५६
प्रतिदिनं समिदाधानम् २५६
सन्ध्योपासनम् २५६
ब्रह्मचारिकर्तव्यानि २५६
ब्रह्मचर्यनियमः २६०
ब्रह्मचारिणो वस्त्राणि २६१
अजिनानि २६१
मेखलाः २६२
दण्डाः २६२
ब्रह्मचारिधर्माः २६३
त्रुटिते मेखलादौ २६४
यज्ञोपवीतं विना भोजनादौ कृते २६४
त्रिरात्रादिब्रह्मचर्यम् २६४
पुनरुपनयननिमित्तानि २६४
पुनरुपनयने विशेषः षण्डमूकादीनामुपनयने विशेषः २६५

वेदारम्भः

वेदभेदेनाहुतिविशेषाः २६७
वेदारम्भप्रकारः २६८

समावर्तनम्

तस्य कालः २६६
स्नातकाः २६६

समावर्तनेतिकर्तव्यता	२७०
समिदाधानाभिषेकौ	२७०
मेखलामोचनवस्त्रपरिधानादित्योपस्थानानि	२७२
दधितिलान्यतरप्राशनजटादिवापनदन्तधावनानि	२७३
उद्वर्तनस्नाननासिकाद्यालम्भनानि	२७४
पितृतर्पणानुलेपने	२७४
वस्त्रपरिधानम्	२७४
उत्तरीयवस्त्रम्	२७४
यज्ञोपवीतद्वयधारणम्	२७५
पुष्पग्रहणम्	२७५
माल्यपरिधानम्	२७५
उष्णीषम्	२७५
कुण्डले	२७५
अञ्जनम्	२७५
आदर्शः	२७६
छत्रम्	२७६
उपानहौ	२७६
वैणवदण्डः	२७६
ग्रन्थसमाप्तिः	२७७

संस्कारदीपकः

महामहोपाध्यायश्रीहर्षनाथशर्मविरचितः

आद्यां शारदचन्द्रकान्तिरुचिरामाह्लादयन्तीं जगत्
सर्वं सर्वपदार्थबोधचतुरां त्रैलोक्यधात्रीं सिताम् ।
सन्देहप्रकरान्धकारनिकरोत्सारप्रसारक्रियां
वाग्देवीं द्विजनायकाधिवसतिं ब्रह्मादिवन्द्यां स्तुमः ॥ १ ॥
राजत्खण्डवलाकुलार्णवसुधाभानुः सुधीमैथिलः
प्रोद्यल्लक्षविपक्षपक्षतिमिरव्रध्नो महेशोऽभवत् ।
शाकेऽब्दे नववाजिवेदधरणी (१४७९) संलक्षिते शोभने
सद्विद्याविभवेन येन मिथिलादेशः समग्रोऽर्जितः ॥ २ ॥
तत्कुलसरसीरुहदिवसेशश्चिरमनुपालितमिथिलादेशः ।
वितरणलज्जितकर्णनरेशो जगति रराज महेश्वरसिंहः ॥ ३ ॥
पुत्रस्तस्य समस्तशास्त्रनिलयो जेता रिपूणां सतां
गोप्ता दुर्ज्जनदण्डधारणपटुः कल्पद्रुमोऽभ्यर्थिनाम् ।
श्रीलक्ष्मीश्वरसिंहभूपतिरसौ विद्वत्कुलं मानयन्
ध्यायन् रामपदं समस्तजनतां संरञ्जयन् राजते ॥ ४ ॥
यत्प्रीतिपात्रं समुपैति लक्ष्मीर्यत्कोपपात्रान्निरपैति सद्यः ।
लक्ष्मीश्वरेत्येष ततः प्रसिद्धो न नामतः केवलमर्थतोऽपि ॥ ५ ॥
अज्ञानसन्ततितमिस्रविनाशनाय निस्संशयप्रचरणाय मुदे जनानाम् ।
श्रीहर्षनाथसुकृती नृपतेर्निदेशात् संस्कारदीपकममुं वितनोत्यमुष्य ॥ ६ ॥
श्रीहर्षनाथोक्तिरनुव्रता सतामाचारमानन्दयते न कं भुवि ।
निजं परं वापि हि सत्पथस्थिता निकाममाह्लादयते विलासिनी ॥ ७ ॥

तत्र [१]संस्कारेष्वादावश्यमनुष्ठेयतयाभ्युदयिकं तावद्विवेच्यते—तत्रादावश्यं [२]सगणाधिपमातरः पूज्याः।

मातृः सम्पूजयित्वा तु पितृभ्यः सुसमाहितः।
वृद्धिश्राद्धं ततः कुर्य्यात् सदाऽभ्युदयकारकम्॥

इति वचनात्। कौर्म्मेऽपि—

पुष्पैर्धूपैः सनैवेद्यैर्गन्धाद्यैर्भूषणैरपि।
पूजयित्वा मातृगणं कुर्याच्छ्राद्धत्रयं[३] बुधः॥

छन्दोगपरिशिष्टे—

कर्म्मादिषु च सर्वेषु मातरः सगणाधिपाः।
पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः॥

सर्वेषु श्राद्धवत्सु मातृः सम्पूजयित्वेत्यादौ सर्वत्राभ्युदयिकसहभावेनैवैतद्विधानात् [४]तदेकमूलकल्पनालाघवात्, "यत्र यत्र भवेच्छ्राद्धं तत्र तत्रैव मातरः" इति कात्यायनोक्तेश्च। तेन यत्राभ्युदयिकश्राद्धं न विहितं यथा निष्क्रमणान्नप्राशनयोस्तत्रैतदपि न भवति। सगणाधिपा इति। अत्र सर्वतः प्रागेव गणपतिपूजनं "सर्व्वकामसमृद्ध्यर्थमादौ पूज्यो विनायकः" इति लिङ्गपुराणात्। प्रयत्नेनेति। अनेन चावश्यकत्वं प्रदर्शितम्। अत एव शातातपः—

अकृत्वा मातृकायागं यः श्राद्धं परिवेषयेत्।
तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः॥ इति।

---

१. संस्कारो नाम शरीरनिष्ठातिशयाधायको व्यापारविशेषः। यद्यपि गौतमोक्तानां पाकयज्ञहविर्यज्ञसंस्काराणां न शरीरनिष्ठातिशयाधायकत्वं तेषामात्मनिष्ठातिशयाधायकत्वात्।

२. 'सगणाधिपा मातरः' इति क पु० पाठः। अत एव "महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः" इति मनुव्याख्याने कुल्लूकभट्टः—"तनुस्तन्त्रवच्छिन्न आत्मा क्रियते" इति व्याख्ययांबभूव। तथापि गर्भाधानादिस्मार्तानां ब्राह्मसंस्काराणामेवात्र निरूपयिष्यमाणत्वात्तेषामेव तथात्वं ज्ञेयम्। तथा च हारीतः—द्विविध एव संस्कारो भवति ब्राह्मो दैवश्च। गर्भाधानादिः स्मार्तो ब्राह्मः। ब्राह्मेण संस्कारेण ऋषीणां सलोकतां गच्छतीति।

३. मातृश्राद्धं पितृश्राद्धं मातामहश्राद्धञ्चेत्यर्थः।

४. आभ्युदयिकसहभावेन मातृपूजाविधौ द्वयोरेकमेव मूलं कल्पनीयम्। स्वतन्त्रविधौ ५ ग् मूलकल्पनमिति सम्भवत्येकमूलत्वे नानामूलकत्वकल्पनमन्याय्यमिति भावः।

"पूजयन्ति" पुत्रधनसमृद्ध्या वर्द्धयन्ति, अभ्युदयदानेन प्रीणयन्तीत्यर्थ इति गौडाः। अत्र गणपतिपूजनानन्तरमाचाराद्दुर्गापूजनम्। सर्वान्ते श्रीरपि पूज्या, "श्रियञ्च पूजयेत्पश्चात्ततः कर्म समाचरेत्" इति वचनात्। अत्र मातृः संपूजयित्वेत्यादि 'क्त्वा'श्रुतेर्मातृपूजनमाभ्युदयिकाङ्गं फलाश्रवणाच्च; तेनाभ्युदयिकसङ्कल्पानन्तरं मातृपूजनमित्याहुः, तदसत्, क्वाप्रत्ययस्याङ्गत्वा[1]नभिधायकत्वात्, 'पूजिताः पूजयन्ति ताः' इति कात्यायनेन सफलत्वबोधनाच्च। तस्मात्प्रधानमेवेदम्। कर्मादिष्वित्युक्तेर्नैमित्तिकञ्च। अत एवात्र ओं अद्यामुककर्मणि गणपतिदुर्गाश्रीसहिताः षोडशमातृरहं पूजयिष्य इति पृथक्संकल्पकरणसमाचारः। अत एव च दैवादाभ्युदयिकाकरणे एतन्मात्रकरणं न विरुद्धम्। मातरो गौर्य्यादयः। तथा च बह्वृचगृह्यपरिशिष्टम्—

गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो[2] लोकमातरः॥
हृष्टिः पुष्टिस्तथा तुष्टिस्तथात्मकुलदेवताः।
गणेशेनाधिकास्त्वेता वृद्धौ पूज्याश्च षोडश॥

यत्त्वत्र पूज्याश्चतुर्दशेत्येव पाठः। मातरो लोकमातर इति च सर्वविशेषणं न तु देवतान्तरन्तेन चतुर्दशत्वमित्याहुः। यच्च वदन्ति मातर इति सर्वासां विशेषणमत एव एतत्पाद्यं गौर्य्यै मात्रे नम इति प्रयोगः। एता मातरो लोकमातरो ज्ञेयाः। अत एव एतयोर्बहुत्वेन निर्देश इति तदुभयमप्यनादेयम्, सम्प्रदायविरोधात्, कल्पतरुप्रभृतिसकलप्रामाणिकनिबन्धविरोधाच्च, गौर्य्यै मात्रे इतिवद् गौर्य्यै लोकमात्रे इति प्रयोगप्रसङ्गाच्च। बहुवचनं तु ब्रह्माणयादीनां देवमातृणां लोकमातृणाञ्च मिलितानां देवतात्वपरत्वेनोपपन्नमिति दिक्। कात्यायनः—

प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु।
अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः॥

---

१. दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यत्र सत्यपि क्त्वाप्रत्यये न दर्शपूर्णमासयोः सोमाङ्गत्वं तयोः स्वतन्त्रफलत्वादित्युक्तं चतुर्थे। (४-३-१६)

२. "ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा। वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः" इत्यपरार्के उक्ताः।

"शुभ्रासु" शुक्लासु रजतस्फटिकादिमयीषु प्रतिष्ठिता इति शेषः। पक्षान्तरमाह— लिखिता वेति। पटादिषु लिखिता वर्णिकाभिश्चित्रिताः। आदिपदाद्भित्त्यादि-परिग्रहः। अक्षतपुञ्जेषु आवाहिता इति शेषः। "नैवेद्यैश्च पृथग्विधैः" अत्र पूर्व-वाक्यस्थं 'पूजनीया' इति सम्बद्ध्यते। चकारादुपचारान्तरपरिग्रहः। अत्र च भूमा-वप्सु तथाग्नौ चेत्यादुक्तसामान्याधारव्यावृत्तिः, विशेषोपादानात्[1]। दूर्वासहितगोमय-निर्मितरक्षिकादौ च पूजनमाचारादेव। एवञ्च "मनोजूतिः" इति मन्त्रेण प्रत्येकं प्राणप्रतिष्ठां विधाय ओंकारादिनमोऽन्तेन चतुर्थ्यन्तस्वस्वनाम्ना गन्धादिभिरभ्यर्च्च-नीयाः। केचिदत्र—

बलिहीने तु दुर्भिक्षं गन्धहीने त्वयोग्यता।
धूपहीने तथोद्वेगो वस्त्रहीने धनक्षयः॥

इति भविष्यपुराणाद्वस्त्रदानमपि नियतमाहुः। इत्थं पूजां विधाय भित्तिलग्ना नातिनीचा न चोच्छ्रिताः सप्त पञ्च वोत्तरोत्तरक्रमेण घृतेन धाराः कुर्यात्—

कुड्यलग्नां वसोर्धारां सप्तवारान् घृतेन तु।
कारयेत्पञ्चवारान् वा नातिनीचां न चोच्छ्रिताम्॥

इति कात्यायनवचनात्। कारयेदिति स्वार्थे णिच्। अत्र सवृन्तकदलीफलेन फलान्तरेण वा धाराप्रतीक्षणं संस्करणीयमात्रे तत्फलसमर्पणञ्चेति समाचारः। वारत्रयं धाराकरणमिति रूपनारायणादयः, तत्राचार एव शरणम्। यद्यपि धाराणां प्रादक्षिण्यं शास्त्रार्थो दैवत्वात्, तथापि प्रत्यामदानमाचारादिति केचित्। आशादित्येन तु धाराणा-मुत्तरोत्तरत्वे "प्राञ्च्युदञ्चि च कर्म्माणि सन्तिष्ठेरन्" इति श्रुतिरेव मूलत्वेनोपन्यस्ता। दक्षिणाद्युत्तरापवर्गं पश्चिमादिप्रागपवर्गं वा धाराः पातयेदिति दानोद्योतलिखन-मपि तदभिप्रायकमेवेति द्रष्टव्यम्। सा च धारा माध्यन्दिनीयैर्वसोः पवित्रमिति मन्त्रेण कर्त्तव्या, तस्य वसुप्रकाशकत्वात्। मन्त्रस्य च सकृदेव पाठो न त्वावृत्तिः, बीजाभावात्। वाचस्पतिमिश्रादयोऽप्येवम्। यद्यप्येकजातीयत्वेऽपि धाराकर्मणां

---

१. यदाहवनीये जुहोतीत्यत्र होमसामान्ये श्रुतोऽप्याहवनीयः पदे जुहोतीत्यनेन होमविशेषे पदविशेषोपादानाद्बाध्यते तद्वदित्यर्थः।

भेदात् सर्वत्र मन्त्रान्वयो युक्तः, मन्त्रान्तैः[१] कर्म्मादिः सान्निपात्य इति कात्यायन-सूत्रात्, तथापि गोशतादौ संख्याविशेषस्य देयतावच्छेदकत्ववदिहापि सप्तत्वादेरवच्छेद-कत्वात् सप्तत्वाद्यवच्छिन्नधारादानमेकमेव कर्मेति[२] सकृदेव पाठो मन्त्रस्य। तथा च परिभाषाध्याये कात्यायनः—"एकद्रव्ये[३] कर्मावृत्तौ सकृन्मन्त्रवचनं कृतार्थत्वात्" इति क्रियादौ मन्त्रवचनमुक्तम्, क्रिया च साभ्यासा एकैवेति न पुनर्वचनं सकृत्कृते कृतश्शास्त्रार्थ इति न्यायादिति तदर्थ इति दिक्। चेदिराजो वसुरत्रोद्देश्य इति बहवः, अग्निरित्येके। इत्थं धाराकरणानन्तरमायुर्वृद्धिकरसूक्तानि जप्त्वाभ्युदयिकश्राद्धमारभेत। तथा च कात्यायनः—

आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः।
षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत्॥

आयुष्याणि आयुषे हितानि, आयुष्यं वर्च्चस्यमित्यादीनि सूक्तानि। शान्त्यर्थम् अमङ्गलनिवृत्त्यर्थम्। अत एव नैतज्जपस्य श्राद्धाङ्गत्वम्, फलश्रुत्या प्रधान-त्वावगमात्। षड्भ्य इति मात्रादीनामप्युपलक्षणम्। तथा च शातातपः—

मातॄणां प्रथमं श्राद्धं पितॄणां तदनन्तरम्।
ततो मातामहानाञ्च वृद्धौ श्राद्धत्रयं भवेत्॥

मत्स्यपुराणम्—

उत्सवानन्दसन्ताने यज्ञोद्वाहादिमङ्गले।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम्॥
ततो मातामहानाञ्च विश्वेदेवास्तथैव च॥

---

१. अनुष्ठेयार्थस्मरणार्थत्वेन विनियुक्तानां मन्त्राणामनुष्ठानकाले प्रयुज्यमानानामन्तैः सह कर्मणामादिः संबन्धनीयः। मन्त्रमुच्चार्य तत्समाप्तिक्षण एव क्रियानुष्ठेयेत्यर्थः।

२. एकविधिगम्य एकः पदार्थः। विधिश्च सप्तसंख्याविशिष्टां धारां विदधातीति धारासप्तकमेकः पदार्थः। एका धारा तु तदंशः, न तु पूर्णः पदार्थः। पदार्थानुष्ठानार्थं मन्त्रः प्रयुज्यते, न तु पदार्थांशानुष्ठानार्थम्, अतः सकृदेव मन्त्रपाठो युक्त इति भावः।

३. "प्रतिप्रधानं गुण आवर्तनीयः" इति न्यायेन यत्र एकोद्देशेन क्रियाया आवृत्तिर्विहिता, यथैकं कुड्यरूपं द्रव्यमुद्दिश्य वारसप्तकं धारा विहिता, तत्र सकृदेव मन्त्रवचनम्। कुतः? कृतत्वात्। मन्त्रस्य हि कार्यमनुष्ठेयक्रियाप्रकाशनरूपम्, तच्च सकृन्मन्त्रोच्चारणेनापि कृतं भवति। अतश्च क्रियाभ्यावृत्तावपि न मन्त्रावृत्तिरित्यर्थः।

उत्सवानन्दहेतौ सन्ताने सत्पुत्रोत्पत्ताविति यावत्। 'आदि'पदेन ऋष्यन्तरोक्त-मङ्गलपरिग्रहः। ततो मातामहानां पूजेत्यन्वयः। विश्वेदेवैः सह [1]पाठिकक्रमो नादेयः।

तेषामारक्तभूतं तु पूर्वं दैवं निवेदयेत्।
रक्तांसि हि विलुम्पन्ति श्राद्धमारक्तवर्जितम्॥

इति मनुवचनात्। वायुपुराणम्—

अन्वष्टकासु वृद्धौ च गयायाञ्च क्षयाहनि।
मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह॥

अत्र गौडाः—षड्भ्य इति वचनं छन्दोगविषयम्। मातॄणां प्रथमं श्राद्धमित्यादिवचनानि छन्दोगेतरविषयाणीत्याहुस्तन्न, उभयत्र सङ्कोचापत्तेः, विभिन्नमूलकल्पनागौरवात्, सम्प्रदायविरोधाच्च, कल्पतरुकारादिविरोधाच्च। "न योषिद्भ्यः पृथग्दद्याद-वसानदिनादृतः" इति परिशिष्टवचनंत्वाद्यश्राद्धादिबाधापत्तिभिया विशेषविहितातिरिक्तविषयत्वेनावश्यं सङ्कोचनीयमिति नास्मन्मते प्रतिकूलमिति दिक्। अत्र श्राद्धत्रयेऽपि विश्वेदेवसम्बन्धः, अविशेषात्। "मातृश्राद्धन्तु युग्मैः स्यात्सदैवं प्राङ्मुखैः सह" इति लघुहारीतवचनाच्च। "विश्वेदेवविहीनं तु केचिदिच्छन्ति सत्तमा." इति मार्कण्डेयपुराणीयो मातृश्राद्धे देवश्राद्धनिषेधस्तु शाखान्तरविषयः, अत एव केचिदित्युक्तम्। कात्यायनः—"वशिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः", वशिष्ठेन पार्व्वणे यो विधिरुक्तः सोऽत्रामिषव्युदासेन बोद्धव्य इत्यर्थः। अत एव नात्र मधुदानमामिषत्वात्। अत एव श्रीदत्तादिभिर्नात्रामिषप्रयोग इति सिद्धवल्लिखितम्। प्रयोगे च मधुदानं न प्रदर्शितम्। रुद्रधरश्राद्धविवेकीयप्रयोगेऽपि मधुदानं न लिखितम्। यत्तु—पिण्डांस्तु दधिमध्वक्तान् बदराणि यवांस्तथा" इति ब्रह्मपुराणीयवचनेन पिण्डे मधुदानविधानात् पिण्डस्य च सर्वस्मात् प्रकृतादन्नादुद्धृत्येत्यनेन श्राद्धविहितद्रव्यशेषकर्त्तव्यताभिधानात्। श्राद्धेऽपि तद्द्रव्यमायाति [2]फलचमसन्यायादिति मध्वत्र देयमेवेति

---

१. समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजतीत्यत्र पञ्चानां प्रयाजानां पाठक्रमेण क्रमस्तथात्र यथापाठं विश्वेदेवा नान्ते पूज्याः, किन्तु श्रौतेन प्रबलेन क्रमेण पूर्वं पूज्या इति भावः।

२. अयमत्र फलचमसन्यायः—ज्योतिष्टोमे श्रूयते—"यदि राजन्यं वैश्यं वा याजयेत्। स यदि सोमं विभक्षयिषेत् न्यग्रोधस्तिमिनीराहृत्य ताः संपिष्य दधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत्,

श्राद्धप्रदीपश्राद्धतत्त्वादिलिखनं तदयुक्तं वैषम्यात्। दृष्टान्ते हि राजन्यकर्तृक-ज्योतिष्टोमयागे फलचमसमस्मै भक्ष्यं ददातीति श्रुत्या ऋत्विग्भक्ष्यत्वेन दधिमिश्रित-वटप्ररोहचूर्णरूपस्य फलचमसस्य विधानादृत्विग्भक्ष्यस्य च परिशेषात् प्रतिपत्ति-रूपतया होमीयद्रव्यशेषत्वात् फलचमसस्य होमीयद्रव्यत्वमायाति। अत्र तु पिण्डस्थ-श्राद्धशेषान्नकर्त्तव्यतया श्राद्धस्य पिण्डद्रव्यसजातीयद्रव्यकत्वं तद्वत् सिद्ध्यतु, न तु पिण्डविशेषणीभूतमधुद्रव्यकत्वमपि। अन्यथा बदरादीनामपि श्राद्धेऽवश्यदेयतापत्ति-रिति। यदपि "मधुमन्त्रविवर्जितः" इति कात्यायनेनात्र मधुमन्त्रनिषेधान्मधुदानं सिद्ध्यति, अन्यथा प्रधानस्य मधुनो निवृत्तौ गुणस्य मधुप्रकाशकमन्त्रस्यार्थत एव निवृत्तेस्तन्निषेधवैयर्थ्यमिति, तदप्यकिञ्चित्करम्, मधुनो निवृत्तौ मधुमन्त्रपाठस्य त्रिरभ्यस्तमधुमन्त्रपाठस्य च सर्व्वथाऽभावे प्रसक्ते वचनस्य तदुभयपाठव्यवस्था-पनार्थत्वात्। इत्थं हि तद्वचनम्—

मधु मध्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम्।
गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्ज्जितः॥

तत्र प्रकृतौ पार्वणेऽशितुमिच्छतां भोक्तुमिच्छतां ब्राह्मणानां श्राव्यत्वेन अन्नोत्सर्गानन्तरं भोजनपूर्वकाले 'गायत्र्यनन्तरम्' गायत्रीजपानन्तरं यो मधुशब्दस्य त्रिरभ्यस्तो जपो मधुमन्त्रसहितः क्रियते सोऽत्र विकृतावाभ्युदयिके मधुवातेति मन्त्र-वर्ज्जितः कार्य्य इत्यर्थः। तथा च नेदानीं मधुमतीपाठः, अन्यदा तु तत्पाठ एवेति परिशिष्टप्रकाशादयः। एवं चान्यत्र मधुमतीपाठो गायत्र्यनन्तरं मधुमन्त्ररहितस्त्रिरभ्यस्त-मधुशब्दजपश्च कार्य्य इति व्यवस्था सिद्धा। समस्त एवाभ्युदयिके मधुमन्त्रनिषेधोऽय-मिति मतेऽपि नैतद्वचनवैयर्थ्यम्, त्रिरभ्यस्तमधुशब्दपाठविधानार्थत्वात्, प्राप्त-भागस्य मधुमन्त्रवर्ज्जनस्य च तदुपकारकत्वेनोपदेशात्, भूतभव्यसमाहारे "भूतं भव्यायोपदिश्यते" इति न्यायात्, मधुनो निवृत्तौ मधुमन्त्रस्य त्रिरभ्यस्तमधुशब्दस्य पाठाभावे प्रसक्तेऽनेन त्रिरभ्यस्तमधुशब्दपाठाभ्यनुज्ञानेन प्रधाननिवृत्तौ गुणनिवृत्ति-रिति न्यायबाधेन साहचर्य्येण च प्रसक्तमधुमन्त्रनिवृत्त्यर्थत्वाच्चेति दिक्।

न सोमम्" इति। स्तिमिन्यो मुकुलानि। तत्र उपक्रमोपसंहारयोर्भक्षविषयत्वाद्भक्षमात्रे सोमः पिष्टेन विक्रियत इति चेत्, मैवम्, इष्टद्रव्यसंस्कारो हि भक्षः। स च यागमन्तरेणानुपपन्नः। तस्मात् यागेऽपि विकारः।

अत्रेदं बोध्यम्, समस्त एवाभ्युदयिके मधुमन्त्रपाठो नेति वदतां प्रदीपकृतामयमाशयः—त्रिरभ्यस्तमधुशब्दपाठो गायत्र्यनन्तरं पार्वणे मधुमन्त्रपाठसाहित्येन यः क्रियते सोऽत्राभ्युदयिके तद्राहित्येन कार्य्य इति मधु मध्विति यस्तत्रेति वचनार्थः[१]। यदि कुत्राप्याभ्युदयिके मधुमन्त्रपाठः स्यात्तदा तत्र तत्साहित्याभावो दुर्वच इति सर्वथा तदभाव एव वाक्यार्थ इति। अत एव पितृभक्तौ नात्र मधुवातापाठ इति सामान्यत एवोक्तम्, प्रयोगे च तदुल्लेखो न कृतः। रुद्रधरीयश्राद्धविवेकेऽप्येवम्।

अत्रेयं मतव्यवस्था—आभ्युदयिके मधुप्रयोगो न भवतीति श्रीदत्तोपाध्यायरुद्रधरोपाध्यायवाचस्पतिमिश्रादयः, भवत्येवेति वर्द्धमानोपाध्यायरघुनन्दनादयः। अन्नोत्सर्गानन्तरं यो गायत्रीजपस्तदनन्तरं मधुमन्त्ररहितस्त्रिरभ्यस्तमधुशब्दजपः कार्यः, अन्यत्र तु मधुमन्त्रोऽपि पठनीय एवेति प्रकाशकारादयः। अन्नाभिमन्त्रण एव मधुमन्त्रपाठो नान्यत्रेत्यन्ये। त्रिरभ्यस्तमधुशब्दपाठोप्यन्नोत्सर्गानन्तरं गायत्रीजपानन्तरमेव नान्यत्र, मधुमन्त्रपाठस्तु न कुत्रापीत्यपरे। आभ्युदयिके कुत्रापि मधुमन्त्रो न पाठ्यः, त्रिरभ्यस्तमधुशब्दपाठस्तु निर्बाध एवेति श्रीदत्तोपाध्यायवर्द्धमानोपाध्यायादयः।

अत्र च श्रीदत्तोपाध्यायोक्तव्यवस्था ज्यायसी, सद्युक्तिकत्वात् सम्प्रदायानुगृहीतत्वाच्चेत्यस्माकं प्रतिभातीति। कात्यायनः—

अतः परं प्रवक्ष्यामि विशेष इह यो भवेत्।
प्रातरामन्त्रितान् विप्रान् युग्मानुभयतः स्थितान्।
उपवेश्य कुशान् दद्यादजुनैव हि पाणिना॥

प्रातरिति पूर्व्वदिननिमन्त्रणनिरासार्थम्, युग्मानित्ययुग्मव्यावृत्त्यर्थम्, तथा च चतुर्विंशतिरत्र श्राद्धिन इति मुख्यः कल्पः। तथा—

निपातो नहि सव्यस्य जानुनो विद्यते क्वचित्।
सदा परिचरेद् भक्त्या पितॄनप्यत्र देववत्॥

सव्यस्य वामस्य, देववद् दक्षिणजानुपातेन। तथा—

नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते।
पात्राणां पूरणादीनि दैवेनैव हि कारयेत्॥

---

१. गायत्र्यनन्तरमित्येतदुद्देश्यपदलप्रविष्टं न तु विधेयदलान्तर्गतमिति भावः।

पित्र्यतीर्थं तर्ज्जन्यङ्गुष्ठयोर्मध्यरूपम्, दैवेन अङ्गुल्यग्ररूपदेवतीर्थेन। केचिदत्र भूस्वाम्यन्नदानेऽपि दैवविधिमिच्छन्ति, तन्न, तस्याभ्युदयिकबहिर्भूतत्वेन दैवविधौ प्रमाणाभावात्। तस्मात् पित्र्यविधिनैव तत्कर्त्तव्यम्, आभ्युदयिकबहिर्भावादेव तत्रामिष-प्रयोगोऽपि न निषिद्धः। तथा—

ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्रपवित्रकान्।
कृत्वार्घ्यं सम्प्रदातव्यन्नैकैकस्यात्र दीयते॥

ज्येष्ठोत्तरकरान् पूर्वोपवेशितो ज्येष्ठस्तदुत्तरकरान् तत्प्रधानकरान् ज्येष्ठस्योत्तरे उपरिकरो येषां तादृशानिति वा, युग्मब्राह्मणपक्षे यो यदपेक्षया पश्चादुपवेशितस्तद्दक्षि-णकरोपरि पूर्वोपवेशितदक्षिणकरो यथा भवति तथाऽवस्थितानिति यावत्। कराग्राग्र-पवित्रकान् कराग्रेऽग्रं यस्य तथाभूतं पवित्रं येषां तादृशान्। कराग्रेऽग्रपवित्रिकं पवित्राग्रं येषामिति गौडीयव्याख्यानं तु न युक्तम्; अग्रपदस्य परनिपातापत्तेः। आर्षत्वानु-सरणं तु सत्यां गतावयुक्तम्। नैकैकस्येति। तथा च युग्मब्राह्मणपक्षे मिलितहस्त एवार्घ्यं देयम्। तथा—

मधु मध्विति यस्तत्र त्रिर्ज्जपोऽशितुमिच्छताम्।
गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्जितः॥

व्याख्यातमेतत्।

तथा—

न चाश्नत्सु जपेदत्र कदाचित्पितृसंहिताम्।
अन्य एव जपः कार्य्यः सोमसामादिकः शुभः॥
यस्तत्र प्रकरोऽन्नस्य तिलवद्यवत्तथा।
उच्छिष्टसन्निधौ सोऽत्र कर्त्तव्यो विपरीतकः॥

पितृसंहितामिति पितृमहत्त्वप्रकाशकमन्त्रमात्रोपलक्षणम्। तथा च पारस्करः— "पित्र्यमन्त्रवर्ज्जञ्जपः" इति। पित्र्यमन्त्र "उदीरतामवर" इत्यादिस्तं वर्ज्जयित्वा-ऽन्येषां पवित्राणां जपः कार्य्य इत्यर्थः। सोमसामेति छन्दोगपरम्, वाजसनेयिभिस्तु पुरुषसूक्तादीनि पवित्राणि जप्यानि। यस्तत्रेति तत्र पार्वणे तृप्तेषु ब्राह्मणेष्वन्नस्य प्रकरो विकरणं तिलवत्, तिलयुक्तं यथा स्यात्तथोक्तम्। अत्र तु यवयुक्तं यथास्यात्तथा विपरीतकः तृप्तेः प्रागेव कार्य्य इत्यर्थ इति नव्याः। विपरीतको देवतीर्थेनेति प्राज्ञः। तथा—

सम्पन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते।
सुसम्पन्नमिति प्रोक्ते शेषमन्नं निवेदयेत्॥

पार्वणे तृप्ताः स्थेति यः प्रश्नस्तत्स्थाने इह सम्पन्नमिति प्रश्नः कार्य्यः। प्रोक्ते ब्राह्मणैः कथिते। तथा—

प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत्।
अपः क्षिपेन्मूलदेशेऽवनेनिक्तवेति निस्तिलाः॥
द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः।
मातामहप्रभृतींस्तु तेषामेव हि वामतः॥
सर्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च।
संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्तथा॥
अवनेजनवत्पिण्डान् दत्त्वा विल्वप्रमाणकान्।
तत्पात्रक्षालनेनाथ पुनरप्यवने जपेत्॥

आद्यं पितरम्, मूलदेशे दर्भस्येति शेषः। द्वितीयं पितामहम्, तृतीयं प्रपितामहम्। मध्यदेशाग्रदेशयोः दर्भस्य। वामत उत्तरतः। एतेन पित्रादिदक्षिणे मातामहादिपिण्डा देया इत्यपास्तम्। न च प्रत्यङ्मुखोपविष्टानां पितॄणां तद्ब्राह्मणानां वा वामत इत्येव वचनार्थस्तेन प्रादक्षिण्यलाभ इति वाच्यम्, तेषां प्रत्यङ्मुखत्वे मानाभावात्। प्राङ्मुखेभ्य उदङ्मुखो दद्यादुदङ्मुखेभ्यः प्राङ्मुखो वेत्येव श्रुतेः। एवञ्च मात्रादिपिण्डापेक्षया पित्रादिपिण्डानामपि प्रवामतैव, एकत्र निर्णीतत्वात्। पितृभक्तिकृत्यप्रदीपादयोऽप्येवम्। कर्कन्धूर्बदरम्। पारस्करगृह्यम्—आभ्युदयिके प्रदक्षिणमुपचारः पूर्वाह्णः कालः पित्र्यमन्त्रवर्ज्जञ्जप ऋजवो दर्भा यवैस्तिलार्थैः सम्पन्नमिति तृप्तिप्रश्नो दधिवदराक्षतमिश्राः पिण्डा नान्दीमुखान् पितॄनावाहयिष्य इति पृच्छति; नान्दीमुखाः पितरः प्रीयन्तामित्यक्षय्यस्थाने नान्दीमुखान् पितॄन् वाचयिष्य इति पृच्छति; नान्दीमुखाः पितरः पितामहाः प्रपितामहा मातामहाः प्रमातामहा वृद्धप्रमातामहाः प्रीयन्तामिति। न स्वधां प्रयुञ्जीत युग्मानाशयेत्तत्र। अत्र प्रकृत्युक्तस्य तिलादेर्विकृत्युक्तेन यवादिना बाधः शरमयं बर्हिर्भवतीति विकृत्युक्तेन शरेण प्रकृत्युक्तानां बर्हिषां बाधवत्। अत्र न स्वधां प्रयुञ्जीतेति स्वधाशब्दप्रयोगनिषेधात् स्वाहाशब्दो नमश्शब्दो वा प्रयोज्यः, त्यागार्थकशब्दप्रयोगस्यावश्यकत्वादिति निबन्धारः। तत्स्थाने "तुभ्यं वृद्धिः" इति पदप्रयोगे तु शिष्टाचार एव शरणमिति

वदन्ति। स्मृतिसारकृतस्तु वृद्धिरिति पदमुच्चार्य्य सर्वमासनादिकं देयमित्यर्थकं सर्वं वै वृद्धिरिति गृह्यवाक्यमेवात्र प्रमाणत्वेन लिखितवन्तः। आश्वलायनः- आभ्युदयिके युग्मा ब्राह्मणाः समूला दर्भाः प्राङ्मुखेभ्य उदङ्मुखो दद्यादुदङ्मुखेभ्यः प्राङ्मुखो वा द्वौ दर्भौ पवित्रे पवित्राणि चत्वारि "शन्नो देवी" इत्यनुमन्त्रितास्वप्सु यवानावपति "यवोऽसि सोमदेवत्यो गोसवो देवनिर्म्मितः। प्रत्नमद्भिः पृक्तः पुष्टथा नान्दीमुखान् पितॄन् लोकान् प्रीणाहि नः स्वाहा" इति नान्दीमुखाः पितरः प्रीयन्तामित्यपां ग्रहणं विसर्ज्जनञ्च। अत्र समूला इति विशेषविधानादत्र पिण्डास्तरणेऽपि समूला एव। एतत्कारिकापि—

तिलोऽसीति पदस्थाने यवोऽसीति पदं वदेत्।
स्वधयेति पदस्थाने पुष्टयाशब्दं वदेदिह।
पितॄनिति पदात् पूर्वं वदेन्नान्दीमुखानिति॥

अत्र "पितॄनिति पदस्थाने पठेन्नान्दीमुखानिति" इति प्राचां सम्मतः पाठः।

ब्रह्मपुराणे—

शाल्यन्नं दधिमध्वक्तं बदराणि यवांस्तथा।
मिश्रीकृत्य तु चत्वारि पिण्डान् श्रीफलसन्निभान्॥
दद्यान्नान्दीमुखेभ्यस्तु पितृभ्यो विधिपूर्वकम्।
अर्घं पुष्पञ्च धूपञ्च प्रशस्तमनुलेपनम्॥
वासश्चाप्यहतं तत्र देयञ्च सदृशं सम्म्।
द्राक्षामलकमूलानि यवांश्च विनिवेदयेत्॥
तान्येव दक्षिणाञ्चैव दद्याद्विप्रेषु सर्वदा।

दधिमधुनोर्म्मिलितयोरुपादानं तेन चतुष्ट्वसिद्धिः। विष्णुपुराणे—

दध्यन्नतैः सबदरैः प्राङ्मुखोदङ्मुखोऽपि वा।
देवतीर्थेन वै पिण्डं दद्यात् कायेन वा पुनः॥

कायेन कनिष्ठामूलरूपेण प्राजापत्यतीर्थेन।

अत्र यद्यप्येतद्वचने प्राङ्मुखोदङ्मुखोऽपि वेत्यभिधानात् प्राङ्मुखेभ्य उदङ्मुखो दद्यादुदङ्मुखेभ्यः प्राङ्मुखो वेत्याश्वलायनोक्तेश्च कर्त्तुः प्राङ्मुखत्वमुदङ्मुखत्वं वेत्येव प्रतीयते, पितृभक्त्यादिसकलप्रामाणिकनिबन्धलिखनमपि तथैव, तथापि प्राङ्मुखोपविष्टानां पितॄणां तद्ब्राह्मणानां वा साम्मुख्यानुरोधात् "पश्चिमाभिमुखो भूत्वा श्राद्धं माङ्गलिकं चरेत्" इति वचनाच्च पश्चिमाभिमुखैरेवैतत्क्रियते। छन्दोगपरिशिष्टम्-

युग्मानेव स्वस्तिवाच्य अङ्गुष्ठग्रहणं तथा।
कृत्वा धुर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः॥

स्वस्तिवाचनानन्तरं पितृपात्रोपवेशितस्य विप्रस्याङ्गुष्ठग्रहणं कृत्वा उत्थाप्य प्रणम्य तमनुव्रजेदित्यर्थः।

अत्र मात्रादीनां नवानामपि नान्दीमुखत्वविशिष्टानां देवतात्वम्, "दद्यान्नान्दीमुखेभ्यस्तु पितृभ्यो विधिपूर्वकम्" इत्यादिवचनात्तेन सर्वत्र त्यागवाक्ये नान्दीमुखपदप्रयोगः कार्य्यः। आवाहनादौ तु विशेषोपदेशादेव तत्प्रयोगः। यत्तु मन्त्रेऽपि नान्दीमुखपदप्रयोग इति केषाञ्चिन्मतं तत्तुच्छम्, मानाभावात्; विशेषोपदेशमन्तरेण मन्त्रत्वप्रयोजकानुपूर्वीविशेषभङ्गस्य कर्त्तुमयोग्यत्वाच्च। अत्र यद्यपि नान्दीमुखाः पितरः प्रीयन्तामिति पारस्करगृह्यादिदर्शनात् पितृपदात् पूर्वन्नान्दीमुखपदप्रयोग इति प्रतीयते; तथापि विशेषोपदेश एवायं नियमो यथा नान्दीमुखाः पितरः प्रीयन्तामित्यादौ, न तु विशेषानुपदिष्टलौकिकत्यागवाक्येऽपि, शिष्टाचारविरोधादिति दिक्। यत्तु—

नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्।
वाक्यमुच्चारयेद्धीमानन्यत्र पितृपूर्वकम्॥

इति कात्यायनवचनं तत्र नान्दीमुख इति विवाहविशेषणम्, पुत्रादिसमृद्धीनामादिकारणरूप इति तदर्थः। नान्दीसमृद्धिरिति कथ्यत इति ब्रह्मपुराणात्। चकारस्त्वर्थः, पूर्वोक्तकर्म्मसमुच्चायको वेति निबन्धारः, एतेनैतद्वचनबलादाभ्युदयिके प्रपितामहपूर्वकं वाक्यमिति केषाञ्चिन्मतमपास्तम्। "प्राग्ग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत्। अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निस्तलाः॥ द्वितीयञ्च तृतीयञ्च" इति पूर्वलिखितपरिशिष्टविरोधाच्च। "नान्दीमुखाः पितरः पितामहाः" इति पारस्करविसंवादाच्चेत्यलं पल्लवेन।

ब्रह्मपुराणम्—

पिता पितामहश्चैव तथैव प्रपितामहः।
त्रयो ह्यश्रुमुखाश्चैते पितरः परिकीर्त्तिताः॥
एभ्यः पूर्वतरा ये च प्रजावन्तः सुखोषिताः।
ते तु नान्दीमुखा नान्दीसमृद्धिरिति कथ्यते॥

अत्र पित्रादित्रयपरभूतपुरुषाणां नान्दीमुखत्वाभिधानं शाखान्तरविषयम्, जीवत्पित्रादित्रिकविषयं वा। अत एव "नान्दीमुखाः पितरः पितामहाः प्रपितामहाः" इति

पारस्करेण न विरोधः। पितृभक्तयादयोऽप्येवम्। एवञ्च यत्र पित्रादयो मृतास्तत्र तेषामेव नान्दीमुखत्वविशिष्टानां श्राद्धम्। यत्र तु त्रयो जीवन्ति तत्र ततः परभूतानां त्रयाणामिति व्यवस्था सिद्धा। यत्तु पितरि पितामहे प्रपितामहे च जीवति नैव कुर्य्यादिति विष्णुवचनं[1] तदतिरिक्तविषयम्। श्राद्धकल्पकृतोऽप्येवम्—नान्दीमुख-श्राद्धन्तु परेभ्यस्त्रिभ्यो भवत्येव। तथा च पृथ्वीचन्द्रोदये मनुः—

"दद्यात्त्रिभ्यः परेभ्यस्तु जीवेच्चेत् त्रितयं यदि" इति।

अत एव पितृभक्तावाभ्युदयिकप्रकरणे—यत्र तु पित्रादयस्त्रयो जीवन्ति तत्र परेषां त्रयाणां नान्दीमुखानां श्राद्धमिति लिखितम्। कल्पतरुकारादयोऽप्येवम्—एवं जीवित्पितृकेण सुतसंस्कारादावाभ्युदयिकं पितामहादितः कार्य्यम्, "म्रियमाणे तु पितरि पूर्व्वेषामेव निर्व्वपेत्" इति मनुस्मरणात्, "पितुः पितृभ्यो वा दद्यात्सपितेत्यपरा श्रुतिः" इति कात्यायनोक्तेश्च। म्रियमाणे जीवति, सपिता विद्यमान-पितृकः। यत्तु—

सपितुः पितृकृत्येषु अधिकारो न विद्यते।
न जीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतेः॥

इति छन्दोगपरिशिष्टवचनं तदाभ्युदयिकातिरिक्तविषयम्। एवञ्च यो यो जीवति तं तं परित्यज्य परं परं पुरुषमन्तर्भाव्य त्रिकं पूरयित्वाभ्युदयिकं कार्यम्। तथा च कात्यायनः—"जीवन्तमतिदद्याद्वा प्रेतायान्नोदके द्विजः"। अति अतिक्रम्य। श्राद्ध-कल्पादयोऽप्येवम्। एवं मातामहादित्रिकेऽपि बोद्धव्यम्,

"मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः" इति विष्णूक्तेः।

एवमिति जीवन्तं त्यक्त्वेत्यर्थः। एवं मात्रादित्रिकेऽपि, एकत्र निर्णीतत्वात्; शिष्टाचाराच्च। मातरि जीवन्त्यां मात्रादित्रिकनिवृत्तिरेवेत्यपरे। यत्तु जीवत्पित्रा पितामहप्रपितामहाभ्यां द्वाभ्यामेव श्राद्धङ्कार्य्यं न तु वृद्धप्रपितामहमन्तर्भाव्य त्रिकपूरणमिति केषाञ्चिन्मतम्, तदसत्—

सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते।
तत्र तत्र त्रयं कुर्य्याद्वर्ज्जयित्वा मृताहनि॥

इति शङ्खविरोधात्। हेमाद्रौ विष्णुरपि—पितरि जीवति यः श्राद्धं कुर्य्याद्येषां

---

१. नान्दीश्राद्धातिरिक्तविषयमित्यर्थः।

पिता कुर्य्यात्तेषां कुर्य्यात्, पितरि पितामहे च जीवति येषां पितामह इति। न च येषां पिता कुर्य्यात्तेषां कुर्य्यादित्युक्त्या मातामहादयोऽपि पितुरेव स्युरिति वाच्यम्, एतस्य पितृपक्षाभिप्रायकत्वात्; मातामहानामप्येवमिति वक्ष्यमाणत्वात्; पितृमातामहादीनां स्वपितृत्वविरहाच्च। तस्मात्पितरि जीवत्यपि स्वमातामहादीनामेव सुतसंस्कारादावाभ्युदयिकं कुर्य्यादिति युक्तम्। एवमेव मदनरत्नकालादर्शादयः, सम्प्रदायोऽप्येवम्। इदञ्च नान्दीमुखश्राद्धं कुलाचारादिना पिण्डरहितमपि कर्त्तव्यम्। तथा च रूपनारायणपारिजाते भविष्यपुराणम्—

पिण्डनिर्वपनं कुर्य्यान्न वा कुर्य्याद्विचक्षणः।
वृद्धिश्राद्धे कुलाचारदेशकालाद्यवेक्ष्य हि॥ इति।

अस्मिन्कल्पे आवाहनादिनिवृत्तिरप्युक्ता यथा तत्रैव—

अग्नौ करणमर्घं चावाहनं चावनेजनम्।
पिण्डश्राद्धे प्रकुर्वीत पिण्डहीने विवर्ज्जयेत्॥ इति।

एवमन्यान्यपि पिण्डोपयुक्तानि पिण्डिकानिर्माणसेकप्रादेशरेखाकरणादीनि निवर्त्तन्ते, अङ्गिनिवृत्तावङ्गनिवृत्तेरर्थसिद्धत्वादिति दिक्।

आभ्युदयिककालमाह विष्णुपुराणम्—

कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः।
नामकर्मणि बालानां चूडाकर्मादिके तथा॥
सीमन्तोन्नयने चैव पुत्रादिमुखदर्शने।
नान्दीमुखं पितृगणं पूजयेत्प्रयतो गृही॥

चूडाकर्म्मादिक इत्यादिपदादुपनयनादिपरिग्रहः। तेन चूडाकरणात् प्राक्तनयोर्निष्क्रमणान्नप्राशनयोर्नाभ्युदयिकम्। नामकरणे तु विशेषोपदेशादेवाभ्युदयिकानुष्ठानम्। न चादिपदस्य प्रकारार्थत्वान्निष्क्रमणान्नप्राशनयोरपि परिग्रह इति वाच्यम्, नामकरणस्य पृथगुपादानवैयर्थ्यापत्तेः। पुत्रादिमुखदर्शने पुत्रस्य प्रथममुखदर्शने।

ब्रह्मपुराणे—

कर्म्मण्यथाभ्युदयिके माङ्गल्यवति शोभने।
जन्मन्यथोपनयने विवाहे पुत्रकस्य च॥
पितृन्नान्दीमुखान्नाम तर्पयेद्विधिपूर्वकम्॥

आभ्युदयिके दृष्टाभ्युदयसाधने ग्रहयागादौ, मङ्गल्यवति मङ्गल्यबहुले कन्याविवाहे, शोभने उत्कृष्टे पारलौकिके देवप्रतिष्ठातुलापुरुषादौ ।

मत्स्यपुराणे—

उत्सवानन्दसन्ताने यज्ञोद्वाहादिमङ्गले ।
मातरः प्रथमं पूज्याः पितरस्तदनन्तरम् ॥
ततो मातामहानाञ्च विश्वेदेवास्तथैव च ॥

व्याख्यातमेतत् ।

अत्रोद्वाहपदं ऋष्यन्तरोक्तकन्यापुत्रविवाहपरम्, एकमूलत्वकल्पनालाघवात् । एतेन यज्ञवत्स्वीयविवाहोऽप्याभ्युदयिकनिमित्तमित्यपास्तम् । "स्वपितृभ्यः पिता दद्यात्" इतिवचनात् । पितुरभावे स्वविवाहस्यापि निमित्तत्वम्, न तु पितरि सत्यपीति श्राद्धकल्पस्मृतिसारादयः । अपरे च—

नान्दीमुखेभ्यः श्राद्धन्तु पितृभ्यः कार्यमृद्धये ।
ततो विवाहः कर्त्तव्यः शुद्धः शुभसुतप्रदः ॥

इति ब्रह्मपुराणवचनात स्वविवाहे काम्यमाभ्युदयिकं न तु नित्यमित्याहुः । प्रथमविवाहेऽपि पितुरन्येनाभ्युदयिकं न कार्य्यम्, पुत्रविवाहस्यैव निमित्तत्वेनान्यस्यानधिकारात् ।

कात्यायनः—

स्वपितृभ्यः पिता दद्यात् सुतसंस्कारकर्मसु ।
पिण्डानोद्वाहनात्तेषां तदभावे तु तत्क्रमात् ॥

अत्र निष्क्रमणान्नप्राशनातिरिक्तत्वेन सुतसंस्कारपदं सङ्कोचनीयम् । "कन्यापुत्रविवाहेषु" इत्याद्युपदर्शितविष्णुपुराणेन सहैकमूलकल्पनालाघवात् । सुतेति पुंस्त्वमविवक्षितम्, तेन सुताया अपि परिग्रहः । सुतापदसुतपदयोरेकशेषाद्वा, ओद्वाहनादित्यभिविधावाङ्वचनान्तरैकमूलकत्वानुरोधात् । तेन विवाहपर्यन्तमपत्यसंस्कारजनककर्मसु पिता स्वपितृभ्यः पिण्डान् दद्यात्, आभ्युदयिकश्राद्धं कुर्यादित्यर्थः, [1]अङ्गमुखेन प्रधानविधानात् । पुत्रस्य च प्रथमविवाह एवाभ्युदयिकम्, संस्कारजनककर्मणि प्रकृतवचनेन तद्विधानात् । द्वितीयादेश्च तदजनकत्वात् संस्कारवति सजातीयसंस्कारान्तरा-

१. अङ्गानां प्रधानोपकारकत्वेन प्रधानाभावेऽङ्गानुष्ठानाभावात्, अङ्गविधाने प्रधानविधानमप्यस्तीति ज्ञेयमिति भावः ।

नुत्पत्तेः। इत्थञ्चैतदेकमूलकत्वानुरोधात् "विवाहे पुत्रकस्य च" इति ब्रह्मपुराणमपि प्रथमविवाहपरमेव द्रष्टव्यम्। तदभावे त्विति, तदभावे संस्कार्यपितुरभावे, तेषां पितॄणाम्, कृते दाने प्राप्ते। तत्क्रमात् संस्कार्यक्रमादित्यर्थः। तथा च संस्करणीयः संस्करणीया वा यथा करोति तथा संस्काराधिकारिणाऽभ्युदयिकं कर्त्तव्यमिति फलितोऽर्थः। इत्थञ्च मातामहादयोऽपि संस्कार्यस्यैवेति लब्धम्। यत्तु—तत्क्रमादित्यस्य संस्कार्यपितृक्रमादित्यर्थ इति, तन्न, तुशब्दप्रतिपाद्यपूर्वोक्तव्यवच्छेदानुपपत्तेः; "स्वपितृभ्यः पिता दद्यात्" इत्यनेनैव तल्लाभे "तदभावे तु तत्क्रमात्" इति चतुर्थचरणवैयर्थ्यापत्तेश्चेति सकलनिबन्धसिद्धान्त इति दिक्।

पितरि जीवत्यन्यः संस्कर्त्ता संस्करणीयपितृक्रमेणैव श्राद्धं कुर्यात्—

अष्टौ संस्कारकर्माणि गर्भाधानमिव स्वयम्।
पिता कुर्यात्तदन्यो वा तस्याभावे तु तत्क्रमात्॥

इति वचनात्। वाकारस्वरसेन तस्य पितृवत्कर्त्तव्यत्वप्रतीतेः। यथा पिता गर्भाधानं स्वयमेव कुर्यात्तथा स तदन्यो वा संस्काराष्टकं कुर्यादित्यर्थः।

शातातपः—"नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमारभेत्"। अत्र पितृपदं श्राद्धार्हपितृपरं न तु ससम्बधिकशब्दत्वेन स्वपितृपरम्, कर्त्रन्तरेण संस्कार्यपितामहादि-श्राद्धाकरणप्रसङ्गात्। न चेष्टापत्तिः, शिष्टाचारविरोधात्; "तदभावे तु तत्क्रमात्" इति विधिविरोधाच्च। कर्मपदञ्च ऋष्यन्तरोक्तविशेषविषयकं बोद्धव्यमिति नातिप्रसङ्गः। यत्तु—तडागयागादौ प्रतिनिधिना स्वपितॄणामेवाभ्युदयिकं कर्त्तव्यम्, "नानिष्ट्वा तु पितॄन् श्राद्धे" इत्यत्र पितृपदेन स्वपितॄणामेव [1]पतिन्यायेनोपस्थितत्वात्, नाम-करणादौ तु पित्रन्येनापि पितृवदेव संस्कार्यवदेव वा कर्त्तव्यम्, स्वपितृभ्य इति विशेष-वचनादिति केषाञ्चिन्मतम्; तन्न, सम्प्रदायविरोधात्। अपि च प्रतिनिधित्वं हि प्रति-निधातृकर्त्तव्यकारित्वम्; प्रतिनिधिपितृश्राद्धञ्च न प्रतिनिधातृकर्त्तव्यमिति कथं प्रतिनिधिस्तत्कुर्यात्? तस्मात्तत्रापि प्रातिनिध्यकरपितॄणामेव श्राद्धम्; अत एव "स्वपितृभ्यः पिता दद्यात्" इत्यनेनैकरूप्यमपि; वामदेवोपाध्यायादयोऽप्येवम्। एवं स्त्रीकर्त्तृके तडागादियागेऽपि तत्पितॄणामेव श्राद्धम्, "नानिष्ट्वा तु पितॄन् श्राद्धे"

---

१. यथा पतिशब्देन स्वीयपतिरेवोपस्थितो भवति, तथा तेनैव न्यायेन पितृपदेनाऽपि स्वीयपितुरेवोपस्थितिर्युक्तेति भावः।

इत्यत्र पितृपदेन तेषामेवोपस्थितेरिति बोद्धव्यम्। एवं पितृव्यादिना भ्रातृपुत्रादेर्नामकरणादौ क्रियमाणे भ्रात्रादौ जीवति तन्मातृत्वादिनैवोल्लिख्याभ्युदयिकं कार्यम्, न तु स्वमातृत्वादिना; मृते तु भ्रात्रादौ भ्रातृपुत्रादिमात्रादीनामेव तन्मातृत्वादिनैव, स्वस्य स्वातन्त्र्येणानधिकारात्; पितुरन्येषां संस्कर्तृत्वे सर्वत्रैकरूप्यानुरोधाच्चेत्यास्तां विस्तरः।

यः कश्चित्सपिण्डीकरणाधिकृतः स यस्य कस्याप्याभ्युदयिकं सपिण्डकरणं कृत्वैव कुर्यात्। तथा च लघुहारीतः—

भ्राता वा भ्रातृपुत्रो वा सपिण्डश्शिष्य एव वा।
सहपिण्डक्रियां कृत्वा पश्चादभ्युदयञ्चरेत्॥ इति।

एवञ्च पितर्यसपिण्डितेऽपि सपिण्डीकरणानधिकारिणा कनिष्ठेन पितृपरभूतपुरुषत्रयश्राद्धं पुत्रजन्मादौ कर्त्तव्यमेव। न च—"स्वपितृभ्यः पिता दद्यात्" इत्यनेन विरोधः, असपिण्डितत्वादिना पितरि श्राद्धायोग्ये पितामहादीनामपि स्वपितृपदार्थत्वात्। तदुक्तम्—

ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते।
व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ॥ इति।

अत्र ब्राह्मणादिहतत्वमुपलक्षणम्, श्राद्धानर्हत्वप्रयोजकासपिण्डितत्वादिकमपि द्रष्टव्यम्, एवमेव हरिनाथोपाध्यायश्रीदत्तोपाध्यायादयः। सङ्गवर्जिते ज्ञातिबन्धुभिर्बहिष्कृते। व्युत्क्रमाद् आत्मघातादेः, असौ पिता। अन्ये तु—कनिष्ठस्यापि सपिण्डनाधिकारः पुत्रत्वमात्रस्य श्राद्धमात्राधिकारितावच्छेदकत्वादिति पितर्यसपिण्डिते कनिष्ठस्यापि नाभ्युदयिकाधिकार इति वदन्ति। यस्य प्रेतस्य सपिण्डनं न कृतमस्ति तस्यैव न कर्त्तव्यमन्यस्य तु कर्त्तव्यमेवेति केचित्। कृतेऽपि सपिण्डने आभ्युदयिकाङ्गकं महादानादिरूपं काम्यं कर्म प्रथमवर्षे न कर्त्तव्यम्। तदाह लघुहारीतः—

"तथैव काम्यं यत्कर्म वत्सरात्प्रथमाद्दते" इति।

तथैव आभ्युदयिकयुक्तमित्यर्थः। शातातपः—

वसवः पितरो ज्ञेया रुद्राश्चैव पितामहाः।
प्रपितामहास्तथादित्या इत्येषा नैगमी श्रुतिः॥

तथा—

पितॄणां रूपमास्थाय देवा ह्यन्नं समश्नुते।

अत्र यद्यपि देवा एव श्राद्धोद्देश्यतयापाततोऽधिगम्यन्ते, तथापि पितर एव देवरूपतया ध्यातव्या इति तत्त्वम्। अत एव पैठीनसिः—"य एवं विद्वान् पितॄन् यजेत वसवो रुद्रा आदित्याश्च प्रीता भवन्ति" इति। इदञ्च श्राद्धं क्वचिदङ्गम्। तदुक्तं भविष्यपुराणे—

निषेककाले सोमे च सीमन्तोन्नयने तथा।
इष्टौ पुंसवने चैव श्राद्धं कर्माङ्गमिष्यते॥

तथा—

यज्ञे पुंसवने चैव सीमन्तोन्नयने तथा।
एतेष्वेव प्रधानेषु श्राद्धं कर्माङ्गमिष्यते॥ इति।

पुत्रजन्मादौ तु नैमित्तिकम्, तथा च मार्कण्डेयपुराणम्—

नैमित्तिकमथो वक्ष्ये श्राद्धमभ्युदयात्मकम्।
पुत्रजन्मनि तत्कार्यं जातकर्मसमं नरैः॥ इति।

अत्र जातकर्मसमकालविधानादच्छिन्ननाड्यां कर्त्तव्यम्। एतच्चोपलक्षणम्। पुत्रविवाहादावपि तन्नैमित्तिकमेव, निमित्तसप्तमीश्रवणात्; "एतेष्वेव प्रधानेषु" इत्युक्त्या-ऽन्यत्र नैमित्तिकमिति प्रतीतेश्च। इत्थञ्चाकृतसपिण्डनस्य ज्येष्ठस्यापि कन्यापुत्र-विवाहोऽर्हत्येव, आभ्युदयिकस्य विवाहानङ्गत्वेन तदकरणेऽपि वैगुण्यविरहात्। अनधिकारे नैमित्तिकाकरणे विहिताकरणदोषोऽपि नेति बोध्यम्। एवं पितरि देशान्त-रस्थे पुत्रविवाहरूपस्याभ्युदयिकनिमित्तस्याज्ञानेन श्राद्धाकरणेऽपि न विवाहवैगुण्यम्, न वा नैमित्तिकाकरणात् प्रत्यवायः, निमित्ताज्ञानेनानधिकारात्। अधिकारिण एवाकरणे प्रत्यवायात्।

इदं पुनरत्रावधेयम्—यत्राभ्युदयिकमङ्गं तत्र तदकरणेऽङ्गहानिप्रयुक्तं कर्मणो वैगुण्यम्, यत्र तु नैमित्तिकं तत्र निमित्तज्ञानवतोऽधिकारिणस्तदकरणे प्रत्यवायो न तु कर्मवैगुण्यमिति। तथा यत्राङ्गं तत्र "अमुककर्माङ्गभूतमाभ्युदयिकश्राद्धमहं करिष्ये" इति सङ्कल्पवाक्यम्; यत्र तु नैमित्तिकं तत्र "अमुककर्मणयाभ्युदयिकश्राद्धमहं करिष्ये" इति निमित्तसप्तमीसहितं वाक्यं करणीयमिति।

मातृपूजाभ्युदयिकापवादमाह कात्यायनः—

असकृद्यानि कर्माणि क्रियन्ते कर्मकारिणा।
प्रतिप्रयोगं नैव स्युर्मातरः श्राद्धमेव च॥

यानि कर्माणि श्रावण्याग्रहायण्यादीनि वारं वारमाहिताग्निना क्रियन्ते, तेषु प्रथमप्रयोग एव मातृपूजाभ्युदयिके न तु प्रतिप्रयोगमित्यर्थः। तथा—

आधाने होमयोश्चैव वैश्वदेवे तथैव च।
बलिकर्मणि दर्शे च पौर्णमासे तथैव च॥
नवयज्ञे च यज्ञज्ञा वदन्त्येवं महर्षयः।
एकमेव भवेच्छ्राद्धमेतेषु न पृथक् पृथक्॥

आधाने = अग्न्याधाने, होमयोः = सायंप्रातर्होमयोः। नवयज्ञः = आग्रहायणेष्टिः। एतेषु आधानादिषु प्रतिकर्मापि न कार्यम्, किन्त्वाधानादौ कृते सर्वेष्वेव कृतं स्यादित्यर्थः।

तथा—

नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते।
न सोष्यन्तीजातकर्मप्रोषितागतकर्मसु॥

अष्टकासु त्रिषु, श्राद्धे पिण्डपितृयज्ञे, सोष्यन्ती आसन्नप्रसवायाः सुखप्रसवनिमित्तमनुष्ठेये सोष्यन्ती होमे। जातकर्मणि विप्रकर्षादिना त्वज्ञानवशात्कालान्तरक्रियमाणे, न तु तत्काल एव क्रियमाणेऽपि; तत्र पुत्रजन्मनिमित्तकस्य विहितत्वेन निषेधानर्थक्यात्। प्रोषितागतकर्मणि, प्रोष्यैत्यगृहानुपतिष्ठते पूर्ववत्पुत्रं दृष्ट्वा जपतीत्यादिना विहिते प्रवासादागतस्य पितुः पुत्रमूर्द्धादिस्पर्शरूपे च न श्राद्धमित्यर्थः। तथा—

विवाहादिः कर्मगणो य उक्तो गर्भाधानं शुश्रुम यस्य चान्ते।
विवाहादावेकमेवात्र कुर्याच्छ्राद्धन्नादौ कर्मणः कर्मणः स्यात्॥

अन्ते परसमीपे, विवाहादारभ्य गर्भाधानात्प्राग् यश्चतुर्थीहोमाङ्गसमशनीयचरुहोमगृहप्रवेशयानारोहणचतुष्पथामन्त्रणात्तभङ्गसमाधानहोमादिरूपः कर्मगण उक्तस्तत्र विवाहोपक्रम एव श्राद्धं न तु तत्तत्कर्मोपक्रमेऽपीत्यर्थः। एकेनैव कृतेन श्राद्धेन सर्वाण्यपि तानि श्राद्धवन्तीत्याशयः। अत्र गौडाः— अन्तशब्दस्य चरमावयवार्थकत्वमभ्युपेत्य गर्भाधानमपि गणेऽन्तर्भाव्य तत्रापि श्राद्धप्रतिषेधं वर्णयन्ति, तन्न, "निषेककाले सोमे च" इत्यादिना गर्भाधानेऽपि श्राद्धविधानात्। न च निषेधस्य छन्दोगपरत्वम्, विधेश्च तदितरपरत्वमिति वाच्यम्, उभयत्र सङ्कोचापत्तेः, सम्प्रदायविरोधाच्च, छन्दोगेतरेषां विवाहादिकर्मसमूहे प्रतिकर्माभ्युदयिकप्रसङ्गाच्चेत्यास्तां विस्तरः।

तथा—

गणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत्।
सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु॥

गणशः समुदायेन, एकस्मिन् दिने क्रियमाणेषु कर्मसु, यथा यजनीयेऽहनि नवयज्ञवास्तुयज्ञगोयज्ञाश्वयज्ञेषु सर्वोद्देशेनैकमेव मातृपूजनमेकमेव च श्राद्धं न तु कर्मसमसंख्याकमित्यर्थः। आग्नेयादीनां षण्णामप्युद्देशेन तन्त्रेण सकृदेव प्रयाजादिकवत्तन्त्रेणैव सिद्धिरिति भावः। अत एवैकस्मिन् दिने क्रियमाणेषु चूडाकरणोपनयनादिषु सकृदेव मातृपूजनमाभ्युदयिकञ्चाचरन्तीति दिक्[१]।

इतिहर्षनाथविरचिते संस्कारदीपके
मातृपूजाभ्युदयिकप्रकाशः॥

अथ संस्कारेष्ववश्यापेक्षणीयस्य शुद्धसमयस्याशुद्धसमयभिन्नस्वरूपत्वात्तज्ज्ञानार्थं समयाशुद्धिर्विवेच्यते। तत्र रत्नावल्याम्—

नीचस्थः सिंहगो वा यदि भवति गुरुः सूर्यरश्मौ च लीनः
संयुक्तो वा यदा स्याद्दशशतघृणिना क्षीणरूपोऽथ बालः।
यात्रां गेहं विवाहं व्रतममरगृहं यज्ञचूडादिसर्वं
वापीमुद्यानकूपं न भवति शुभदं यद्यदिष्टञ्च लोके॥

नीचस्थः=मकरस्थः। सूर्यरश्मौ लीनः=अस्तः। दशशतघृणिना=सूर्येण। उद्यानकूपमित्यस्य न कुर्यादिति शेषः। यत एतत्सर्वं लोके यद्यदिष्टं तत्तत्तदा शुभदं न भवति तस्मान्न कुर्यादित्यर्थः। नन्दः—

उपनयनं गोदानं परिणयनं गृहप्रवेशनं गमनम्।
अस्तमितेषु न कुर्यात् सुरगुरुभृगुपुत्रचन्द्रेषु॥

गोदानं समावर्त्तनम्। बृहट्टोच्चयः—

अस्ते शुक्रे धनुर्मीने सिंहादित्ये तथा गुरौ।
चूडोद्वाहं प्रतिष्ठाञ्च व्रतादीन्नैव कारयेत्॥

---

१. अत्रेदं बोध्यम्—एकस्मिन् संस्कार्ये यत्रानेकसंस्काराणामेकस्मिन् दिनेऽनुष्ठानं तत्र सकृदेव मातृपूजनमाभ्युदयिकञ्च कार्यम्, यत्र संस्कार्याणामनेकत्वं तत्र संस्कारजन्यचरमापूर्वाणामनेकसंस्कार्यनिष्ठत्वेन तदङ्गाभ्युदयिकश्राद्धजन्याङ्गपूर्वाणामपि तन्निष्ठत्वस्यावश्यकत्वादेकया सामग्र्या एकमेव कार्यं जन्यत इति नियमस्य योगसिद्धयधिकरणे स्थापितत्वान्न सकृदनुष्ठितेनाभ्युदयिकेनेतावत्पूर्तिरित्यनेकसंस्कार्येषु पृथगेव वृद्धिश्राद्धमिति।

दीपिकायाम्—

गुर्वादित्ये गुरौ सिंहे नष्टे शुक्रे मलिम्लुचे।
याम्यायने हरौ सुप्ते सर्वकर्माणि वर्जयेत्॥

गर्गः—

कर्णवेधं तथा क्षौरं विवाहं व्रतमेव च।
गुर्वादित्ये न कुर्वीत पुत्रदारधनक्षयात्॥

सोमशेखराख्यनिबन्धे—

वापीकूपतडागयागगमनक्षौरप्रतिष्ठाव्रतं
विद्यामन्दिरकर्णवेधनमहादानं वनं सेवनम्।
तीर्थस्नानविवाहदेवभवनं मन्त्रादिदेवेक्षणं
दूरेणैव जिजीविषुः परिहरेदस्तङ्गते भार्गवे॥
बाले शुक्रे वृद्धे शुक्रे वृद्धे जीवे नष्टे जीवे।
बाले जीवे जीवे सिंहे सिंहादित्ये जीवादित्ये॥
तथा मलिम्लुचे मासि सुराचार्येऽतिचारगे।
वापीकूपतडागादिक्रियाः प्रागुदितास्त्यजेत्॥

जीवे गुरौ। राजमार्त्तण्डे—

अस्तमिते भृगुपुत्रे कन्या म्रियते वरस्तु वागीशे।
स्यादुभयोरपि मरणं केतावुदिते करग्रहणे॥
बालभृगौ परिणीता युवतिरसाध्वी भवत्यवश्यमिदम्।
वृद्धे तस्मिन् वन्ध्या सन्ध्यास्ते मृत्युमभ्येति॥
बाले च दुर्भगा नारी वृद्धे नष्टप्रजा भवेत्।
नष्टे च मृत्युमभ्येति सर्वमेतद्गुरावपि॥

कृत्यचिन्तामणौ देवीपुराणम्—

सिंहसंस्थं गुरुं शुक्रं सर्वारम्भेषु वर्जयेत्।
आरब्धञ्च न सिद्ध्येत महाभयकरं भवेत्॥
कूपारामतडागेषु प्रपोद्यानगृहेषु च।
सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्जयेत्॥

कल्पतरौ देवीपुराणम्—

यथा सिंहस्थिते जीवे तथैव मकरस्थिते।

7298

देवारामतडागादि प्रपोद्यानगृहाणि च ॥
विवाहादि महाभाग भयदानि विनिर्दिशेत्।

रत्नावल्याम्—

सर्वत्रैव स्थितः श्रेष्ठोऽमरराजपुरोहितः।
नीचस्थोऽर्कगृहस्थश्च सर्वकर्मविदूषकः॥

नीचस्थो मकरस्थः। अर्कगृहस्थः सिंहस्थः। राजमार्त्तण्डे—

सिंहगुरौ परिणीता स्त्री पतिमात्मानमात्मजान् हन्ति।
क्रमशस्त्रिषु पित्र्यादिषु वशिष्ठगर्गादयः प्राहुः॥

पित्र्यादिषु मघापूर्वफल्गुन्युत्तरफल्गुन्येकचरणेषु। तथा—

अनादिदेवतां दृष्ट्वा शुचः स्युर्नष्टभार्गवे।
मलिम्लुचेऽप्यनावृत्तं तीर्थस्नानमपि त्यजेत्॥
गुर्वादित्ये गुरौ सिंहे शुक्रे चास्तमुपागते।
नाधिष्ठानवतीं पश्येद्देवतामादितो नरः॥

अनावृत्तं प्राथमिकम्, आदितः प्रथमम्। बृहद्दैवज्ञोक्तये—

अस्तङ्गते भृगुसुते नश्यन्ति समस्तदिग्गता यात्राः।
वेश्मक्रियाप्रवेशः क्षौरोद्वाहौ परीक्षा च॥

परीक्षा तन्नमाषादिदिव्यविधिः। तथा—

अस्तं प्रयाते च भृगौ गुरौ वा सूर्ये निरंशे हिमगौ प्रनष्टे।
न कूपवाप्यादिकमन्दिरार्थं शुभं प्रदिष्टं धनकीर्त्तिनाशात्॥

हिमगौ चन्द्रे। कृत्यचिन्तामणौ—

बाले च विधवा नारी वृद्धे च चिरदुर्भगा।
वन्ध्या सन्ध्यागते शुक्रे सर्वमेतद्गुरावपि॥
बाले वेश्यापदं याति योषिदुद्वाहिता भृगौ।
वृद्धे वन्ध्यात्वमेवाशु सन्ध्यायामपि नैधनम्॥

गुरुशुक्रयोर्बाल्यादिदिनसंख्या यथा रत्नमालायाम्—

प्रागुदूगतः शिशुरहस्त्रितयं सितः स्यात्
पश्चादशाहमिह पञ्च दिनानि वृद्धः।
प्राक्पक्षमेव गदितोऽत्रिवशिष्ठगर्गै-
र्जीवस्तु पक्षमपि वृद्धशिशुर्विवर्ज्यः॥

सितः शुक्रः। इह पश्चाद्दिशि। कृत्यप्रदीपे वशिष्ठः—

बालो दशाहाभ्युदितः परेण
पूर्वेण बालो दिवसत्रयं स्यात्।
वृद्धस्तु पूर्वेण सपक्षमेकं
पश्चात्स्थितः पञ्चदिनानि शुक्रः॥

राजमार्त्तण्डे—

भवेत् सन्ध्यागतः पञ्चादस्तमेष्यन् दिनत्रयम्।
दिनानि पञ्च पूर्वेण तत्कृते कर्म वर्जयेत्॥

यत्तु गौडैः—

बाले वृद्धे च सन्ध्यांशे चतुःपञ्चत्रिवासरान्।
जीवे च भार्गवे चैव विवाहादिषु वर्जयेत्॥

इत्यादिवचनमुपन्यस्तमापद्विषयतया योजितञ्च तत्प्रामाणिकनिबन्धृभिरनादरणात् सम्प्रदायाननुग्रहाच्चोपेक्षणीयम्। भुजबलभीमादिषु—

पूर्वराशिं यदा त्यक्त्वा अपूर्णे वत्सरे गुरुः।
अपरं राशिमायाति लुप्तकालः स उच्यते॥
अतीचारगतो जीवस्तं राशिं नैति चेत्पुनः।
लुप्तः संवत्सरो ज्ञेयो गर्हितः सर्वकर्मसु॥

लुप्त इति तत्र वर्षे क्रियालोपप्रयुक्तो लुप्तत्वव्यवहार इति भावः। तथा—

अतीचारगते जीवे वक्रे चैव बृहस्पतौ।
कामिनी विधवा प्रोक्ता तस्मात्तौ परिवर्जयेत्॥
अतीचारगतो जीवः पूर्वभं नैव गच्छति।
नाचरेत्तत्र कर्माणि तदा तत्रैव संस्थिते॥

बादरायणः—

कृत्वातिचारं यदि पूर्वराशिं नायाति मन्त्रं विबुधाधिपस्य।
यानं विवाहं व्रतबन्धगेहं सर्वं तदा हन्ति मतं मुनीनाम्॥

मतमित्यस्य एतदित्यादिः। दीपिकायाम्—

अतीचारगते जीवे शुक्रे चास्तमुपागते।
व्रतोद्वाहं न कुर्वीत जायते मरणं ध्रुवम्॥

गर्गः—

गुरोर्वक्रातिचारे च वर्जयेत्तदनन्तरम् ।
यज्ञव्रतविवाहादावष्टाविंशतिवासरान् ॥

वक्र एवातिचारो वक्रातिचारः, अतीचारो हि व्यवस्थामतिक्रम्य सञ्चरणम्, तत्त्वञ्च वक्रेऽप्यक्षतम् । लल्लः—

पक्षो दशाहानि तथा त्रिपक्षी मासत्रिभागः खलु षट् च मासाः ।
एषोऽतिचारः कथितो ग्रहाणां भौमादिकानामितरस्तु चारः ॥

यथासंख्यमन्वयः, तेन पक्षत्रयं गुरोरतीचार इति लब्धम् । एतच्च पूर्वराश्यागमिष्यदतीचारि गुरुविषयम्, "प्राग्राशिगन्तृजीवस्य चातिचारे त्रिपक्षकः" इत्यादि वचनान्तरसंवादात् । यत्र चातिचारं कृत्वा पूर्वराशिं पुनर्नायाति तत्र संवत्सर इत्युक्तमेव । इत्थं चातीचारत्रैविध्येनाशुद्धित्रैविध्यमिति स्थितम् ।

यानि तु—

शुभं भवनमासाद्य यदातिक्रमते गुरुः ।
तत्र चोद्वाहिता कन्या सुखं भर्त्रा प्रमोदते ॥
अतीचारगते जीवे वृषे वृश्चिककुम्भयोः ।
तत्र चोद्वाहिता कन्या सम्प्रीणीयात् कुलद्वयम् ॥
कन्यावृश्चिकमेषेषु मन्मथेऽथ वृषे झषे ।
अतीचारेऽपि कर्त्तव्यं विवाहादि बुधैः सदा ॥
वक्रातिवक्रावथवाऽतिचारं करोति जीवो जगतो हिताय ।
यदा तदाप्याह शुभे विलग्ने शुभाय पाणिग्रहणं वशिष्ठः ॥

तथा—

मकरस्थो यदा जीवो वर्जयेत् पञ्चमांशकम् ।
शेषेष्वपि च भागेषु विवाहः शोभनो मतः ॥
विवाहो नैव कर्त्तव्यः सिंहसंस्थे गुरौ सदा ।
मकरस्थे तु कर्त्तव्यः कल्याणं सर्वदा बुधैः ॥

इत्यादीनि गौडादिपरिगृहीतानि वचनानि, तानि सम्प्रदायविरोधात् प्रामाणिकनिबन्धृभिरनादरणाच्चोपेक्षणीयानि । अत एव दानरत्नाकरमहादाननिर्णयादौ—"मलिम्लुचगुरुशुक्रबाल्यवार्द्धकास्तमयसिंहमकरान्यतरगुरुस्थितिपूर्वराश्यनागतातीचारिगुरुकसंवत्सर-

पूर्वराश्यागमिष्यदतीचारिगुरुकपक्षत्रय-वक्रिगुरुकाष्टाविंशतिवासर-केत्वाद्यद्भुतोत्तरसप्ताह-गुर्वादित्य-सिंहादित्य-पौषादिमासचतुष्ट्यान्यतमैकद्वित्र्यन्यतमदिनाधिकरणकवृष्ट्युत्तरैक-त्रिसप्तान्यतमदिनानि निषिद्धसमयः, तदन्यस्तु शुद्धसमयः" इति न्यायरत्नवाक्यं सिद्ध-वल्लिखितमिति बोध्यम्। एवमेव सुधाकरादयः, द्वैतनिर्णयकृतोऽप्येवम्। कृत्यचिन्ता-मणिभोजराजव्यवहारसमुच्चयश्रीधरसमुच्चयेषु—

पौषादिचतुरो मासान् ज्ञेया वृष्टिरकालजा।
व्रतयात्रादिकं तत्र वर्जयेत् सप्तवासरान्॥
एकेनैकं दिनं त्याज्यं द्वितीयेन दिनत्रयम्।
तृतीयेन च सप्ताहं त्यजेदाकालवर्षणे॥
वृत्तेऽप्यकालवर्षे नाशुद्धिं निर्दिशेत्तावत्।
यावन्न भवति याने नरपशुचरणाङ्किता वसुधा॥

अत्र शुक्लादिश्चान्द्रो मासः, शिष्टाचारादौत्सर्गिकत्वाच्च। तेन सौरवैशाखा-न्तर्गतोऽपि चान्द्रचैत्रघटककालोऽकालवृष्ट्या दूष्यते। एकेन वृष्टिमद्दिनेन तदग्रिम-मेकं दिनं त्याज्यम्, एकेनेति करणतृतीयानिर्देशात्; दूष्यदूषकयोर्भेदावश्यकत्वाच्च। न चैकेनेति वर्षणविशेषणमिति वाच्यम्, एकस्मिन् दिने नानावर्षणसत्त्वेऽनेकदिनाशुद्धि-प्रसङ्गात्। न चैकदिवसावच्छिन्नवृष्टिपरमेकपदमतो नोक्तदोष इति वाच्यम्, एवमपि दूष्यस्य दिनस्य दूषककोटिप्रवेशानौचित्येन तदुत्तरदिनस्यैव त्याज्यत्वलाभात्। वर्षण-दिनवर्जनं तु [1]दण्डापूपन्यायात् सिद्धम्। "वृत्तेऽप्यकालवर्षे" इत्यत्र यावत्तावदिति सामानाधिकरण्यलाघवेन तस्यापि दुष्टत्वलाभाच्च। रत्नाकरादिस्वरसोऽप्येवम्। एवं वृष्टिमदव्यवहितदिनद्वयेन तदुत्तरं दिनत्रयमशुद्धम्, वृष्टिमदव्यवहितदिनत्रयेण तदुत्तरं सप्ताहमशुद्धम्, वृष्टिदिनानि तु पूर्ववदेव। वृष्टिदिनमादायैव गणनेति तु न युक्तम्, उक्त-युक्तेः, एकेनैकं दिनमित्यनेनैव वर्षणदिनस्याशुद्धित्वे द्वितीयेन दिनत्रयमित्यत्रैकमिति तृतीयेन तु सप्ताहमित्यत्र चतुरहमित्येव सिद्धे दिनत्रयमिति सप्ताहमित्यनयोर्वैयर्थ्यापत्तेः; [2]विध्यनुवादवैषम्यापत्तेश्च। एवमेव नव्यवर्द्धमानदेवनाथमुरारिमिश्रप्रभृतयः। एतेन

(१) दण्डसंलग्नो यूपो दण्डे गृहीते गृहीतो भवति, तथैव वर्षणदिनसंबन्धाद् द्वितीये दिने वर्जनीये वर्षणदिनवर्जनमर्थात् सिद्ध्यतीति भावः।

(२) विधौ त्वज्ञातत्वमनुवादे च ज्ञातत्वमिति यद्येकदैव विधित्वमनुवादत्वं भवेत्तदा ज्ञात-त्वाज्ञातत्वयोर्युगपदेव प्रसङ्गो दोषः।

वृष्टिदिनमादायैवैकादिगणनेति रघुनन्दनेनोक्तमपास्तम्। तच्चेदं वर्षणं वसुधाया वानर-चरणाङ्कितत्वयोग्यतासम्पादकमेवाशुद्धिप्रयोजकमिति वृत्तेऽप्यकालवर्षं इत्यस्यार्थः। एतत्सूचनार्थमेव "त्यजेदाकालवर्षणे" इत्याङ्प्रयोगः।

यत्तु—

नाडीजङ्घः सुरगुरुमुनिर्वक्ति वृष्टेरकालं
मासावेतावशुभफलदौ पौषमाघौ न शेषौ।

इति कृत्यचिन्तामणिधृतगर्गवचनैकवाक्यत्वानुरोधेन "पौषादिचतुरो मासान्" इत्यत्र मासपदं पक्षपरम्, पक्षा वै मासा इति परिभाषणात्। अत एव यतीनां चातुर्मास्यादिकं पक्षचतुष्ट्यात्मकमेव। इत्थञ्च फाल्गुनचैत्रयोर्न वृष्टिदोष इत्याहुस्तन्मन्दम्, "पौषान्मासात्प्रभृति मुनयो व्यासवाल्मीकिगर्गाश्चैत्रं यावच्छुभकरविधौ वृष्टिदोषं वदन्ति" इति तत्पूर्वार्द्ध एव चैत्रं यावदिति मासानामेव गणनात्, पक्षपरत्वे तदसम्भवात्; तेन समं वाक्यभेदस्य दुष्परिहरत्वात्। तस्मादेकत्रावश्यं वाक्यभेदोऽनन्यगतिकत्वात्, तद्वरं मासपदं स्वार्थपरमेवास्तु लाघवात्। न च मासपदं पक्षपरमेव परिभाषावलादिति वाच्यम्, "मासावेतौ" इत्यत्रैव तदभावात्। तस्मादशुभफलदावित्युपादानात् पौषमाघयोरशुभफलदत्वमपि, फाल्गुनचैत्रयोस्तु कालवैगुण्यमात्रमिति विभावनीयम्। यदपि "नाडीजङ्घः सुरगुरुमुनिः" इति वचनादावश्यके कर्मणि पौषमाघावेव वृष्टेरकाल इति केषाञ्चिन्मतम्, तदप्येतेन निरस्तम्, सम्प्रदायविरोधाच्च।

यच्च—

मार्गस्य पौर्णमास्यादावष्टकान्तामकालजाम्।
वृष्टिं केचन मन्यन्ते न माघे न च फाल्गुने॥

इति संख्यापरिमाणधृतवचनम्, तदपि प्रामाणिकनिबन्धृभिरनादरणात् सम्प्रदायाननुग्रहाच्चोपेक्ष्यमिति दिक्।

सत्यः—

ग्रहे रवीन्द्वोरवनिप्रकम्पे केतूद्गमोल्कापतनादिदोषे।
व्रते दशाहानि वदन्ति तज्ज्ञास्त्रयो दशाहानि वदन्ति केचित्॥
यदाम्बुवृष्टिः कुलिशं पतत्यधो धराप्रकम्पोऽसुरकेतुदर्शनम्।
तदा विवाहव्रतबन्धनेषु विवर्जयेत् सप्त दिनानि शास्त्रतः॥

एकरात्रं परित्यज्य कुर्यात्पाणिग्रहं ग्रहे।
यात्रायां सप्तरात्रं तु त्रिरात्रं व्रतबन्धने॥

अत्राम्बुवृष्टिराकालिकी त्रिदिनाभिव्यापिका, असुरो राहुः, केतुः स्वनामप्रसिद्धः, तयोर्दर्शनमित्यर्थः।

व्यासः—

दृश्यते सिंहिकासूनुरुदितो गगने यदि।
यात्रादौ मङ्गले कार्ये सप्तरात्रं विवर्जयेत्॥

सत्यः—

उल्कापाते त्रितयं तु धूमे सप्त दिनानि च।
वज्रपाते दिनमेकं वर्जयेत् सर्वकर्मसु॥
दिग्दाहे दिनमेकं तु ग्रहे सप्तदिनानि च।
भूमिकम्पे समुत्पन्ने त्र्यहाणि परिवर्जयेत्॥

तथा—

उत्पातदर्शने कर्म न शुभं सप्तवासरान्।
व्रतयात्राविवाहादि शुभं सप्ताहतो विदुः॥
अरिष्टे त्रिविधोत्पाते सिंहिकासूनुदर्शने।
सप्तरात्रं न कुर्वीत यात्रोद्वाहादिमङ्गलम्॥

अरिष्टे अशुभफलके, त्रिविधोत्पाते दिव्यभौमान्तरिक्षभेदात्। कृत्यचिन्तामणौ भोजराजः—

दाहे दिशां चैव धराप्रकम्पे वज्रप्रपाते कुविदारणे वा।
धूमे तथा पांशुकरप्रपाते न कारयेन्मङ्गलकारि कार्यम्॥
उल्कापाते च निर्घाते तथैवाकालवर्षणे।
छिद्रे सूर्ये च संदृष्टे न कुर्यान्मङ्गलक्रियाम्॥
धूमकेतौ समुत्पन्ने ग्रहणे चन्द्रसूर्ययोः।
ग्रहाणां सङ्गरे चैव न कुर्यान्मङ्गलक्रियाम्॥
द्विसूर्यं वा त्रिसूर्यं वा दृष्ट्वा गगनमण्डलम्।
रात्रौ शक्रधनुश्चैव मङ्गलानि विवर्जयेत्॥

रत्नशतके—

दर्शनादर्शनाद्राहोः केतोः सप्तदिनं त्यजेत्।
यावत्केतूदयस्तावदशुद्धः समयो भवेत्॥

अत्र सर्वत्र मङ्गलपदं शुभकर्ममात्रपरम्, विशेषपरत्वे मानाभावात्। स्मृतिकौमुद्यादयोऽप्येवम्।

अयमत्र प्रकरणार्थः—ग्रहणे भूकम्पोल्कापातादिसकलसमाहारे व्रतबन्धे त्रयोदशाहमशुद्धम्, किञ्चिदूनतत्समाहारे दशाहम्, "ग्रहे रवीन्द्वोः" इति वचनात्, व्रतबन्धेतरमङ्गलकर्मसु च सकलतत्समाहारे किञ्चिदूनतत्समाहारे वाऽधिकदिनाशुद्धिसम्पादकनिमित्तमादायैवाशुद्धिव्यवस्था, विशेषप्रापकाभावात्; ग्रहणमात्रे च व्रतबन्धादिसकलकर्मसु सप्ताहमेव, "ग्रहे सप्तदिनानि च" इत्यादि नानावचनबलात्। प्रौढकन्यामाणवकयोर्विवाहोपनयनयोः क्रमेणैकरात्रत्रिरात्रे, "एकरात्रं परित्यज्य" इति वचनात्, तस्य च सप्ताहप्रापकनानावचनविरोधपरिहाराय प्रौढकन्यादिविषयतया निबन्धृभिर्व्यवस्थापितत्वात्। "यदाम्बुवृष्टिः" इति वाक्ये च सप्ताहान्वयस्त्रिदिनाभिव्यापिकालिकवृष्ट्यसुरकेतुदर्शनयोरेव, वचनान्तरसंवादात्। तथा—उल्कापाते त्र्यहम्, वज्रपातदिग्दाहयोः प्रत्येकमेकाहम्, भूमिकम्पे त्र्यहमशुद्धम्, उल्कापाते त्रितयमित्यादिवचनात्। राहुदर्शनादौ सप्ताहम्, "दृश्यते सिंहिकासूनुः" इत्यादिवचनात्। केतूदये तु यावदुदयस्तावदशुद्धम्, "यावत्केतूदयस्तावत्" इति वचनात्। एतदतिरिक्तेषु सर्वेषूत्पातेषु प्रत्येकं सप्ताहम्, "उत्पातदर्शने कर्म न शुभं सप्तवासरान्" इत्यादि नानावचनबलात्। तेषाञ्च परिभाषारूपत्वेन लघूपस्थितिकत्वात्; व्यवस्थान्तरे चानध्यवसायात्। एषु च सर्वत्रोत्पातदिनमादायैवैकत्र्यादिगणना, न त्वकालवृष्टिवत्तदुत्तरदिनमादाय, तत्र कालस्य दूषकत्वमत्र तु दिग्दाहादिक्रियाया एवेति भेदात्। अत एव रत्नाकरादिलिखितन्यायरत्नवाक्ये केत्वाद्यद्भुतोत्तरसप्ताहेति लिखितम्, उत्पातदिनोत्तरदिनमादाय गणनाभिप्राये त्वद्भुतदिनोत्तरेति ब्रूयात्। यत्तु—दिग्दाहे तदुत्तरदिनमशुद्धम्, वज्रपातादौ च तद्दिनमादायैवैकादिगणनमित्युक्तम्, तदसत्, वैषम्ये युक्तिविरहादित्यलं पल्लवेन।

उत्पातदोषापवादो यथा अद्भुतसारे श्रीपतिनिबन्धे च—

अथ दिवसत्रयमध्ये मृदुपानीयं यदा भवति।
उत्पातदोषशमनं तदैव सम्प्राहुराचार्याः॥

बृहस्पतिः—

शमयन्त्यासन्नाहात् कम्पादिकृतं निमित्तमाश्वेव ।
अतिवर्षणोपवासव्रतदीक्षाजप्यहवनानि ॥

यमः—

निर्घातोल्काभूमिवेपनदिग्दाहपांशुशोणितमांसास्थिकेशदधिलाजाङ्गारवर्षे शान्तिस्वस्त्ययने कृत्वा शान्तिस्वस्त्ययने विधाय, क्रिया कार्येत्यर्थः ।

विष्णु :—

व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
आरब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥
आरम्भो वरणं यज्ञे सङ्कल्पो व्रतसत्रयोः ।
नान्दीमुखं विवाहादौ श्राद्धे पाकपरिष्क्रिया ॥

काठकगृह्यपरिशिष्टम्—

प्रवृत्तं मलमासात् प्राक् यत्कर्म न समापितम् ।
आगते मलमासेऽपि तत्समाप्यं न संशयः ॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
समयाशुद्धिप्रकाशः ॥

अथ संस्काराः

तत्र सुमन्तुः—ब्राह्मणक्षत्रियविशां वृत्तिर्गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म-नामकरणनिष्क्रमणान्नप्राशनचौडोपनयनव्रतचर्याध्ययनसमावर्तनविवाहसोष्यन्तीयज्ञदा-नानि। वृत्तिः संस्क्रिया, सोष्यन्ती सुखप्रसवार्थं कर्म।

गौतमः --गर्भाधानं पुंसवनं सीमन्तोन्नयनं जातकर्मनामकरणनिष्क्रमणान्नप्राशन-चौडोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः[१]। सहधर्म्मचारिणी-संयोगो विवाहः।

मनुः—

वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम्।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च॥

निषेकादिः गर्भाधानादिः, प्रेत्य परलोके, इहास्मिन् लोके।

तथा—

गार्भैर्होमैर्जातकर्मचौडमौञ्जीनिबन्धनैः।
बैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते॥

गार्भैः गर्भसंस्कारार्थैः। होमशब्दः कर्मविशेषोपलक्षकस्तेन गर्भाधानादेः परिग्रहः। बैजिकं शुक्रसंश्लेषजम्, गार्भिकं गर्भाशयस्थशोणितसम्बन्धजम्। एनः पापम्।

---

१. पञ्चानां यज्ञानामनुष्ठानमष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्था अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रो-ऽप्तोर्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत्संस्कारा इति। यस्यैते चत्वारिंशत् संस्कारा अष्टावात्मगुणाश्च स ब्राह्मणो ब्रह्मणः सायुज्यमाप्नोतीति। पार्वणः स्थालीपाकः। श्रावणी तत्र क्रियमाणं श्रवणाकर्म, आग्रहायणी तत्र क्रियमाणं प्रत्यवरोहणम्। चैत्री तत्र क्रियमाणः शूलगवः। आश्वयुजी तत्र क्रियमाणमाश्वयुजीकर्म। अष्टावात्मगुणाः—दया सर्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गल्यमकार्पण्यमस्पृहा इति।

अत्र यद्यपि पापक्षयरूपफलदर्शनात् सर्वेषां संस्काराणां काम्यत्वमेवायाति, तथापि चूडाकरणं नित्यम्, आवश्यकशिखाधारणार्थत्वात्। नामकरणमपि नित्यम्, आवश्यकाभिवादनादिकर्मार्थत्वात्। अत एव यथोचितकाले ननुष्ठितनामकरण-चूडाकर्मणी उपनयनाव्यवहितपूर्वकालेऽवश्यमनुतिष्ठन्ति शिष्टाः। उपनयनमपि तथा,

"अत ऊर्ध्वं पतन्त्येते सर्वकर्मबहिष्कृताः"

इति याज्ञवल्क्येन गौणकालपर्यन्तमप्यनुपनीतेषु पातित्याभिधानात। विवाहोऽपि नित्यः, आवश्यकसत्प्रजोत्पादनार्थत्वात्; "तस्मात् सर्वप्रयत्नेन कर्त्तव्यो दारसंग्रहः" इति देवलवचनाच्च, "दारान् सर्वप्रयत्नेन विशुद्धानुद्वहेत्ततः" इति कश्यपवचनाच्च। गर्भाधानादि तु न तथा, अत एवानावश्यकत्वान्नानुतिष्ठन्ति बहव इति मुरारिमिश्रादयः। तत्र गर्भाधानं क्षेत्रसंस्कारद्वाराऽपत्यसंस्कारकम्, पात्रसंस्कारकस्य प्रक्षालनादेस्तत्रत्य-जलादिसंस्कारकत्ववत्, पुसवनसीमन्तोन्नयने अपि तथा। स च क्षेत्रसंस्कारः प्रथमगर्भ एव सम्पन्न इति नैतेषां त्रयाणां प्रतिगर्भमावृत्तिः, आरम्भणीयान्यायात्[1]।

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।
यं यं गर्भं प्रसूयेत स सर्वः संस्कृतो भवेत्॥

इति देवलवचनाच्च, पत्नीभेदे तु भवत्येव त्रयाणामप्यावृत्तिः, प्रधानावृत्तौ गुणावृत्तिरिति[2] न्यायात्। जातकर्मादि तु न स्त्रीद्वाराऽपत्यसंस्कारकम्, तेन तत्प्रत्यपत्यमावर्त्तते।

---

१. अयमत्रारम्भणीयान्यायः—"आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावारभ्यमानः" इति विहितेयमारम्भणीयेष्टिर्दर्शपूर्णमासयोर्यावज्जीवमावर्तमानयोः प्रतिप्रयोगमावर्तनीया। कुतः—प्रयाजादिवदङ्गत्वात्, इति चेत्! नैतद्युक्तम्। कुतः—सर्वप्रयोगसाधारणत्वात्। "यावज्जीवं मया दर्शपूर्णमासौ कर्तव्यौ" इत्यध्यवसाय आरम्भः। स चैक एव। तेन चारम्भेण प्रयुक्तेयमिष्टिः। तस्मात्—नावर्तनीया। यथा आधानं सर्वक्रतुसाधारणत्वात् सकृदेव कर्तव्यम्, तद्वदिति।

२. यथा प्रक्षालनं पात्राङ्गम्, पात्रावृत्तौ तस्याप्यावृत्तिर्भवति। यथा वा प्रधानभूतयोर्दर्शपूर्णमासयोरावृत्तौ प्रयाजानामङ्गभूतानामावृत्तिस्तथा संस्कार्यभूतानां पत्नीनां भेदे गर्भाधानादि-संस्काराणामपि भेद इति भावः। अत्र पत्नीसंस्कारो न पत्नीमात्रपरः, किन्तु तद्द्वाराऽपत्य-संस्कारपर इति ध्येयम्।

याज्ञवल्क्यः—

ब्रह्मक्षत्रविशः शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः।
निषेकाद्याः स्मशानान्तास्तेषां वै मन्त्रतः क्रियाः॥
मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः॥

शूद्रस्याप्यमन्त्रकाः संस्कारा भवन्ति। तथा च यमः—

शूद्रोऽप्येवंविधः कार्यो विना मन्त्रेण संस्कृतः।
न केनचित्समसृजच्छन्दसा तं प्रजापतिः॥

अशूद्राणामदुष्टकर्मणामित्यापस्तम्बेनोपनयने शूद्रपर्युदासात्तस्यामन्त्रकमप्युपनयनं निषिद्धम्। अत एव—

"तस्मादस्याधिकारोऽस्ति न वेदेषु न च स्मृतौ"

इति तस्य वेदाध्ययनादिनिषेधः। तथा—

"विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा"

अत्र मात्रग्रहणाद्विशेषविहितव्यतिरिक्तनिवृत्तिः। अतो नोक्तवचनविरोधः।

इदं वाक्यम्—विवाहे कन्यादानादिवाक्यसम्बन्धो भवति, संस्कारान्तरेषु च लौकिकवैदिकसर्वविधवाक्यनिवृत्तिरित्येतत्तात्पर्यकमित्यपरे। तथा—

"तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः"

तूष्णीं मन्त्रशून्याः, एता जातकर्माद्याः। यत्तु निषेकाद्या इति मुरारिमिश्रैरुक्तं तदयुक्तम्, जन्मतः पूर्वं स्त्रीत्वनिर्णयासम्भवात्।

मनुः—

अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः[१]।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्॥
वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया॥

---

१. इयमावृदयं जातकर्मादिक्रियाकलापः समग्र उक्तकालक्रमेण शरीरसंस्कारार्थं स्त्रीणाममन्त्रकः कार्य इति कुल्लूकभट्टः।

औपनायनिक उपनयनकार्यकारी। स्त्रीणामुपनयनस्थाने विवाह एव, गुरुशुश्रूषणस्थाने पतिसेवा, अग्निपरिचरणस्थाने गृहकार्यम्।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
संस्कारप्रकाशः॥

अथ सकलहोमकर्माङ्गभूतत्वात्प्रथमं कुशण्डिकां[1] प्रदर्शयति पारस्करः—

परिसमुह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय दक्षिणतो ब्रह्मासनमास्तीर्य प्रणीय परिस्तीर्यार्थवदासाद्य पवित्रे कृत्वा प्रोक्षणीः संस्कृत्यार्थवत्प्रोक्ष्य निरूप्याज्यमधिश्रित्य पर्यग्नि कुर्यात्, स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात्, आज्यमुद्वास्योत्पूयावेक्ष्य प्रोक्षणीश्च पूर्ववत्, उपयमान्[2] कुशानादाय समिधोऽभ्यादाय पर्युक्ष्य जुहुयात्, एष एव विधिर्यत्र क्वचिद्धोमः। परिसमुह्य सर्वतः पांश्वादिकमुत्सार्य। परिसमूहनीयां भूमिमाह गोभिलः—

"प्रागुदक्प्रवणां देशं समं वा परिसमुह्य" इति।

गृह्यासंग्रहः—

प्राङ्नीचं ब्रह्मवर्चस्यमुदङ्नीचं यशोत्तमम्।
पित्र्यं दक्षिणतो नीचं प्रतिष्ठालम्भकं समम्॥

भरद्वाजः—

कुशैः सम्मार्जयेद् भूमिं शुद्धामादौ शुचिस्ततः।
हस्तमात्रां चतुरस्रां गोमयेनोपलेपयेत्॥

मानकर्त्तारमाह कात्यायनः—

मानक्रियायामुक्तायामनुक्ते मानकर्त्तरि।
मानकृद्यजमानः स्याद्विदुषामेष निर्णयः॥ इति।

---

१. याज्ञिकेषु कुशकण्डिकेत्येव शब्दप्रयोगः, अतः कुशकण्डिकेत्येव समुचितः प्रतिभाति।

२. उपयमनान्।

परिसमूहनकुशानाञ्च परित्यागो विधेयः, अन्यत्र तथा दृष्टत्वात्। यथा सम्मार्जनान्यपास्यतीति। परित्यागश्चैशान्याम्,

"द्वारमेव हि द्रव्याणां प्रागुदीच्यां दिशि स्मृतम्"

इति वचनात्। प्रागुदीची ऐशानी, उपलिप्य गोमयोदकेन, समस्तं पर्युपलिम्पतीति गृह्यान्तरदर्शनात्। सांख्यायनः—"चतुरस्रं स्थण्डिलं गोमयेनोपलिप्य"। शौनकः—"गोमयेन सवारिणा, उपलिप्य स्थण्डिलन्तु चतुरस्रं तु सर्वतः"। स्थण्डिलं मार्जनादिसंस्कृता समभूमिः। गोमयञ्च वन्ध्यादीनां न ग्राह्यम्, तथा च शाट्यायनः—

अमेध्यसेविनीवन्ध्याप्रसूतानां च गोमयम्।
जीर्णायाश्चोपलेपार्थं नाहर्त्तव्यं कदाचन॥

अमेध्यसेविनी पुरीषादिभक्षिणी, प्रसूता अनतीतदशरात्रप्रसवा। यद्यपि भूमिः सर्वदैव पवित्रा, तदुक्तम्—

"विष्णुपादपरिक्रान्ता वराहेणोद्धृता पुनः"

अतः पृथ्वी सदा पूता इतीत्यलमुपलेपनेन, तथापि हेत्वप्रदर्शनपुरस्सरमुपलेपनीयत्वमाह अङ्गिराः—

इन्द्रेण वज्राभिहतः पुरा वृत्रो महासुरः।
मेदसा तस्य संक्लिन्ना तदर्थमुपलिप्यते॥ इति।

उल्लिख्य रेखाः कृत्वा, रेखाकरणञ्च वारत्रयमुत्तरोत्तरक्रमेण। तथा च वायुपुराणम्—

कण्डनं पेषणञ्चैव तथैवोल्लेखनक्रिया।
सकृदेव पितॄणां स्यादेवानां तु त्रिरुच्यते॥

सांख्यायनः—"सर्वाश्चावृतो दक्षिणाप्रवृत्तय उदक्संस्था भवन्ति" (इति)। आवृतः प्रक्रियाः। संस्था समाप्तिः। उल्लेखनसाधनद्रव्यं तत्प्रयोजनञ्चाह वामनभाष्ये स्मृतिः—

खादिरं स्फ्यं प्रकल्प्याथ तिस्रो लेखाश्च पञ्च च।
स्थण्डिले उल्लिखेद्विद्वान् स्रुवेण च कुशेन वा॥
कीटिका विविधाः सन्ति अस्ति कण्टकमेव च।
तेषामुद्धरणार्थाय उल्लेखः क्रियते बुधैः॥ इति।

पञ्च चेति चकारो विकल्पार्थः।

कारिकाकारः—

गोमयेनोपलिप्याथ स्रुवेणोल्लेखयेत्ततः।

यत्तु—

न नखेन न काष्ठेन नाश्मना मृण्मयेन वा।
प्रोल्लिखेल्लक्षणं विप्रः सिद्धिकामस्तु यो भवेत्॥

इत्यङ्गिरोवचने काष्ठप्रतिषेधनं तच्छाखान्तरविषयमिति न विरोधः, अत एव स्फ्येन स्रुवमूलेन वेति निर्विचिकित्सं स्वपद्धतौ रामदत्तादयो लिखितवन्तः। प्रादेशप्रमाणा रेखाः कर्त्तव्या इति सम्प्रदायानुरोधिनः। प्रादेशप्रमाणत्वे बीजाभावात् प्रक्रान्तस्थण्डिलप्रमाणा इति नव्यवर्द्धमानादयः। उद्धृत्य अनामिकाङ्गुष्ठाभ्यां यथोल्लिखिताभ्यो रेखाभ्यः पांशूनुत्सार्य। यद्यपीहानामिकाङ्गुष्ठस्य मृन्निरसनसाधनत्वं स्पष्टतः सूत्रकृता नोक्तम्, तथापि अनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति, अङ्गुष्ठेनोपकनिष्ठिकया चाङ्गुल्या ब्रह्मासनात्तृणमभिसंगृह्य निरस्यतीत्यादौ सर्वत्र निरसने तस्यैव साधनत्वदर्शनादिहापि तत्प्रत्येतव्यम्। अत एवाह कारिकाकारः—

"अनामाङ्गुष्ठसंयोगेनोद्धरेत्तत्र मृत्तिकाम्" इति।

उद्धृतपांशूनामैशान्यां परित्यागमाह अङ्गिराः—

उत्करं गृह्य रेखाभ्योऽरत्निमात्रे निधापयेत्।
द्वारमेव हि द्रव्याणां प्रागुदीच्यां दिशि स्मृतम्॥

अरत्निश्चतुर्विंशाङ्गुलः। तथा च कात्यायनः—

अङ्गुलस्य प्रमाणन्तु षड्यवाः पार्श्वसम्मिताः।
चतुर्विंशाङ्गुलोऽरत्निर्वितस्तिर्द्वादशाङ्गुलः॥

प्रागुदीच्यामैशान्याम्। अभ्युक्ष्य अधोमुखेन हस्तेनाद्भिरभिषिच्य। तथा च गृह्यपरिशिष्टम्—

उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्।
तिरश्चावोक्षणं प्रोक्तं न्यञ्चताभ्युक्षणं स्मृतम्॥

एते च परिसमूहनादयः पञ्च पदार्था भूसंस्कारका इति भर्तृयज्ञः। अग्न्यर्था इति कर्कः। अग्निमुपसमाधाय आत्माभिमुखं वह्निं स्थापयित्वा। गृह्यान्तरम्—"अभिमुखमग्निं प्रणयन्ति"। अङ्गिराः—

कपालैर्भिन्नपात्रैर्वा आयसैर्गोमयेन वा।
नाग्निप्रणयनं कार्यं यजमानभयावहम्॥

भिन्नपात्रैः स्फुटितपात्रैः। तथा—

अल्पप्रणीतो विच्छिन्नोऽसमिद्धश्चापविश्रुतः[१]।
त्वरया पुनरानीतो यजमानभयावहः॥

अल्पप्रणीतः=अल्प एव प्रणीतः। विच्छिन्नः=अमिलितः। अपविश्रुतः सूत्रकाराद्यनुपदिष्टः। तथा—

तस्माच्छुभेन पात्रेण अविच्छिन्नाकुशं बहु।
अग्निप्रणयनं कार्यं यजमानसुखावहम्॥
शुभं पात्रं तु कांस्यं स्यात्तेनाग्निं प्रणयेद् बुधः।
तस्याभावे शरावेण नवेनाभिमुखे च तम्॥

अभिमुखे स्वात्मसम्मुखे, एतन्मूलक एव प्रत्यङ्मुखं निदध्यादिति पद्धति-कृल्लेखः। तम् अग्निम्। इत्थञ्च कपालैरित्यादि प्रपञ्चनमात्रम्, उपसंहारे कांस्यपात्र-शरावयोर्द्वयोरेव शुभपात्रत्वकथनादिति मिश्राः। ताम्रपात्रमप्याह देवीपुराणम्—

ताम्रपात्रे शरावे वा आनयित्वा हुताशनम्।
अग्निप्रणयनं कुर्याद्यजमानसुखावहम्॥ इति।

अग्निं विशेषयति शौनकः—

निर्मथ्य यज्ञियात् काष्ठादानीतं वा द्विजालयात्॥
उत्तमोऽरणिजो ज्ञेय उत्तमः सूर्यकान्तिजः।
उत्तमः श्रोत्रियागारान्मध्यमः स्वगृहादपि॥

कात्यायनः—

न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम्।
स्वगर्भसत्क्रियार्थांश्च यावन्नासौ प्रजायते॥
अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः।
नहि पित्रा समानीतः पुत्रस्य भवति क्वचित्॥

स्वेऽग्नौ विवाहकालाद्याहृते स्वकीयेऽग्नौ, स्वगर्भसत्क्रियार्थान् निजगर्भसंस्कारार्थान् गर्भाधानादीन्, असौ गर्भः। समानीतो विवाहकालाद्याहृतः। दक्षिणतो ब्रह्मासन-

१. 'अपरिश्रुतः' इति पाठान्तरम्।

मास्तीर्य, अग्नेर्दक्षिणदिशि यज्ञियदारुमयं ब्रह्मण आसनम्। प्रागग्रैः कुशैराच्छाद्य, तथा च गोभिलः—"प्रागग्रान् दर्भानास्तीर्य्य" इति। अत्र च कण्ठतः सूत्रकारानुक्तमपि ब्रह्मोपवेशनमासनप्रकल्पनान्यथाऽनुपपत्त्या लभ्यते। नह्यदृष्टाय कश्चिदासनं प्रकल्पयति, ब्रह्मासनव्यपदेशानुपपत्तेश्च। तस्य च ब्रह्मणो वरणमाह कात्यायनः—"ब्रह्माणं वृणीते" इति। वरणञ्च गन्धादिदानद्वारा प्रीतिमुत्पाद्य कर्मकरणाय प्रेरणं स्वीकरणं वा। तत्र च "सर्वत्र प्राङ्मुखो दाता ग्रहीता च उदङ्मुखः" इति वचनाद् ब्रह्मण उदङ्मुखत्वं प्रतीयते, इत्थं वृतो ब्रह्माग्नेः प्रदक्षिणं कृत्वा स्वासने उत्तराभिमुख उपविशेत्। तथा च परिशिष्टान्तरे—"अग्नेणाग्निं परीत्य" इति कात्यायनः। अपरेणाहवनीयं दक्षिणाऽतिक्रामति, अपरेण पूर्वेण, दक्षिणा दक्षिणस्याम्। आहवनीयमिति प्रकृताभिप्रायम्, तथा ब्रह्मसदन आहवनीयमभिमुख उपविशति।

रेणुकः—

"कृताकृतावेक्षणार्थमस्मिन्नग्निमुखो विशेत्" इति।

अस्मिन् आसने।

गृह्यासंग्रहे—

द्यूते च व्यवहारे च प्रव्रते[1] यज्ञकर्मणि।
यानि पश्यन्त्युदासीनाः कर्त्ता तानि न पश्यति॥
एकः कर्मनियुक्तः स्याद् द्वितीयस्तन्त्रधारकः।
तृतीयः प्रश्नकं ब्रूयात्ततः कर्म समाचरेत्॥

कर्मनियुक्तः कृताकृतावेक्षणाय नियुक्तो ब्रह्मा। तन्त्रधारकः पुस्तकधारकः। प्रश्नवक्ता सदस्यः। गोभिलः—"अग्निमभिमुखो वाग्यतः प्राञ्जलिरास्ते आ कर्मणः पर्यवसानात्। नायज्ञियां वाचं वदेत्। यद्ययज्ञियां वाचं वदेत्तदा वैष्णवीमृचं यजुर्वा जपेत्। अपि वा नमो विष्णवे इत्येवं ब्रूयात्" इति। अयज्ञियां यज्ञानुपयुक्ताम्, यज्ञानुपयुक्तत्वं तु संस्कृतस्याप्यतदर्थत्वेन तदर्थकस्याप्यपभ्रंशत्वेन च। वैष्णवीमृचम् इदं विष्णुरित्येताम्, यजुर्वा विष्णोरराटमसीत्येतत्। यदा तु ब्रह्मा न भवति तदा कल्पान्तरमाह गृह्यान्तरम्—"एतेनैव कल्पेन छत्रमुत्तरासङ्गं सोदकमरण्डलुं दर्भबटुं वा ब्रह्मासने निधाय" इति।

---

१. प्रव्रते प्रकृष्टव्रते। 'प्रवृत्ते' इति पाठान्तरम्।

एतेनैव चेतनब्रह्मपक्षोक्तेनैव, दर्भबटुं कुशमयग्रन्थिम्। तन्निर्माणप्रकारमाह कालिका-पुराणम्—

द्विरावृत्त्याऽथ मध्ये वै अर्द्धवृत्त्यान्तदेशतः।
ग्रन्थिप्रदक्षिणावर्त्तः स ब्रह्मग्रन्थिसंज्ञकः॥ इति।

शान्तिदीपिकायाम्—

सप्तभिर्नवभिर्वापि सार्द्धद्वितयवेष्टितम्।
ओङ्कारेणैव मन्त्रेण द्विजः कुर्यात् कुशद्विजम्॥

गृह्यासंग्रहः—

पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन तु विष्टरः।
दक्षावर्त्तो भवेद् ब्रह्मा वामावर्त्तस्तु विष्टरः॥

अत्र सप्तभिरित्यादि प्रपञ्चनमात्रं न तु संख्यानियमः। उक्तं हि कात्यायनेन—

यज्ञवास्तुनि मुष्ट्याञ्च स्तम्बे दर्भबटौ तथा।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि॥ इति।

यज्ञवास्तुनि दर्भजूटिकाहोमे, मुष्ट्यां दर्भमुष्टिस्तृणातीत्यादौ, "स्तम्बे दर्भस्तम्बं निदधाति" इत्युक्ते, दर्भबटौ कुशमय्यां ब्रह्मप्रतिकृतौ, विष्टरास्तरणे प्रसिद्धे, अत एव "ब्राह्मणाभावे कुशान् ब्रह्माणं कुर्यात्" इत्येव पद्धतिकृल्लिखितम्, न तु कुश-संख्याऽभिहिता। समाचारोऽपि तथैव, भट्टनारायणादयोऽप्येवमाहुरिति दिक्।

प्रणीय, अप इति शेषः। तथा च सांख्यायनः—"अपः प्रणयति" इति। परि-शिष्टान्तरम्, चमसं प्रत्यगग्नेर्निधायाद्भिः पूरयित्वा, चमसं प्रणीतापात्रम्, ताश्चापः कुशैराच्छादनीयाः, "कुशैराच्छादिता अपः" इति गृह्यान्तरदर्शनात्, आच्छादनञ्च पतितादिभिस्तद्दर्शनं मा भूदित्येतदर्थमदृष्टार्थं वा। देवीपुराणम्—

"दक्षिणे स्थापयेद् ब्रह्म प्रणीताञ्चोत्तरेण तु"।

प्रणीतां प्रणीतानामपां पात्रम्। आश्वलायनगृह्यपरिशिष्टम्—उत्तरतोऽग्नेर्दर्भेषु निधाय, अत्र चमसमिति प्रक्रान्तम्। कात्यायनः—"अनुज्ञात उत्तरेणाहवनीयं सम्प्रति निदधाति"। उदपात्रमित्यनुवर्त्तते, अनुज्ञातो ब्रह्मणा, एतन्मूलक एव ब्रह्मणो मुख-मवलोक्येति पद्धतिकृतां लेखः। आहवनीयमिति प्रकृताभिप्रायम्। प्रणीतापात्रलक्षणं यथा यज्ञपार्श्वसंग्रहे—

"प्रस्थमात्रोदकग्राही प्रणीता चमसो भवेत्"

निगमे—

नैयग्रोधाश्चमसाश्चतुरस्राः प्रस्थोदकग्राहिणः।

यज्ञपार्श्वपरिशिष्टम्—

प्रणीता द्वादशाङ्गुल्या विस्तारेण षडङ्गुला।
चतुरङ्गुलखातः स्याच्चमसः परिकीर्त्तितः॥

तथा—

चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः"

कामनाभेदेन प्रणीतापात्रं विशेषयति कात्यायनः—"कांस्यवानस्पत्यमार्त्तिकैरभिचारब्रह्मवर्चसप्रतिष्ठाकामा यथासंख्यम्" इति। कांस्यवानस्पत्यमार्त्तिकैः चमसैः। परिस्तीर्य अग्नेः सर्वतो बर्हिः स्तृत्वा, सर्वतः स्तरणाच्चाग्नेयादीशानान्तमित्यादि क्रमेण सम्भवतीति पद्धतिषु तथा लेखः। यत्तु—दैवे कर्मणि प्रदक्षिणविधेः प्रवामनिषेधस्य च सकलसम्मतत्वादीशानादाग्नेयान्तम् अग्नितो ब्रह्मपर्यन्तं वायव्यान्नैर्ऋतान्तं प्रणीतातोऽग्निपर्यन्तं बर्हिस्तृणुयादित्युक्तम्, तदसत्, "प्राञ्च्युदञ्चि च कर्माणि सन्तिष्ठेरन्" इति श्रुत्या प्रागुदीचोः संस्थाविधानादर्थतः प्रत्यग्दक्षिणयोरुपक्रमसिद्धेः प्राग्रैः कुशैः परिस्तृणातीत्युपक्रम्य। सांख्यायनोऽपि—"सर्वाश्चावृतो दक्षिणा प्रवृत्तय उदक्संस्था भवन्ति" इति, आवृतः प्रक्रियाः। आश्वलायनोऽपि—"दिक्षु सर्वासूदक्संस्थाः प्राच्यादिषु परिस्तृतिः"। प्राञ्च्युदग्वेति कात्यायनश्रौतसूत्रभाष्ये श्रीदेवोऽप्याह—"परिस्तरणादिकमप्युत्तरतः समापनीयम्, त्रिरुल्लेखनाद्यपि प्राक्संस्थमुदक्संस्थं वा" इति। एवमेव हरिशर्मपशुपतिरामदत्ताचार्यचूडामणिरघुनन्दनप्रभृतयः। अत एव धर्मकोषादिनिबन्धेषु भूपालवराहधर्मकरादिपद्धतिषु च बर्हिर्मुष्टिं चतुर्द्धा विभज्य एकेन भागेनाग्नेयादीशानान्तं ब्रह्मणोऽग्निपर्यन्तं नैर्ऋताद्वायव्यान्तम् अग्नितः प्रणीतापर्यन्तमिति यथाव्यवहारमेव लिखितमित्यलं पल्लवेन।

अर्थवदासाद्य तत्तत्कर्मोपयोगिद्रव्यं स्थापयित्वा। स्थापनञ्च कार्यक्रमेण, [1]मुख्यक्रमानुरोधात्। अत एव क्रमेणासादनीयानीति रामदत्तः। कर्मप्रदीपे कात्यायनः—

१. श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिसंज्ञकेषु क्रमबोधकप्रमाणेषु पञ्चमं प्रमाणं मुख्यक्रमः। मुख्यक्रमो नाम प्रधानक्रमानुरोधेन योऽङ्गानां क्रमस्तेन पदार्थानां क्रमो निश्चीयते। अत्रापि यत्पदार्थजन्यं कार्यं प्रथमं भवति तत्पदार्थस्य प्रथममासादनम्, अयमेव मुख्यक्रम इति ज्ञेयम्।

प्राञ्चं प्राञ्चमुदगग्नेरुदगग्रं समीपतः ।
तत्तथासादयेद् द्रव्यं यद्यथा विनियुज्यते ॥

कातीयश्रौतसूत्रम्—"पश्चादुत्तरतो वा"

कारिकायाम्—

"पश्चादुत्तरतो वा स्यात्पात्रासादनमग्नितः"

पवित्रे कृत्वा समे अप्रशीर्णाग्रे प्रादेशमात्रे अनन्तर्गर्भे कुशपत्रे कुशैश्छित्त्वा। तथा च कात्यायनः—"कुशौ समावप्रसीर्णाग्रावनन्तर्गर्भौ कुशैश्छिनत्ति" इति। कुशौ कुशपत्रे। तथा—

"समित्पवित्रं वेदश्च त्रयं प्रादेशसंमितम्"

पवित्रञ्च स्तृतकुशेभ्यो न ग्राह्यम्,

"स्तृतेभ्यो न विप्रचिनुयाद्यातयामं स्तृतं स्मृतम्"

इति गृह्यासंग्रहवचनात्।

पिण्डार्थे ये स्तृता दर्भाः स्तरणार्थे तथैव च।
कृते धृताश्च विण्मूत्रे त्यागस्तेषां विधीयते ॥

इति कात्यायनवचनाच्च, विनियुक्तविनियोगविरोधाच्च। अत एवाह कात्यायनः—अन्ये वाऽयुक्तत्वादिति। अयुक्तत्वादविनियुक्तत्वादन्ये एव तृणे आदाय तिरश्चीनिधेयेन स्तृतस्य बर्हिष इति तदर्थः। अपि चेत्थं कर्मान्तरे पत्रान्तरपरिग्रहमभिधाय पवित्रार्थमपि पत्रान्तरपरिग्रहमाह स एव—"अन्यत्रापि तृणार्थे"इति, पवित्रादाविति तदर्थः। अत एव पवित्रकरणार्थं कुशपत्रद्वयमिति पृथगेव तदासदनं रामदत्तादिभिर्लिखितम्। ननु पवित्रे इति द्विवचनेन पवित्रद्वयं प्रतीयते। पवित्रञ्च पत्रद्वयात्मकं वक्ष्यमाणकात्यायनवचनात्। इत्थञ्च प्रकृते पत्रचतुष्टयं तावल्लभ्यते, तथा च सम्प्रदायविरोध इति चेन्न, प्रकृते पवित्र-पदस्य पवित्रैकदेशपत्रपरत्वात्तत्र च द्विवचनार्थद्वित्वान्वयेन पत्रद्वयस्यैव लाभात्, विवेककारादयोऽप्येवम्। अत एव "प्रादेशमात्रे पवित्रे कुरुतः" इति गोभिलसूत्रे 'प्रादेशमात्रे' इत्युपदानं सार्थकम्, अन्यथा तत्रापि पवित्रपदस्य मुख्यपरत्वे तद्वैयर्थ्य-मापद्यते, प्रादेशमात्रपत्रद्वयावयवकसमुदायशक्तपवित्रपदादेव प्रादेशमात्रत्वलाभात्। मम तु प्रकृतवत्तत्रापि पवित्रपदस्य स्वशक्यावयवपत्रपरत्वेन तत्प्रमाणज्ञापनार्थं तत्सार्थक्यम्। अत एव "देवस्त्वा"इति मन्त्रे पवित्रेणेत्येकवचनम्। इत्थञ्च "पवित्रे स्थः"

इत्यादौ यत्र यत्र द्विवचनं तत्र सर्वत्र पवित्रावयवपत्रपरमेव पवित्रपदमवगन्तव्यम्। अत एव—

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥

इति पवित्रलक्षणमभिधाय "आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु" इति कात्यायनेनोक्तम्, तेन चैकमेव पवित्रमत्रापीति स्पष्टं प्रतीयते, अत्र च यत्र कुत्रचिदित्यनेनैवाज्योत्पवनेऽपि पवित्रनिर्णयसम्भवे आज्यस्योत्पवनार्थं यदिति पुनरभिधानं "पवित्रे कुरुतः" इति गोभिलसूत्रे द्विवचनदर्शनेन पवित्रद्वयशङ्कानिरासार्थमिति दिक्। अनन्तर्गर्भिणं अन्तर्गतिगर्भशून्यं गर्भिभिन्नमिति यावदिति केचित्। परे त्वन्तर्गतो गर्भो यस्य तदन्तर्गर्भं गर्भिदलम्, न त्वन्तर्गतो गर्भ इति कर्मधारयः, अन्तःपदवैयर्थ्यात् तदस्यास्तीत्यन्तर्गर्भि, गर्भात्तृतीयदलम्, तद्भिन्नमनन्तर्गर्भिणं चतुर्थदलम्, आर्षत्वाद्विभक्तेरलुक्। न चैवं गर्भगर्भिणोरुपादानप्रसङ्ग इति वाच्यम्, धर्मिपारतन्त्र्येण तयोरपि भेदावगमात्, अत एव गर्भो गर्भि अन्तर्गर्भि चैतत्त्रितयं त्यक्त्वा चतुर्थं ग्राह्यमिति महार्णववादयः। कुशौ समावप्रशीर्णाग्रावनन्तर्गर्भावित्युपदर्शितकातीयसूत्रेऽप्यनन्तर्गर्भावित्यस्य अन्तर्गतो गर्भो यस्य सोऽन्तर्गर्भः, न विद्यतेऽन्तर्गर्भो ययोस्तावनन्तर्गर्भौ चतुर्थावित्येवार्थः, निरुक्तवचनैकवाक्यत्वानुरोधात्, एवमच्छिन्नाग्रे अनन्तर्गर्भे प्रादेशेन मापयित्वा कुशैश्छिनत्तीति सांख्यायनसूत्रमप्येतदर्थकमेवेत्याहुः। दलानामुपादाने नियमो नास्त्येव, वाक्यस्य गर्भविशिष्टोपादाननिषेधपरत्वादित्येके। प्रोक्षणीः संस्कृत्य प्रोक्षणसाधनीरपः संस्कृताः कृत्वा। संस्कारप्रकारमाह कात्यायनः—"अपः कृत्वा ताभ्यामुत्पुनाति"। "अपः कृत्वा प्रणीताभिरुदकार्थः" इति वचनात् सन्निधानाच्च प्रणीतोदकं प्रोक्षणीपात्रे निधाय ताभ्यां पवित्राभ्यामुत्पुनाति ऊर्ध्वं नीत्वा क्षिपेदित्यर्थः। आश्वलायनगृह्यपरिशिष्टम्—प्रोक्षणपात्रमुद्धृत्य पवित्रमन्तर्द्धायाप आसिच्य तूष्णीं ताः पवित्राभ्यां त्रिरुत्पूय। उत्पवनञ्च द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा विधेयम्, उदग्राभ्यां पवित्राभ्यामङ्गुष्ठाभ्यां चोपकनिष्ठिकाभ्यामङ्गुलिभ्यामभिसंगृह्येति गृह्यान्तरदर्शनात्। द्विवचनं पाणिद्वयलाभार्थम्, एकहस्ताङ्गुष्ठानामिकाभ्यां मूलदेशेऽपरहस्ताङ्गुष्ठानामिकाभ्यामग्रदेशे पवित्रधारणमिति निबन्धारः।

शौनकः—

कृत्वा पवित्रे आसिच्य वारिप्रोक्षणभाजने।
उत्पुनीयात् पवित्राभ्यामपस्तूष्णीं त्रिरेव तु॥

कात्यायनः—सव्ये कृत्वा दक्षिणेनोदिङ्नयति। प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षिणहस्तेनाप ऊर्ध्वं चालयेदित्यर्थः। तथा—तासां प्रोक्षणम्, तासां प्रोक्षणीनामपां प्रोक्षणं प्रणीतोदकेनोत्तानहस्तेन सेचनं कार्यमित्यर्थः। गृह्यकारिकायाम्—

प्रोक्षणीपात्रमादाय प्रणीताग्रे विमोचयेत्।
ततः पवित्रं संगृह्य पाणिभ्यां प्रोक्षणीं तथा॥
पूरयेत्त्रिर्जलेनैव इत्येवं पारिभाषिकम्।
उत्पवेतोदिङ्नयेच्च त्रिस्त्रिवारं क्रमेण च॥

प्रोक्षणीपात्रलक्षणं यथा यज्ञपार्श्वसंग्रहे—

वैकङ्कतं पाणिमात्रं प्रोक्षणीपात्रमुच्यते।

वैकङ्कतो वृक्षविशेषः। अत्र प्रोक्षणीपात्रे पवित्रयोर्निधानमाह कात्यायनः—ताः स्थानं तयोरिति। ताः प्रोक्षण्य आपः, तयोः पवित्रयोः। गदाधरादयोऽप्येवम्। अन्ये तूदिङ्नयनात्प्रागेव तत्र पवित्रनिधानमाहुः। अर्थवत्प्रोक्ष्य यथासादितमुपयोगि-पदार्थजातं प्रोक्षणीभिरद्भिरुत्तानहस्तेनाभिषिच्य। कातीयश्रौतभाष्ये श्रुतिः—पवित्राभ्यामेताः प्रोक्षणीरुत्क्षिप्योत्पूय ताभिः प्रोक्षतीति। अत्र प्रोक्षणानन्तरमग्नि-प्रणीतयोर्मध्ये प्रोक्षणीपात्रनिधानम्, असञ्चरे प्रोक्षणीर्निधायेति कात्यायनोक्तेः। असञ्चरे प्रणीताग्न्योर्मध्ये, नान्तरेण गच्छेयुरिति कात्यायनेन तत्र सञ्चरणनिषेधात्। रेणुकोऽप्याह—असञ्चरः प्रणीताग्न्योरन्तरा परिकीर्त्तितः। निरुप्याज्यम्, औपयिक-मासादितमाज्यं स्थाल्यां प्रक्षिप्य, आज्यपदं स्थालीपाकादेरप्युपलक्षणम्, तेन चरुश्चेत्तह्यत्र तण्डुलानामपि स्वस्थाल्यामावापः। तत्र कर्मणो दैवत्वादिभेदेन तण्डुलानां प्रक्षालनभेदमाह गृह्यान्तरम्—तण्डुलांस्त्रिर्देवेभ्यः प्रक्षालयेदित्याहुर्द्विर्मनु-ष्येभ्यः सकृत्पितृभ्य इति। रेणुकः—प्रणीतमुदकं कृत्वा चरुस्त्रिःक्षालितं क्षिपेत्। हविर्विशेषाकाङ्क्षायां गृह्यान्तरम्—अथ हविर्निःक्षिपति व्रीहीन् वा यवान् वेति। एतदलाभे शाल्यादिकमपि। तथा च कात्यायनः—

यथोक्तवस्त्वसम्पत्तौ ग्राह्यं तदनुकारि यत्।
यवानामिव गोधूमा व्रीहीणामिव शालयः॥ इति।

कारिकायाम्—

तण्डुलाश्च तथा शुभ्रा अखण्डाः सुमनोहराः।
त्रिःक्षालिताः क्रमेणैव स्थाल्यां तान्निर्वपेत्तथा॥

निर्वापप्रमाणे कात्यायनः—

यावतो होमनिर्वृत्तिर्भवेद्या यत्र कीर्त्तिता।
शेषञ्चैव भवेत्किञ्चित्तावन्तं निर्वपेच्चरुम्॥

आज्यस्थालीं लक्षयति स एव—

आज्यस्थाली तु कर्त्तव्या तैजसद्रव्यसम्भवा।
माहेयी वापि कर्त्तव्या नित्यं सर्वाग्निकर्मसु॥
आज्यस्थाल्याः प्रमाणं तु यथाकामं तु कारयेत्।
सुदृढामव्रणां भद्रामाज्यस्थालीं प्रचक्षते॥

माहेयी मृण्मयी चरुस्थाली। लक्षणं यथा यज्ञपार्श्वसंग्रहे—

तिर्यगूर्द्ध्वसमिन्मात्रा दृढा नातिबृहन्मुखी।
मृण्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते॥
कुलालचक्रघटितमासुरं मृण्मयं भवेत्।
तदेव हस्तघटितं स्थाल्यादि खलु दैविकम्॥

तिर्यगूर्द्ध्वसमिन्मात्रा विशालतोच्चैस्त्वाभ्यां प्रादेशप्रमाणा, औदुम्बरी ताम्रमयी, अधिश्रित्य तदाज्यमग्नौ स्थापयित्वा, चरुश्चेत्तर्हि तस्याप्यधिश्रयणम्। तत्र चरुसद्भावे आज्याधिश्रयणं ब्रह्मणा कार्यम्, "आज्यमधिश्रयत्यन्ये" इति कात्यायनोक्तेः। संग्रहकारिकायाम्—"वह्नेर्दक्षिणदिग्भागे आज्याधिश्रयणं भवेत्"।

मध्ये चरुश्रपणं पाकयोग्यत्वादिति गौडाः। उत्तरत इत्यपरे।

कात्यायनः—

स्वशाखोक्तविधिस्विन्नो ह्यदग्धोऽकठिनः शुभः।
न चातिशिथिलः पाच्यो न च वीतरसश्चरुः॥

वीतरसो गालितमण्डः। पर्यग्निकुर्यात् ज्वलत्तृणादिकमाज्यस्य परितो भ्रामयेदित्यर्थः। श्रौतेऽपि—तृणेनावज्योत्य, तृणेन ज्वलितेन दर्भाग्रेणावज्योत्य हविः संप्रकाश्येत्यर्थः। चरुश्चेत्तमपि पर्यग्निकुर्यात्, उपलक्षणार्थत्वादाज्यस्य।

कारिकायाम्—

तत्रोल्मुकञ्च संगृह्य नैर्ऋत्याश्च प्रदक्षिणम्।
पर्यग्नि कारयेत्पश्चादित्येवं पारिभाषिकम्॥

परिशिष्टान्तरम्—उल्मुकं निरस्य, वह्नाविति शेषः। स्रुवं प्रतप्य सम्मृज्याभ्युक्ष्य पुनः प्रतप्य निदध्यात्। अग्नौ स्रुवं तापयित्वा दर्भैः सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्तापयित्वा निदध्यादित्यर्थः। सम्मार्जनप्रकारमाह कात्यायनः—स्रुवं प्रतप्य पूर्ववद्वेदाग्रैरन्तरतः प्राक्संमार्ष्टि। वेदाग्रैः संमार्जनकुशाग्रैः। प्राक् प्रागपवर्गम्, परिशिष्टान्तरम्—स्रुवं सव्येन धारयन् दक्षिणेन पाणिना दर्भाग्रैः प्रागपवर्गं परिमृज्य। कात्यायनः—

प्राक्शस्तेषां कुशैः कार्यः संप्रमार्गो जुहूषता।
प्रतापनञ्च लिप्तानां प्रक्षाल्योष्णेन वारिणा॥

तेषां स्रुवादीनाम्। कातीयश्रौतसूत्रम्—विपर्यस्य बर्हिर्मूलैः। तथा संमार्जनान्यपास्यति, संमार्जनान् संमार्जनकुशान्। कुशोपरि स्रुवधारणमाह परिशिष्टान्तरम्—बर्हिष्यासाद्येति। स्वदक्षिणतः स्रुवधारणमिति रामदत्तादयः। उत्तरत इति परे।

कारिकायाम्—

अर्द्धशृतं चरुं ज्ञात्वा स्रुवं चोपप्रतापयेत्।

तथा—

प्रतापयेत्ततो वह्नौ रक्षसां वारणाय च॥
स्रुवखाते च ये सन्ति पापिष्ठाः पापयोनयः।
वह्निप्रतापिताः सर्वे भस्मीभवन्ति तत्क्षणात्॥

अत एवाधोमुखस्य प्रतपनं निबन्धृभिर्लिखितम्, तथा सति खाततापस्य सुकरत्वात्। स्रुवसंस्कारोऽयं होमार्थः। स्रुवलक्षणं यथा यज्ञपार्श्वसंग्रहे—

अङ्गुष्ठपर्ववृत्तास्योऽरत्निमात्रः स्रुवो भवेत्।
पुष्करार्द्धं भवेत्खातं पिण्डिकार्द्धं स्रुचस्तथा॥

पिण्डिकार्द्धं मुष्टयर्द्धम्। खादिरो हस्तमात्रोऽङ्गुष्ठपर्वमात्रखातः स्रुव इति स्मृतिपरिभाषाकारः। विशेषमाह श्रीदेवभाष्ये आपस्तम्बः—वैकङ्कत्यामिहोत्रहवणीबाहुमात्र्यरत्निमात्री वा प्रसृताकृतिरिति। अग्निहोत्रहवणी स्रुक् स्रुवश्च, प्रसृताकृतिः आकुञ्चितपाणयाकृतिः। हस्तप्रमाणो हस्ताकृतिः स्रुव इति स्मृतिसुधाकरः। प्रकारान्तरं यथा ग्रहयागपद्धतौ—

खादिरं तु स्रुवं विद्याच्चतुर्विंशाङ्गुलं बुधः।
चतुर्थांशेन पाणिः स्यात्तावता कलशौ स्मृतौ॥

सभूषणौ भागयुगे गण्डी कार्या सुवर्त्तुला।
एकाङ्गुलोऽत्र कण्ठः स्यात्ततस्त्र्यङ्गुलहानियुक्॥
हस्तो निकुब्जाङ्गुलिको मध्यन्दिनकराकृतिः।
समस्ताङ्गुलिसंलग्नाश्चतस्रोऽङ्गुलयोऽन्तरे॥
बहिः किञ्चिद्विभिन्नाः स्युरङ्गुष्ठस्तलसंस्थितः।
अनामिका मध्यपर्वोर्द्ध्वाधोरेखागतं भवेत्॥
पवित्रञ्चाङ्गुरीयञ्च पाणेस्तलगतं भवेत्।
अङ्गुष्ठपृष्ठसंलग्नं पुष्करं नखतः पृथक्॥
तन्मध्ये निखनेत्कूपं कर्षाज्यग्रहणोत्तमम्।
कलशौ तत्र कर्त्तव्यौ मणिबन्धे परान्तिके॥
प्रथमं त्र्यङ्गुलं विद्याद् द्वितीयं चतुरङ्गुलम्।
तयोः पार्श्वेषु कार्याणि कङ्कणानि विशारदैः॥ इति।

आज्यमुद्वास्योत्पूयावेक्ष्य अग्नेः सकाशादाज्यमवतार्य पवित्राभ्यामुत्पूय तदाज्यमवलोक्येत्यर्थः। आश्वलायनः—पवित्राभ्यामाज्यस्योत्पवनम्, उद्वासितस्याज्यस्य स्वाग्रे निधानं होत्रग्न्योरन्तरा आज्यहविषी आसादयेदिति वचनात्। यदि तत्रापद्रव्यसम्भवस्तर्हि तन्निरस्येत्। तथा च श्रौतसूत्रम्—निरस्यत्यन्यदिति।

गृह्यासंग्रहः—

अग्निना चैव मन्त्रेण पवित्रेण च चक्षुषा।
चतुर्भिरेव यत्पूतं तदाज्यमितरद् घृतम्॥
घृतं वा यदि वा तैलं पयो वा दधि यावकम्।
आज्यस्थाननियुक्तानामाज्यशब्दो विधीयते॥

तथा—

यथा सीमन्तिनी नारी पूर्वगर्भेण संस्कृता।
एवमाज्यस्य संस्कारः पूर्वेणैवोत्तरस्य तु॥

एवञ्च यत्किञ्चिदवशिष्टे संस्कृते घृतादौ यदि पुनर्घृताद्यन्तरप्रवेशनं तदा न तत्र संस्कारापेक्षा सर्वापचारे पुनस्तदपेक्षैव तत्र संस्काराभावादिति मुरारिमिश्रादयः। अन्ये तु सर्वापचारेऽपि न संस्कारापेक्षा पात्रस्य संस्कृतत्वात् पात्रसंस्कारकत्वाच्चास्येत्याहुः। अत्र चरुश्चेत्तदाज्योद्वासनोत्तरं तस्योद्वासनम्। तत्राग्नेः सकाशादाज्यं

गृहीत्वा चरोः पूर्वेण नीत्वा स्वपुरतो निधाय चरुमादायाज्यपश्चिमेन नीत्वा आज्यादुत्तरतो निदध्यात्, अन्तर्बहिर्भावविधाने हविषाञ्च यथापूर्वमिति कात्यायनेन परिभाषणात्।

रेणुकः—

चरोरानीय पूर्वेण घृतमुद्वासयेत्ततः।
आज्यस्य पश्चादानीय चरुं तस्योत्तरे न्यसेत्॥

प्रोक्षणीश्च पूर्ववद् उत्पूयेति सम्बद्ध्यते, न तूद्वास्येत्यपि, अधिश्रयणाभावात्। नाप्यवेक्ष्येत्येतत्, पूर्ववदित्युक्तेः। नहि पूर्वं प्रोक्षणयवेक्षणं विहितम्। यथा पवित्राभ्यां पूर्वमुत्पूतास्तथोत्पूयेत्यर्थः। प्रोक्षणीसंस्कारोऽयं पर्युक्षणार्थः। उपयमनान् कुशानादाय उपग्रहार्थं ये दर्भास्ते उपयमनास्तान् कुशानादाय दक्षिणपाणिना गृहीत्वा सव्ये निधाय।

"सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः"

इति वचनात्। समिधोऽभ्याधाय, तिस्रः समिधोऽग्नौ तूष्णीं प्रक्षिप्य। इदञ्चोत्तिष्ठता कार्यम्—उत्तिष्ठन् समिधः सर्वत्रेति कात्यायनोक्तेः। समिधां घृताक्तत्वमिन्धनार्थत्वात्। समिल्लक्षणं यथा स्मृत्यर्थसारे—

सत्वचः समिधः कार्या ऋजुश्लक्ष्णाः समास्तथा।

कात्यायनः—

नाङ्गुष्ठादधिका ग्राह्या समित्स्थूलतमा क्वचित्।
न वियुक्ता त्वचा चैव न सकीटा न पाटिता॥
प्रादेशान्नाधिका नोना न तथा स्याद्विशाखिका॥
न सपर्णा न निर्वीर्या होमेषु च विजानता॥

विशाखिका विविधशाखायुक्ता, निर्वीर्या निस्सारा। चिन्तामणौ—

विशीर्णा विदला ह्रस्वा वक्रा ससुषिरा कृशा।
अतिस्थूलाऽतिदीर्घा च समित्कार्यविनाशिनी॥
प्रादेशान्नाधिका नोना समित्स्यात् सर्वकर्मसु॥

विदला समिन्निर्माणपूर्वं पत्ररहिता। ससुषिरा सच्छिद्रा। समिदधिकारे ब्रह्मपुराणम्—

पलाशाश्वत्थन्यग्रोधप्लक्षवैकङ्कतोद्भवाः ।
अश्वत्थोदुम्बरौ बिल्वश्चन्दनं सरलस्तथा ।
सालश्च देवदारुश्च खदिरश्चेति यज्ञियाः ॥

वैकङ्कतो विकङ्कतः स्रुवावृक्षः 'कटैआ' इति लोके प्रसिद्धः । अश्वत्थस्य पुनरुपादानं प्राधान्यसूचनार्थमिति निबन्धारः । गदाधरभाष्ये स्मृतिः—

समित्पवित्रं वेदश्च त्रयः प्रादेशसंमिताः ।
इध्मस्तु द्विगुणः कार्यस्त्रिगुणः परिधिः स्मृतः ॥

मरीचिः—

प्राग्ग्राः समिधो देयाः पुष्ट्यर्थं हि विजानता ।
शान्त्यर्थेषु सशल्काग्रा विपरीता जिघांसता ॥

सशल्का सत्वचा । जिघांसता मारणादिकर्म कुर्वता पूर्वोक्तविपरीता देयेत्यर्थः । पर्युक्ष्य सपवित्रेण सर्वेण प्रोक्षणीयुदकेन प्रदक्षिणमग्निं परिषिञ्चेत्यर्थः । रेणुकः—

सपवित्रेण हस्तेन प्रोक्षणीपात्रवारिणा ।
पर्युक्षणं भवेदग्नेरशेषेण प्रदक्षिणम् ॥

चुलुकगृहीतेन प्रोक्षणीयुदकेनेत्येके । ततः प्रणीतापात्रे पवित्रनिधानम् । तथा च कात्यायनः—पवित्रे निधाय प्रणीतास्विति । कारिकायाम्—

संस्रवार्थं तु तत्पात्रं कौबेर्यां दिशि मुञ्चयेत् ।
प्रणीतादक्षिणे भागे इत्येवं पारिभाषिकम् ॥

तत्पात्रं प्रोक्षणीपात्रम् । जुहुयात् वक्ष्यमाणहोमं कुर्यादित्यर्थः । होमविधौ विशेषमाह कात्यायनः—

पाणयाहुतिर्द्वादशपर्वपूरिका स्रुवादिना चेत्स्रुवपात्रपूरिका ।
दैवेन तीर्थेन च हूयते हविः स्वङ्गारिणि स्वर्चिषि तच्च पावके ॥

स्रुवादिनेत्यादिपदेन कंसादिपरिग्रहः, दधिपयोयवागूभिर्यदा होमस्तदा कंसेन चरुस्थाल्यां स्रुवेण वेति गोभिलीये तस्याप्याहुतिकरणत्वाभिधानात् । क्वचिद्रसादिनेति पठितं तदयुक्तम्, हविराधारपाठसाहचर्यविरोधादिति नारायणः । स्रुवपात्रं स्रुवस्थपुष्करः । दैवं तीर्थमङ्गुल्यग्रम् । तथा च याज्ञवल्क्यः—

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रे करस्य तु ।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् ॥

हारीतः—

अङ्गुष्ठस्योत्तरतो रेखा ब्राह्मं तीर्थं कनिष्ठायाः पश्चात्प्राजापत्यम् अग्रेऽङ्गुलीनां दैवम् अङ्गुष्ठप्रदेशिन्योरन्तरा पित्र्यं मध्ये आग्नेयम्। मध्ये पाणिमध्ये। तथा— आवपनहोमतर्पणानि प्राजापत्ये कुर्यात्, मार्जनार्चनबलिकर्मभोजनानि दैवेन, पित्र्यर्थान् पित्र्येण, प्रतिग्रहमाग्नेयेन गृह्णीयात्।

अत्र होमो लाजादिहवनम्—

बलायुर्दाररेखासु सोमतीर्थं तु मध्यमम्।
लाजादिहवनं तेन कर्त्तव्यं वपनं तथा॥

इति ब्रह्मपुराणसंवादात्। अतो दैवेन तीर्थेन च हूयते हविरिति कात्यायनसामान्यवचनेन न विरोधः। एवं तर्पणपदं सनकादितर्पणपरमिति न देवतर्पणाद्यतिप्रसक्तिः।

देवीपुराणे—

न मुक्तकेशो जुहुयान्नानिपातितजानुकः।
अनिपात्य बहिर्जानू राक्षसैर्हूयते हविः॥

कात्यायनः—

योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः।
मन्दाग्निरामयावी च दरिद्रश्च स जायते॥
तस्मात् समिद्धे होतव्यं नासमिद्धे कदाचन।
आरोग्यमिच्छतायुश्च श्रियमात्यन्तिकीं तथा॥

व्यङ्गारिणि गताङ्गारे, आमयावी दीर्घरोगी। आदित्यपुराणे—

क्षुत्तृट्क्रोधत्वरायुक्तो हीनमन्त्रैर्जुहोति यः।
अप्रवृद्धे सधूमे वा सोऽन्धः स्यादन्यजन्मनि॥

क्षुदिति लोभादेरप्युपलक्षकम्, जुहोतीति च देवपूजादेरिति रत्नाकरः।

तथा—

स्वल्पे रूक्षे सस्फुलिङ्गे वामावर्त्ते भयानके।
आर्द्रकाष्ठैः सुसम्पूर्णे फूत्कारवति पावके॥
कृष्णार्चिषि सुदुर्गन्धे तथा लिहति मेदिनीम्।
आहुतीर्जुहुयाद्यस्तु तस्य नाशो भवेद् ध्रुवम्॥

गृह्यासंग्रहः—

सप्तजिह्वा भवन्त्येता हुताशनमुखोद्गताः ।
याभिर्हव्यं सदाऽश्नन्ति हुतं सम्यग्द्विजोत्तमैः ॥
पावकस्य मुखं वक्ष्ये यदुक्तं पद्मयोनिना ।
सप्तजिह्वाप्रमाणं तु वर्त्तुलं मुखमण्डलम् ॥
करालो धूमिनी श्वेता लोहिता महालोहिता ।
सुवर्णा पद्मरागा च सप्तैताः परिकीर्त्तिताः ॥
करालीं रक्षांस्यश्नन्ति धूमिनीमसुरास्तथा ।
श्वेतां नागाः समश्नन्ति पिशाचा लोहितां तथा ॥
महालोहिताञ्च गन्धर्वाः सुवर्णाञ्च यमास्तथा ।
पद्मरागां तथा देवाः ख्यातां जिह्वां हुताशने ॥
तस्यां तु होमयेन्नित्यं सुसमिद्धे हुताशने ।
एताश्चोक्ताः समासेन ज्ञातव्याश्च द्विजोत्तमैः ॥

करालीमित्यादौ तृतीयार्थे द्वितीया । होमक्रियाबहिर्भूतशब्दाभिलापश्च जुह्वतो लक्ष्मीविनाशकः, तथा च मनुः—

स्नातस्य वरुणस्तेजो जुह्वतोऽग्निं श्रियं हरेत् ।
भुञ्जानस्य यमस्त्वायुस्तस्मान्न व्याहरेत् त्रिषु ॥

योगियाज्ञवल्क्यः—

स्त्रीशूद्रपतितांश्चैव रासभञ्च रजस्वलाम् ।
जपकाले न भाषेत ब्रह्महोमादिकेषु च ॥

स्त्रीपदेनैव रजस्वलायाः संग्रहे पुनस्तदुपादानं दोषाधिक्यसूचनार्थम् । अङ्गिराः—

सन्ध्ययोरुभयोर्जप्ये भोजने दन्तधावने ।
पितृकार्येषु दैवेषु तथा मूत्रपुरीषयोः ॥
गुरूणां सन्निधौ दाने योगे चैव विशेषतः ।
एषु मौनं समातिष्ठन् स्वर्गं प्राप्नोति मानवः ॥

अत्र तत्तत्कर्मानुपयुक्तवचनाभावो मौनं न तु सर्वथा वचनाभावः, मन्त्रपाठादेरावश्यकत्वात् । अनुपयुक्तत्वञ्चातदर्थत्वेन तदर्थस्याप्यपभ्रंशत्वेन चेति बोध्यम् । क्वचिन्मौनानकल्पमाह बौधायनः—मौनयुक्तस्त्रैविद्यवृद्धैराचार्यवृद्धैर्मुनिभिरन्यैर्वा सुव्रतै-

बहुश्रुतैर्दन्तैर्दन्तान् सन्धायान्तर्मुख एव यावदर्थं सम्भाषेत न यन्त्रलोपो भवतीति विज्ञायते। यन्त्रलोपो नियमभङ्गः। वह्निसन्दीपनञ्च हस्तादिभिर्निषिद्धम्, तथा च कात्यायनः—

जुहूषंश्च हुते चैव पाणिशूर्पस्फ्यदारुभिः।
न कुर्यादग्निधमनं कुर्याच्च व्यजनादिना॥
मुखेनैव धमेदग्निं मुखादेषोऽध्यजायत।
नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत्॥

जुहूषन् होतुमिच्छन् हुते वा पाणयादिना वह्निसन्दीपनं न कुर्यात्, किन्तु व्यजनादिनैव कुर्यादिति पूर्ववचनार्थः। कुर्याच्चेति चकारोऽवधारणे। इत्थं स्वमतमभिधाय मतान्तरमुपन्यस्यति—"मुखेनैव" इति, मुखादग्निरजायतेति श्रुतेरग्नेर्मुखप्रभवत्वान्मुखेनैव सन्दीपनमौचित्यात् "नाग्निं मुखेनोपधमेत्" इति श्रुतेरसंस्कृताग्निविषयत्वेन योजनादित्यर्थः। इदञ्च न स्वमतम्, "कुर्याच्च व्यजनादिना" इति सिद्धान्तिते आकाङ्क्षानिवृत्तौ मुखेनेति पुनरभिधानायोगात्, मुखेनैवेत्येवकारेण "कुर्याच्च व्यजनादिना" इत्यस्य विरोधाच्च; योजयन्तीति प्रथमपुरुषप्रयोगेण तस्य परमतत्वसूचनाच्च, योजयन्ति न तु योजयाम इति प्रत्ययात्। एतेनैवास्मिन्मतेऽनास्थापि सूचिता, तद्बीजं तु "नाग्निं मुखेनोपधमेत्" इति सामान्यश्रुतेर्विशेषविषयत्वोपगमे मानाभावः "मुखादेषोऽध्यजायत" इति हेतुतया यदुपन्यस्तं तल्लौकिकेऽपि तुल्यम्, औचित्यमात्रस्य श्रुतिसङ्कोचकत्वञ्च नोचितम्; अत एव देवीपुराणे आचाराध्याये—

न सूर्यमवलोकेत उदयास्तमये क्वचित्।
न मुखेन धमेदग्निं न च व्यालांस्तु लङ्घयेत्॥

इति सामान्यत एव मुखधमनं प्रतिषिद्धम्, किञ्च मुखधमननिषेधकानामवश्यसङ्कोचनाग्रहे संस्कृताग्निविषयत्वेनैव व्यवस्थानं युक्तम्, तत्रैव वैधावैधविचारावश्यकत्वात्। अत एवासंस्कृतेऽग्नौ, मुखधमनाचारस्य संस्कृते तदभावाचारस्य सार्वलौकिकस्योपपत्तिः। अत एव मत्स्यपुराणे यज्ञोपकरणकथने—"व्यजनं वाससी शुभ्रे ताम्रपात्रे सुविस्तरे" इति वह्निसन्धुक्षणार्थं व्यजनासादनमुक्तम्। तत्र व्याख्यातृभिरपि व्यजनमग्निसन्धुक्षणायेति लिखितम्। इत्थञ्च "मुखेनैव धमेदग्निम्" इति परमतमयुक्तञ्चेति स्थितम्। अत एव आशादित्येन—" "मुखेनैव धमन्त्यग्निम्" इत्यत्र मुखेनैव धमन्त्यग्निम् 'इत्येके' इत्युपात्तम्, "पाणिसूर्पस्फ्यदारुभिः" इत्यत्र "पाणिशूर्पास्फ्यदारुभिः"

रिति च पठितम्, युक्तञ्चैतत् पाणिशूर्पस्फ्यदारुभिरिति पाठे स्फ्यपदोपादान-वैयर्थ्यात्, दारुपदेनैवोपग्रहात्। वर्द्धमानादयोप्येवम्। "न कुर्याद्व्यजनादिना" इति क्वाचित्कः पाठोऽप्रामाणिकः, हेमाद्रिप्रभृतिबहुनिबन्धविसंवादात्। अत एव महादाननिर्णये वाचस्पतिमिश्रः—वह्निसमिन्धनञ्च पाणिशूर्पस्फ्यदारुभिर्निषिद्धं व्यजनादिना तु विहितमिति लिखितवन्तः। अस्तु वा व्यजननिषेधो मायूरव्यजन-परः, "पक्षकेन भवेद्व्याधिः" इति वचनान्तरसंवादात्। मुरारिमिश्रादयोऽप्येवमित्यलं पल्लवितेन।

तथा—

होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः।
पाणिनैवेतरस्मिंस्तु स्रुचा चात्र न हूयते॥

अनादेशे विशिष्यानभिधाने, इतरस्मिन् द्रवद्रव्यातिरिक्ते हविषि, अत्र द्रवद्रव्ये तदितरस्मिन् वोभयत्रापि अनादेशे स्रुचा न हूयत इति, स्रुचो जुहूरिति समाख्याबलाद्धोमसाधनत्वं प्रसक्तं प्रतिषिध्यते। तथा—

आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते।
मन्त्रस्य देवतायाश्च प्रजापतिरिति स्थितिः॥

अनादेशे होमद्रव्यानभिधाने, जुहोतिषु होमेषु, "मन्त्रस्य देवतायाश्च" इत्यत्रानादेश इत्यनुषज्यते मन्त्रस्यानादेशे प्रजापतिदेवताको महाव्याहृतिमन्त्रः, स च समस्तव्याहृतित्रयात्मक इति कल्पतरुपारिजातरत्नाकरादयः। युक्तञ्चैतत्—

"यत्र मन्त्रा न विद्यन्ते व्याहृतीस्तत्र योजयेत्"

इति वचनान्तरसंवादात्, नारायणेन तु—"मन्त्रोऽपि प्रजापतिः प्रजापतये स्वाहेतीत्यर्थः" इति व्याख्यातम्, देवताया अनादेशे प्रजापतिशब्दवाच्या देवतेत्यर्थः। इदञ्च मन्त्रदेवतयोरुभयोरनभिधाने वेदितव्यम्। यत्र तु देवताया अभिधानं मन्त्रमात्र-स्यानादेशस्तत्र तद्देवताया मूलमन्त्रो वेदितव्यो न तु तत्रापि व्याहृतय एवेति हेमाद्रिः। युक्तञ्चैतत्, अन्यदेवताकमन्त्रेणान्यदेवतोद्देश्यकहोमस्यायुक्तत्वात्। अत एव प्रकृत-कात्यायनवचने प्रजापतिरिति तन्त्रेणोभयाभिधानम्, तस्य चोभयानभिधाने उभयमित्यत्रैव तात्पर्यावगमात्। इत्थञ्च यत्र मन्त्रोपदेशो देवतायाश्चानुपदेशस्तत्रोपदिष्टमन्त्रस्यैव देवता न तु तत्रापि प्रजापतिरेवेत्यपि युक्तिसाम्याल्लभ्यते। मूलमन्त्रो यथा गरुडपुराणे—

प्रणवादिनमोऽन्तञ्च चतुर्थ्यन्तञ्च सत्तमाः ।
देवतायाः स्वकं नाम मूलमन्त्रः प्रकीर्त्तितः ॥ इति ।

स्रुवश्च चतुरङ्गुलं परित्यज्य शङ्खमुद्रया धार्यः, तथा च मत्स्यपुराणम्—

मूले हानिकरं प्रोक्तं मध्ये शोककरं तथा ।
अग्रे व्याधिकरं प्रोक्तं स्रुवं धारयते कथम् ॥
कनिष्ठाङ्गुलिमानेन चतुर्विंशतिकाङ्गुलम् ।
चतुरङ्गुलं परित्यज्य अग्रे चैव द्विरष्टकम् ॥
चतुरङ्गुले च तन्मध्ये धारयेच्छङ्खमुद्रया ।
हीयते यजमानो वै स्रुवमूलस्य दर्शनात् ॥
तस्मात् सङ्गोपयेन्मूलं होमकाले स्रुवस्य तु ॥

द्विरष्टकं षोडशाङ्गुलम्, तन्मध्ये षोडशाङ्गुलचतुरङ्गुलयोर्मध्ये । स्मृतिः—

अग्निः सोमस्तथा सूर्यो रुद्रश्चैव प्रजापतिः ।
षष्ठश्चैव यमो देवः स्रुवे तिष्ठन्ति सर्वदा ॥
स्रुवाग्रे वसते वह्निर्विभागश्चतुरङ्गुलः ।
अग्निस्थानेऽग्निसन्तापः सोमे क्लेश उदाहृतः ॥
सूर्ये पशुविनाशस्तु रौद्रे रौद्रभयं भवेत् ।
प्रजापतौ प्रजावृद्धिर्यमे मृत्युभयं भवेत् ॥
भयभागे त्यजेन्मूलं षोडशाङ्गुलमग्रतः ।
प्रजापतौ स्रुवं धार्यं सर्वकामसमृद्धये ॥

स्रुवमिति नपुंसकत्वं छान्दसम् । होमश्च देवतान् ध्यायता प्रणवयुतेन स्वाहान्तेन मन्त्रेण स्वाहावसाने कार्यः । तथा च विष्णुधर्मे—

मन्त्रेणोङ्कारपूतेन स्वाहान्तेन विचक्षणः ।
स्वाहावसाने जुहुयाद्ध्यायन् वै मन्त्रदेवताम् ॥

योगियाज्ञवल्क्यः—

सर्वमन्त्रप्रयोगेषु ओमित्यादौ प्रयुज्यते ।
तेन संपरिपूर्णानि यथोक्तानि भवन्ति हि ॥

स्वाहान्तमन्त्रे स्वाहान्तरं नमोऽन्ते नमोऽन्तरञ्च न देयम्—

नमोऽन्ते न नमो दद्यात् स्वाहान्ते द्विठमेव च ।
पूजायामाहुतौ चापि सर्वत्रायं विधिः स्मृतः ॥

इति भट्टभाष्यलिखितवचनात् । द्विठः स्वाहा । कात्यायनः—

आसीन ऊर्द्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता ॥

प्रह्वेण अवनतेन, तिष्ठता ऊर्ध्वजानुना । तथा—

दक्षिणं पातयेज्जानु देवान् परिचरन् सदा ।

तथा—

यत्र दिङ्नियमो नास्ति जपहोमादिकर्मसु ।
तिस्रस्तत्र दिशो ज्ञेया ऐन्द्री सौम्यापराजिता ॥

ऐन्द्री पूर्वा, सौम्या उत्तरा, अपराजिता ऐशानी । तथा—

यत्रोपदिश्यते कर्म कर्त्तुरङ्गं न चोच्यते ।
दक्षिणस्तत्र विज्ञेयः कर्मणः पारगः करः ॥

शौनकः—

अविज्ञातसुरा मन्त्राः प्रयोक्तव्याः प्रयोक्तृभिः ।
एकश्रुत्यैव होमेषु विज्ञाताश्च विकल्पतः ॥

यत्तु—

जन्मभूगोत्रमग्निञ्च वर्णस्थानमुखादि च ।
अज्ञात्वा कुरुते यागं ग्रहास्तेनावमानिताः ॥

इति स्कन्दपुराणवचनं तद्ग्रहयागपरम् प्रकरणाद् ग्रहा इति श्रवणाच्चेति बोध्यम्; योगियाज्ञवल्क्यः—

रौद्रपित्र्यासुरान् मन्त्रांस्तथा चैवाभिचारिकान् ।
व्याहृत्यालभ्य चात्मानमपः स्पृष्ट्वान्यदाचरेत् ॥

व्याहृत्य उच्चार्य, आत्मानं तदधिष्ठानहृदयमालभ्य स्पृष्ट्वा । कात्यायनः—

पित्र्यमन्त्रानुहरणे आत्मालम्भे अवेक्षणे ।
अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥

मार्जारमूषिकास्पर्शे आक्रुष्टे क्रोधसम्भवे।
निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नपः स्पृशेत्॥

अवक्षणे आत्मनः। कर्मकौमुद्याम्—

यमरुद्रपितॄणाञ्च मृतस्यापि तथैव च।
आहुत्यन्ते च कर्त्तव्यो जलस्पर्शः सदा बुधैः॥

कात्यायनश्रौतसूत्रम्—रौद्रं राक्षसमासुरमाभिचारिकं मन्त्रमुक्त्वा पित्र्यमात्मानमालभ्योपस्पृशेदपः। एष एव विधिर्यत्र कुत्रचिद्धोमः। एवकारो भिन्नक्रमो विधिरित्यनन्तरं द्रष्टव्यः, अन्यथा वैयर्थ्यात्, यत्र क्वचित् शान्तिकपौष्टिकादिष्वपि होमो विहितस्तत्र सर्वत्र एष पूर्वोक्तो विधिरेव न मन्त्रा इत्यर्थः। गृह्याग्निव्यतिरेकेणापि यथायं विधिः स्यादित्येवमर्थः क्वचिच्छब्दः, यथा दाराग्निमुपसमाधाय घृताक्तानि कुशेध्मानि जुहुयादित्यादौ। अत्र केचित्—परिसमूहनादिषु प्रत्येकं मन्त्रान्वयो युक्तः, देवीपुराणे तत्र तत्र तत्तन्मन्त्राभिधानात्। यथा यद्देवादेव हेडनमिति परिसमूहनमित्याद्यभिधाय—

एवं लक्षणसंयुक्तं सर्वहोमेषु याज्ञिकम्।
विधानं विहितं तत्र ब्रह्मणाऽमिततेजसा॥ इति।

न चेदं श्रौतकर्मविषयमिति वाच्यम्, पुराणोक्तेः सर्वसाधारण्यात्, सर्वहोमेष्वित्युपसंहाराच्च, वामनभाष्ये तत्तन्मन्त्रलिखनाच्चेति वदन्ति; तन्न, सम्प्रदायविरोधात्, एष एव विधिरिति पारस्करीयैवकारवैयर्थ्याच्च। विधिरेव न मन्त्रा इति कर्कहरिहरादिव्याख्यानाच्च, परिसमूहनादयः पदार्थास्तूष्णीं कर्तव्या इति हलायुधलिखनाच्च। अत एव रामदत्तादिभिः पद्धतिकारैर्मन्त्रानुल्लेखः। उपदर्शितदेवीपुराणवचनं तु कल्पतरुकारादिभिरपरिग्रहादप्रमाणम्, सत्यपि प्रामाण्ये एवं श्रौताग्निः संस्कृतो भवतीत्युपसंहारेण श्रौताग्निमात्रविषयं वा। यदप्युक्तं मन्त्रान्वयानन्वयपक्षयोर्मन्त्रान्वयपक्षो ज्यायान्, यदि न स्यात्ततः किं स्यादस्ति चेन्नास्तिको हत इति न्यायात्; तथा हि—त्वन्मतेऽस्माकं मन्त्रोच्चारणरूपमीषत्प्रयासमात्रम्, अस्मन्मते तव कर्महानिरेवेति, तदपि तुच्छम्, शास्त्रविहितमन्त्रपाठेऽनङ्गव्यवायापत्तेः, तस्मात्सकलशिष्टाचारानुगृहीतो मन्त्रानन्वयपक्षो युक्त इत्यलं विस्तरेण।

पारस्करः—अन्वारब्ध आघारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यं स्विष्टकृच्च। अन्वारब्धे ब्रह्मणा दक्षिणहस्तेनानुगृहीतबाहौ होतरि सति

आधारादयो होमा विधीयन्त इत्यर्थः। नव्यवर्द्धमानस्तु—अन्वारब्ध इति प्रथमान्तं मन्वानो ब्रह्मणा दक्षिणहस्तेन बाहावनुगृहीतो होता आधारादिसंज्ञिका अङ्गाहुती-र्जुहुयान्न तु प्रधानाहुतिष्वन्वारम्भ इति व्याचष्ट, तन्मते आधारावित्यादौ द्वितीयार्थे प्रथमा, अन्वारम्भश्च कुशेनेति गदाधरादयः। रेणुकोऽप्याह—

भूरादिनवसु स्विष्टकृति चाद्ये चतुष्टये।
अन्वारम्भो भवेत्तेषु सोऽन्वारम्भः कुशेन हि॥ इति।

आधारौ आधारसंज्ञकहोमौ; यथा—ओं प्रजापतये स्वाहा इदं प्रजापतये; ओं इन्द्राय स्वाहा इदमिन्द्रायेति; अत्राद्यहोमो न वाचा किन्तु मनसैव, "ब्रह्म ह वा इदमग्र आसीत्तस्य तेजो रसो अत्यरिच्यत स ब्रह्मा समभवत् स तूष्णीं मनसा ध्यायत् स प्रजापतिरभवत्तस्मात्प्राजापत्यां मनसा जुह्वति मनो हि प्राजापतिः" इति श्रुतेः। प्रजापत्यां प्रजापतिदेवताकामाहुतिम्। आश्वलायनोऽप्याह—प्रजापतिं ध्यायेत्तूष्णीं होमेषु सर्वत्रेति। अत्र पूर्वाहुतिर्वायुकोणादारभ्याग्निकोणं यावदपरा नैर्ऋतकोणादारभ्यैशानकोणं यावदवच्छिन्नघृतधारया देया; तथा चोक्तम्—"प्राञ्चावाधारौ विदिशावेके" इति। विदिशावेव कर्त्तव्यौ सर्वैर्दृष्ट्वादिति हरिशर्मादयः। रेणुकोऽप्याह—

प्रणीतासु पवित्रे ते कृत्वा जान्वाच्य दक्षिणम्।
अन्वारब्धे कृते होमो ब्रह्मणा दक्षिणे करे॥
बहुकाष्ठैः समिन्धीयादर्चिष्मन्तं क्रियोत्तमम्।
स्रुवेणाज्यं गृहीत्वाग्नेः प्रत्यगुत्तरदेशतः॥
आरभ्य दिशमाग्नेयीमाज्यधारामृजुं हरेत्।
मनसा संस्मरेत् स्वाहायुक्तञ्चैव प्रजापतिम्॥
नैर्ऋतीं दिशमाश्रित्य ऐशानीं पूर्ववद्धरेत्।
अत्रेन्द्राय पदं स्वाहायुक्तञ्चैव प्रयोजयेत्॥
एवमाधारयेदेतावाधारावितिभाषिकौ॥ इति।

आज्यभागौ तत्संज्ञकहोमौ, यथा—ओं अग्नये स्वाहा इदमग्नये, ओं सोमाय स्वाहा इदं सोमायेति। महाव्याहृतयः भूराद्यास्तिस्रः, यथा—ओं भूः स्वाहा इदं भूः; ओं भुवः स्वाहा इदं भुवः, ओं स्वाहा इदं स्वः इति। कात्यायनः—

"भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः" इति।

इदं भूरित्यादित्यागवाक्ये विभक्तेर्लुगव्ययत्वात्। सर्वप्रायश्चित्तं सर्वप्रायश्चित्त-

संज्ञिकाः पञ्चाहुतयः। यथा—त्वन्नो अग्ने, सत्वन्नो अग्ने, अयाश्चाग्ने, ये ते शतम्, उदुत्तमं वरुणेति। प्राजापत्यं प्रजापतिदेवताकं हवनम्। यथा—ओं प्रजापतये स्वाहा इदं प्रजापतये इति। स्विष्टकृच्च स्विष्टकृद्धोमश्च, यथा—ओं अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते इति। चकारः सर्वसमुच्चयार्थः। अत्र प्राजापत्यान्तास्त्रयोदशाहुतय आज्येनैव, आज्यं द्रव्यनादेश इत्युक्तेः। स्विष्टकृद्धोमस्तु यत्र यानि हवींषि भवन्ति तत्र तैः सर्वैरपि विधेयः, तथा च कात्यायनः—यावद्धविरुत्तरार्द्धात्स्विष्टकृत इति। स्विष्टकृद्धोमार्थमवद्यतीत्यर्थः। अत्र प्रजापतये स्वाहेत्यादयो मन्त्राः, इदं प्रजापतये इत्यादयस्त्यागवाक्यानीति विवेकः, एवमन्यत्रापि। एतेषामङ्गत्वनिर्वचनं यथा वामनभाष्ये—

आधारौ नासिके ज्ञेयाज्यभागौ च चक्षुषी।
वक्त्रोदरञ्च कुक्षिश्च कटिर्व्याहृतयः स्मृताः॥
शिरो हस्तौ च पादौ च पञ्च वारुणकं स्मृतम्।
प्राजापत्यं स्विष्टकृच्च श्रोत्रे द्वे च प्रकीर्तिते॥ इति।

पञ्चवारुणकं सर्वप्रायश्चित्ताभिधम्। आहुतिप्रदेशमाह सांख्यायनः—उत्तरे आग्नेयं दक्षिणे सौम्यं मध्ये अन्या आहुतयः। आग्नेयं पूर्वाज्यभागः। सौम्यमुत्तराज्यभागः। अन्या महाव्याहृत्यादयः। आश्वलायनः—उत्तरमाग्नेयं दक्षिणं सौम्यं विज्ञायते चक्षुषी वा एते यज्ञस्य यदाज्यभागौ तस्मात् पुरुषस्य हि प्रत्यङ्मुखस्यासीनस्य दक्षिणमक्ष्युत्तरं भवत्युत्तरं दक्षिणं पुरुषस्य यज्ञपुरुषस्य। एतदुक्तं भवति—यज्ञपुरुषस्य दक्षिणमक्षि सौम्यं भवत्युत्तरञ्चाग्नेयम्, तस्य च प्रत्यङ्मुखोपविष्टत्वेन तद्विपरीतमित्याग्नेयं दक्षिणे सौम्यञ्चोत्तरे होतव्यमिति। पारस्करः—एतन्नित्यं सर्वत्र। एतदाधारादि स्विष्टकृदन्तं सर्वत्र सर्वेषु होमकर्मसु नित्यमावश्यकम्, यत्र तु होम एव नास्ति यथा प्रस्थरारोहणादौ तत्रैतन्न भवति। अन्ते विहितस्य स्विष्टकृद्धोमस्य कर्मविशेषे स्थानान्तरमाह—स एव प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यच्चेदाज्याद्धविः। इति। महाव्याहृतिभ्यः प्राक् पूर्वं स्विष्टकृद्यागो भवति चेद्यदि आज्यादन्यदपि चरुप्रभृति हविर्भवति, केवलाज्ययोगे तु सर्वाहुतिशेष एवेत्यर्थः।

अथ—

वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चापि यत्।
अजानतोऽर्थं तत्सर्वं तुषाणां कण्डनं यथा॥

योऽधीते नार्थतत्त्वज्ञस्तस्य तद्धारणा वृथा।
भारवाहीव भृतकः केवलं क्लेशभाग् भवेत्॥

इत्यादि नानावचनेषु वेदार्थमज्ञात्वा केवलं तत्पाठे निन्दाश्रवणादवश्यं तत्तन्मन्त्रार्थः प्रयोगकाले ज्ञातव्य इति यथाऽवसरं तत्तन्मन्त्रार्थाः प्रदर्शनीयाः। तत्र तावत्प्रास्तावसरकाङ्गं होममन्त्रा व्याख्यायन्ते। तत्राप्याराज्यभागमन्त्राः स्पष्टार्थाः।

महाव्याहृतीर्व्याचष्टे योगियाज्ञवल्क्यः—

भवन्ति चास्मिन् भूतानि स्थावराणि चराणि च।
तस्माद्भूरिति विज्ञेया प्रथमा व्याहृतिः स्मृता॥
भवन्ति भूयो लोकानि उपयोगत्वये पुनः।
कल्पान्ते उपभोगाय भुवस्तस्मात्प्रकीर्त्तितः॥
शीतोष्णवृष्टितेजांसि जायन्ते तानि वै सदा।
आलयः सुकृतानाञ्च स्वर्ल्लोकः स उदाहृतः॥ इति।

भूः चराचरोत्पत्तिस्थानं भूर्लोकः, उपभोगस्थानं भुवर्लोकः, अन्तरिक्षं स्वः, सुकृतस्थानं स्वर्लोक इति परमार्थः।

सर्वप्रायश्चित्तमन्त्रास्तदर्थाश्च यथा—

त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अव यासिसीष्ठाः।
यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्॥

हे अग्ने! त्वं नः अस्मान् प्रति वरुणस्य देवस्य हेडः क्रोधं अवयासिसीष्ठाः अपगमय दूरीकुर्विति यावत्। त्वं कीदृक् विद्वान् जानानः क्रोधमिति शेषः। यस्माच्च त्वं यजिष्ठः यष्टृतमः, वह्नितमः वोढृतमः, अर्थात् हविषां शोशुचानो दीप्यमानश्च भवसि, तस्मात्प्रार्थये अस्मत् अस्मत्तः, विश्वा विश्वानि, सर्वाणि द्वेषांसि दौर्भाग्यानि प्रमुमुग्धि प्रमोचय।

स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ।
अव यक्ष्व नो वरुणं रराणो वीहि मृडीकं सुहवो न एधि॥

स त्वं एवं प्रार्थ्यमानः, नः अस्माकम्, अवमः अवितृतमः पालयितृतमो भव। उती तर्पणेन गत्या वा नेदिष्ठो निकटतमश्च भव, अस्या उषसोऽहर्मुखस्य व्युष्टौ विच्छेदावच्छिन्ने काले अस्मिन्नेवाहनीत्यर्थः, अवयक्ष्व अवगत्य, यज नोऽस्माकं वरुणं रराणो रममाणः सन्, यद्वा "रा दाने" इत्यस्य रराण इति रूपम्,

हविर्ददानः सन् वीहि भक्षय, अर्थात्पुरोडाशं मृडीकं सुखकरम्, अथ नोऽस्माकं सुहवः स्वाह्वानः, एधि भव।

अयाश्चाग्नेऽस्य नभिशस्तिपाश्च सत्त्वमित्त्व मया असि।
अया नो यज्ञं वहास्यया नो धेहि भेषजम्॥

हे अग्ने ? त्वं अयाः न यातीत्ययाः सर्वत्रान्तर्बहिरवस्थितोऽसि भवसि, चः समुच्चये तथा अनभिशस्तिपाश्च असि, न विद्यते अभिशस्तिरभिशापो येषान्तेऽनभिशस्तयः साधवस्तेषां पाः पालकश्च भवसि, तथा सः प्रसिद्धस्त्वं इत् एति सर्वत्र गच्छतीति तथा सर्वगोऽसि, तथा त्वं अयाः शुभावहविधिरसि, "अयः शुभावहो विधिः" इत्यमरः, बहुवचनमार्षम्, किञ्च यस्मात्त्वं अयाः अयते गच्छतीति तथा "अय गतौ" तस्मादसुन् गन्ता भूत्वा, नोऽस्माकं यज्ञं वहासि, वहसि तस्मादया अयतेऽस्मिन्निति तथा, आश्रयस्त्वं नोऽस्मभ्यम्, भेषजं सुखोत्पादनमौषधमदृष्टलक्षणं धेहि धारय पोषय वा, अया इति पुनर्वचनेन भूयांसमर्थं मन्यते, अग्निर्ज्योतिर्ज्योतिरित्यादाविवेत्यन्ये। अत्र सत्त्वमित्त्वमित्यत्र सत्यमित्वमिति पठित्वा हे अग्ने त्वं अनभिशस्तिपाः अयाश्च असि तत्सत्यमेवेत्यर्थः, "इच्छब्द एवार्थः सदमि त्वा हवामहे इत्यादौ तथा दर्शनात्" इत्यनन्तदेवः।

ये ते शतं वरुण ये सहस्रं यज्ञिया: पाशा वितता महान्तः।
तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः॥

हे वरुण ! ते तव ये यज्ञिया विघ्ननिवारणेन यज्ञहिता विस्तीर्णा महान्त उत्कृष्टाः शतं ये सहस्रं पाशाः सन्ति तेभिस्तैः पाशैः छान्दसत्वादैसन्, यद्वा तेभिस्तेभ्यः पञ्चम्यर्थे तृतीया, अद्य अस्मिन्नेवाहनि सविता सूर्यः उत समुच्चये विष्णुश्च विश्वे विश्वदेवाश्च मरुतो वायवश्च स्वर्काः शोभनाश्च ते अर्काः देवताविशेषा वा, नोऽस्मान् मुञ्चन्तु मोचयन्तु, अत्र अर्को मन्त्रो भवतीति यास्कोक्तेः शोभनाः अर्का मन्त्रा येषां ते स्वर्का इति सवित्रादीनामेव विशेषणम्, न तु देवतान्तरबोधकमिति केचित्; अन्ये च विश्वे इति विश्ववर्त्तिन इत्यर्थकं मरुतामेव विशेषणमिति वदन्ति, तदुभयमप्यनादेयम्; विश्वेभ्य इति स्वर्केभ्य इति च त्यागवाक्यदर्शनेन तयोर्देवतान्तरप्रतिपादकत्वाभ्युपगमावश्यकत्वात्।

उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय।
अथाव यमादित्यव्रते तवानागसो अदितये स्याम॥

उदित्युपसर्गः अथावयेत्यत्र सम्बध्यते। हे वरुण अस्मत् अस्मत्तः उत्तमं ऊर्ध्वस्थितं पाशमुच्छ्रथाय श्लथीकृत्वोर्ध्वं नय, अधमधःस्थितं विमध्यमं मध्यस्थितञ्च पाशं अवश्रथाय श्लथीकृत्वा नीचैः कुरु, अथैवं कृते सति हे आदित्य अदितेः पुत्र, तव व्रते कर्मणि वर्तमाना अनागसोऽनपराधा वयं अदितये अदीनतायै स्याम भवेमेति।

प्राजापत्यस्विष्टकृतौ सुगमौ।

होमार्थं गृहीतहविषः शेषरक्षणं तस्य होमान्ते भक्षणञ्चाह कात्यायनः—पाकयज्ञेष्ववत्तस्यासर्वहोमो हुत्वा शेषप्राशनमिति। अवत्तस्य होमार्थं गृहीतस्य हविषः असर्वहोमः शेषरक्षणपरको होमः।

रेणुकः—

हुत्वा हुत्वैव सर्वासां शेषं पात्रान्तरे क्षिपेत्।
भूरादिनवसु स्विष्टकृति चाद्ये चतुष्टये॥
अन्वारम्भो भवेत्तेषु सोऽन्वारम्भः कुशेन हि।
होमान्ते च ततः कुर्यात् संस्रवप्राशनं तथा॥

संस्रवः शेषः। ब्रह्मणे दक्षिणादानमाह गृह्यान्तरम्—पूर्णपात्रो दक्षिणा तं ब्रह्मणे दद्यादिति। पुंस्त्वं छान्दसम्।

कात्यायनः—

ब्रह्मणे दक्षिणा देया या यत्र परिकीर्त्तिता।
कर्मान्तेऽनुच्यमानायां पूर्णपात्रादिका भवेत्॥

तथा—

यावता बहुभोक्तुश्च तृप्तिः पूर्णेन जायते।
नावराद्धर्यमतः कुर्यात् पूर्णपात्रमिति स्थितिः॥

अवराद्धर्यम् न्यूनम्। अङ्गिराः—

चतुर्मुष्टिर्भवेत्कुञ्चिः चतुःकुञ्चिस्तु पुष्कलम्।
पुष्कलानि च चत्वारि पूर्णपात्रमुदाहृतम्॥

यज्ञपार्श्वपरिशिष्टप्रकाशे—

अष्टमुष्टिर्भवेत्कुञ्चिः कुञ्चिरष्टौ तु पुष्कलम्।
पुष्कलानि च चत्वारि पूर्णपात्रमुदाहृतम्॥

तथा—

यवैर्वा वीहिभिः पूर्णं भवेत्तत्पूर्णपात्रकम् ॥

एवञ्चात्र शक्त्यपेक्षया व्यवस्था। अचेतनब्रह्मपक्षे पुरोहितायैव तत्प्रतिपादनमाह कात्यायनः—

कुलर्त्विजमधीयानं सन्निकृष्टं गुरुं तथा।
नातिक्रमेत् सदा दित्सन् य इच्छेदात्मनो हितम् ॥ इति।

पुरोहितश्चाध्ययनशाली सन्निकृष्टः कर्मोपदेशकत्वेन गुरुश्चेति निबन्धारः।

अथ—पवित्राभ्यां प्रणीताजलेन शिरस्सम्मार्जनम्, तथा च कात्यायनः—पवित्रयोर्मार्जयन्ते सुमित्रिया न इति, "सुमित्रिया न" इति मन्त्रेण पवित्रयोरेव स्थिताभिरद्भिरात्मानं शोधयन्तीत्यर्थः। रेणुकः—

मार्जनं स्यात्पवित्राभ्यामग्नौ ते प्रक्षिपेत्ततः।

प्रक्षेपोऽयं प्रतिपत्तिरूपः। मन्त्रो यथा—"सुमित्रिया न आप ओषधयः सन्तु" इति। अस्यार्थः—आप ओषधयश्च नोऽस्माकं सुमित्रियाः साधुमित्रत्वेनावस्थिताः सन्तु भवन्त्विति। ततः प्रणीतानिःक्षेपमाह कात्यायनः—प्रणीता निनयति। प्रणीता अपो निःक्षिपेदित्यर्थः। गृह्यान्तरम्—अपां शेषन्निनीय।

निःक्षेपश्चैशान्याम्—

"द्वारमेव हि द्रव्याणां प्रागुदीच्यां दिशि स्मृतम्" इति वचनात्।

पात्रन्युब्जीकरणञ्च सर्वनिःक्षेपार्थम्। निःक्षेपोऽयं "दुर्मित्रियास्तस्मै सन्तु" इति मन्त्रेण, मन्त्रलिङ्गात्। मन्त्रो यथा—"दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः" इति। अस्यार्थः—ता एव आप ओषधयश्च तस्मै दुर्मित्रिया दुष्टमित्रत्वेनावस्थिताः सन्तु, तस्मै कस्मै योऽस्मान् द्वेष्टि, अर्थात् शत्रुः, यञ्च वयं द्विष्मः, अर्थात् शत्रुमेवेति। ततो बर्हिर्होमः। तथा च कात्यायनः—समिष्टयजुर्जुहोति "देवा गातुविदः" इति समिष्टयजुरिति बर्हिर्होमकर्मनामधेयम्। गृह्यान्तरम्—तत एव बर्हिषः कुशमुष्टिमादायाज्ये हविषि वा त्रिरवदध्यात्। तत एव स्तृतादेव, न च विनियुक्तविनियोगविरोधः, प्रतिपत्तिरूपत्वात्। हविषि वा आज्यासद्भावे चरौ वा, अवदध्यात् मज्जयेत्। तथा 'अग्नावपवर्जयेत्' अपवर्जयेत् दाहयेदित्यर्थः। अयञ्च होमो हस्तेनैव विधेयः। पाणिनैवेतरस्मिन्निष्टयुक्तेः। मन्त्रो यथा—

देवा गातुविदो गातुं वित्वा गातुमित ।
मनसस्पत इमं देव यज्ञं वाहा वातेधाः ॥ इति ।

अस्यार्थः—हे गातुविदो ! यज्ञविदो ! देवगातु प्राचीनं यज्ञं वित्वागातुमर्थादप्रेतनं यज्ञं इत आगच्छत, यज्ञपरम्परास्वनवच्छिन्नमना भवतेत्यर्थः । इत्थं देवानभ्यर्थ्य चन्द्रमाह—हे देवमनसस्पते चन्द्र! यद्वा देवान् यष्टुं मनसः प्रवर्त्तक हे परमेश्वर ! इमं यज्ञं स्वाहा त्वद्धस्ते ददामि, त्वञ्च तं यज्ञं वाते वायौ धाः धारय, वाते हि यज्ञोऽवतिष्ठते, तथा च श्रुतिः—वायुरेवाग्निस्तस्माद्यदैवाध्वर्युरुत्तमं कर्म करोत्यथैतमेवाप्येतीति । गातुर्यज्ञः, गीयते वेदत्रयेणेति गातुरिति व्युत्पत्तेः । ततः पूर्णाहुतिदानम्, तथा च शौनकः—

अथ पूर्णाहुतिं दद्याद् गन्धपुष्पफलान्विताम् ।
साज्ततामूर्ध्वकायश्च समपाच्छुक्रदिङ्मुखः ।।

ऊर्ध्वकायः तिष्ठन्, भविष्यपुराणे—

दद्यादुत्थाय पूर्णां वै नोपविश्य कदाचन ।

पूर्णां पूर्णाहुतिम् । गोभिलीये—

पूर्णाहुतिञ्च मूर्द्धानं दिव इत्यभिपातयेत् ।

मत्स्यपुराणे—

पूर्णाहुतौ च मूर्द्धानमिति मन्त्र उदाहृतः ।

मन्त्रो यथा—

मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानर मृत आजातमग्निम् ।
कविं सम्राजमतिथिं जनानामासन्नापात्रं जनयन्त देवाः ॥

अस्यार्थः—देवा अग्निं जनयन्त उत्पादितवन्तः, अडभाव आर्षः, कीदृशं दिवो द्युलोकस्य मूर्द्धानं, शिरोवदुन्नतप्रदेशे सूर्यरूपेणावस्थाय भासकम्, तथा पृथिव्या अरतिं रतिरुपरतिस्तद्रहितम्, नहि पृथिव्या उपरि कदाचिदप्यग्निमुपरमते; किन्तु दाहपाकप्रकाशैः सर्वाननुगृह्णन् सर्वदा वर्त्तत एव, तथा वैश्वानरं विश्वेभ्यः सर्वेभ्यो नरेभ्यो हितं जठराग्निरूपेणान्नपाचकत्वात्, तथा ऋते यज्ञे यज्ञनिमित्तं आजातं अरणिद्वयादुत्पन्नम्, कविं स्वभक्ताननुग्रहीतुमभिज्ञम्; सम्राजं सम्यग्दीप्यमानम्, जनानां यजमानानामतिथिं हविर्भिः सत्कारयोग्यम्, आसन् आसनि आस्ये आपात्रं आभिमुख्येन पीयते अनेनेत्यापात्रम् । विज्ञायते हि चमसों देवपान इति, चमसेन ह वा

एतेन भूतेन देवा भक्षयन्तीति श्रुतेरिति। ततः स्रुवलग्नसघृतभस्मना त्र्यायुषाणि करोति, भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च त्र्यायुषमिति प्रतिमन्त्रमिति। व्याख्यास्यते चैतदुपरिष्टात्। स्मृत्यन्तरे—

ततोऽनामिकया कुर्याद्बिन्दुं सघृतभस्मना।

तथा—

ऐशान्यामाहरेद्भस्म स्रुचोऽग्रेण स्रुवेण वा।

ततः कर्मदक्षिणा देया, यदाह मनुः—

यज्ञस्य दक्षिणा पत्नी तया हीनोऽफलो भवेत्। इति।

संग्रहे—

सर्वत्र कर्मणामन्ते मन्त्राशिषमनुत्तमाम्।
दद्युर्विप्राः स्वशाखोक्तामादौ तत्कारणवशाखिनः॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
कुशण्डिकाप्रकाशः॥

———

अथ विवाहप्रकाशः

अथ [1]सकलसंस्कारोपजीव्यत्वात्, स्त्रीशूद्रसाधारण्येन व्यापकत्वात्, पारस्करादिभिः प्रथममभिधानाच्च विवाहस्तावन्निरूप्यते। तत्र विवाहो नाम ग्रहणविशेषः।

अतः परं समावृत्तः कुर्याद्दारपरिग्रहम्।

इत्याद्युद्वाहाभिप्रायकग्रहणार्थकपदप्रयोगात्,

दारान् सर्वप्रयत्नेन विशुद्धानुद्वहेत्ततः।

इति कश्यपवचनस्य उद्वहेत् [2]परिग्रहेदिति रत्नाकरव्याख्यानाच्च। स चायं ग्रहणविशेषः स्वत्वविशेषोत्पत्त्यनुकूलव्यापाररूपः स्वीकारविशेषः। तदुक्तमाश्वलायनगृह्यभाष्ये—उपयमनं नाम कन्यायाः स्वीकरणमिति, अत एव "[3]उपाद्यमः स्वकरणे" इति पाणिनिस्मरणम्, उपयच्छत इत्युदाहृत्योद्वहतीति विवरणञ्च वृत्तिकाराणां संगच्छते। स्वत्वे विशेषत्वञ्च स्वनिरूपक पतिनाशादिदोषैरनश्वरत्वस्वरूपम्। अत एव मृतेऽपि पत्यौ 'तस्येयम्' इति प्रयोगः। उक्तञ्च—

यस्मै दद्यात् पिता त्वेनां भ्राता वानुमते पितुः।
तं शुश्रूषेत जीवन्तं संस्थितञ्च[4] न लङ्घयेत्॥

इति वचनव्याख्यातृभिः। तथा च मृतलङ्घनाभावप्रयोजकं मृतस्यापि स्वत्वमस्तीति। मनुरपि—

न [5]निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते। इति।

---

१. यथाविधिपरिगृहीतायामेव भार्यायां गर्भाधानादिसंस्काराः सम्यगनुष्ठातुं शक्या इति विवाहस्योपजीव्यत्वं कारणत्वमिति भावः।

२. परिगृह्णीयादिति क० पु० पाठः।

३. 'उप्' उपसर्गकयमधातोरात्मनेपदं भवति स्वीकाररूपार्थे। स्वकरणं स्वीकारः। उदाहरणम्—भार्यामुपयच्छते इति।

४. मृतम्।

५. निष्क्रयो विक्रयः, विसर्गस्त्यागः।

तस्य च स्वीकारविशेषस्य ज्ञानविशेषरूपस्येच्छाविशेषरूपस्य वा विषयतया कन्याया विवाहकर्मत्वम्, समवायितया च वरस्य तत्कर्तृत्वम्, तेन "कन्यापुत्र-विवाहेषु" इत्यादि संगच्छते; न चैतच्छुल्कग्रहणादावतिप्रसक्तमिति वाच्यम्, तस्य परम्परया भार्यानिष्ठस्वत्वविशेषोत्पादकत्वेऽपि साक्षात्तद्विरहात्। ब्राह्मादिभेदश्च विवाहसम्पादकदानादिभेदप्रयुक्तः। नन्वेतच्छूद्राविवाहेऽव्याप्तम्, तत्र पतिमरणेन तत्स्वत्वनाशाभ्युपगमात्। अत एव मृतपतिकशूद्राया पत्यन्तरेण परिग्रहः सकल-देशीयव्यवहारसिद्ध इति चेन्मैवम्, तत्रापि पूर्वपतिस्वत्वनाशानभ्युपगमात्, तादृश-शूद्राया अपि पुनर्भूवहिर्भावविरहात्, अन्यथात्वे मानाभावात्; अत एव तादृशपरि-ग्रहस्य न लोके विवाहपदेनाभिधानम्।

स चायं स्वीकारो द्विविधः—कन्यापित्रादिकर्तृकदानादिप्रयोज्य ओमित्यादि-प्रयोगादिप्रकाश्यप्रतिग्रहरूपः, "भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः" इत्यादिमन्त्रप्रकाश्यदेवकर्तृककन्यादानसम्पादकप्रतिग्रहस्वरूपश्च; तत्प्रकाशश्च "गृभ्णामि ते सौभगत्वाय हस्तम्" इत्यादिमन्त्रप्रयोगः पाणयवच्छेदेन कन्याग्रहणञ्च। देवकर्तृकं दानं मनुरप्याह—

"देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः" इति।

तमिमं द्विविधमपि दर्शयति नारदः—

स्त्रीपुंसोस्तु सम्बन्धाद्वरणं प्राग्विधीयते।
वरणाद् ग्रहणं पाणेः स सम्बन्धो द्विलक्षणः॥

विवृणोति चैतद्रत्नाकरः, सम्बन्धात् पाणिग्रहणात्मकात्, वरणात् वरणोत्तरम्, द्विलक्षणो वरणरूपः पाणिग्रहणरूपश्चेति। वरणं कन्यापित्रादिकर्तृकं दानम्, प्रत्य-ङ्मुखा वरयन्ति प्रतिगृह्यन्ति प्राङ्मुखा इत्यादौ तथा दर्शनात्, वरयन्ति गोत्रप्रवराद्यभि-धानपूर्वकं ददतीत्यर्थ इति हि तद्व्याख्यातारो रत्नाकरादयः; तच्च प्रतिग्रहपर्यन्तं विव-क्षितम्, पाणिग्रहणपदञ्च सप्तपदीपरिणयनान्तकर्माभिधायकमित्यग्रे वक्ष्यते। अत एव कन्यादाननिष्पत्त्यनन्तरं पाणिग्रहणात् पूर्वमपि विवाहसम्पत्तिकथनं प्रथमप्रतिग्रहरूप-स्यैकविधस्य तस्य निष्पन्नत्वात्। यथा त्रिशङ्कूपाख्याने—

पाणिग्रहणमन्त्राणां विघ्नं चक्रे स दुर्मतिः।
येन भार्या हृता पूर्वं कृतोद्वाहा परस्य वै॥ इति।

कृतोद्वाहा पाणिग्रहणात् पूर्वं हृतेत्यर्थः। अयमत्र विवेकः—केवलेन प्रथमप्रतिग्रहेण कन्यायां पत्युः स्वत्वमुत्पद्यते दातुः सत्त्वं निर्त्तते। तथा च मनुः—

मङ्गलार्थं स्वस्त्ययनं यज्ञस्तासां प्रजापतेः।
प्रयुज्यते विवाहे तु प्रदानं स्वाम्यकारणम्॥

प्रदानं स्वाम्यकरणं प्रदानेनैव कन्यायां वरस्य स्वाम्यं जायते दातुः स्वाम्यं निवर्त्तते इति रत्नाकरः। न चानेन दानमात्रस्य स्वाम्यकारणत्वमभिहितं न तु प्रतिग्रहस्येति वाच्यम्, दानस्य प्रतिग्रहपर्यन्तत्वात्, स्वनिरूपकपतिनाशादिदोषानश्वरत्वविशिष्टस्वत्वोत्पत्तिस्तु सप्तपदीपरिणयनान्तकर्मरूपद्वितीयप्रतिग्रहसहकारेणैव; अत एव कन्यादानानन्तरं पाणिग्रहणसंस्कारात्पूर्वं वरमरणे वरान्तराय कन्यापितृकर्तृकं पुनर्दानं संगच्छते। तथा च वशिष्ठः—

अद्भिर्वाचा च दत्तायां मृत उर्ध्वं वरो यदि।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा॥

एतद्वचनव्याख्याने रत्नाकरः—कन्यायाः सकृद्दानं यन्मन्वादिभिरुक्तं तत्पाणिग्रहणान्तसंस्कारवत्कन्याविषयमिति। यमः—

वाचा दत्ता तु या कन्या यदि तस्या वरो मृतः।
न च मन्त्रोपपन्ना या कुमारी पितुरेव सा॥

मन्त्रोपपन्ना पाणिग्रहणमन्त्रजन्यसंस्कारवती, इत्थञ्च सप्तपदीपरिणयनानन्तरमेव दाम्पत्यनिष्पत्तिः। तथा च यमः—

नोदकेन न वा वाचा कन्यायाः पतिरिष्यते।
पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे॥

मनुकात्यायनौ—

पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे॥

पाणिग्रहणिका वैवाहिकाः, नियतं निश्चितम्, दारलक्षणं भार्यात्वनिष्पत्तौ निमित्तम्, तेषां मन्त्राणाम्, निष्ठा समाप्तिः, सप्तमे पदे प्राप्तवत्यां कन्यायामिति शेषः। सप्तमपददानोत्तरं भार्यात्वनिष्पत्तेस्तत्र वैवाहिकमन्त्रसमाप्तिर्विज्ञेयेत्यर्थः। अत एव

तत्र तत्र पाणिग्रहणपदेन सप्तमपदपरिणयनपर्यन्तमुच्यत इति लब्धम्। स्पष्टयत्येत-ल्लघुहारीतः—

"कृत्स्नं हि जाया पतित्वं सप्तमे पदे" इति।

यत्त्वनडुच्चर्मोपवेशनान्तो विवाह इति कस्यचिल्लिखनं तत्सप्तपदीपरिणयनोत्तरकर्मणां विवाहाङ्गत्वाभिप्रायेण। अत एवानडुच्चर्मोपवेशनाननुष्ठानेऽपि विवाहनिष्पत्तिः, अङ्गवैकल्येऽपि प्रधाननिष्पत्तेरभ्युपगमात्। अत एव च यत्किञ्चिदङ्गविकले प्रधानेऽनुष्ठिते न पुनस्तदङ्गानुष्ठानं न वा प्रधानावृत्तिः। तथा च कात्यायनः—

प्रधानस्य क्रिया यत्र साङ्गं तत्क्रियते पुनः।
तदङ्गस्याक्रियायां तु नावृत्तिनव तत्क्रिया॥ इति।

दाम्पत्यनिष्पत्त्यनन्तरञ्च वरमरणादिसद्भावेऽपि न पुनर्वरान्तरेण विवाहः। तथा च मनुनारदकात्यायनबृहस्पतयः—

सकृदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत्॥

अत्र कन्याप्रदानं सप्तपद्यन्तकर्मप्रकाश्यप्रतिग्रहपर्यन्तं विवक्षितम्, सोमादिभिश्च न पाणिग्रहान्तसंस्कारः कृत इति—"सोमो ददद् गन्धर्वाय गन्धर्वो दददग्नये" इति मन्त्रेण न विरोधो न वा—"अद्भिर्वाचा च दत्तायाम्" इति वशिष्ठवचनविरोधः। इदञ्चास्य वचनस्य पाणिग्रहणान्तसंस्कारवत्कन्याविषयत्वं वदता रत्नाकरेण स्पष्टीकृतम्। सकृदाह ददानीत्युक्त्यैव सिद्धे पुनः सकृत्कन्या प्रदीयत इत्युक्तिः प्रतिग्रहीतृकर्तृकस्यापि दानान्तरस्य निवृत्त्यर्था। बौधायनः—

बलाच्चेत् प्रहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥

अत्र मन्त्रैर्यदि न संस्कृतेति विशेषणात्पाणिग्रहणमन्त्रसंस्कृताया न पुनर्दानमित्युक्तं भवति। केनचिन्निमित्तेन क्रियमाणः पुनः संस्कारस्तु न पुरुषान्तरकर्तृको न वा तत्र पुनर्दानमिति नानुपपत्तिः। मनुः—

न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु।

आश्वलायनः—

अज्ञातश्च द्विजो यस्तु विधवामुद्वहेद्यदि।
परित्यज्य च ताञ्चैव प्रायश्चित्तं समाचरेत्॥

मनुः—

पाणिग्रहणिका मन्त्राः कन्यास्वेव प्रतिष्ठिताः।
नाकन्यासु क्वचिन्नृणां लुप्तधर्मक्रिया हि ताः॥

अकन्यासु विवाहितासु, लुप्तधर्मक्रिया लुप्ता निवृत्ता धर्माः कन्या अग्निमयच्छतेत्यादिमन्त्रोपात्तकन्यात्वादयः क्रियादानप्रतिग्रहादयो यासां ताः। तथा—

न द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदिश्यते।

श्रुतिः—"यदेकस्मिन् यूपे द्वे रशने परिव्ययति तस्मादेको द्वे जाये विन्दते यन्नैकां रशनां द्वयोर्यूपयोः परिव्ययति तस्मान्नैका द्वौ पती विन्दते" इति, वशिष्ठः—"या वा क्लीबं पतितमुन्मत्तं वा भर्त्तारमुत्सृज्यान्यं पतिं विन्दते मृते वा सा पुनर्भूर्भवति।" बौधायनः—"सप्तविधा पुनर्भूस्तां गृहीत्वा न प्रजां न धर्मं विन्दते।" प्रजाम् धर्म्याम्, सप्तविधां पुनर्भूं प्रदर्श्य कश्यपः—

इत्येताः कश्यपेनोक्ता दहन्ति कुलमग्निवत्।

मनुः—

यस्मै दद्यात्पिता त्वेनां भ्राता वाऽनुमते पितुः।
तं शुश्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत्॥

संस्थितं मृतम्, न लङ्घयेत् न तदन्यं समाश्रयेत्। तथा—

न विवाहविधावुक्तं विधवावेदनं पुनः।

पराशरः—

सहानुगमनं कुर्यात्कुर्याद्वा नैष्ठिकं व्रतम्।
अयं धर्मः स्त्रियाः प्रोक्तः कलौ काले विशेषतः॥

भारते—

एक एव पतिर्नार्या यावज्जीवं परायणम्।
मृते जीवति वा तस्मिन्नापरं प्राप्नुयान्नरम्।
अभिगम्य परं नारी पतिष्यति न संशयः॥

अङ्गिराः—

अन्यदत्ता तु या कन्या पुनरन्यस्य दीयते।
तस्या अन्नं न भोक्तव्यं पुनर्भूः सा प्रगीयते॥

यत्तु—

वरश्चेत्कुलशीलाभ्यां न युज्येत कदाचन।
न मन्त्राः कारणं तत्र न च कन्याऽनृतं भवेत्॥
समाच्छिद्य तु तां कन्यां बलादत्तयोनिकाम्।
पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत्॥

इति शातातपवचनं तद्युगान्तरविषयम्, कलिवर्ज्येषु पुनरुद्वाहगणनात्। तथा चादिपुराणम्—

ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा।
कलौ पञ्च न कुर्वीत भ्रातृजायां कमण्डलुम्॥

ब्रह्मपुराणम्—

स्त्रीणां पुनर्विवाहस्तु देवरात्पुत्रसन्ततिः।
स्वातन्त्र्यं वा कलियुगे न कर्त्तव्यं कदाचन॥ इति।

परे त्विदं वचनं वाग्दत्तापरम्, वरकन्यापदस्वरसात्; मन्त्रा इत्यस्य पाणिग्रहणात्प्राग् दानादिप्रयोजका मन्त्रा इत्यर्थः, न तु पाणिग्रहणमन्त्राः, "पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्" इति मनुविरोधात्, तद्बाधकल्पनापेक्षयोक्तार्थकल्पनाया लाघवेनौचित्यात्, अदत्तयोनिकामित्यस्य सकामा सती दानीयेन कुलशीलविहीनेन यादत्तयोनिस्तदन्यामित्यर्थः, दत्तयोनिकाया अन्यस्मै दाननिषेधात्। तथा च दण्ड-प्रकरणे नारदः—

सकामायां तु कन्यायां सङ्गमे नास्त्यतिक्रमः।
किन्त्वलङ्कृत्य सत्कृत्य स एवैनां समुद्वहेत्॥ इत्याह।

यत्तु—

अज्ञातदोषेणोढा या निर्दोषा नान्यमाश्रिता।
बन्धुभिः सा नियोक्तव्या निर्बन्धु स्वयमाश्रयेत्॥
अष्टौ वर्षाण्युदीक्षेत ब्राह्मणी प्रोषितं पतिम्।
अप्रसूता तु चत्वारि परतोऽन्यं समाश्रयेत्॥
क्षत्रिया षट् समास्तिष्ठेदप्रसूता समास्त्रयः।
वैश्या प्रसूता चत्वारि द्वे वर्षे त्वितरा वसेत्॥

न शूद्रायाः स्मृतः काल एष प्रोषितयोषिताम् ।
जीवति श्रूयमाणे तु स्यादेष द्विगुणो विधिः ।।

इति नारदस्मृतिः पुनरुद्वाहबोधिका, नह्येतस्या वाग्दत्ताविषयत्वं सम्भवति, अप्रसूता त्विति व्याख्युक्तेरित्याहुस्तन्मन्दम्, मन्वादिबहुवचनविरोधेन नियोक्तव्येत्युपक्रमेण चैतस्या नियोगपरत्वात् । ब्राह्मणयादीनां प्रतीक्षाकालतारतम्यं तु सत्त्वादिगुणानामधिकन्यूनभावनिबन्धनम्, जीवत्वश्रवणे प्रतीक्ष्यकालद्वैगुण्यञ्च तदागमनप्रत्याशया, सर्वत्राप्रसूतायाः प्रतीक्षाकालन्यूनता च तस्याः पुरुषागमनजन्यरोगादिशङ्कया, एवं प्रसूताया अपि नियोगोक्तिः पुत्ररहिता परा, "द्वितीयमेके प्रजनं मन्यन्ते स्त्रीषु तद्विदः" इति मनुस्मरणादेकपुत्रा परा वेति निबन्धारः । सोऽप्ययं नियोगो युगान्तरविषयः, कलौ तन्निषेधात् । तथा च क्रतुः—

देवरेण सुतोत्पत्तिर्हृत्ता कन्या न दीयते ।
न यज्ञे गोवधः कार्यः कलौ न च कमण्डलुः ।।

अत्र न देवरेण सुतोत्पत्तिरित्यनेन नियोगो निषिध्यत इति व्याख्यातारः । बौधायनोऽपि—

विधिर्यो निश्चितः पूर्वं क्रियते नेह साम्प्रतम् ।
पुरा कल्पे स एतच्च विधवाया नियोजनम् ।। इति ।

यदपि—

नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते ।।

इति पराशरवचनं तद्वाग्दत्ताविषयम् । तथा च तद्व्याख्यातारः—वाग्दानानन्तरं पाणिग्रहणात्प्राक् पूर्वस्मिन् वरे नष्टे दूरदेशगमनेनापरिज्ञातवृत्तान्ते नारीणां कन्यानामन्यः पतिर्विधीयते । तथा च नारदः—

परिगृह्य तु यः कन्यां वरो देशान्तरं व्रजेत् ।
त्रीनृतून् समतिक्रम्य कन्याऽन्यं वरयेद्वरम् ।।
स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते ।
वरणाद् ग्रहणं पाणेः स सम्बन्धो द्विलक्षणः ।।
तयोरनियतं प्रोक्तं वरणं दोषदर्शनात् ।। इति ।

दोषदर्शनात् क्लीबादिषु वरणे कन्यात्वप्रत्यावृत्तेः शास्त्रे दर्शनातिति रत्नाकरः। अत एव पतावित्युक्तम्, तस्य च पतित्वेनाख्याते न तु वास्तवे इत्यर्थः। पतिशब्दस्याचक्षाणायन्तप्रकृतिके प्रत्ययान्तत्वात्, अत एव पतावित्युपपद्यते, अन्यथा पत्याविति स्यात्। तदाह स्म मनोरमाकारः—पतिरित्याख्यातः पतिरिति, पाणिग्रहणात् पूर्वं पतित्वनिष्पत्तिरेव नेति तद्भावः। यद्वा समासत्वप्रयुक्तधिसंज्ञाकार्यदर्शनादपताविति च्छेदः, तस्य च नञिव युक्तन्यायेन पतिसदृशे वाग्दानसंप्रदाने न तु पाणिग्राहके इत्यर्थोऽवसेयः। नन्वेवं वाचा दत्ता, मनोदत्ता, अग्निं परिगता, सप्तमं पदं नीता, भुक्ता, गृहीतगर्भा, प्रसूता चेति सप्तविधा पुनर्भूस्तां गृहीत्वा न प्रजां धर्ममिति बोधायनवचनविरोध इति चेन्मैवम्, निर्दुष्टवरसंप्रदानकवाग्दानविषयत्वात्। अत एव नारदः—

दत्तां न्यायेन यः कन्यां वराय न ददाति ताम्।
अदुष्टश्चेद् वरो राज्ञा स दण्ड्यश्चौरदण्डवत्॥

इति तत्र दण्डं विधत्त इति दिक्। सेयं विद्वन्मनोहरानुसारिणी सरणिः। पराशरमाधवीये तु—"नष्टे मृते प्रव्रजिते" इति वचनं नियोगपरतयैव व्याख्यातमित्यलं पल्लवितेन।

अथ पितृगोत्रनिवृत्तिः पतिगोत्रप्राप्तिश्च चतुर्थीकर्मनिर्वृत्त्यनन्तरमेव,

चतुर्थीहोममन्त्रेण त्वङ्मांसरुधिरेन्द्रियैः।
भर्त्रा संयुज्यते नारी तद्गोत्रा तेन सा भवेत्॥

इति बृहस्पतिवचनादिति स्मृतिसुधाकरद्वैतपरिशिष्टादिसकलनिबन्धसिद्धान्तः। ठक्कुरमधुसूदनादयोऽप्येवम्। यत्तु—

स्वगोत्राद् भ्रश्यते नारी विवाहात्सप्तमे पदे।
पतिगोत्रेण कर्त्तव्या तस्याः सर्वक्रिया ततः॥

इति लघुहारीतवचनं तच्छाखान्तरविषयम्, तत्र चतुर्थीहोममन्त्रलिङ्गसंवादविरहात्; अभिषेकपाणिग्रहणमन्त्राणामेव तच्छाखिनां शरीरैक्यनिमित्तत्वाच्चेति ध्येयम्। मुरारिमिश्रादयोऽप्येवम्। केचित्तु—"स्वगोत्राद् भ्रश्यते नारी" इति लघुहारीतवचनस्यापि सप्तपदीपरिणयनस्य चतुर्थीकर्मसहकारेण पितृगोत्रनाशकत्वमित्यत्रैव

तात्पर्यमिति वदन्ति। एवं प्रवरसापिण्डयोरपि चतुर्थीकर्मानन्तरमेवप्राप्तिः, गोत्र-समशीलत्वात्;

विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु।
एकत्वमागता भर्तुः पिण्डे गोत्रे च सूतके॥

इति गृह्यान्तरभाष्यधृतवचनाच्च; अत एव अस्थिभिस्ते अस्थीनीत्यादि मन्त्रलिङ्गाद्भर्त्रा समं पत्न्याः सापिण्ड्यमिति निबन्धृभिर्लिखितमिति दिक्। स चायं विवाहोऽष्टविधः। तथा च मनुर्यमश्च—

ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽसुरः।
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥
यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ।
तद्वत् सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान्॥
षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्।
विट्शूद्रयोश्च तानेव विद्याद्धर्म्यानराक्षसान्॥
चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षस्यं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः॥
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह।
पैशाचश्चासुरश्चैव न कर्त्तव्यः कदाचन॥
पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वदेशितौ।
गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ॥

प्रसवे अपत्योत्पत्तौ, अगुणान् दोषान्, आनुपूर्व्या यथोक्तक्रमेण, अवरान् अधस्तनान्, आसुरगान्धर्वराक्षसपैशाचान्। धर्म्यान् अदुष्टजनकान्, पञ्चानाम् उपरितनानां प्राजापत्यादीनाम्, द्वावधर्म्यावित्युक्तं तावेव प्रदर्शयति—पैशाचश्चासुर-श्चैवेति। अयञ्च निषेधो ब्राह्मणविषयः, अन्यत्र तद्विधानात्। पृथक् पृथग् एकैकशः। मिश्रौ उभयलक्षणसङ्कीर्णौ। यथा—कन्यावरयोः परस्परानुरागे सत्येव कन्याया अदीयमानाया झटिति हरणेन विवाहे गान्धर्वराक्षसौ। षडानुपूर्व्या विप्रस्येति यद् ब्राह्मणस्यासुरविवाहानुमननं तदत्यन्तापद्विषयमिति भावः।

नारदः—

अष्टौ विवाहा वर्णानां संस्कारार्थं प्रकीर्त्तिताः।
ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्तथैव च ॥
आर्षस्तथैव दैवश्च गान्धर्वश्चासुरस्तथा।
राक्षसोऽनन्तरस्तस्मात् पैशाचश्चाष्टमोऽधमः ॥
एषां तु धर्म्याश्चत्वारो ब्राह्माद्याः समुदाहृताः।
साधारणाः स्याद् गान्धर्वस्त्रयो धर्म्यास्तथापरे ॥

साधारणो न धर्म्यो न वाऽधर्म्यः। नारदक्रमेणैव ब्राह्मादीनभिधाय देवलः—

एते विवाहाश्चत्वारो धर्म्यास्तोयप्रदात्मिकाः।
अशुल्का ब्राह्मणार्हाश्च तारयन्ति द्वयोः कुलम् ॥

गान्धर्वादिचतुष्टयमभिधाय पुनर्देवलः—

एतान् सशुल्कान् सामान्यान् विवाहांश्चतुरो विदुः।
केवलं क्षत्रियस्यैव वीर्यवत्त्वाद्धि राक्षसः ॥

तथैव बौधायनः—एषाञ्चत्वारः पूर्वे ब्राह्मणस्य तेष्वपि पूर्वः पूर्वः श्रेयान्, इतरेषामुत्तरोत्तरः पापीयान्। तत्रापि षष्ठसप्तमौ क्षत्रधर्मानुगतौ, पञ्चमाष्टमौ वैश्यशूद्रयोः। इतरेषां गान्धर्वादीनाम्, पापीयान् मन्दतरः, षष्ठसप्तमौ आसुरराक्षसौ। पञ्चमाष्टमौ गान्धर्वपैशाचौ। पैठीनसिः—ब्राह्मप्राजापत्यार्षदैवो ब्राह्मणस्य, गान्धर्वासुरौ राजन्यस्य, राक्षसो वैश्यस्य, पैशाचः शूद्रस्य, राक्षसो वैश्यस्येत्यापत्कालविषयम्। हारीतः—एतेषामेकतमेनोढां धर्मपत्नीं प्राहुः। अत्र यद्यप्येकतमेनेति सामान्यतः सर्वं प्रत्यवशिष्टम्, तथापि यो यस्य विवाह उक्तस्तेनैव तस्य धर्मपत्नी भवतीति वाक्यार्थो नेयः। रत्नाकरादयोऽप्येवम्। यमः—

अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत् ॥

ब्राह्मविवाहं लक्षयति याज्ञवल्क्यः—

ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता।
तज्जः पुनात्युभयत पुरुषानेकविंशतिम् ॥

"स ब्राह्माभिधानो विवाहो यस्मिन्नुक्तलक्षणाय वराय आहूय यथाशक्त्यलङ्कृता कन्या दीयते" इति मिताक्षरा। तत्र यस्मिन्नित्यस्य प्रतिग्रहरूपविवाहे इत्यर्थः। अत्रा-

हूयेति श्रवणान्मैथिलानां वरानयनार्थं वरकुले कन्याभ्रातृगमनव्यवहारः समूल एव। अन्येऽपि वञ्चकबकप्रतिकृतिप्रदर्शनादयो व्यवहारास्तेषां समूला एव। तथा चाश्वलायनः—अथ खलूच्चावचा जनपदधर्मा ग्रामधर्माश्च तान् विवाहे प्रतीयात्। उच्चावचा नानाप्रकाराः। जनपदो देशः। चकारात् कुलधर्माः प्रतीयात् कुर्यादिति भाष्यकृतः। मनुः—

आच्छाद्य चार्हयित्वा तु श्रुतशीलवते स्वयम्।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्त्तितः॥

आच्छाद्य वस्त्रयुगं परिधाप्य। इत्थञ्च वरपरिधेयवस्त्रयुगं कन्यापित्रैव देयमिति सिद्धम्। अर्हयित्वा अर्हणं कृत्वा। देवलः—

ततो विनीतां कल्याणीं कुलरूपवयोऽन्विताम्।
अलङ्कृत्यार्हते दद्याद्विवाहो ब्राह्म उच्यते॥

अलङ्कृत्येति श्रवणात् कन्यालङ्करणमप्यावश्यकम्। बौधायनः—'श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने देयेति स ब्राह्मः'। ब्रह्मचारिणे असञ्जातस्त्रीसङ्गमायेति लक्ष्मीधरः। समावर्त्तनानन्तरमेव देयेति हलायुधः। ब्रह्मचारिणे वेदवते इति तु रत्नाकरः। युक्तञ्चैतत्, जातपरिणीतस्त्रीसङ्गमस्य द्वितीयविवाहे विवाहाष्टकबहिर्भावापत्तेः। ब्रह्मचारिणे इति प्राशस्त्यार्थमिति गौडाः। श्रेष्ठवरमधिकृत्य ब्रह्मपुराणम्—

तादृशाय मुदा कन्यां ददध्वं श्रद्धयान्विताः।
अलङ्कृत्य यथाशक्त्या पूरयित्वा धनेन च॥

अलङ्कृत्य वरमपि, धनेन गोभूहिरण्यादिना। यथाशक्त्या इत्युभयत्रापि योज्यम्। ब्राह्मविवाहमभिप्रेत्य संवर्त्तः—

स कन्यायाः प्रदानेन श्रेयो विन्दति पुष्कलम्।
सद्भिरित्युच्यते साधुः कीर्त्तिमाप्नोति पुष्कलाम्॥

साधुरित्युच्यत इत्यन्वयः। दैवं लक्षयति मनुः—

यज्ञे तु वितते सम्यक् ऋत्विजे कर्म कुर्वते।
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते॥

देवस्यायं दैवः, तत्सम्पादकः धर्मोऽङ्गम्। देवलः—

अन्तर्वेदीं समानीय कन्यां कनकमण्डिताम्।
ऋत्विजे तु ददात्येष विवाहो दैवसंज्ञकः॥

हारीतः—वेद्यन्ते गोमिथुनं दत्वा स दैवः। गोमिथुनमत्र स्वीयमेव, न तु वरादेवोपादेयं तथा सत्यार्षत्वापत्तेः। आर्षं लक्षयति मनुः—

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।
कन्याप्रदानं विधिवदार्षोऽयं धर्म उच्यते॥

धर्मतः दक्षिणात्वेन। द्वे वेति शक्त्यपेक्षो विकल्पः। देवलः—

प्रदानं यत्तु कन्यायाः सह गोमिथुनेन च।
शस्ताय चासगोत्राय तमार्षमृषयो विदुः॥

गोमिथुनेन वरादुपात्तेन। याज्ञवल्क्यः—

यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोयुगम्।
चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट्॥

प्रथमजो दैवविवाहजः, चतुर्दश सप्तावरान् सप्तपरान् पुनाति; उत्तरज आर्षविवाहजः षट् त्रीन् पूर्वान् त्रीनवरान् पुनातीत्यर्थः। प्राजापत्यं लक्षयति मनुः—

सहितौ चरतां धर्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥

कन्याप्रदानसमये सह अन्योन्याव्यभिचारेण धर्मेण धर्मं चरतामिति वाक्यमुच्चार्य कन्यावरावभ्यर्च्य कन्याप्रदानं क्रियते, तेन विवाहः प्राजापत्य इत्यर्थ इति व्याख्यातारः। विष्णुः—प्रार्थितप्रदानं प्राजापत्यः। प्रार्थिताय प्रदानमित्यर्थः। प्रार्थना च सहितौ चरतां धर्ममिति। याज्ञवल्क्यः—

इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने।
स कायः पावयेत्तज्जः षट् षट् वंश्यान् सहात्मना॥

सह धर्मं चरतामित्युक्तेत्यन्वयः। कायः कः प्रजापतिर्देवताऽस्य प्राजापत्य इत्यर्थः। तज्जः षट् पूर्वान् षट् परान्, आत्मना सहेत्येवं त्रयोदश पुनाति। आसुरं लक्षयति मनुः—

ज्ञातिभ्यो द्रविणं दत्वा कन्यायै चैव शक्तितः।
कन्याऽऽप्रदानं स्वाच्छन्द्यादासुरो धर्म उच्यते॥

ज्ञातिभ्यः कन्यायै वा धनं दत्वा धनग्रहणलुब्धदातुः स्वाच्छन्द्याद्धनादानावष्टम्भाद् यत्कन्याया आप्रदानं ग्रहणमित्यथः। देवलः—

शुल्कं प्रदाय कन्यायाः प्रत्यादानं विधानतः।
वित्तहेतुर्विवाहोऽयमासुरः षष्ठ उच्यते॥

प्रत्यादानं ग्रहणम् याज्ञवल्क्यः—'आसुरो द्रविणादानात्'। शास्त्रविहितगोमिथुनातिरिक्तद्रव्यग्रहणादित्यर्थः; तेनार्षस्य न तथात्वम्।

नन्वेवमार्षासुरयोर्निष्पत्तिर्द्धनग्रहणायत्ता, वर्णविशेषपरतया तयोः प्राशस्त्यमिति मनुनाभिहितम्, धनग्रहणञ्च सर्वथैव प्रतिषिद्धम्। तथा च कश्यपः—

क्रीता द्रव्येण या नारी न सा पत्नी विधीयते।
न सा दैवे न सा पित्र्ये दासीं तां कश्यपोऽब्रवीत्॥
शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः।
आत्मविक्रयिणः पापा महाकिल्विषकारकाः॥
पतन्ति निरये घोरे घ्नन्ति चासप्तमं कुलम्।
गमनागमने चैव सर्वैः शुल्कोऽभिधीयते॥

गमनागमने बहुसन्देशादिकमादाय कन्याप्रार्थनार्थं कन्यापितृवेश्मनि यातायाते। आपस्तम्बः—

दानं विक्रयधर्मश्च अपत्यस्य न विद्यते।
न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि॥
गृह्णन् शुल्कञ्च लोभेन स्यान्नरोऽपत्यविक्रयी।
आददीत न शूद्रोऽपि शुल्कं दुहितरं ददत्॥
शुल्कं गृह्णन् हि कुरुते छद्मनं दुहितृविक्रयम्।
नानुशुश्रुम जात्वेतत्पूर्वेष्वपि च जन्मसु।
शुल्कसंज्ञेन मूल्येन पापं दुहितृविक्रयम्॥ इति।

एवं चेदमसङ्गतमिति चेन्न; स्वार्थं धनग्रहणस्यैव कश्यपादिनिषेधविषयत्वात्; कन्यार्हणाद्यर्थं तद्ग्रहणे च विक्रयदोषविरहात्। अत एव "लोभमोहिताः" इत्युपात्तम्। तथा च मनुः—

यासां नाददते शुल्कं ज्ञातयो न स विक्रयः।
अर्हणान्तु कुमारीणामानृशंस्यं हि केवलम्॥

आनृशंस्यमनुकम्पा। आपस्तम्बः—विवाहे दुहितृमते दानं काम्यम्, विवाहे यत्कन्यापित्रे दानन्तत्काम्यं न मूल्यार्पणम्। कामना चात्रार्षत्वोत्पत्तिविषया, "यथा युक्तो विवाहस्तथा युक्ताः प्रजा भवन्ति" इत्यभिधानादिति भावः। इत्थञ्च "स्वार्थ-धनग्रहणविषय एव" कश्यपादिप्रतिषेध इति वेदितव्यम्। तदुक्तं स्मृत्यालोके—

आर्षे गोमिथुनादानं धनादानन्तथासुरे।
कन्याऽर्हणार्थकं कन्या दातुर्न जनयत्यघम्॥
कन्यामनु धनादाने निन्दाश्रवणमस्ति यत्।
तस्यात्मार्थतया वित्तादानं तु विषयं विदुः॥

कल्पतरुरत्नाकरादयोऽप्येवम्। गान्धर्वं लक्षयति मनुः—

इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वस्स तु वै ज्ञेयो मैथुन्यः कामसम्भवः॥

मैथुन्यः मिथुनस्य कर्म मैथुनं तस्मै हितः। देवलः—

विविक्ते स्वयमन्योन्यं स्त्रीपुंसोर्यत्समागमः।
प्रीतिहेतुस्स गान्धर्वो विवाहः पञ्चमो मतः॥

अत्र परस्परानुरागस्तन्मूलकं दानं वा प्रतिग्रहप्रयोजकम्। यत्तु "द्वयोस्सकाम-योर्मातृपितृदानरहितस्स गान्धर्वः" इति विष्णुस्मरणं तत्स्वयंवरगान्धर्वाभिप्रायम्, "स्वयं कन्या वरयते स गान्धर्वः" इति हारीतसंवादात्। रत्नाकरादयोऽप्येवम्। याज्ञ-वल्क्यः—"गान्धर्वः समयान्मिथः।" समयः त्वं मे भार्या त्वं मे पतिरिति सङ्केतः।

राक्षसं लक्षयति मनुः—

हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥

भित्त्वा चेत्यस्य कन्यासम्बन्धिनमिति शेषः। छेदादन्यहिंसापरं हत्त्वेति। क्रोशन्तीम् भयात्स्वजनमाह्वयन्तीम्। अत्र प्रसह्य हरणमात्रे तात्पर्यम्। देवलः—

विक्रमेण प्रसह्य स्यात्कुमारीहरणं पुनः।
वीर्यहेतुर्विवाहः स राक्षसः सप्तमो मतः॥

प्रसह्य अभिभूय। आश्वलायनः—"हत्वा छित्त्वा च शीर्षाणि रुदतीं रुदभ्यो हरेत्, स राक्षसः।" रुदद्भ्यः कन्याबन्धुभ्यः। याज्ञवल्क्यः—"राक्षसो युद्धहरणात्।"

पैशाचं लक्षयति मनुः—

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः ॥

रह एकान्ते, उपगच्छति आलिङ्गनादिकङ्करोति । याज्ञवल्क्यः—"पैशाचः कन्यकाच्छलात्" । कन्यकाछलात् "छलेन छद्मना स्वापाद्यवस्थास्वपहरणाद्" इति मिताक्षरा । मनुः—

ब्राह्मादिषु विवाहेषु चतुष्वेवानुपूर्वशः ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसम्मताः ॥
रूपसत्त्वगुणोपेता धनवन्तो यशस्विनः ।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः ॥
इतरेष्ववशिष्टेषु नृशंसानृतवादिनः ।
जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषस्सुताः ॥

विवाहश्चायमावश्यकः; तथा च ब्रह्मचारिधर्ममभिधाय संवर्त्तः—

एष धर्मः समाख्यातः प्रथमाश्रमिणि द्विजे ।
अतः परं समावृत्तः कुर्यादारपरिग्रहम् ॥

समावृत्तः गुरुकुलादेत्य कृतस्नानादिसंस्कारः । अत्र दारेति भाविनि भूतोपचारः । यमः—

वेदं वेदौ च वेदान्वा ततोऽधीत्य यथाविधि ।
अविशीर्णब्रह्मचर्यो दारान् कुर्वीत धर्मतः ॥

वेदं वेदौ च वेदान्वेति पुरुषशक्त्यपेक्षो विकल्पः । अविशीर्णेत्यनेन विशीर्णब्रह्मचर्यस्याकृतप्रायश्चित्तस्योत्तरस्मिन्नाश्रमेऽनधिकार इति द्योतितं भवति । तथा—

गुरुवासमनुज्ञाय प्रदाय गुरुदक्षिणाम् ।
सदृशानाहरेद्दारान् मातापितृमते स्थितः ॥

वा शब्दो नैष्ठिकापेक्षया, तेन गुर्वनुज्ञया गुरुदक्षिणां दत्त्वा सदृशान् दारानाहरेत् नैष्ठिकब्रह्मचारी वा स्यादित्यर्थः । नैष्ठिकब्रह्मचारी यावज्जीवब्रह्मचारी । रत्नाकरादयोऽप्येवम् । वशिष्ठः—गृहस्थो विनीतक्रोधो गुरुणाऽनुज्ञातः स्नात्वाऽसमानार्षेयीमस्पृष्टमैथुनामधरवयस्कां सदृशीं भार्यां विन्देत् । गृहस्थ इति भाविनि भूतोपचारस्तद्धर्म-

प्राप्त्यर्थः, तेनाकृतदारोऽपि गार्हस्थ्यसंकल्पवानाश्रमान्तरनिवृत्तो गृहस्थधर्मेष्वधिक्रियत इति यज्ञापार्श्वकल्पतरु-रत्नाकरादयः। याज्ञवल्क्यः—

लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः।
यस्मात्तस्मात्स्त्रियः सेव्याः कर्त्तव्याश्च सुरक्षिताः॥

कश्यपः—

दाराधीनाः क्रियाः सर्वा ब्राह्मणानां विशेषतः।
दारान् सर्वप्रयत्नेन विशुद्धानुद्वहेत्ततः॥
देवतानां नमस्कारः पितॄणाञ्चोदकक्रियाः।
दारतः सम्प्रवर्त्तन्ते दाराः स्वर्गस्य संक्रमः॥
इत्येतत्कश्यपमतं ब्रह्मणश्चानुशासनम्॥

विशुद्धान् कुलतः स्वरूपतश्च, उद्वहेत् परिग्रहेत्[1]। दक्षः—

अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते त्वसौ॥
जपे होमे तथा दाने स्वाध्याये वा रतः सदा।
नासौ फलमवाप्नोति कुर्वाणोऽप्याश्रमच्युतः॥

शूद्रस्याप्याश्रममाह पराशरभाष्ये वामनपुराणम्—

चत्वार आश्रमाश्चैव ब्राह्मणस्य प्रकीर्त्तिताः।
गार्हस्थ्यं ब्रह्मचर्यञ्च वानप्रस्थञ्च भिक्षुकम्॥
क्षत्रियस्यापि कथिता आश्रमास्त्रय एव हि।
ब्रह्मचर्यञ्च गार्हस्थ्यमाश्रमद्वितयं विशः।
गार्हस्थ्यमुचितं त्वेकं शूद्रस्य क्षणमाचरेत्॥

क्षणमुत्सवरूपम्। भविष्यपुराणम्—

चत्वारिंशद्वत्सराणां साष्टानाञ्च परे यदि।
स्त्रिया वियुज्यते कश्चित्स तु रण्डाश्रमी मतः॥
अष्टचत्वारिंशदब्दं वयो यावत्प्रपूर्यते।
पुत्रभार्यावियुक्तस्य नास्ति यज्ञाधिकारिता॥

---

१. परिगृह्णीयादिति क पु० पाठः।

इत्थञ्च प्रत्यवायश्रुतेः कन्यालाभसत्त्वेऽपि स्वेच्छया विवाहाकर्त्तरि ज्येष्ठे कनिष्ठविवाहे परिवेदनदोषो नास्ति, तादृशज्येष्ठस्य 'कामतः कारिणस्तथे'ति छन्दोग-परिशिष्टे परिवेदने पर्युदस्तत्वादिति निबन्धारः।

पैठीनसिः—

अलाभे चैव कन्यायाः स्नातकव्रतमाचरेत्।

स्नातकव्रतम् "स्नातकस्य यमान्वक्ष्यामः" इत्यादिना पारस्करोक्तम्। विवाह्य कन्यां लक्षयतः मनु-शातातपौ—

असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने॥

दारकर्मणि दारत्वसंपादके विवाहे। मैथुने मिथुनसाध्यधर्मपुत्रोत्पत्त्यादौ।

मातुरसपिण्डा मातुलदुहित्रादिभ्योऽन्या। पिण्डो देहः, समान एकः पिण्डो देहो येषान्ते सपिण्डाः। सपिण्डता च एकशरीरावयवान्वयेन भवति, तथाहि—पुत्रस्य पितृशरीरावयवान्वयेन पित्रा सह सापिण्ड्यम्, एवं मातृशरीरावयवान्वयेन मात्रा। तदुक्तं गर्भोपनिषदि—एतत्षाट्कौशिकं शरीरं त्रीणि पितृतः त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतः त्वङ्मांसरुधिराणि मातृत इति। तथा पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्, मातामहादिभिरपि मातृद्वारेण। एवं पत्या सह पत्न्या एकशरीरारम्भकतया सापिण्ड्यम्, 'अस्थिभिस्ते अस्थीनि' इत्यादिश्रुति-बलाच्च। तदुक्तम्-"एकत्वमागता यस्माच्चरुमन्त्राहुतिव्रतैः" इति। तत्सपिण्डैस्तु तद्द्वारैव; एवञ्च साक्षात्परम्परया वैकशरीरान्वयित्वं सापिण्ड्यमिति लब्धम्।

नन्वेतदतिप्रसक्तम्? अष्टमादरेपि परम्परया एकशरीरान्वयसम्भवात् इति मातृतः पितृतः पञ्च सप्तान्यतमत्वेनोपहितत्वात्[1]। अत एव चेन्न। वृद्धशातातपः—

पञ्चमात्सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा।
सपिण्डता निवर्त्तेत सर्ववर्णेष्वयं विधिः॥

अशौचप्रकरणे—"दशाहेन सपिण्डास्तु" इत्यादौ सपिण्डपदं स्वकुलसपिण्ड-परं मातामहादावुक्तसापिण्ड्यसत्त्वेऽपि तत्राशौचविशेषस्य वाचनिकत्वादिति न दोषः। अत्रैकस्यापि सप्ताधिकत्वे तेन समं सप्तान्तर्गतस्यापि सापिण्ड्यं निवर्त्तते, संयोगवत्तस्योभयनिरूप्यत्वादिति वाचस्पतिमिश्रादयः। तच्चिन्त्यम्, सप्तमत्वादे-

१. तथा च पङ्कजशब्दवत् सपिण्डशब्दो योगरूढ इति ज्ञेयम्।

रवधिनिरूप्यत्वात्; काममुभयनिरूप्यं सापिण्ड्यं न तु निरूपकयोरैकरूप्यनियमः संयोगे घटपटयोरिव, एवञ्च यदपेक्षया यः सप्तमः स तस्य सपिण्डः, यदपेक्षया योऽष्टमः स तस्य सकुल्य इत्येवमापेक्षिकं सपिण्डत्वमेतत्कथमेकस्याष्टमत्वे निवर्त्तेत, अवधेरष्टमत्वेऽप्यवधिमतः सप्तमत्वानपायात्; अत एव वीजिपुरुषापेक्षयाऽष्टमस्यापि वरस्य सप्तमी कन्या स्वजना भवति, एवं वैषम्येऽपि मातृसपिण्डा भवति। किञ्चैवं सप्ताधिकस्य सकुल्यताऽपि न स्यात्, उभयनिरूप्यत्वात्, उभयोरैकरूप्यनियमात्, अन्यस्य सप्तमत्वेन वैलक्षण्यात्, एवञ्चात्र न दशाहो नापि त्र्यह इत्यशौचाभावः प्रसज्येत, अशौचान्तरस्य च दशान्तर्भावादेवाभावादिति न किञ्चिदेतदिति बर्द्धमानः। ठक्कुरदेवनाथादयोऽप्येवम्। अत्र कूटस्थमारभ्य गणना कार्या। तदुक्तम्—

वध्वा वरस्य वा तातः कूटस्थाद्यदि सप्तमः।
पञ्चमी चेत्तयोर्माता तत्सापिण्ड्यं निवर्त्तते॥ इति।

कूटस्थो[1] मूलपुरुषः। विश्वरूपनिबन्धे—

एवमुक्तप्रकारेण पितृबन्धुषु सप्तमात्।
ऊर्ध्वमेव विवाह्यत्वं पञ्चमान्मातृबन्धुतः॥
सन्तानो भिद्यते यस्मात्पूर्वजादुभयत्र च।
तमादाय गणोद्धीमान् वरं यावच्च कन्यकाम्॥

१. अत्र पितृद्वारकसापिण्ड्यविचारे सप्तमादूर्ध्वं सापिण्ड्यनिवृत्तिः। मातृद्वारकसापिण्ड्यविचारे तु पञ्चमादूर्ध्वं तन्निवृत्तिरिति निर्णयः। अत्रोदाहरणानि—

विष्णुर्मूलभूतः कान्तिः२ गौरी २ सुधीः ३ हरः ३ बुधः ४ मैत्रः ४ चैत्रः ५ शिवः ५ गणः ६ भूपः ६ मृडः ७ अच्युतः ७ रतिः ८ कामः ८ अत्र रतिकामयोरष्टमयोर्विवाहः पितृद्वारकत्वात्।	विष्णुर्मूलभूतः दत्तः २ चैत्रः २ सोमः ३ मैत्रः ३ सुधीः ४ बुधः ४ श्यामा ५ रतिः ५ शिवः ६ गौरी ६ अत्र गौरीशिवयोः षष्ठयोर्विवाहः मातृद्वारकत्वात्।	विष्णुर्मूलभूतः दत्तः २ चैत्रः २ सोमः ३ मैत्रः ३ सुधीः ४ बुधः ४ श्यामा ५ नर्मदा ५ शिवः ६ कामा ६ रमा ७ कविः ७ अत्र रमाकव्योर्न विवाहः मण्डूकप्लुत्या सापिण्ड्यानुवृत्तेः।	विष्णुर्मूलभूतः दत्तः २ चैत्रः २ सोमः ३ मैत्रः ३ सुधीः ४ बुधः ४ श्यामा ५ शिवः ५ कान्तिः ६ हरः ६ अत्र कान्तिहरयोर्न विवाहः एकतो निवृत्तावपि अन्यतोऽनुवृत्तेः।

शङ्खः—

यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्धनाः।
एकपिण्डाः पृथक् शौचाः पिण्डस्त्वावर्त्तते त्रिषु॥

पृथक्क्षेत्रा ब्राह्मणादिनाऽनुलोम्येनासवर्णासु स्त्रीषु जनिताः। पृथग्धनाः पितृजात्युचितभागादन्याद्दशभागार्हाः। एकपिण्डाः पित्रा समं परस्परञ्च सपिण्डाः। "पिण्डस्त्वावर्त्तते त्रिषु" एषां त्रिपुरुषमेव सापिण्ड्यमनुवर्त्तते।

कूर्मपुराणे— अप्रत्तानां तथा स्त्रीणां सापिण्ड्यं सप्तपौरुषम्।
प्रत्तानां भर्तृसापिण्ड्यं प्राह देवः पितामहः॥

प्रत्ता दत्ता। यत्तु—अप्रत्तानां स्त्रीणां त्रिपुरुषमिति वशिष्ठवचनं तदशौचपरम्, अत एव सप्तमीपर्यन्तं मातृसपिण्डा सा चाविवाह्येति सकलसिद्धान्तः। 'असपिण्डा च या मातुः' इति चकारान्मातृसगोत्रापि मातृवंशपरम्पराजन्मनाम्नोः प्रत्यभिज्ञाने सति न विवाह्या, "सगोत्रां मातुरप्येके" इत्यादिवक्ष्यमाणव्यासवचनादिति कुल्लूकभट्टरघुनन्दनादयः।

पितुरसगोत्रा पितृगोत्रभिन्नगोत्रा। गोत्रञ्च वंशपरम्पराप्रसिद्धमादिपुरुषब्राह्मणरूपं काश्यपादि। "असगोत्रा च या पितुः" इति 'च'शब्दात्पितृसपिण्डापि पितृष्वस्रादिसन्ततिभवा नोद्वाह्या। अत एव पित्रपेक्षया सप्तमवर्जनाय 'पितुः' इति सार्थकं न वरापेक्षयेति रघुनन्दनः। शूलपाणिस्तु क्षेत्रमात्रगोत्रस्य द्विपितृकस्य क्षेत्रजादेर्बीजिसगोत्रावर्जनाय पितुरितीत्याह। गौतमः—"असमानप्रवरैर्विवाहः ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्।"

समानप्रवरत्वञ्च प्रवराणां संख्यायाः संज्ञायाश्च तुल्यत्वेन भवति, तच्च गोत्रभेदेऽपि यथा वत्ससावर्ण्यगोत्रयोरौर्वादीनां पञ्चत्वेन संख्यया और्वादिरूपया संज्ञया च। यत्र तु प्रवरनामसाम्येऽपि न संख्यासाम्यं संख्यासाम्ये नामभेदो वा तत्राप्यसमानप्रवरतैवेति बोध्यम्। प्रवरस्तु—गोत्रवंशप्रवर्त्तकस्य मुनेर्व्यावर्त्तको मुनिगण इति निबन्धारः।

पितृबान्धवाः—

पितामहस्वसुः पुत्राः पितुर्मातुः स्वसुः सुताः।
पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः॥

इति वाक्योक्ताः। एषां बीजिनो यः सप्तमस्तदूर्ध्वं विवाह इत्यर्थ इति मुरारिमिश्रादयः। एभ्य एव यः सप्तमस्तदूर्ध्वं विवाह इत्यर्थ इति परे। अत्र पितृबन्धुपदं

पितृपक्षार्थकम्, न तूपदर्शितपरिभाषितपरम्, तथा सति पितृमातामहान्नवमपर्यन्त-त्यागापत्तेरिति ठक्कुरमधुसूदनादयः। एवं मातृबन्धुष्वपि ज्ञेयम्। बीजिनश्चेत्यत्र 'ऊर्ध्वं सप्तमादि'त्यनुवर्त्तते। एतच्च वाक्यान्तरस्वरसात्पितृपक्षपरम्। बीजी वंशहेतु-बीजयोगीति मुरारिः। अत्र बीजी यः परक्षेत्रेऽपत्यमुत्पादयति स इति रत्नाकरस्मृति-चन्द्रिकादयः।

मातृबान्धवाः —

मातुर्मातुः स्वसुः पुत्रा मातुः पितुः स्वसुः सुताः।
मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः॥

इति वाक्योक्ताः। उद्वहेदित्यनुवृत्तौ याज्ञवल्क्यः—

अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम्।
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्॥

अनन्यपूर्विकाम् दानेनोपभोगेन वा पुरुषान्तरापरिगृहीताम्, यवीयसीम् प्रमाणवयोभ्यां न्यूनाम्। तथा च गर्गः—"उद्वहेद्वयसा न्यूनां न्यूनामाकारतोऽपि च" इति। अरोगिणीम् अचिकित्सनीयव्याध्यनुपस्पृष्टाम्। भ्रातृमतीमिति पुत्रिकाकरण-शङ्कानिवृत्त्यर्थम्। ऋषेरिदमार्षं नाम प्रवरः, गोत्रप्रवरौ च पृथक् पृथक् पर्युदासे निमित्तम्, तेनासमानगोत्रजामसमानार्षजामित्यर्थः।

परिणीय सगोत्राञ्च समानप्रवरां तथा।
त्यागं कृत्वा ततस्तस्यास्ततश्चान्द्रायणं चरेत्॥

इति पृथक् प्रायश्चित्तदर्शनात्।

पैठीनसिः —असमानार्षेयीङ्कन्यां वरयेत् पञ्च मातृतः परिहरेत्, सप्त पितृतः परिहरेत्; त्रीन् मातृतः, पञ्च पितृत इति वा। अत्र समानजातीयाविवाहे पञ्च मातृतः सप्त पितृतः, असमानजातीयाविवाहे त्रीनित्यादीति व्यवस्थितो विकल्पः।

गौडास्तु त्रीनित्याद्यधिकदोषार्थमित्याहुः। त्रीनित्याद्यनुकल्प इति माधवः।

अन्ये तु—

असंबद्धा भवेद् या तु पिण्डेनैवोदकेन वा।
सा विवाह्या द्विजातीनां त्रिगोत्रान्तरिता च या।
सन्निकर्षेऽपि कर्त्तव्यं त्रिगोत्रात्परतो यदि॥

इत्यादि बृहन्मनु-मत्स्यपुराणादिवचनदर्शनात् तत्समानविषयमेतदित्याहुः।

सुमन्तुः—"पितृस्वसृसुतां मातृस्वसृसुतां मातुलसुतां मातृसगोत्रां समानार्षेयीं विवाह्य चान्द्रायणं चरेत्, परित्यज्य चैनां बिभ्रियात्।" अयञ्च मातृसगोत्रानिषेधो मातृसम्बन्धित्वेन जन्मपरम्परानाम्नोः प्रत्यभिज्ञायां सत्याम्। अत एव व्यासः—

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि।
जन्मनाम्नोरविज्ञाने उद्वहेदविशङ्कितः॥

इति रत्नाकरादयः। इदं व्यासाभिधानं पुत्रिकापुत्रविषयमिति हलायुधः। मातृसगोत्रा मातृसमाननामधेयेति मुरारिः। मातृसगोत्रानिषेधो मातृसपिण्डापर इत्यपरे।

पैठीनसिः—कुलोत्पन्नां युक्ताचारां वरयेत्, मातृष्वसृपितृष्वसृदुहितरौ मातुलसुता च धर्मतस्ता भगिन्यो वर्जयेत्। असमानार्षेयीमित्यादिपूर्ववाक्येनैव पितृष्वसृदुहित्रादौ निषेधे सिद्धे पुनर्निषेधो दोषातिशयबोधनार्थः।

सुमन्तुः—"मातृपितृसम्बन्धा आसप्तमादविवाह्याः कन्या भवन्ति। आपश्चमादन्येषां सर्वाः पितृपक्ष्यो मातरस्तद्भ्रातरो मातुलास्तद्दुहितरो भगिन्यस्तदपत्यानि भागिनेयानि। ताः परिणीतास्सङ्करकारिण्यः; तथाध्यापयितुरेतदेव।" अत्र मातृसम्बन्धे न सप्तमीत्यागो मातृसपिण्डाविषयः, 'मातुस्सपिण्डा यत्नेन वर्जनीया द्विजातिभिः' इति व्यासवचनात्। भ्रातरः सोदरा एव, तत्रैव भ्रातृपदस्य शक्तत्वात्। सङ्करकारिण्यः सङ्करात्मकाधर्मकारिण्यः। तथाध्यापयितुः तद्विवाहमन्त्राध्यापयितुः। एतदेव सङ्करकारित्वमेवेत्यर्थः। 'ताः परिणीताः' इत्यत्र अन्यथेति पठित्वा 'अन्यथा एताः कन्यकाः परिणीताः' इति रत्नाकरकृदादयो व्याचख्युः।

अत्र केचित्—ता इति स्त्रीलिङ्गनिर्देशात्तेन तदपत्यानि भागिनेयानीत्युपक्रान्तानि प्रत्यवमर्षटुं न शक्यन्ते। स्त्रीनपुंसकयोरेकशेषेण निर्देशे तु तानीति स्यात्। तस्मात्तद्दुहितृपरिणयमात्रे निन्देयमिति तद्दौहित्रीपरिणये न दोषः। तदपत्यानीति च तदपत्यनिन्दार्थमेवोक्तमित्याहुः। तदसत्; तदतिदेशवैयर्थ्यात्। न चोक्तैव गतिः; तेन तदलाभात्, 'ताः परिणीताः' इत्यत्र अन्यथेति पठतां रत्नाकरकृदादीनां मते उपदर्शितप्रत्यवमर्षाप्रत्यवमर्षविचारानवकाशाच्च।

गौडास्तु—'तथाध्यापयितुरेतदेवे'ति वाक्यमन्यथा व्याचक्षते। तथा हि—अध्यापयितुः गुरोस्तथा कन्यका उद्वाहिता एतदेव सङ्करात्मकाधर्मकारित्वं भजन्त एवेत्यर्थः। उक्तञ्च मत्स्यसूक्ते—

समानप्रवरा वापि शिष्यसन्ततिरेव वा ।
ब्रह्मदातुर्गुरोश्चैव सन्ततिः प्रतिषिध्यते ॥ इति ।

मार्कण्डेयपुराणे—

उद्वहेन्पितृमात्रोस्तु सप्तमीं पञ्चमीं तथा ।

विष्णुपुराणे—

पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ।
गृहस्थ उद्वहेत्कन्यां न्याय्येन विधिना नृप ॥ इति ।

अत्र रत्नाकरकृदादयः—नायं विधिरुद्वाहस्य, धनार्जनवद्रागपरिप्राप्तत्वात्; तस्मात्पञ्च मातृतः परिहरेत्, सप्त पितृतः परिहरेदित्यादिस्मृत्येकवाक्यतानुरोधान्निषेधप्रकरणाम्नानाच्च नञ्यर्थकल्पनमेवोचितमिति पञ्चम्यादिपरिहार एव वाक्यार्थ इत्याहुः ।

कौमुदीकृतस्तु—विवाहस्य विधिवत्पाणिग्रहणरूपत्वेन कन्यास्वीकाररूपत्वेन वा रागप्राप्तत्वासम्भवाद्विधेरावश्यकत्वमिति पञ्चम्यादिपरिणयनमेव वाक्यार्थः । न च पञ्चम्यादिवर्जनस्मृतिविरोधः; "त्रीन्मातृतः पञ्च पितृतः" इति पैठीनसिवदेतस्याप्यसमानजातीयपरत्वात् । यद्वा आपत्कल्पे समानजातीयेऽपि पञ्चम्यादिपरिणयनम्, अनापदि तु तत्परिहार इति व्यवस्थाऽस्तु । अत एवोक्तपैठीनसिवचनव्याख्याने त्रीनित्याद्यनुकल्प इति माधवः । अपि चैकवाक्यत्वाग्रहेऽपि निषेधवाक्यस्यैव विरोधिलक्षणया भावपरताऽस्तु लाघवानुरोधात्, उद्वाहस्य न रागपरिप्राप्तत्वमित्यस्योक्तत्वादित्याहुः ।

अन्ये तु—विष्णुपुराणादिवाक्यानां विधायकतैव न तु निषेधकत्वम्, अश्रवणात्; स्त्रीसम्भोगस्य रागपरिप्राप्तत्वेऽपि विधिवत्तत्स्वीकाररूपविवाहस्य रागपरिप्राप्तत्वासम्भवेन विधायकत्वे बाधकाभावाच्च । न च प्रकरणानुरोधान्निषेधपरत्वम्; श्रुत्यपेक्षया प्रकरणस्य दुर्बलत्वात् । नाप्येकवाक्यत्वानुरोधात्तथा, भावाभावविषययोस्तदसम्भवात्, अध्याहारेण समानविषयत्वस्यातिप्रसङ्गेन दूरापास्तत्वादित्याहुः ।

केचित्तु—गत्यन्तराभावात्परिसंख्येयम्, तेन पञ्चमात्सप्तमाच्चार्वागुद्वाहनिषेधो लभ्यते । अत एव क्वचित्पितृपक्षे सप्तमीपरिणयसमाचारोऽपीत्याहुः ।

मतत्रयेऽप्यस्मिन्मातृपक्षे पञ्चमीपरिणयप्रसङ्गो दोषः ।

नव्यास्तु—निषेधकवचनानि "ऊर्ध्वं सप्तमात्पितृबन्धुभ्यः" इति गौतमवाक्यैकवाक्यत्वानुरोधात्तदुक्तविशेषनिषेधपराण्येव । अन्यथा गौतमस्य बन्धुपर्यन्तानुधावनं तन्निर्वचनञ्च निरर्थकमेव स्यात् । न चोक्तरीत्या सपिण्डपदस्य सप्तपञ्चान्य-

तमाभिधायित्वे 'अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीमि'ति याज्ञवल्क्यवचनात्सामान्यत एव पितृपक्षे सप्तमीपर्यन्तस्य मातृपक्षे पञ्चमीपर्यन्तस्य निषेधः सिद्ध एवेति वाच्यम्; असगोत्रे पञ्चमावधेरेव सर्वत्र सापिण्ड्यात्। तथा चापस्तम्बः—

सगोत्रे खलु सापिण्ड्यं विज्ञेयं साप्तपौरुषम्।
विगोत्रे तत्तु सर्वत्र विज्ञेयं पाञ्चपौरुषम्॥ इति।

इत्थञ्च यत्र पितृपक्षे सप्तमीपर्यन्तनिषेधः, तत्र स्ववंशबीजिनः पितृबन्धुबीजिनश्च तद्द्वारैव सप्तमीविषयः। तद्भिन्ने तु सप्तमीपरिणयोऽप्यविरुद्ध एव। स्मृतिसारादीनामप्यत्रैव तात्पर्यम्।

नन्वेवं पितृमातृकादिद्वारा षष्ठीपरिणयोऽप्यविरुद्धः स्यात्, इष्टत्वात्; अत एव पितृमातृपक्षस्तु मातृपक्ष एवेत्यतस्तत्र षष्ठ्यपि परिणेयेति प्रतिहस्तकाः। अत एव च न मातृपक्षे पञ्चमीपरिणयातिप्रसङ्गः। न चैवं क्वचिद्व्यवहितेऽपि सप्तमीपरित्यागः क्वचित्सन्निहितेऽपि तदुपादानमित्यसङ्गतमिति वाच्यम्; वाचनिकेऽर्थे सन्निधानव्यवधानयोरप्रयोजकत्वात्। अत एव सपत्नीमातृसोदरोपादानेऽपि तद्भ्रातृपुत्रीपरित्याग इति वदन्ति।

महामहोपाध्यायठक्कुरमहेशास्तु तत्तत्पाठमन्यथयित्वा पितृपक्षे सर्वत्र सप्तमीपरिणयमनुजानन्ति। तत्र च शिष्टसंवादमाचारञ्च प्रमाणयन्ति।

कतिपये दाक्षिणात्यास्तु—

उद्वहेत्सप्तमादूर्ध्वं तदभावे तु सप्तमीम्।
पञ्चमीं तदभावे तु पितृपक्षेऽप्ययं विधिः॥
सप्तमीञ्च तथा षष्ठीं पञ्चमीञ्च तथैव च।
एवमुद्वाहयेत्कन्यां न दोषः शाकटायनः॥
तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि।
विवाहयेन्मनुः प्राह पाराशर्योऽङ्गिरा यमः॥
यस्तु देशानुरूपेण कुलमार्गेण चोद्वहेत्।
नित्यं स व्यवहार्यः स्याद्वेदाच्चैतत् प्रतीयते॥

इति चतुर्विंशतिमतात्सापिण्ड्यसङ्कोचेन विवाहस्य बहुदेशेषु दर्शनाच्च येषां कुले देशे चानुकल्पत्वेन सापिण्ड्यसङ्कोचः परम्परया समागतः तेषां सापिण्ड्यसङ्कोचेन विवाहो न दोषाय। स्वकुलदेशविरुद्धेन सापिण्ड्यसङ्कोचेन विवाहे दोष

भवत्येव। यद्वा आपद्विषयकोऽनुकल्पोऽयम्, अत्र हि तदभाव इति स्पष्टमेवानुकल्पत्वमुक्तम्। इत्थञ्च प्रकृतमार्कण्डेयपुराणादिवचनमप्येतद्विषयकमेवेत्याहुः।

अन्ये तु—उपदर्शितचतुर्विंशतिमतं तथाविधानि वचनान्तराणि च कानिचिन्निर्मूलानि कानिचिद्दत्तकसापत्नादिसम्बन्धविषयतया असमानजातीयसापिण्ड्यविषयतया वा नेयानीत्याहुरित्यलं पल्लवेन।

अत्र च सपिण्डादिनिषेधः शूद्राणां नास्ति। 'असपिण्डा च या मातुः' इत्यादि मनुवचनादौ द्विजातिपुरस्कारादिति ठक्कुरदेवनाथादयः।

विज्ञानेश्वरस्तु सपिण्डानिषेधः सार्ववर्णिकः, सर्वत्र सापिण्ड्यसद्भावात्। सगोत्रायाः समानप्रवरायाश्च निषेधस्तु त्रैवर्णिकविषय इत्याह। तस्यायं भावः—ब्राह्मणस्य प्रातिस्विका एव गोत्रप्रवराः। राजन्यवैश्ययोश्च पुरोहितस्यैव गोत्रप्रवरा वेदितव्याः, यजमानस्यार्षेयान् प्रवृणीतेत्युक्त्वा पौरोहित्यान् राजन्यविशां प्रवृणीतेत्याश्वलायनोक्तेः। शूद्रस्य चातिदिष्टमपि गोत्रादिकं नास्तीति न तत्र सगोत्रादिनिषेधसम्भवः।

ननु—

शूद्राणां मासिकं कार्यं वपनं न्यायवर्त्तिनाम्।
वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टञ्च भोजनम्॥

इति मनुवचने चकारसमुच्चितगोत्रेऽपि वैश्यधर्मातिदेशात् पूर्वपुरुषपुरोहितगोत्रभागित्वं तेषां प्रतीयते; अत एव गोत्रोच्चारणसमाचारोऽपीति कथं न सगोत्रादिनिषेधसम्भव इति चेत्—अत्रोपदिष्टातिदिष्टगोत्रादेरेव निषेधो न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेः, अन्यथातिदेशे क्षत्रियवैश्यमात्रोपादानं व्यर्थं स्यादित्येतत्सिद्धार्थानुवादकमेव मनुवचनादौ द्विजातिग्रहणम्। सपिण्डता तु शूद्रेऽप्यविशिष्टा। अत एव स्मृतिसारादौ—

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतः क्रमात्।
सपिण्डता निवर्त्तेत सर्ववर्णेष्वयं विधिः॥

इति चातुर्वर्ण्यसाधारणं वैवाहिकसापिण्ड्यविवेचनमिति शूद्राणामपि सपिण्डानिषेध इति। एवमेव रघुनन्दनभट्टाचार्यप्रभृतयः।

वस्तुतस्तु उक्तरीत्या मनुवचनादावनुवादपरत्वेन यथाकथञ्चित् द्विजातिपदोपादानेऽपि "मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिः" इति व्यासवचनादौ तदुपपादनं दुर्घटम्, तस्मात्तत्र द्विजातिपदोपादानेऽद्विजातीनामेव मातृसपिण्डावर्जनमित्यवश्यं वक्तव्यम्। एवम् 'असपिण्डा च या मातुः' इति मनुवचनस्यापि द्विजातिपरतैव वाच्या, द्विजातिपदश्रवणात्, मातृसपिण्डांशे उपदर्शितव्यासवचनैकवाक्य-

त्वानुरोधाच्च। न चैवं शूद्राणां पैतृष्वस्रेय्यादिरूपपितृसपिण्डादिनिषेधोऽपि न स्यात्, तथा च समाचारविरोध इति वाच्यम्; "असमानार्षेयीं कन्यां वरयेत् पञ्च मातृतः परिहरेत्सप्त पितृतः परिहरेत्" इति पैठीनसिना तन्निषेधात्। न चोक्तरीत्या मनुवचनैकवाक्यत्वानुरोधात्तस्यापि द्विजातिपरत्वमिति वाच्यम्; उपदर्शितमनुवचने पितृसपिण्डादिपर्युदासविरहात्। न चासगोत्रा चेति चकारेण पितुरसपिण्डाया समुच्चय इति वाच्यम्; तेन तदसमुच्चयात्, गोत्रप्रवरयोः साहचर्यानुरोधेन पितुरसमान-प्रवराया एव समुच्चयेनापि चकारोपपत्तेः, अत एव चोपदर्शितपैठीनसिवचने "असमानार्षेयीं कन्यां वरयेत्" इत्यंशो द्विजातिमात्रविषयः, मनुवचनैकवाक्यत्वानुरो-धात्। एवम् "अन्यपूर्विकां कान्ताम्" इति याज्ञवल्क्यवचनेऽप्यसमानार्षगोत्रजामित्यंशो द्विजातिमात्रविषयः, उक्तयुक्तेः। असपिण्डामित्याद्यंशस्तु सर्वसाधारणः, द्विजातिमात्र-परत्वे बीजाभावात्। एवमसमानप्रवरैर्विवाह इति गौतमवचने असमानप्रवरैरित्यंशो द्विजातिमात्रविषयः, ऊर्ध्वं सप्तमादित्याद्यंशस्तु सर्वसाधारणः। एवञ्च विज्ञानेश्वरमते-ऽपि फलतो न कश्चिद्भेदः। ठक्कुरदेवनाथादिमतमप्युपपन्नम्, समाचारोऽप्युपपन्नः। न चैवं मनुवचने चकारेण पितुरसपिण्डायाः समुच्चयाभावे तदनुक्तिरूपा न्यूनतेति वाच्यम्; तवापि पितुरसमानप्रवराया अनुक्तिवत्पितृबन्धुसप्तमादिपर्युदासानुक्तिवच्चेष्ट-त्वादित्यस्माकं प्रतिभातीत्यास्तां विस्तरः।

हेमाद्रौ स्कन्दपुराणम्—

सुरूपां लक्षणोपेतामव्यङ्गाङ्गीं कुलोद्भवाम्।
कन्यां भ्रातृमतीञ्चैव धर्मार्थार्थीं समुद्वहेत्॥
विशालनेत्रां सुमुखीं नीलकुञ्चितमूर्द्धजाम्।
आताम्रपाणिपादाग्रां कम्बुग्रीवां सुमध्यमाम्॥
विशालजघनाञ्चारुनितम्बस्थलभूषिताम्।
अस्थूलगुल्फदशनामश्यामाधरतालुकाम्॥
अपिङ्गाक्षीमकपिलामस्फुरच्चरणां शुभाम्।
अस्थूलगण्डनासाग्रां शस्तामाहुर्मनीषिणः॥

मनुः—

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम्।
तनुलोमकेशदशनां मृदुङ्गीमुद्वहेत्स्त्रियम्॥

अव्यङ्गाङ्गीम् अविकलाङ्गीम्, तनुलोमकेशदशनाम् अनतिस्थूललोम-केशदशनाम्।

शातातपः—

हंसस्वनां मेघवर्णां मधुपिङ्गललोचनाम्।
ईदृशीं वरयन् कन्यां गृहस्थः सुखमेधते॥

मेघवर्णाम् स्निग्धश्यामरूपाम्, मधुपिङ्गललोचनाम् मधुवदीषत्पिङ्गले लोचने यस्यास्ताम्।

मनुः—

नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम्।
नालोमिकां नातिलोमां न वाचालां न पिङ्गलाम्॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्।
नाहिपक्षिप्रेष्यनाम्नीं न च भीषणनामिकाम्॥
यस्याश्च न भवेद् भ्राता न विज्ञायेत वा पिता।
नोपयच्छेत तां कन्यां पुत्रिकाधर्मशङ्कया॥

ऋक्षम् नक्षत्रं तन्नाम्नी, यथा रेवतीत्यादि। वृक्षनाम्नी यथा—जयन्ती, पाटलेत्यादि। एवमग्रेऽपि। अन्त्यो म्लेच्छः। प्रेष्यो दासः। 'पुत्रिकाधर्मशङ्कया' इत्युभयत्र योज्यम्। पितृसत्त्वे च तद्वचसा तादृशशङ्कानिवृत्तिसम्भव इति भावः।

कात्यायनः—

लोकापवादयुक्ता या सा तु दुष्टा प्रकीर्त्तिता।
अन्यत्रासक्तचित्ता या या स्यात्संस्पृष्टमैथुना॥

नारदः—

दीर्घकुत्सितरोगार्त्ता व्यङ्गा संस्पृष्टमैथुना।
दुष्टान्यगतभावा च कन्यादोषाः प्रकीर्त्तिताः॥

दीर्घः चिरकालव्यापी, कुत्सितः अपस्मारादिः। विष्णुपुराणम्—

नातिकेशामकेशां वा नातिकृष्णां न पिङ्गलाम्।
निसर्गतो विकलाङ्गीमधिकाङ्गीञ्च नोद्वहेत्॥
नाविशुद्धां सरोषां वाऽकुलजाञ्चातिरोगिणीम्।
न दुष्टां दुष्टवाचालां व्यङ्गिनीं पितृमातृतः॥

न श्मश्रुव्यञ्जनवतीं न चैव पुरुषाकृतिम् ।
न घर्घरस्वरां क्षामवाक्यां काकस्वरां न च ॥
नानिरुद्धेक्षणां तद्वदुद्वृताक्षीञ्च नोद्वहेत् ।
यस्याश्च रोमशे जङ्घे गुल्फौ यस्यास्तथोन्नतौ ॥
गण्डयोः कूपकौ यस्या हसन्त्यास्ताञ्च नोद्वहेत् ।
नातिरुक्षच्छविं पाण्डुकरजामरुणेक्षणाम् ॥
आपीनहस्तपादाञ्च न कन्यामुद्वहेद् बुधः ।
न वामनां नातिदीर्घां नोद्वहेत्संहतभ्रुवम् ॥
न चातिछिद्रदशनां न करालमुखीं तथा ॥

व्यङ्गिनीं पितृमातृत इति पितृमातृकुष्ठादिदोषदुष्टामित्यर्थः । श्मश्रुव्यञ्जनवतीं श्मश्रुस्वरूपलक्षणयुक्ताम्, अनिरुद्धेक्षणां पक्ष्मानावृतनयनाम् । यद्वा निद्रयाप्यनावृतनयनाम् ।

आश्वलायनः—"बुद्धिरूपशीललक्षणसम्पन्नामरोगामुपयच्छेत" । यत्र स्वमनो रमते तद्रूपमिति भाष्यकृतः । लक्षणानि शुभसूचकचिह्नानि । तानि च भविष्यपुराणादौ व्यक्तानि । तथा हि—

प्रतिष्ठिततलाः सम्यग् रक्ताम्भोजसमत्विषः ।
ईदृशाश्चरणा धन्या योषितां भोगवर्द्धनाः ॥
करालैरतिनिर्मांसै रूक्षैरथ शिरातताः ।
दासीत्वं दुर्भगत्वञ्च प्राप्नुवन्ति न संशयः ॥

तथा—

अङ्गुल्यः संहता वृत्ताः सर्वाः सूक्ष्मनखास्तथा ।
कुर्वते सर्वमैश्वर्यं राजभोगञ्च योषिताम् ॥
ह्रस्वासु जीवितं ह्रस्वं विरला वित्तहानये ।
दारिद्र्यं मूलभुग्नासु प्रेष्यत्वं पृथुलासु च ॥

मूलभुग्नासु प्रथमपर्ववक्रासु । तथा—

जानुभिश्चैव मार्जारिसंहजान्वनुकारिभिः ।
श्रियं सम्प्राप्य सौभाग्यं प्राप्नुवन्ति सुतांस्तथा ॥
घटाभैरध्वगा नार्यो निर्मांसैः कुलटास्तथा ॥

तथा—

हस्तिहस्तनिभैर्वृत्तै रत्नाभैः करभोपमैः।
प्राप्नुवन्त्युरुभिः शश्वत्स्निग्धैः सुखमनङ्गजम्॥
दौर्भाग्यं बहुमांसैश्च बन्धनं लोमशालिभिः॥

तथा—

सुव्यावृत्तं समं चारु सूक्ष्मरोमततं पृथु।
जघनं शस्यते स्त्रीणां रतिसौख्यकरं पुनः॥

तथा—

अश्वपृष्ठेन सदृशः कूर्मपृष्ठाकृतिस्तथा।
शशिबिम्बनिभश्चापि तथा च शकटाकृतिः॥
भगः शुभकरः स्त्रीणां रतिप्रीतिविवर्द्धनः।
तिलपुष्पाकृतिर्यस्तु यश्चाखुखरसन्निभः॥
द्वावप्येतौ पररतां कुरुतश्च दरिद्रताम्।
उदूखलनिभः शोकं मरणं विकृताननः॥

तथा—

पयोधरभरानम्रः प्रवणश्चिवली गुरुः।
मध्यः शुभायतः स्त्रीणां रोमराजीविभूषितः॥
पणवाभैर्मृदङ्गाभैस्तथा मध्यैर्यवोदरैः।
प्राप्नुवन्ति भयावासंदौःशील्यमपि चेदृशैः॥

तथा—

अवक्रमुल्बणं पृष्ठमरोम सुसमाहितम्।
नानापुष्पाढ्यपर्यङ्करतिसौख्यकरं परम्॥
कुब्जमद्रोणिकं पृष्ठं रोमशं यदि योषितः।
स्वप्नान्तेऽपि सुखं तस्या नास्ति हन्यात्पतिञ्च सा॥

तथा—

सुवृत्तमुन्नतं पीनमधरोन्नतमायतम्।
स्तनयुग्ममिदं शस्तमतोऽन्यदसुखावहम्॥

तथा—

स्पष्टं रेखात्रयं यस्या ग्रीवायाञ्चतुरङ्गुलम् ।
मणिकाञ्चनमुक्ताढ्यं सा दधाति विभूषणम् ॥
अधना स्त्री कृशग्रीवा दीर्घग्रीवा च बन्धकी ।
ह्रस्वग्रीवा स्थिरापत्या स्थूलग्रीवा च दुःखिता ॥

तथा—

कोमलं मांसलञ्चापि पीनं रोमविवर्जितम् ।
गोपुच्छाकृति नारीणां भुजयोर्युगलं शुभम् ॥

तथा—

दीर्घं तु चिबुकं यस्याःसा स्त्री धूर्त्ता रतिप्रिया ।
प्रविष्टं तु पुनर्यस्या द्वेष्टि सा पुरुषं सदा ॥

तथा—

संमृष्टदर्पणाम्भोजपूर्णेन्दुबिम्बसुप्रभम् ।
रदनं सुरनारीणां सदृक्षफलदं स्मृतम् ॥
चतुरस्रमुखी धूर्त्ता मण्डलास्या शठा भवेत् ।
अप्रजा वाजिवक्त्रा स्त्री महावक्त्रा च दुःखिता॥
मालतीबकुलाम्भोजनीलोत्पलसुगन्धि यत् ।
वदनं मुच्यते नैतत्पानताम्बूलभोजनैः ॥

तथा—

ताम्राभः किञ्चिदानम्रः स्थौल्यह्रास्व्यविवर्जितः ।
अधरो यस्तु तुङ्गश्च नारीणां भोगदः सदा ॥
स्थूले कलहशीला स्याद्विवर्णे दुःखिता भवेत् ।
उत्तरौष्ठेन तीक्ष्णेन वनिता चातिकोपना ॥

तथा—

जिह्वा तनुतराऽवक्रा ताम्रा दीर्घा च शस्यते ।
स्थूला ह्रस्वा विवर्णान्ता वक्रा भिन्ना च निन्दिता ॥

तथा—

शङ्खकुन्देन्दुधवलैः स्निग्धैस्तुङ्गैरसन्धिभिः ।
मिष्टान्नपानमाप्नोति दन्तैरेभिर्न संशयः ॥
सूक्ष्मैरतिकृशैश्चैव स्फुटितैर्विरलैस्तथा ।
रूक्षैश्च दुःखिता नित्यं विकचैर्विमतिर्भवेत् ॥

तथा—

नीलोत्पलदलप्रख्यैराताम्रैश्चारुपद्मभिः ।
वनिता नयनैरेभिर्भोगसौभाग्यशालिनी ॥
शशकाक्षी मृगाक्षी च वराहाक्षी वराङ्गना ।
यत्र यत्र समुत्पन्ना महान्तं भोगमश्नुते ॥
अगम्भीरैरसंक्लिष्टबहुरेखाविभूषितैः ।
राजपत्न्यो भवन्तीह नयनैर्मधुपिङ्गलैः ॥
गम्भीरैः पिङ्गलैश्चैव दुःखिताः स्युश्चिरं ध्रुवम् ।
वयोमध्ये त्यजेत्प्राणानुन्नताक्षी च याऽङ्गना ॥
रक्ताक्षी विषमाक्षी च धूम्राक्षी श्वेतलोचना ।
वर्जनीया सदा नारी श्वनेत्रा चैव दूरतः ॥

तथा—

ईषदापाण्डुगण्डा ये सुवृत्ताः पार्वणत्विषः ।
प्रशस्ता निन्दितास्त्वन्ये रोमकूपविभूषिताः ॥

तथा—

अर्द्धेन्दुप्रतिमा भोगा रोमशं सुसमाहितम् ।
भोगसौख्यकरं श्रेष्ठं ललाटं वरयोषिताम् ॥

तथा—

सूक्ष्माः कृष्णा मूर्द्धस्निग्धाः कुञ्चिताग्राः शिरोरुहाः ।
भवन्ति श्रेयसे स्त्रीणां सर्वसौख्यकराः सदा ॥
अत्यन्तकुञ्चितै रूक्षैः स्फुटिताग्रैर्गुडप्रभैः ।
पिङ्गलै रोमकैश्चैव केशैश्चापि तथाविधैः ॥

अत्यन्तपिङ्गला नारी विषकल्पेति निश्चितम् ।
सप्ताहाभ्यन्तरे सा तु पतिं हन्यान्न संशयः ॥

तथा—

हंसकोकिलवीणानां शिखिवेणुस्वनाः स्त्रियः ।
प्राप्नुवन्ति बहून् भोगान् भृत्यानाज्ञापयन्ति च ॥
भिन्नकांस्यस्वरा नारी खरकाकस्वरा च या ।
रोगव्याधिभयं शोकं दारिद्र्यं चाधिगच्छति ॥

तथा—

हंसगोवृषचक्राङ्गं सममातङ्गगामिनी ।
सुकुला सा भवेन्नारी महिषी पार्थिवस्य च ॥
श्वशृगालगतिर्या स्याद् या च वायसगामिनी ।
दासी मृगगतिर्नारी दुर्भगा स्याच्च बन्धकी ॥

तथा—

फलिनी रोचना हेमकुङ्कुमत्विष एव च ।
वर्णाः शुभङ्कराः स्त्रीणां यश्च दूर्वाङ्कुरोपमः ॥

वर्ण इति व्यत्ययेनान्वयः । तथा—

मूर्द्धानि मृदुरोमाणि नात्यन्तस्वेदजानि च ।
सुरभीणि च गात्राणि यासां ताः पूजिताः स्त्रियः ॥

तथा—

रेखा कनिष्ठिका मूलाद् यस्याः प्राप्ता प्रदेशिनीम् ।
शतमायुर्भवेत्तस्या ऊनायामूनता क्रमात् ॥
संवृत्ताः समपर्वाणस्तीक्ष्णाग्राः कोमलत्वचः ।
समा ह्यङ्गुलयो यस्याः सा नारी भोगवर्द्धिनी ॥
बन्धुजीवारुणैस्तुल्यैर्नखैरैश्वर्यमाप्नुयात् ।
समरेखा यवा यासामङ्गुल्यङ्गुलिपर्वसु ॥
तासां हि विपुलं सौख्यं धनधान्यं तथाक्षयम् ।
चतस्रोऽवक्रगम्भीरा रेखाः स्निग्धाः करे स्त्रियाः ॥

यदि स्युः सुखमाप्नोति विच्छिन्नाभिरनीशता।
मणिबन्धोऽव्यवच्छिन्नरेखात्रयविभूषितः ॥
दधाति न चिरादेव मणिकाञ्चनभूषणम्।
चक्रस्वस्तिकवज्रासिपूर्णकुम्भनिभाङ्कुशैः ॥
प्रासादच्छत्रमुकुटैर्हरिकेयूरकुण्डलैः।
शङ्खतोरणनिर्युष्टैस्तत्रस्थैर्नृपतिस्त्रियः ॥

तत्रस्थैः करस्थैः।

यस्याः पाणितले रेखायूपस्रुक्स्रुवकुण्डिकाः।
दृश्यन्ते चरणे यस्या यज्ञपत्नी भवत्यसौ ॥
वीथ्यापणतुलामानैस्तथा मुद्रादिभिः स्त्रियः।
भवन्ति वणिजां पत्न्यो रत्नकाञ्चनमाणिकाः[१] ॥
दात्रगोहलगोबन्धफालोदूखललाङ्गलैः।
भवन्ति धनधान्याढ्याः कृषीबलजनाङ्गनाः ॥

लक्षणानां दुरवगाहत्वं मत्वा परीक्षान्तरमाह आश्वलायनः—"अष्टौ पिण्डान् कृत्वा ऋतमग्रे प्रथमम्, यज्ञऋते सत्यं प्रतिष्ठितम्, यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तदृदृश्यताम्" इति पिण्डानभिमन्त्र्य कुमारीं ब्रूयादेषामेकतमं गृहाणेति, क्षेत्राच्चेदुभयतः सस्याद् गृह्णीयादन्नवत्यस्याः प्रजा भविष्यतीति विद्यात्, गोष्ठात्पशुमती वेदिपुरीषाद् ब्रह्मवर्चस्विनी अविदासिनो ह्रदात्सर्वसम्पन्ना देवनात्कितवी चतुष्पथाद्विप्रव्राजिनी इरिणादधन्या श्मशानात्पतिघ्नी। अष्टौ पिण्डान् वक्ष्यमाण-क्षेत्रमृत्तिकाभिः। पुनः पिण्डग्रहणं कुमार्या अभिमन्त्रणं मा भूदित्येतदर्थम्। उभयतः सस्यात्क्षेत्रादाहृतं मृत्पिण्डं गृह्णीयाच्चेत्तदा अस्याः प्रजा अन्नवती भविष्यतीति विद्यात्, एवमुत्तरत्रापि नेयम्। यदेकस्मिन् संवत्सरे द्विः फलति तदुभयतः सस्यं क्षेत्रम्। गोष्ठं गवां स्थितिदेशः। वेदिपुरीषं वेदिमृत्तिका। अविदासिह्रदो नाम अशोष्यो ह्रदः। देवनं द्यूतस्थानम्। यत्रोप्तं बीजन्न प्ररोहति तदिरिणम्। विप्रव्रा-जिनी पतिं त्यक्त्वा प्रव्रजनशीला, स्वैरिणीति यावत्। अत्र प्रजास्तुतिनिन्दाद्वारेणैव परीक्ष्यमाणकुमारी स्तुता निन्दिता चेति रत्नाकरादिस्वरसः। भाष्यकृद्भिस्तु पञ्चभिः

---

१. 'मालिकाः' क० पु० पाठः

प्रजाद्वारेण स्तुतिनिन्दे प्रदर्शिते, त्रिभिरुत्तरैस्तु साक्षादेवेत्यभ्युपेतम्। तेषामयमाशयः—चतुष्पथाद्विप्रव्राजिनीत्यत्र प्रजा भविष्यतीति नानुषज्यते स्वैरिणीत्वस्य पुंरूपप्रजाऽव्यापनात्, एवं श्मशानात्पतिघ्नीत्यत्रापि। इत्थञ्च इरिणादधन्येत्यत्रापि न तदनुषङ्गः, विप्रव्राजिनीत्यत्रैव तद्विच्छेदात्। तस्मात्परीक्ष्यमाणाकुमार्येव तेषु सम्बध्यत इति।

गौडनिबन्धे—

मातुर्यन्नाम गुह्यं स्यात्सुप्रसिद्धमथापि वा।
तन्नाम्नी या भवेत् कन्या मातृनाम्नीं प्रचक्षते॥
प्रमादाद्यदि गृह्णीयात्प्रायश्चित्तं समाचरेत्।
ततश्चान्द्रायणं कृत्वा तां कन्यां परिवर्जयेत्॥

यत्तु—

मातृनाम्नी यदा कन्या विवाहे कुलजा हि या।
विप्रैर्नामान्तरं कार्यं तस्याः पित्रोरनुज्ञया॥

इति राजमार्त्तण्डीयवचनं तत्कन्यादानात्प्राग्विषयम्, अन्यथा पूर्वोक्तनिषेधवैयर्थ्यापत्तेः। अत एव कन्यादानात्प्राग् वरनामानुगुण्येन मैथिलानां कन्यानामकरणसमाचारः, ज्योतिःप्रतिपादितदेवमानुषादिगणसाद्गुण्याद्यनुरोधाच्च।

[1]कश्यपः—

सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः।
वाचा दत्ता मनोदत्ता कृतकौतुकमङ्गला।
उदकस्पर्शिता या च या च पाणिगृहीतिका।
अग्निं परिगता या च पुनर्भूप्रभवा च या।
इत्येताः कश्यपेनोक्ता दहन्ति कुलमग्निवत्॥

कृतकौतुकमङ्गला बद्धकङ्कणा, उदकस्पर्शिता उदकपूर्वं दत्ता। अत्र च प्रकरणे ये विधयो दृष्टगुणानुषङ्गिणो न भवन्ति यथा 'असपिण्डा च या मातुः' इत्यादयः, तेषामतिक्रमणे[2] भार्यात्वमेव न भवति, एवं ये च निषेधा न तथा यथा—"सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि" इत्यादयस्तेषामप्यतिक्रमे भार्यात्वाभावः,

---

१. कश्यप इति मु० पु० नास्ति।

२. अतिक्रमे इति मु० पु०।

भार्याशब्दस्य यूपाहवनीयादिवदलौकिकाङ्गसङ्गेनालौकिकसंस्कारमादायैव प्रवृत्तेः। येषां तु विधीनां दृष्टगुणानुषङ्गेण प्रवृत्तिः, यथा "राजपत्न्यो भवन्तीह नयनैर्मधुपिङ्गलैः" इत्यादयः, तदतिक्रमे भार्यात्वसिद्धौ न बाधकम्, किन्तु तादृशगुणाभावः। एवं निषेधेऽपि यत्र दृष्टदोषाऽनुषङ्गो यथा—"अत्यन्तपिङ्गला नारी" इत्यादौ तदतिक्रमेऽपि न भार्यात्वाभावः, किन्तु सदोष एव। येषां तु न दृष्टगुणदोषानुषङ्गेण प्रवृत्तिः सगोत्रादिपरित्यागवत्परित्यागाश्रवणेन भार्यात्वप्रतिबन्धकत्वमपि न सम्भाव्यते यथा "नक्तंवृत्तनदीनाम्नीम्" इत्यादयः, तदतिक्रमे यथाश्रुतिप्रायश्चित्तमात्रम्। एवं वरेऽपि परिवेत्तृनपुंसकादौ कल्पनीयम्। रत्नाकरादयोऽप्येवम्। अत्र गौडा उक्तरीत्या सगोत्रादिषु भार्यात्वानिष्पत्तौ तथाविधासु परिवेदनादिदोषोऽपि नोत्पद्यत इत्याहुः। एवं कन्यापरीक्षणवत्कुलस्यापि परीक्ष्यत्वमाह आश्वलायनः—"कुलमग्रे परीक्षेत"। अग्रे वचनं वधूवरगुणेभ्यः कुलगुण एव प्रधानमित्येतत्सूचनार्थमिति गृह्यभाष्यम्। याज्ञवल्क्यः—

"दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात्।"

दशभिः पुरुषैः मातृतः पञ्चभिः पितृतः पञ्चभिर्विख्यातं यत्कुलं तस्मात्। श्रोत्रियाणां श्रुत्यध्ययनसम्पन्नानाम्, कन्या आहर्त्तव्येति शेषः। एतदपवादमाह स एव—"स्फीतादपि न सञ्चारिरोगदोषसमन्वितात्।" सञ्चारिणो रोगाः कुष्ठापस्मारप्रभृतयः शुक्रशोणितद्वारेणानुप्रविशन्तः। दोषा हीनक्रियात्वादयः। तथा च मनुः—

महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः।
स्त्रीसम्बन्धे दशैतानि कुलानि परिवर्जयेत्॥
हीनक्रियं निष्पुरुषं निश्छन्दो लोमशार्शसम्।
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च॥

महान्ति बहुसम्बन्धीनि स्त्रीसम्बन्धे विवाहे कर्त्तव्ये इति शेषः। हीनक्रियं गर्भाधानादिक्रियाशून्यमिति रत्नाकरः, जातकर्मादिरहितमिति मुरारिमिश्रकुल्लूकभट्टादयः। निष्पुरुषं कन्योत्पत्तिभूयिष्ठम्, निश्छन्दः स्वाध्यायहीनम्, लोमशम् अत्यन्तरोमयुक्तम्, अर्शसम् अर्शोनामव्याधियुक्तम्, क्षयि क्षयनामकव्याधियुक्तम्, आमयावि उक्तरोगातिरिक्तवंशसञ्चारिरोगयुक्तम्, अपस्मारि अपस्मारव्याधिमत्, श्वित्रि श्वेतकुष्ठयुक्तम्, कुष्ठि औदुम्बरादिकुष्ठयुक्तम्।

यमः—

चतुर्दशकुलानीमान्यविवाह्यानि निर्दिशेत् ॥
अनार्षेयं ब्राह्मणानां ऋत्विजाञ्च विवर्जयेत् ।
अत्युच्चमतिह्रस्वञ्चातिवर्णञ्च विवर्जयेत् ॥
हीनाङ्गमतिरिक्ताङ्गमामयाविकुलानि च ।
श्वित्रिकुष्ठिकुलादीनां कुर्याच्च परिवर्जनम् ॥
सदा कामकुलं त्याज्यं लोमशानाञ्च यत्कुलम् ।
अपस्मारिकुलञ्चैव पाखण्डानां कुलं त्यजेत् ॥

ऋत्विजोऽत्रानिन्द्ययाजकाः । कामकुलम्, कामप्रधानं कुलम्, धर्ममनपेक्ष्य कामप्रयुक्तप्रवृत्तिप्रधानमिति यावत्, अतिवर्णमतिकृष्णमतिगौरञ्च । एवं वरस्यापि विशेषमाह मनुः—

उत्कृष्टायाभिरूपाय वराय सदृशाय च ।
अप्राप्तामपि तां तस्मै कन्यां दद्याद् यथाविधि ॥

उत्कृष्टाय कुलशीलादिभिः । अप्राप्तामपि अप्राप्तशास्त्रोक्तविवाहवयस्कामपि ।

नारदः—

उन्मत्तः पतितः क्रूरो दुर्भगस्त्यक्तबान्धवः ।
कन्यादोषौ तु यौ पूर्वावेष दोषगुणो वरे ॥

दुर्भगः स्त्रीणामत्यन्तं द्वेष्यः । त्यक्तबान्धवः त्यागानर्हबान्धवत्यागी । पूर्वौ "दीर्घकुत्सितरोगार्त्ता व्यङ्गा संपृष्टमैथुना" इति वाक्योक्तावाद्यौ दीर्घकुत्सितरोगार्त्तत्व-व्यङ्गत्वरूपौ कन्यादोषौ वरे दोषगुणो दोषरूपो धर्म इत्यर्थः । व्यासः—

जातिर्विद्या वयः शीलमारोग्यं बहुपक्षता ।
अर्थित्वं वित्तसम्पत्तिरष्टावेते वरे गुणाः ॥

मनुः—

कामममरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि ।
न चैवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥

लभ्यमाने गुणवति गुणहीनाय न देयेति तात्पर्यं न तु रजस्वला धारणीयेति निबन्धारः ।

यमः—

दद्याद् गुणवते कन्यां नग्निकामेव शक्तितः ।
न चैव गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् ॥

नग्निकां दशवर्षाम्, शक्तितः सामर्थ्ये सति । आश्वलायनः—बुद्धिमते कन्यां प्रयच्छेत् । शातातपः—

वरो वरयितव्योऽर्थी कुलशीलसमन्वितः ।
रूपवान् पण्डितः प्राज्ञो युवा दोषविवर्जितः ॥

कन्यागुणान् प्रदर्श्य याज्ञवल्क्यः—

एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ।
यत्नात् परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ॥

एतैः अरोगित्वादिभिः । सवर्णः उत्कृष्टजातिः समानजातिर्वा, न तु हीनवर्ण इति निबन्धारः । दारक्रमं दर्शयति मनुः—

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि ।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः ॥
शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते ।
ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः ॥

सवर्णकन्यालाभे सैव प्रशस्ता । तदलाभेऽमुना क्रमेण विवाह्येत्यर्थः । ब्राह्मणमधिकृत्य पैठीनसिः—

अलाभे कन्यकायाश्च स्नातकव्रतमाचरेत् ।

अपि वा क्षत्रियायां पुत्रानुत्पादयेद् वैश्यायां वा शूद्रायां चेत्यन्ये । यमः—

भार्यायाश्च स्वजात्याया धर्मः प्रथमकल्पितः ।
आनुपूर्व्येण भार्याः स्युश्चतस्रो ब्राह्मणस्य तु ।
क्षत्रियस्यानुपूर्व्येण गम्यास्तिस्रोऽवराः स्त्रियः ॥
वैश्यस्यावरधर्मे द्वे भार्ये अप्यब्रवीन्मनुः ।
शूद्रः स्वजातिं विन्देत तास्वपत्यं समं भवेत् ॥

समत्वमिह पुत्रोत्पत्तिफलभूतपैत्रऋणापाकरणमात्रेणेति निबन्धारः ।

नारदः—

ब्राह्मणक्षत्रियविशां शूद्राणां च परिग्रहे।
सजातिः श्रेयसी भार्या सजातिश्च पतिः स्त्रियाः॥

विष्णुः—

द्विजस्य भार्या शूद्रा तु धर्मार्थन्न भवेत् क्वचित्।
रत्यर्थमेव सा तस्य रागार्थस्य प्रकीर्त्तिता॥

रत्यर्थमेवेत्येवकारेण पूर्वखण्डनिषिद्धाऽपि धर्मार्थिता पुनरतिशयद्योतनाय निषिध्यते।

मनुः—

न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः।
कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते॥

वृत्तान्ते उपाख्याने भार्योपदिश्यते श्राद्धादिकार्यार्थमिति भावः। तथा—

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च।
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः॥
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्।
जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते॥

शूद्रावेदी शूद्रोद्वोढा, इत्यत्रेर्मर्तामित्यर्थः। एवमग्रेऽपि। उतथ्यतनयस्य गोतमस्य। इयञ्च निन्दा परिणायकमलङ्घने न त्वन्यथा, शूद्रापरिणयस्य विहितत्वात्, रत्यर्थमसौ न तु धर्मार्थमिति स्थितिः। अत्रैव मनुयमहारीताः—

वृषलीफेनपीतस्य निःश्वासोपहतस्य च।
तस्याञ्चैव प्रसूतस्य निष्कृतिर्न्नोपपद्यते॥

फेनपीतः पीतमुखलालः। उशनाः—पतति वृषलीपतिरित्याचक्षते, न पततीत्येके। अयमिह प्रकरणार्थः—द्विजातीनां[1] सजातीयकन्याया अलाभे विजातीया यथाक्रममुत्तरोत्तरा विवाह्याः, सजातीयालाभे तु सैव विवाह्या। एतल्लङ्घने पातित्यादिनिन्दानुवादो बोध्यः। तदुक्तं ब्रह्मपुराणे—

---

१. संजाति—इति मु० पु० पाठः

क्षत्रविट्शूद्रकन्यास्तु न विवाह्या द्विजातिभिः।
विवाह्य ब्राह्मणीं पश्चाद्विवाह्याः क्वचिदेव तु॥

क्वचिदेव तु कस्मिंश्चित्परिणयनिमित्ते दारमरणादौ, शूद्रा तु यदीतरासु प्रजाया असम्भवस्तदाऽपत्यार्थं विवाह्या। सहधर्मचारिणी तु तदापि सा न भवति, "धर्मार्थिन्न भवेत्" इति विष्णूक्तेः। यस्तु शूद्राविवाहे निषेधः स इतरालाभे। पुत्रपौत्रोत्पत्ति-निन्दापि तद्विषया, निन्दाविशेषश्रुतिर्दोषभूयस्त्वबोधनार्थेति। रत्नाकरादयोऽप्येवम्। उद्वाहतत्त्वे बृहन्नारदीयम्—

समुद्रयात्रास्वीकारः कमण्डलुविधारणम्।
द्विजानामसवर्णासु कन्यासूपयमस्तथा॥
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वधः।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा॥
दत्तायाश्चैव कन्यायाः पुनर्दानं परस्य च।
दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ॥
महाप्रस्थानगमनं गोमेधं च तथा मखम्।
इमान् धर्मान् कलियुगे वर्ज्यानाहुर्मनीषिणः॥

मांसादनं गोमहिषादेरिति निबन्धारः। अविवाहितज्येष्ठस्थितिसमानकालीनः कनिष्ठस्य दारपरिग्रहः परिवेदनम्। तद्दूषयति मनुः—

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते।
परिवेत्ता स विज्ञेयः परिवित्तिः स पूर्वजः॥
परिवित्तिः परिवेत्ता च यया च परिविद्यते।
सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः॥

अग्रजे, अविवाहिते इति शेषः। हारीतः—ज्येष्ठेऽनिविष्टे कनीयान् निविशन् परिवेत्ता भवति, परिविन्नो ज्येष्ठः, परिवेदनी कन्या, परिदायी दाता, परिकर्त्ता याजकः सर्वे ते पतिताः। अनिर्विष्टेऽकृतविवाहेऽकृताग्निहोमे च। निष्ठानिर्देशाज्ज्येष्ठ-विवाहनिष्पत्त्युत्तरं कनिष्ठस्य विवाहेऽधिकार इति लभ्यते, विवाहनिष्पत्तिश्च निष्पन्ने चतुर्थीकर्मणीत्युपरिष्टाद्वक्ष्यते। ज्येष्ठमाह देवलः—

बहिर्वर्णेषु चारित्र्याद् यमयोः पूर्वजन्मतः।

यस्य जातस्य यमयोः पश्यन्ति प्रथमं मुखम् ।
सन्तानः पितरश्चैव तस्मिन् ज्यैष्ठं प्रदर्शितम् ॥

परिवेदनापवादमाह कात्यायनः—

देशान्तरस्थक्लीबैकवृषणानसहोदरान् ।
वेश्याभिषक्तपतितशूद्रतुल्यातिरोगिणः ॥
जडमूकान्धबधिरकुब्जवामनकुष्ठकान् ।
अतिवृद्धानभार्यांश्च कृषिशक्तान्नृपस्य तु ॥
धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।
कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ॥

एकवृषणः एकाण्डः, असहोदरान् वैमात्रेयादीन् । शूद्रतुल्यानाह मनुः—

गोरक्षकान् वाणिजिकान् तथा कारुकुशीलवान् ।
प्रेष्यान् वार्द्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ॥

अभार्यान् शास्त्रनिषिद्धभार्यापरिग्रहान् नैष्ठिकब्रह्मचार्यादीन्, अभार्यो मृतपत्नीक इति मुरारिः । नृपस्य चेति चकारेण सक्तानित्यनुषज्यते[1], कामतः कारिणः स्वच्छन्द-व्यवहारिणः, कुलटः परकुलाटनशीलो दत्तकादिः । शातातपः—

क्लीबे देशान्तरगते पतिते भिक्षुकेऽपि वा ।
योगशास्त्राभियुक्ते च न दोषः परिवेदने ॥
खञ्जवामनकुब्जेषु गद्गदेषु जडेषु च ।
जातान्धे बधिरे मूके न दोषः परिवेदने ॥

योगशास्त्राभियुक्ते विषयात्यन्तविरक्ते । गद्गदोऽत्यन्ताव्यक्तस्वरवान् । अत्र विशेषमाह कात्यायनः—

धनवार्द्धुषिकं राजसेवकं कर्षकं तथा ।
प्रोषितञ्च प्रतीक्षेत वर्षत्रयमपि त्वरन् ॥
प्रोषितं यद्यश्रृणवानस्त्वब्दादतिसमाचरेत् ।
आगते तु पुनस्तस्मिन् पादं तच्छुद्धये चरेत् ॥

धनवार्द्धुषिकादित्रयं प्रोषितञ्च त्वरन्नपि वर्षत्रयं प्रतीक्षेतेति प्रथमश्लोकार्थः । यदि च प्रोषितस्य कल्याणवार्त्तां न श्रृणुयात्तदा वर्षं प्रतीक्ष्य परिणयं कुर्यात् । पुनः

१. अनुकृष्यते मु ०पु०

तस्मिन्नागते तु कनिष्ठः परिवेदनपापशुद्धये कृच्छ्रपादं समाचरेदिति द्वितीयश्लोकार्थः। मुरारिस्तु कर्षकमित्यत्र कर्मठमिति पठित्वा कर्मठो योगासक्त इति व्याख्यातवान्। इदञ्च वर्षत्रयप्रतीक्षणं विद्याधर्मधनेतरार्थप्रोषितपरम्। विद्यादिनिमित्तप्रोषिते तु गोतमः—द्वादशवर्षाणि ब्राह्मणस्य विद्यासम्बन्धे भ्रातरि चैवं ज्यायसि यवीयान् कन्याग्न्युपयमेषु षडित्येके। वशिष्ठः—अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिर्विष्टमप्रतीक्षमाणः प्रायश्चित्ती भवति। तत्र श्लोकौ—

द्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोर्गतः।
न्याय्यः प्रतीक्षितुं भ्रात्रा श्रूयमाणः पुनः पुनः॥
उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव वा।
राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम्॥

भ्रातृपदेन सोदर्य एव, सापत्नादावेककारणादियोगादपि भ्रातृपदप्रयोगोपपत्तौ तत्र भ्रातृपदाभिधायां प्रमाणाभावात्। एतन्न्यायानुवादिन्येव यमशातातपयोः स्मृतिः—

पितृव्यपुत्रान् सापत्नान् परमातृसुतांस्तथा।
दाराग्निहोत्रसंयोगे न दोषः परिवेदने॥

प्रतीत्यध्याहार्यम्। परनारीसुता दत्तकक्रृत्रिमादयः। अत्र चेयं व्यवस्था—विद्याधर्मधनार्थं प्रोषिते ज्येष्ठे पुनः पुनः श्रूयमाणकल्याणवार्तायां द्वादशवर्षप्रतीक्षणम्, तत्रैव वयोऽपेक्षया शक्त्यपेक्षया वा वार्त्ताश्रवणाल्पत्वात्यल्पत्वाभ्यां वा दशाष्टवर्षप्रतीक्षणम्। सर्वथाऽश्रूयमाणकल्याणवार्तायां तत्रैव षट्वर्षप्रतीक्षणम्। वर्षत्रयप्रतीक्षणं तु विद्याधर्मधनेतरार्थप्रोषिते राजसेवकादौ च। वर्षैकप्रतीक्षणञ्च विद्याधर्मधनेतरार्थप्रोषितस्य कल्याणवार्त्ताऽश्रवण इति। रत्नाकरादयोऽप्येवम्। गौडास्तु—विद्याधनधर्मार्थं गतानां ब्राह्मणक्षत्रियवैश्यशूद्राणां क्रमशो द्वादशदशाष्टषड्वर्षाणि प्रतीक्षणमित्याहुः। हारीतः—

सौदर्याणां तु सर्वेषां परिवेत्ता कथं भवेत्।
दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया॥

अत्र नाग्निहोत्रेणेत्यभिधानं दारपरिवेदनादल्पदोषप्रतिपादनपरम्, न तु परिवेदनाभावबोधकम्, "दाराग्निहोत्रसंयोगम्" इत्यादिना मनुना तदभिधानात्। अत्रैव शातातपः—

नाग्नयः परिविन्दन्ति न यज्ञा न तपांसि च।
न च श्राद्धं कनिष्ठस्य विकला या च कन्यका॥

गौडास्तु—"नाग्नयः परिविन्दन्ति" [1]इत्यभिधानं ज्येष्ठानुमत्यभिप्रायकम्। तथा च उशनाः—

ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत्।
अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा॥

वशिष्ठः—

अग्रजोऽस्य यदानग्निरधिकार्यनुजः कथम्।
अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि॥

इत्थञ्च-विवाहस्त्वनुमत्याऽपि दोषायेत्याहुः। विकला या च कन्यकेति या च विकला अङ्गवैगुण्यादिदोषवती अनूढा ज्येष्ठा कन्या सा कनिष्ठायाः सहोदरायाः ऊढायाः परिवेदनाय न भवतीत्यर्थः। अत्राप्रसक्तप्रतिषेधानुपपत्त्या नञः पर्युदासवृत्तित्वादेतदतिरिक्तायां परिवेदनदोष इति परिशिष्टप्रकाशः। देवलस्त्वत्र विषयेऽग्रेदिधिषुदिधिषुत्वमाह। यथा—

ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा।
सा चाग्रेदिधिषुः प्रोक्ता पूर्वा च दिधिषुः स्मृताः॥ इति।

जीवद्भार्यस्य भार्यान्तरपरिग्रहं व्यवस्थापयति मनुः—

मद्यपाऽसत्यवृत्ता च प्रतिकूला च या भवेत्।
व्याधिता चाधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा॥

मद्यपा त्रैवर्णिकस्त्रीति रत्नाकरः। असत्यवृत्ता असाधुचरित्रा, प्रतिकूला भर्तुरनिष्टकारिणी। व्याधिता पत्नीकर्त्तव्यव्यापारप्रतिबन्धकव्याधिमती, हिंस्रा पुत्रदासादिताडनकर्त्री, अर्थघ्नी वृथा द्रव्यव्ययकारिणी, सर्वदेति पदस्यासत्यवृत्तेत्यादिभिरन्वयः। अधिवेदनं भार्यायां सपत्नीत्वप्रतिपादनम्। भार्यान्तरपरिग्रहोऽधिवेदनमिति तु मिताक्षरा। याज्ञवल्क्यः—

सुरापी व्याधिता धूर्त्ता वन्ध्या चैवाप्रियंवदा।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥

सुरापी शूद्रापि, "पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्" इति सामान्येन प्रतिषेधादिति मिताक्षरा, धूर्त्ता पतिपुत्रप्रतारणशीला, अप्रियंवदा निष्ठुरभाषिणी, स्त्रीप्रसूः स्त्रीमात्रजननी, पुरुषद्वेषिणी पतिद्वेषिणी।

---

१. इत्याद्यभिधानं मु० पु० पाठः।

मनुः—

वन्ध्याष्टमेऽधिवेद्याऽब्दे दशमे तु मृतप्रजा।
एकादशे स्त्रीजननी द्वादशेऽप्रियवादिनी॥

सद्यस्त्वप्रियवादिनीति कुल्लूकभट्टादिसम्मतः पाठः। इदमत्र बोध्यम्—येष्वधिवेदननिमित्तेषु समयो न श्रुतस्तेषु यावता समयेन तद्दोषनिर्णयो भवति तावदेव समयः प्रतीक्ष्य इति। याज्ञवल्क्यः—

अधिविन्ना तु भर्त्तव्या महदेनोऽन्यथा भवेत्।
यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते॥

मनुः—

अधिविन्ना तु[1] या नारी निर्गच्छेद्दूषिता गृहात्।
सा शक्त्या सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ॥

याज्ञवल्क्यः—

आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम्।
त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः॥

दक्षां शीघ्रकारिणीम्। वीरसूं पुत्रजननीम। त्यजन् अधिविन्दन्। तृतीयांशं धनस्य।

नारदः—

अनुकूलामवाग्दुष्टां दक्षां साध्वीं प्रजावतीम्।
त्यजन् भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसा॥

कन्यादानञ्च रजोदर्शनात्प्रागेव कर्त्तव्यम्। तथा च वशिष्ठः—

प्रयच्छेन्नग्निकां कन्यां ऋतुकालभिया पिता।
ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति॥

तिष्ठन्त्याम् अविवाहितायामिति शेषः। ऋच्छति गच्छति। बौधायनः—

दद्याद् गुणवते कन्यां नग्निकां धर्मचारिणीम्।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम्॥

---

१. च-इति मु० पु० पाठः।

गुणोऽत्र कुलीनत्वादिः ।

नारदः—

कन्याऽऽर्तुं समावेक्ष्य बान्धवेभ्यो निवेदयेत् ।
न चेद्दद्युस्तु तां भर्त्रे ते स्युर्भ्रूणहतः समाः ॥

भ्रूणो गर्भः ।

अत्रिकाश्यपौ—

पितृगेहे तु या कन्या रजः पश्यत्यसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ।
अश्रद्धेयमपाङ्क्तेयं तं विद्याद् वृषलीपतिम् ॥

पैठीनसिः—

तस्मान्नग्निका दातव्या ।

अङ्गिराः—

अनवाप्तरजा गौरी प्राप्ते रजसि रोहिणी ।
अव्यञ्जनकुचा श्यामा कुचहीना तु नग्निका ॥

व्यञ्जनं कुचादन्यस्य रोमादेः ।

भविष्यपुराणे—

अप्राप्तरजसा गौरी प्राप्ते रजसि रोहिणी ।
अव्यञ्जनकुचा कन्या कुचहीना तु नग्निका ॥
सप्तवर्षा भवेद् गौरी दशवर्षा तु नग्निका ।
द्वादशे तु भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

यद्यपि नग्निकापदेन लोके परिधानाऽनभिज्ञैवोच्यते, उक्तञ्च—

यावन्न लज्जयात्यर्थं कन्या पुरुषसन्निधौ ।
योन्यादीनुपगूहेत तावद्भवति नग्निका ॥

तथापि कुचहीना दशवर्षा च विवाहिता प्रशस्ता भवतीति प्रतिपादनार्थमिह नग्निका परिभाषिता ।

अङ्गिराः—

व्यञ्जनेषूपजातेषु सोमो भुङ्क्ते तु कन्यकाम् ।
पयोधरे तु गन्धर्वो जाते भुङ्क्ते रजस्वलाम् ॥
तस्मादव्यञ्जनोपेतामरजस्कपयोधराम् ।
अभुक्ताञ्चैव सोमाद्यैर्दद्याद् दुहितरं पिता ॥

संवर्त्तः—

रोमकाले तु सम्प्राप्ते सोमो भुञ्जीत कन्यकाम् ।
ऋतुकाले तु गन्धर्वो वह्निस्तु ऋतुदर्शने ॥
तस्मादुद्वाहयेत् कन्यां यावन्नर्तुमती भवेत् ।
विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः ॥

अत्रिः—

व्यञ्जने तु कुलं हन्यात्पितॄन् हन्यात्पयोधरे ।
हन्यादिष्टञ्च पूर्त्तञ्च प्राप्ते रजसि कन्यका ॥

कश्यपः—

सप्तवर्षा भवेद् गौरी दशवर्षा तु कन्यका ।
सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते ॥
भुञ्जीत व्यञ्जनं सोमो गन्धर्वस्तु पयोधरौ ।
कुन्तलस्यागमे वायू रजस्यग्निः प्रकीर्त्तितः ॥
तस्मादव्यञ्जनोपेतामरजस्कपयोधराम् ।
नोपभुक्तां तु सोमाद्यैर्दद्याद् दुहितरं पिता ॥

अत्र "सप्तवर्षा भवेद् गौरी" इत्यभिधानादनवाप्तरजा गौरीत्यस्यापि सामान्यवाच्यतयैतद्विशेषपरत्वम् । एवं "विवाहस्त्वष्टवर्षायाः कन्यायाः शस्यते बुधैः" इति संवर्त्तवाक्यस्याप्येकमूलत्वाद् गर्भाष्टमत्वमादायात्रैव तात्पर्यमुन्नेयम् ।

बौधायनः—

त्रीणि वर्षाण्यृतुमतीं कन्यां यो न प्रयच्छति ।
स तुल्यं भ्रूणहत्याया दोषमृच्छत्यसंशयम् ॥
न याचते तावदेव याचते चेत्पृथक् पृथक् ।
एकैकस्मिन् ऋतौ दोषं पातकं मनुरब्रवीत् ॥

यदि न याचते तदैव वर्षत्रयेण भ्रूणहत्याजन्यपापतुल्यपापवत्ता, अथ योग्याय याचमानाय न ददाति तदा प्रतिऋतु भ्रूणहत्याजन्यपापसदृशपापवत्तेत्यर्थः। यथोक्तकालातिक्रमे तु कन्यया यत्कर्त्तव्यं तदाह विष्णुः—

ऋतुत्रयमपाकृष्य कन्या कुर्यात्स्वयंवरम्।
ऋतुत्रये व्यतीते तु प्रभवत्यात्मनस्तु सा॥
पितृवेश्मनि या नारी रजः पश्यत्यसंस्कृता।
सा कन्या वृषली ज्ञेया हरंस्तां न च दुष्यति॥

मनुः—

त्रीणि वर्षाण्युपासीत कुमार्यृतुमती सती।
ऊर्ध्वन्तु कालादेतस्माद्विन्देत सदृशं पतिम्॥
अदीयमाना भर्त्तारमभिगच्छेत्स्वयं तु सा।
नैनः किञ्चिदवाप्नोति न च यं साधिगच्छति॥
अलङ्कारं नाददीत पितृदत्तं स्वयंवरा।
मातृतो भ्रातृदत्तं वा स्तेयं स्याद्यदि सा हरेत्॥
पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन्।
सा हि स्वाम्यादतिक्रामेदृतूनां प्रतिरोधनात्॥

एनः पापम् असतीत्वनिबन्धनम्। अत्रेदं बोध्यम्—पूर्वं 'यस्तु तां वरयेत्कन्याम्' इत्यनेन वरयितरि वरे दोष उक्तः, इदानीं "न च यं साधिगच्छति" इत्यनेन कन्ययाऽधिगम्यमाने तस्मिन् दोषाभाव उच्यत इत्यविरोधः। यद्वा पूर्वमश्रद्धेयत्वादिप्रयोजकं दूषणमुक्तम्, इह तु लघुनिबन्धनदोषाभाव उच्यत इत्यविरोधः।

बौधायनः—

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम्।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम्॥
अलभ्यमाने सदृशे गुणहीनमपि श्रयेत्।

विष्णुना ऋतुत्रयं प्रतीक्ष्यमाणमुक्तम्, मनुबौधायनाभ्याञ्च वर्षत्रयम्। तत्रेयं व्यवस्था—सदृशवरलाभेऽपि पित्रादीनामुपेक्षादौ ऋतुत्रयं प्रतीक्ष्यं पित्रादीनां यत्नवतामपि केनचिद्धेतुना दानासम्भवे वर्षत्रयमिति।

अत्रैव वशिष्ठः—

पितुः प्रमादात्तु यदीह कन्या वयःप्रमाणं समतीत्य तिष्ठेत्।
सा हन्ति दातारमदीयमाना कालातिरिक्ता गुरुदक्षिणेव॥

कालातिरिक्ता दानोचितं समयमतिक्रान्ता।

यमः—

कन्या द्वादशवर्षाणि याऽप्रदत्ता वसेद् गृहे।
ब्रह्महत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम्॥

नारदः—

यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत्।
अनुज्ञया वरं तस्य परीक्ष्य वरयेत् स्वयम्॥
सवर्णमनुरूपञ्च कुलशीलवयःश्रुतैः।
सहधर्मं चरेत्तेन पुत्रानुत्पादयेत् ततः॥

याज्ञवल्क्यः—

गम्यं त्वभावे दातॄणां कन्या कुर्यात् स्वयंवरम्।

गम्यं गमनार्हं नारदोक्तसवर्णत्वादिधर्मवन्तम्।

'सकृत्कन्या प्रदीयते' इत्युपक्रम्य नारदः—

ब्राह्मादिषु विवाहेषु पञ्चस्वेष विधिः स्मृतः।
गुणापेक्षं भवेद्दानमासुरादिषु च त्रिषु॥

अयं सकृत्कन्यादानविधिर्ब्राह्मादिविवाहपञ्चक एव, आसुरराक्षसपैशाचेषु त्रिषु द्वितीयवरस्याधिकगुणवत्त्वे दत्ताया अपि पुनर्दानमित्यर्थः।

एकस्मै दातुं प्रतिज्ञाताऽपि कन्या पुनरन्यस्मै न देयेत्याह मनुः—

न दत्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः।
दत्वा पुनः प्रयच्छन् हि प्राप्नोति पुरुषाऽनृतम्॥

दत्वा दातुं प्रतिज्ञाय, पुरुषाऽनृतं "सहस्रं पुरुषाऽनृते" इति वाक्याभिहितम्।

कश्यपः—

पिता वा यदि वा माता भ्रातरो यदि वेतरः।
कन्याऽनृतकरा मूढा यां गतिं यान्ति तां शृणु॥
अनिवर्त्ती यथा योनौ गच्छत्येव यथाऽनिलः।
एवं नरकमायान्ति कन्याऽनृतकरा नराः॥

इतर उक्तेभ्योऽन्यः कन्यादाता। कन्याऽनृतकराः कन्यादानप्रतिज्ञायामसत्यत्व-प्रयोजकाः।

एतदपवदति नारदः—

कन्यायां प्राप्तशुल्कायां श्रेयांश्चेद् वर आव्रजेत्।
धर्मार्थकामसंयुक्तं वाक्यं तत्रानृतं भवेत्॥

वाक्यम्—'इयं कन्या तुभ्यं मया दातव्या' इति वैधः प्रतिश्रवः।

याज्ञवल्क्यः—

सकृत्प्रदीयते कन्या हरंस्तां चौरदण्डभाक्।
दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत्॥

दत्तां दातुं प्रतिज्ञातामित्यर्थ इति रत्नाकरादयः। सप्तमपदात् प्रागेतदिति मिताक्षरा।

तथा—

दत्तां कन्यां हरन्दण्ड्यो व्ययं दद्याच्च सोदयम्।
मृतायां दत्तमादद्यात्परिशोध्योभयव्ययम्॥

वाचा दत्तां कन्यां कारणमन्तरेण हरन् दण्ड्यो भवति, यच्च वरेण दत्तं हिरण्यादिकं तत्सवृद्धिकं कन्यापिता दद्यात्। वाग्दत्तायां कन्यायां मृतायाञ्च वरो दत्त-मादद्यात्। तदपि न सर्वं किन्तूभयव्ययं परिशोध्य यदवशिष्टं तावदेवेत्यर्थः।

कात्यायनः—

अनेकेभ्योऽपि दत्तायामनूढायाञ्च यत्र वै।
वरागमश्च सर्वेषां लभेत्पूर्ववरस्तु ताम्॥
पश्चाद्वरेण यद्दत्तं तस्याः प्रतिलभेत सः।
तथा गच्छेत्समूढायां दत्तं पूर्ववरो हरेत्॥

सुहृद्भ्यो धनग्रहणपूर्वकं प्रतिज्ञातायामनूढायां यत्र द्वयोर्बहूनाञ्च विवाहायागमस्तत्र प्रथमवरस्तां कन्यां लभेत। अन्यस्तु स्वयं दत्तं धनं लभेत। यदि तु पश्चाद्वरेण सा विवाहिता तदा पूर्ववर एव स्वयं दत्तं धनमादाय गच्छेदित्यर्थः। तथा—

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा।
धार्या सा वर्षमेकन्तु देयाऽन्यस्मै विधानतः॥
अथ प्रवृत्तिरागच्छेत्प्रतीक्षेत समात्रयम्।
अत ऊर्ध्वं प्रदातव्या कन्याऽन्यस्मै यथेच्छतः॥

स्त्रीधनं मुद्रिकादि। प्रवृत्तिरागमनवार्त्ता। एतच्च वर्षाभ्यन्तरे वर्षत्रयाभ्यन्तरे वा व्यङ्गनादिशङ्काविरहे ज्ञातव्यम्। अन्यत्र तु नारदः—

प्रतिगृह्य च यः कन्यां वरो देशान्तरं व्रजेत्।
त्रीनृतून् समतिक्रम्य कन्याऽन्यं वरयेद् वरम्॥

प्रतिगृह्य विवाहितुं[1] स्वीकृत्य। मनुः—

कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः।
देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥

नारदः—

प्रतिगृह्य च यः कन्यामदुष्टामुत्सृजेन्नरः।
विनेयः सो ह्यकामोऽपि कन्यां तामेव चोद्वहेत्॥

प्रतिगृह्य हस्तोदकीकृत्य। अदुष्टां विवाहविरोधिदोषशून्याम्। अकामोऽपि विवाहेच्छाशून्योऽपि। तथा—

कन्यादोषेऽफलं दानं दातुः षण्णवतिर्दमः।
शुल्कप्रदानस्य च तथा कन्यायाश्च निवर्तनम्॥

निवर्तनं परावृत्तिः। कात्यायनः—

वरदोषमनाख्याय पाणिं गृह्णाति यो नरः।
याचनां वा प्रकुर्वीत तद्दत्तां नाप्नुयाद्वरः॥
कन्यादोषेऽप्ययं धर्मो दाता दण्ड्यो वरस्तथा।
दद्याद् ग्रहीता दाता च न त्वेवाभिप्रजातयोः॥

---

१. विवोढ–मु० पु० पाठः।

वरदोषानाख्याने वरो दण्ड्यः, कन्यादोषानाख्याने दाता दण्ड्यः, न त्वेवाभिप्रजातयोः प्रसवे जाते नैवं दण्डः।

नारदकात्यायनौ—

नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम्।
दोषे सति न दोषः स्यादन्योऽन्यं त्यजतोस्तयोः॥

दोषे कुष्ठादौ। दोषः पापम्। मनुः—

विधिवत्प्रतिगृह्यापि त्यजेत् कन्यां विगर्हिताम्।
विप्रदुष्टां व्याधियुक्तां दमुना प्रतिपादिताम्॥

विगर्हितां दुर्लक्षणवतीम्, विप्रदुष्टां अन्यगतभावाम्, दमुना अन्यकन्योपदर्शनपूर्वककन्यादानादिप्रकारेण।

कात्यायनः—

दीयमानमथात्मानं या नारी नानुमोदते।
न सा देया न च ग्राह्या विधिरेष स्मृतो भृगुः॥

भृगुरित्यस्येत्यादेत्यादिः। रत्नाकरे स्मृतिः—

त्रिविवाहं कृतं येन न करोति चतुर्थकम्।
कुलानि पातयेत्सप्त भ्रूणहत्याव्रतं चरेत्॥

वर्त्तमानस्त्रीत्रिकपरमेतद्वचनमिति निबन्धारः। दक्षः—

मातापितृविहीनन्तु संस्कारोद्वहनादिभिः।
यः स्थापयति तस्येह पुण्यसंख्या न विद्यते॥

विष्णुधर्मोत्तरे—

विवाहादिक्रियाकाले तत्क्रियासिद्धिकारकम्।
यः प्रयच्छति धर्मज्ञः सोऽश्वमेधफलं लभेत्॥

आदि[1]पदाद् यज्ञोपनयनप्रतिष्ठादिग्रहणमिति दानवाक्यावली। दाक्षिणात्यनिबन्धे—

आसने शयने दाने भोजने वस्त्रसंग्रहे।
विवादे च विवाहे च द्यूतं सप्त सुशोभनम्॥

---

१. शब्दात्—मु० पु० पाठः।

अन्यत्र तु विष्णुधर्मोत्तरम्—

नामसंकीर्त्तनं विष्णोः क्षुतप्रशमनं सदा।
वियोगं शीघ्रमाप्नोति सर्वानर्थो न संशयः॥
नासंवृतमुखः कुर्याद्धास्यं जृम्भां तथा क्षुतम्।

रत्नाकरे वृद्धयाज्ञवल्क्यः—

विवाहे विततेतन्त्रे होमकाल उपस्थिते।
कन्याया ऋतुरागच्छेत् कथं कुर्वन्ति याज्ञिकाः॥
स्नापयित्वा तु तां कन्यामर्चयित्वा यथाविधि।
हुत्वाज्यं चैव लाजांश्च ततस्तन्त्रं प्रवर्त्तयेत्॥

हुत्वा चाज्याहुतीस्तत्रेति यज्ञपार्श्वः। गायत्र्या होम इति पशुपतिः।
मनुः—

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः॥
यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥
शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम्।
न शोचन्ति तु तत्रैता वर्द्धते तद्धि सर्वदा॥
जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः।
तानि कृत्याहतानीव विनश्यन्ति समन्ततः॥
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च॥

जामयो भगिन्यः स्नुषादयश्च।

स्त्रीणामस्वातन्त्र्यं सर्वथा विधेयम्, तथा च स एव—

अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम्।
विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे॥

सज्जन्त्यः प्रसक्ता भवन्त्यः। नारदः—

स्वातन्त्र्याद्धि प्रणश्यन्ति कुले जाता अपि स्त्रियः।
अस्वातन्त्र्यमतस्तासां प्रजापतिरकल्पयत्॥

कुले सत्कुले। याज्ञवल्क्यः—

रक्षेत्कन्यां पिता विन्नां पतिः पुत्रस्तु वार्द्धके।
अभावे ज्ञातयस्तेषां न स्वातन्त्र्यं क्वचित्स्त्रियाः॥

विन्नां विवाहिताम्। तेषामभावे इत्यन्वयः।

दक्षः—

स्वकाम्ये वर्त्तमाना सा स्नेहान्न च निवारिता।
अपथ्याभिभवेत्पश्चाद्यथा व्याधिरुपेक्षितः॥

रामायणे—

नैवाङ्गनानां दयितो नापि द्वेष्योऽस्ति कश्चन।
सर्वमेवावलम्बन्ते लता गहनजा इव॥

महाभारते—

यौवने वर्त्तमानानामिष्टाभरणवाससाम्।
नारीणां स्वैरवृत्तीनां स्पृहयन्त्यः कुलस्त्रियः॥
अलाभात्पुरुषाणाञ्च भयात्परिजनस्य च।
वधबन्धभयाच्चैव स्वयं गुप्ता भवन्ति ताः॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः।
नान्तकः सर्वभूतानां न पुंसां वामलोचना॥

स्त्रीरक्षणप्रकारमाह मनुः—

न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम्।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम्॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्मेऽन्नपक्तौ च पारिणाह्यस्य रक्षणे॥
अवेक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः।
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः॥

पारिणाह्यं गृहोपकरणम्, आप्ताश्च ते कारिणश्चेत्याप्तकारिणः।

तथा—

यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥

महाभारते—

स्त्रिय एताः श्रियो नाम सत्कार्या भूतिमिच्छता।
लालिता निगृहीता स्त्री लक्ष्मीर्भवति भारत॥

मनुः—

देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः।
तां साध्वीं बिभ्रियान्नित्यं देवानां हितमाचरन्॥

विष्णुः—

सवर्णासु बह्वीसु भार्यासु विद्यमानासु ज्येष्ठयैव सह धर्मकार्यं कुर्यात्।

कात्यायनः—

अग्निशिष्टादिशुश्रूषां बहुभार्यः सवर्णया।
कारयेत्तद्बहुत्वं चेज्ज्येष्ठया गर्हिता न चेत्॥

दक्षः—

प्रथमा धर्मपत्नी तु द्वितीया रतिवर्द्धिनी।
दृष्टमेव फलं तत्र नादृष्टमुपगम्यते॥

मनुः—

सन्तुष्टो भार्यया भर्ता भर्त्रा भार्या तथैव च।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम्॥

व्यासः—

पूर्वोत्थानपरा दक्षा जघन्यासनशायिनी।
अवाग्दुष्टाऽनुकूला स्त्री भवेद्वै पुण्यकर्मणः॥

देवलः—

स्वदारांस्त्यजतो मोहान्नरस्यान्यायमोचिनः।
धर्मवंशपरित्यक्तुर्निष्कृतिर्न विधीयते॥

अन्यायमोचिनः अन्यायेन त्यक्तुः। मनुः—

स्वच्छन्दगा च या नारी तस्यास्त्यागो विधीयते।
न चैव स्त्रीवधं कुर्यान्न चैवाङ्गविकर्त्तनम्॥
स्वच्छन्दव्यभिचारिण्या विधवायास्त्यागमब्रवीत्।
न वधं न च वैरूप्यं वधं स्त्रीणां विवर्जयेत्॥

न वधं न च वैरूप्यमित्यत्राब्रवीदित्यनुषज्यते । याज्ञवल्क्यः—

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यांवासयेद्व्यभिचारिणीम् ॥

स्त्रीधर्ममाह मनुः—

बालया वा युवत्या वा वृद्धया वापि योषिता ।
न स्वातन्त्र्येण कर्त्तव्यं किञ्चित्कार्यं गृहेष्वपि ॥
बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने ।
पुत्राणां भर्त्तरि प्रेते न भजेत् स्त्री स्वतन्त्रताम् ॥

बृहस्पतिः—

पित्रा भर्त्रा सुतैर्न स्त्री वियुक्ताऽन्यगृहे वसेत् ।
असत्सङ्गैर्विशेषेण गर्ह्यतामेति सा ध्रुवम् ॥

याज्ञवल्क्यः—

संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ।
कुर्याच्छ्वश्वशुरयोः पादवन्दनं भर्तृतत्परा ॥

संयतोपस्करा यथास्थाननिवेशितगृहोपकरणा । तथा—

पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया ।
सेह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥

ऋष्यशृङ्गः—

गृहमेधा भवेन्नित्यं भूषणानि च पूजयेत् ।
नित्यस्नानकृतां वेणीमर्चयेत् पुष्पवाससा ॥
पूर्वमेव रहो गच्छेद्यावन्नान्यः प्रबुध्यते ।
देवताराधनं कुर्याद् धूपपुष्पबलिं हरेत् ॥

गृहमेधा गृहकृत्यपरा । भूषणानि पूजयेद् मार्जनादिभिः संस्कुर्यात् । नित्यस्नानकृतां नित्यस्नानोत्तररचिताम् । शङ्खलिखितौ—"न देवभृत्यातिथिभ्योऽग्रेऽश्नीयात्, न भर्त्तुः, अन्यत्र प्रतीकारौषधात् ।" अन्यत्र प्रतीकारौषधाद् रोगप्रतीकारकारणमौषधं तद्भर्त्तुः पूर्वमप्यश्नीयादित्यर्थः । तथा—"न परपुरुषं भाषेतान्यत्र बालकप्रव्रजितवृद्धेभ्यः, न नाभिं दर्शयेत्, कुलवधूरागुल्फाभ्यां वासः परिदध्यात्, न स्तनौ विवृतौ कुर्यात्, न हसेतानावृतम् ।" विवृतौ व्यक्तौ । अनावृतं मुखमनाच्छाद्य । व्यासः—

द्वारोपवेशनं नित्यं गवाक्षेण निरीक्षणम्।
असत्प्रलापो हास्यं च दूषणं कुलयोषिताम्॥

मनुः—

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम्।
स्वप्नोऽन्यगृहवासश्च नारीणां दूषणानि षट्॥

सर्वाण्येतानि चारित्र्ये दूषणौपयिकानि विवक्षितानीति निबन्धारः। बृहस्पतिः—"पानाटनदिवास्वप्नमक्रिया दूषणं स्त्रियाः।" अक्रिया गृहक्रियाऽनाचरणम्। हारीतः—"परगृहरथ्याचत्वरवीथीप्रव्रजितालयांश्च नाभिगच्छेत् परशयनासनवस्त्राभरणानि मनसापि नाध्यवस्येत् प्रक्षाल्योपकरणानि गुप्ते निधाय वसेत् श्वोभूते प्रतिप्रक्षाल्य पाचनार्थान् कुर्यात्।"

मनुः—

दानात्प्रभृति या तु स्याद् यावदायुः पतिव्रता।
सा भर्तृलोकमाप्नोति यथैवारुन्धती तथा॥
पतिं या नातिचरति मनोवाक्कायसंयता।
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते॥
अनेन नारीवृत्तेन मनोवाग्देहसंयता।
इह कीर्तिमवाप्नोति पतिलोकं परत्र च॥

पतिलोकोऽत्र पत्या सह कृतयज्ञादिजन्यो विवक्षितः।

बृहस्पतिः—

आर्त्ताऽर्त्ते मुदिता हृष्टे प्रोषिते विमना कृशा।
मृते म्रियेत या पत्यौ सा ज्ञेया स्त्री पतिव्रता॥

मनुः—

व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निन्द्यताम्।
शृगालयोनिमाप्नोति पापरोगैश्च पीड्यते॥

कात्यायनः—

पतिमुल्लङ्घ्य मोहात् स्त्री कं कं न नरकं व्रजेत्।
कृच्छ्रान्मानुषतां प्राप्य किं किं दुःखं न विन्दति॥

याज्ञवल्क्यः—

पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत्।
इहैव सा शुनी गृध्री शूकरी चैव जायते॥

यावत्सप्रजा कन्या न भवति तावद् जामातृगृहे न भोक्तव्यम्, तथा च कामधेनावादित्यपुराणम्—

विष्णुं जामातरं मन्ये तस्य मन्युं न कारयेत्।
अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे॥

हेमाद्रावग्निपुराणम्—

अप्रजायां तु कन्यायां न भुञ्जीत कदाचन।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि॥
महासत्त्व समाकीर्णान्नास्ति ते नरकाद्भयम्।
तीर्णस्त्वं सर्वदुःखेभ्यः परं स्वर्गमवाप्स्यसि॥

विष्णुधर्म्मोत्तरे—

येनेच्छेद्विपुलां प्रीतिं तेन सार्द्धमरिन्दम।
न कुर्यादर्थसम्बन्धं दारसन्दर्शनं तथा॥

बृहस्पतिः—

तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहे च स्पृष्टास्पृष्टं न दुष्यति॥

योगियाज्ञवल्क्यः—

न स्नायादुत्सवेऽतीते मङ्गलं विनिवर्त्य च।
अनुव्रज्य सुहृद्बन्धून्नर्चयित्वेष्टदेवताम्॥

दाक्षिणात्यनिबन्धे ज्योतिषे—

स्नानं सच्चैलं तिलमिश्रकर्मप्रेतानुयानं कलशप्रदानम्।
अपूर्वतीर्थामरदर्शनं च विवर्जयेन्मङ्गलतोऽब्दमेकम्॥

अथ विवाहे विहितवर्षादि राजमार्त्तण्डे—

अयुग्मे दुर्भगा नारी युग्मे च विधवा भवेत्।
तस्माद् गर्भान्विते युग्मे विवाहे सा पतिव्रता॥

मासत्रयादूर्ध्वमयुग्मवर्षे युग्मेऽपि मासत्रयमेव यावत् ।
विवाहशुद्धिं प्रवदन्ति सर्वे वात्स्यादयो ज्योतिषि जन्ममासात् ॥
युग्माब्दकेषु युवतेरपि जन्ममासान्मासत्रयं विवहने परमब्दशुद्धिम् ।
प्राहुः समस्तमुनयो विषमे तु वर्षे मासत्रयादुपरितः खलु जन्ममासात् ॥

पारस्करः—"उदगयन आपूर्यमाणपक्षे पुण्याहे कुमार्याः पाणिं गृह्णीयात् ।" उदगयने उत्तरायणे, आपूर्यमाणपक्षे शुक्लपक्षे, पुण्याहे शास्त्रोक्तदोषरहितदिने, कुमार्याः अक्षतयोन्याः । विंशतिप्रसूताव्युदासार्थं कुमारीग्रहणम् , स्मर्यते हि तस्याः पुनर्विवाहः श्रीपतिरत्नमालायाम्—

मेषोक्षवृश्चिकमृगानवकुम्भसंस्थे प्रद्योतने करतलग्रहणं प्रशस्तम् ।
गीर्वाणमन्त्रिणि मृगेन्द्रमधिष्ठितेन मासेऽधिकेन त्रिदिनस्पृशिनावमेन ॥
प्रद्योतने सूर्ये, करतलग्रहणं विवाहः ।

देवलः—

आषाढे धनधान्यभोगरहिता नष्टप्रजा श्रावणे
वेश्या भाद्रपदे इषे च मरणं रोगान्विता कार्त्तिके ।
पौषे प्रेतपतिर्वियोगबहुला चैत्रे महोन्मादिनी
अन्येष्वेव विवाहिता पतिरता नारी समृद्धा भवेत् ॥

रत्नकलापे—

मानुषेऽथ खगशुद्धलग्नके जीवचन्द्ररविभृक्तशुद्धिषु ।
माघमार्गघटमाधवत्रये कालशुद्धिषु करग्रहः स्मृतः ॥

दाक्षिणात्यनिबन्धे व्यासः—

माघफाल्गुनवैशाखे यद्यूढा मार्गशीर्षके ।
ज्येष्ठे चाषाढके चैव सुभगा वित्तसंयुता ॥

तत्रैव नारदः—

पौषेऽपि कुर्यान्मकरस्थितेऽर्के चैत्रे भवेन्मेषगतो यदा स्यात् ।
प्रशस्तमाषाढकृतं विवाहं वदन्ति गर्गा मिथुनस्थितेऽर्के ॥

कृत्यचिन्तामणौ—

जन्ममासे च पुत्राढ्या धनाढ्या च धनोदये ।
जन्ममे जन्मराशौ च कन्या हि ध्रुवसन्ततिः ॥

विवाहपटले—

श्रेष्ठं पक्षमुशन्ति शुक्लमसितस्यान्त्यं त्रिभागं विना
रिक्तां प्रोझ्य तिथिं तथा ह्ययनयोः सन्धिश्च शेषाः शुभाः।
आग्नेयग्रहवासरेषु कलहः प्रीतिश्च सत्सूत्तमा
केचित्स्थैर्यमुशन्ति सौरिदिवसे चान्द्रे च सापत्नकम्॥

आग्नेयाः क्रूराः, सत्सु सौम्यग्रहवासरेषु।

दुर्गादित्यग्रन्थरत्नशतके च—

त्यक्त्वा चैत्रमुदक्प्रचारिणि रवौ मार्गे च मासे मिथः
स्त्रीपुंसोर्दिनवाष्टराशिरहिते योषिच्छुभे भास्वति।
लग्नाच्चन्द्रमसश्च सप्तमगृहे शून्ये विवाहः शुभः
कुर्यान्न व्यतिपातवैधृतिदिने नो विष्टिदुष्टेऽहनि॥

कृत्यचिन्तामणौ सोमशेखराख्यनिबन्धे—

मार्गशीर्षे तथा ज्येष्ठे क्षौरं परिणयं व्रतम्।
ज्येष्ठपुत्रदुहित्रोश्च यत्नतः परिवर्जयेत्॥

भोजराजः—

कृत्तिकास्थं रविं त्यक्त्वा ज्येष्ठे ज्येष्ठस्य कारयेत्।
उत्सवादिषु कार्येषु दिग्दिनानि विवर्जयेत्॥

दिग्दिनानि दशदिनानि। दाक्षिणात्यनिबन्धे पराशरः—

अज्येष्ठकन्यका यत्र ज्येष्ठपुत्रो वरो यदि।
व्यत्ययो वा तयोस्तत्र ज्येष्ठो मासः शुभप्रदः॥

यथा—

द्वौ ज्येष्ठौ मध्यमौ प्रोक्तावेकज्येष्ठं शुभावहम्।
ज्येष्ठत्रयं न कुर्वीत विवाहे सर्वसम्मतम्॥

सर्वेत्यस्य एतदित्यादिः।

व्यासः—

एकादशी द्वितीया च पञ्चमी सप्तमी तथा।
त्रयोदशी तृतीया च दशमी च शुभावहाः॥

शनैश्चरदिने चैव यदा रिक्ता तिथिर्भवेत् ।
तस्मिन्विवाहिता कन्या पतिसन्ततिवर्द्धिनी ॥
अमावास्यासु रिक्तायां करणे विष्टिसंज्ञिते ।
यः करोति विवाहं स शीघ्रं याति यमालयम् ॥

विवाहपटले—

आर्द्राद्ये भचतुष्टये विधवता आग्नेययाम्ये तथा
शेषेषु क्षयरोगशोकमरणव्याध्याद्यनिष्टं बहु ।

शेषेषु विहितातिरिक्तेषु । तथा—

प्रीतिर्जन्मसु तारकासु परतः संज्ञानुरूपं फलं,
चन्द्रे चोपचयाद्यसप्तमगते सौभाग्यसौख्याप्तयः ॥

वराहसंहितायाम्—

रेवत्युत्तररोहिणीमृगशिरोमूलानुराधामघा-
हस्तास्वातिषु तौलिषष्ठमिथुनेषूद्यत्सु पाणिग्रहः ।
सप्ताष्टान्त्यबहिः शुभैरुडुपतावेकादशद्वित्रिगे
क्रूरैस्त्र्यायषडष्टगैर्न च भृगौ षष्ठे कुजे चाष्टमे ॥

कुमार्याः पाणिं गृह्णीयादित्युपक्रम्य पारस्करगृह्यम् —"त्रिषु त्रिषूत्तरादिषु ।" उत्तरफल्गुन्यादित्रयोत्तराढादित्रयोत्तरभाद्रादित्रयेषु नवसु नक्षत्रेष्वित्यर्थः । एवञ्चैतद्गृह्यानुसारिभिश्चित्राश्रवणाधनिष्ठाश्विन्यो ज्योतिष्यविहिता अपि ग्राह्याः, स्वगृह्योक्तत्वात् ।

विद्याधरीविलासे—

पापाख्या च त्रिविधा पञ्च चतुर्दश विंशतिस्त्रियुता ।
सिद्धिफला वृद्धिकरी विनाशसंज्ञा क्रमात्कथिता ॥

भोजराजः—

कृष्णो बलवती तारा शुक्ले चन्द्रो बलोत्तमः ।
तस्मात्कार्यं प्रयत्नेन विशुद्धे चन्द्रतारके ॥

आश्वलायनः—

"सार्वकालिकमेके विवाहम्" इच्छन्तीति शेषः ।

राजमार्त्तण्डे—

राजग्रस्ते तथा युद्धे पितृणां प्राणसंशये।
अतिप्रौढा च या कन्या नानुकूलं प्रतीक्षते॥
अतिप्रौढा च या कन्या कुलधर्मविरोधिनी।
अविशुद्ध्याऽपि सा देया चन्द्रलग्नबलेन तु॥

व्यासः—

लग्नशुद्धिर्यदा नास्ति प्राप्तः कालोऽतिवर्त्तते।
अविशेषेण वर्णानां तदा गोधूलिरिष्यते॥

भुजबलभीमः—

महशुद्धिमब्दशुद्धिं शुद्धिं मासायनर्त्तुदिवसानाम्।
अर्वाग्दशवर्षेभ्यो मुनयः कथयन्ति कन्यकानाम्॥

अथ विवाहकर्मणः प्रदेशमाह पारस्करः—"पञ्चसु बहिश्शालायां विवाहे चूडाकरणे उपनयने केशान्ते सीमन्तोन्नयने" इति। विवाहादिषु पञ्चकर्मसु गृहाद् बहिश्शालायां मण्डपादौ कर्म भवति, अन्यत्र तु बहिश्शालायामन्तश्शालायां वेति गदाधरः। अन्यत्र गृहाभ्यन्तरे मुख्यशालायामेवेति हरिहरः। केशान्ते गोदानकर्मणि।

मण्डपकरणमाह वशिष्ठः—

षोडशारत्निकं कुर्याच्चतुर्द्वारोपशोभितम्।
मण्डपं तोरणैर्युक्तं तत्र वेदीं प्रकल्पयेत्॥

अरत्निश्चतुर्विंशाङ्गुलः।

वेदीमाह नारदः—

हस्तोच्छ्रितां चतुर्हस्तां चतुरस्रां समन्ततः।
स्तम्भैश्चतुर्भिः सुश्लक्ष्णां वामभागे तु सद्मनः॥
समां तथा चतुर्दिक्षु सोपानैरतिशोभिताम्।
एवंविधामारुरुक्षेन्मिथुनं साग्निवेदिकाम्॥

मिथुनं कन्यावरौ। अत्र 'साग्निवेदिकाम्' इति दर्शनादग्निस्थापनं वेदिकायामेवेति लभ्यते। गृह्यासङ्ग्रहः—

वेदी वैवाहिकी कार्या चतुरङ्गुलमुच्छ्रिता।
तां शूद्रो नोपलिप्येत न वन्ध्याविधवे स्त्रियौ॥
पतिपुत्रवती या स्त्री सैव तामुपलेपयेत्।

अथार्हणा। तत्र पारस्करः—"षडर्घ्या भवन्ति" षट् पुरुषा अर्घ्या अर्हणीया भवन्तीत्यर्थः। तान् प्रदर्शयति स एव—"आचार्य ऋत्विग् वैवाह्यो राजा प्रियः स्नातकः" इति। आचार्य उपनयनपूर्वकवेदाध्यापकः।

तथा च मनुः—

उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः।
सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥ इति।

ऋत्विग् होमादिकर्मार्थं वृतः।

तथा च मनुः—

अग्न्याधेयं पाकयज्ञानग्निष्टोमादिका: क्रियाः।
यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते॥ इति।

वैवाह्यो वरः, राजा अभिषेकादिगुणवान् प्रजापालनेऽधिकृतः। प्रियः उत्कृष्ट-जातिः समानजातिर्वा सखा। स्नातको ब्रह्मचर्यात् समावृत्तः। स चाचार्यस्यार्घ्यः।

तथा च मनुः—

तं प्रतीतं स्वधर्मेण ब्रह्मदायहरं पितुः।
स्रग्विणं तल्प आसीनमर्चयेत्प्रथमं गवा॥ इति।

गवा मधुपर्केण। पूर्वसूत्रे षड्ग्रहणं प्रियस्नातकयोः पृथक्त्वज्ञापनार्थम्। अर्हणाकालं नियमयति पारस्करः—"प्रतिसंवत्सरानर्हयेयुः"। प्रतिसंवत्सरमागता-नेतानाचार्यादीन् शिष्यादयः, अर्हयेयुः अर्घेण पूजयेयुः, नार्वाक् संवत्सरादित्यर्थः। ननु "प्रतिसंवत्सरानर्हयेयुः" इत्यविशेषेणोक्तत्वादृत्विजामपि संवत्सरान्त एवार्हणं प्राप्नोतीत्यत आह स एव—"यक्ष्यमाणास्त्वृत्विजः" यागं करिष्यन्तो यजमानाः पुन-र्ऋत्विजो यागकाल एवार्हयेयुर्न तत्र संवत्सरनियम इत्यर्थः। इत्थं च पूजनीया उक्ताः, कालोऽप्युक्तः। इदानीमर्हणप्रकारमाह स एव—"आसनमाहार्याह साधु भवानास्तामर्च-यिष्यामो भवन्तम्" इति. आसनं दारुमयं पीठादि आहार्य अनुचरैरानाय्य, साधु भवा-नास्तामित्याह, अर्चको ब्रूयादित्यर्थः। मन्त्रार्थस्तु—साधु सुखं यथा भवति तथा भवा-

नास्तां भवन्तमर्चयिष्यामः पूजयिष्याम इति। मन्त्रादौ च प्रणवः प्रयोक्तव्यः। तथा च योगियाज्ञवल्क्यः—"सर्वमन्त्रप्रयोगेषु ओमित्यादि प्रयुज्यते" इति, सर्वमन्त्रप्रयोगेषु वैदिकपौराणिकादिसकलमन्त्रप्रयोगेषु, एवमेवाग्रेऽपि। मन्त्राश्चैकश्रुत्यैव प्रयोक्तव्याः। तथा च परिभाषाध्याये कात्यायनः—"तानो[1] वा नित्यत्वात्" इति। तान एकश्रुतिः। वाशब्दः पक्षान्तरव्यावृत्तौ।

अर्हणां चाचान्तेनैव कर्तव्यम्—

क्रियां यः कुरुते मोहादनाचम्यैव नास्तिकः।
भवन्ति हि वृथा तस्य क्रियाः सर्वा न संशयः॥

इति साम्बपुराणात्। अत्र च यजमानाध्येषणानन्तरमर्हणीयेन स्वाभिमतिज्ञापकमर्चयेति वक्तव्यम्, प्रत्युत्तरस्य दातुं युक्तत्वात्। विष्टरादानपर्यन्तञ्च स्थातव्यम्, निरासनोपवेशनस्यायुक्तत्वात्, विष्टरग्रहणाभिधानोत्तरमेनमभ्युपविशतीति पारस्करेणाभिधानाच्च। इत्थं चार्हकेणापि तावत्पर्यन्तं स्थेयम्, अर्हणीये तिष्ठत्यर्हयितुरुपवेशनस्यायुक्तत्वादाचाराच्च। तत्र च वरस्यार्हणीयत्वे यजमानस्य प्रत्यङ्मुखता वरस्य प्राङ्मुखतेति विवेकः।

कन्यां वरयमाणानामेष धर्मोऽभिधीयते।
प्रत्यङ्मुखा वरयन्ति प्रतिगृह्णन्ति प्राङ्मुखाः॥

इति रत्नाकरधृतगृह्यपरिशिष्टवचनाद्विवाहे तथा नियमेन तदङ्गार्हणायामपि तथा युक्तत्वात्, एतत्सर्वं विष्टरं प्रतिगृह्णातीत्यग्रिमसूत्रव्याख्याने "प्रत्यङ्मुखेन यजमानेन तिष्ठता दत्तं विष्टरमासनात् पश्चिमे प्राङ्मुखस्तिष्ठन्नर्घ्यः पाणिभ्यामुदगग्रमादत्ते" इति वदता हरिहरेण स्पष्टीकृतम्।

पारस्करः—"आहरन्ति विष्टरं पद्यं पादार्थमुदकमर्घ्यमाचमनीयं मधुपर्कं दधिमधुघृतं पिहितं कांस्ये कांस्येन" आहरन्ति आनयन्ति यजमानपुरुषा इति शेषः। विष्टरं वेणीकृतपञ्चविंशतिकुशात्मकमासनम्। तथा च गृह्यासंग्रहः—

पञ्चाशद्भिः कुशैर्ब्रह्मा तदर्द्धेन तु विष्टरः।
दक्षावर्त्तो भवेद् ब्रह्मा वामावर्त्तस्तु विष्टरः॥

---

१. तान उदात्तादिस्वररहितः, एकश्रुतिरेव मन्त्राणां स्वरो भवति, न संहितास्वरो नाऽपि ब्राह्मणस्वरः। कुतः? नित्यत्वात्, वर्णस्वरूपमात्रोच्चारणाविनाभूतत्वादित्यर्थः।

अत्र कुशैरित्युपलक्षणम्। तेन "पञ्चाशत्पत्रको ब्रह्मा तदर्द्धेन तु विष्टरः" इति वचनान्तरमपि संगृहीतम्। पद्यं पद्भ्यामाक्रमणीयं विष्टरान्तरम्, पादार्थमुदकं पादप्रक्षालनार्थं जलम्, अर्घं दूर्वादियुतोदकपात्रम्। आचमनीयम् आचमनार्थमुदकम्। दधिमधुघृतात्मकं मधुपर्कमेकस्मिन् कांस्यपात्रे कृतमपरेण कांस्यपात्रेणाच्छादितम्, मधुपर्कमित्येतावदुक्त्यैव सिद्धे दधिमधुघृतमित्यभिधानं मधुपर्कप्रभेदान्तरनिरासार्थम्। तथा च मधुपर्कप्रभेदे स्मृतिः—

सर्पिषा मधुना दध्ना अर्घार्हानर्हयेत्सदा।
दधिक्षौद्रपयोभिर्वा मधुदध्युदकेन वा॥ इति।

पारस्करः—"अन्यस्त्रिस्त्रिः प्राह विष्टरादीनि"। अन्यो यजमानव्यतिरिक्तः पुरोहितादिः, विष्टरादीनि विष्टरप्रभृतीन्यनुपदप्रदर्शितानि वस्तूनि त्रिस्त्रिः विष्टरो विष्टरो विष्टर इत्येवमादि प्रत्येकं त्रींस्त्रीन् वारान् स्वे स्वे प्रतिपादनकाले प्राह ब्रूयादित्यर्थः। त्रिरभिधानं चादरार्थम्। तथा विष्टरं प्रतिगृह्णाति। यजमानेन दत्तं विष्टरमर्हणीय आदद्यादित्यर्थः। विष्टरप्रतिपादनकाले च विष्टरः प्रतिगृह्यतामिति यजमानेन वक्तव्यम्, अदत्तस्योपादानायोगादभिलापकशब्दप्रयोगस्य युक्तत्वात्। एवमर्हणीयेनापि स्वीकारज्ञापकं विष्टरं प्रतिगृह्णामीत्यभिधेयम्, उक्तयुक्तेः। एवं पाद्यादावपि बोध्यम्। एवमेव महामहोपाध्यायवर्द्धमानरामदत्तादयः। आचारोऽप्येवम्। यत्तु विष्टरं तूष्णीमादत्त इति हरिहरादिलिखनं तदेतेन निरस्तम्, वैदिकमन्त्राभावपरतया बोन्नेयम्। तथा—"वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः, इमं तमभितिष्ठामि यो मा कश्चाभिदासति इत्येनमभ्युपविशति" वर्ष्मोऽस्मीति मन्त्रं पठित्वा एनं विष्टरं उत्तराग्रमासने निधाय अभ्युपविशति उपविशेदित्यर्थः। गृह्यान्तरम्—"उदङ्ग्रं विष्टरमास्तीर्याध्युपविशेत्।" आश्वलायनः—"उदगग्रे विष्टरे उपविशेत्।" अत्र विष्टरग्रहणोपवेशनयोर्मध्ये पठितो वर्ष्मोऽस्मीति मन्त्र इमं तमभितिष्ठामीति लिङ्गादुपवेशने विनियुज्यते। तथा च श्रौतसूत्रम्—"तेषामारम्भेऽर्थतो व्यवस्था तद्वचनत्वात्" इति। तेषां मन्त्राणामारम्भे प्रयोगे अर्थतो विहितार्थाभिधानरूपेण सामर्थ्येन लिङ्गेन व्यवस्था अनेन मन्त्रेणेदं कर्त्तव्यमित्येवंरूपा भवति, तद्वचनत्वात् तदर्थवाचकत्वादिति तदर्थः। एतेन ग्रहणे विनियोगमङ्गीकुर्वन्तो निरस्ताः, रामदत्तादिनिबन्धृविरोधादाचारविरोधाच्च। समस्तमन्त्रोपादानमन्यशाखीयत्वात्।

एवमग्रेऽपि । एवं येषामनुपादानं तेषां स्वशाखीयत्वं बोध्यम् । येन मन्त्रेण[१] यत्कर्त्तव्यतयोपदिष्टं तन्मन्त्रपाठान्ते तत्कर्मारम्भणीयम् । तथा च कात्यायनः—"मन्त्रान्तैः कर्मादिः सान्निपात्यः" इति । कर्मसु ये मन्त्राः पठ्यन्ते तेषां मन्त्राणामन्तैः सह कर्मादिः क्रियमाणस्य कर्मण आदिः सान्निपात्यः संयोजनीय इति तदर्थः । मन्त्रार्थस्तु—अहं समानानां सजातीयानां वर्ष्म आच्छादकः समानानां मध्ये वर्ष्मः श्रेष्ठ इति वा, अस्मि भवामि, केषां क इव ? उद्यताम् उदयकुर्वतां ग्रहनक्षत्रादीनां सूर्य इव । किञ्च, यः कश्च कश्चिद् मा माम् अभिदासति हिनस्ति तमिमं विष्टररूपतापन्नं पुरुषम् अभितिष्ठामि अभिभूय अधः कृत्वा तिष्ठामीति । अधःकृते विष्टरे वैर्यध्यासः क्रियते । इत्थमत्रार्हणीयस्योपवेशनाभिधानात्तस्मिन्नुपविष्टे यजमानेनाप्युपवेशनीयं बाधकाभावात्,

आसीन ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः ।
तदासीनेन कर्त्तव्यं न प्रह्वेण न तिष्ठता ॥

इति कात्यायनवचनाच्च । पारस्करः—"पादयोरन्यं विष्टर आसीनाय" । विष्टरं ददातीति शेषः । पादयोरित्युत्तरमधस्तादित्यध्याहृत्य योजनीयम् । विष्टरे पूर्वप्रदत्ते आसीनायोपविष्टायार्हणीयाय पादयोश्चरणयोरधस्तादन्यं विष्टरं यजमानः पूर्ववद् ददातीत्यर्थः । स च तं पूर्ववत्प्रतिगृह्य "वर्ष्मोऽस्मि" इत्यनेन पादयोरधस्तान्निदध्यात् । अत्र हि पूर्वोक्तविष्टरग्रहणेतिकर्त्तव्यता सर्वाप्यनुषज्यते, अविशेषात् । एष पुनरत्र विशेषो यत्पूर्वार्पितविष्टरस्यासने धारणम्, एतस्य तु पादयोरधस्तात्करणमिति तदेतज्ज्ञापनार्थं पादयोरित्यभिधानम् । इदं च प्रसङ्गेन द्वितीयविष्टरस्य पादयोर्दानोपदेशमात्रकरणं न तु प्रथमविष्टरदानानन्तरमेव विष्टरान्तरदानमिति क्रमः । प्रक्षाल्य हि पादौ विष्टरे निदधाति न चाप्रक्षालितौ, अयुक्तत्वात् । तस्मात्पाद्योदकदानोत्तरमेव विष्टरान्तरदानम्, अग्निहोत्रं जुहोति यवागूं पचतीत्यादाविवार्थक्रमानुरोधेन [२]पाठक्रमतिरस्कारात् । तदुक्तं कात्यायनेन—"विरोधेऽर्थस्तत्परत्वात्" इति । पाठक्रमार्थक्रमयोर्विरोधेऽर्थक्रम एव बलीयान्

१. कर्म मु० पु० पाठः ।

२. यत्र प्रयोजनानुसारेण पदार्थानां क्रम आश्रीयेत स आर्थक्रमः । यथा अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र यवागूपाकस्याग्निहोत्रार्थत्वात् प्रथमं यवागूपाकानुष्ठानमनन्तरमग्निहोत्रानुष्ठानम् । पाठक्रमादनुष्ठाने तु यवागूपाकस्यादृष्टार्थत्वं स्यादग्निहोत्रे च द्रव्याभावः स्यात्, अतः पाठक्रमापेक्षयार्थक्रमो बलवानिति पञ्चमे मीमांसायां निर्णयः ।

कुतः ? तत्परत्वात् पाठस्य कार्यसिद्ध्यर्थत्वादिति तदर्थः। नन्वेवं पूर्वविष्टरदानस्यापि पाद्यदानोत्तरकालिकत्वमस्त्विति चेन्न, तत्र पादयोर्द्धारणानुपदेशेनोपदर्शितयुक्त्यविषयत्वात्। एवमेव कर्कहरिहररामदत्तादयः, आचारोऽप्येवम्।

पारस्करः—"सव्यं पादं प्रक्षाल्य दक्षिणं प्रक्षालयति ब्राह्मणश्चेद्दक्षिणं प्रथमम् विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः" इति। पाद्यं पाद्यं पाद्यमिति त्रिरन्यैरुक्ते पाद्यं प्रतिगृह्यतामिति यजमानदत्तं पाद्यंपाद्यं प्रतिगृह्णामीत्यभिधाय गृहीत्वा "विराजो दोहोऽसि" इति मन्त्रेण तेन सव्यं पादं प्रक्षाल्य दक्षिणं पादं प्रक्षालयेत् क्षत्रियादिरर्घ्यः। यदि पुनर्ब्राह्मणोऽर्हणीयो भवेत् तर्हि प्रथमं दक्षिणं पादं प्रक्षाल्य वामं प्रक्षालयेदित्यर्थः। प्रतिप्रक्षालनं च मन्त्रपाठः। तथा च गृह्यकारिका—

"कर्मावृत्तौ तु मन्त्रस्याप्यावृत्तिर्गृह्यकर्मणि" इति।

मन्त्रार्थस्तु—हे उदक! सर्वोपकारित्वेन विशेषेण राजत इति विराड् अन्नम्, "अन्नं वै विराड्" इति श्रुतेः। तस्य विराजोऽन्नस्य दोहः परिणामो रसस्त्वमसि। यद्वा विराट् सूर्यः, तस्य दोहः सारस्त्वमसि।

अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नसमुद्भवः॥ इति स्मृतेः।

यद्वा विराड् हरिः, तस्य दोहस्तत्कर्तृको रसस्त्वमसि, "अप एव ससर्जादौ तासु बीजमवाक्षिपत्" इति स्मृतेः।

यद्वा विराजो विशिष्टदीप्तेः दोहः पूरणोऽसि, तादृशं विराजो दोहं त्वामशीय अश्नवै व्याप्नुयाम्। किञ्च, विराजो दोहस्त्वं मयि मम पाद्यायै पाद्याय भवेति, लिङ्गव्यत्ययश्छान्दसः। गदाधरस्तु पादयोः साध्वी पाद्या सपर्या तस्यैतदर्थं विराजो दोहः मन्त्रसंस्कृतं जलं भवेति शेष इति व्याचष्टे। तथा अर्घं प्रतिगृह्णात्यापः स्थ युष्माभिः सर्वान् कामानवाप्नावानीति, आपः स्थेति मन्त्रेणार्घं प्रतिगृह्णीयादित्यर्थः। अर्घोऽर्घोऽर्घ इति त्रिरभिधानादिकं सर्वमनुसन्धेयम्। मन्त्रार्थस्तु—हे आपः यतो यूयम् आपः आप्तिहेतवः, यद्वा आप्नुवन्तीत्यापः व्यापिकाः स्थ भवथ, तस्माद् युष्माभिर्हेतुभिः सर्वान् कामानभीष्टार्थानहमाप्नवानि लभेयमिति। अत्र चैतत्सूत्रार्थपर्यालोचनेन हरिहरादिव्याख्यानेन च आपः स्थेति मन्त्रेणार्घग्रहणं प्रतीयते, न तु शिरसि तद्दानम्।

पद्धतिकारै रामदत्तादिभिश्चानेन शिरसि किञ्चिदत्तादिकं दत्त्वेति लिखितम्, व्यवहारोऽपि तथैव। तत्रेत्थं विरोधपरिहारः—

पाद्यं तु पादयोर्दद्यादर्घं दद्याच्छिरोपरि।

इत्यादिवचनेन शिरस्यर्घदानप्रतीत्या शिरसैवार्घग्रहणं युक्तम्, तथा च सूत्रे तद्व्याख्याने च यदर्घग्रहणमुक्तं तच्छिरसैवेत्यभिप्रायकमित्युन्नेयम्, शिरसा ग्रहणञ्च हस्तेन तद्ग्रहणपूर्वकं शिरसि दानरूपमित्येतदभिप्रायेण रामदत्तादिलेखो व्यवहारश्चेति। एतदभिप्रायकमेव तमर्घं शिरसाऽभिवन्द्येति हरिहरगदाधरवर्द्धमानादीनां लिखनम्। तथा—"निनयन्नभिमन्त्रयते समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत। अरिष्टास्माकं वीरा मा परासेचि मत्पथः" इति। निनयन् तमर्घं भूमौ प्रवाहयन् अभिमन्त्रयते 'समुद्रं वः' इति मन्त्रं पठदित्यर्थः, न तु मन्त्रान्ते निनयनं निनयन्निति समानकालिकत्वार्थकशत्रन्तनिर्देशात्। निनयनमैशान्यां दिशि कर्त्तव्यम्—

द्वारमेव हि द्रव्याणां प्रागुदीच्यां दिशि स्मृतम्।

इत्यङ्गिरोवचनात्, तच्च निनयनं जलमात्रस्य न त्वक्षतादेः, मन्त्रलिङ्गात्। मन्त्रार्थस्तु—हे आपः वो युष्मान् समुद्रं प्रहिणोमि प्रस्थापयामि अतो यूयं स्वां योनिं स्वकारणभूतं समुद्रम् अभिलक्षीकृत्य गच्छत व्रजत। यूयं किम्भूताः अस्माकं अरिष्टा अहिंसकाः वीरा उत्कृष्टाः। यद्वा युष्मत्प्रसादादस्माकं वीराः पुत्रा भ्रातरश्चारिष्टा अनुपहताः सन्त्विति शेषः। किञ्च, मत् मत्तः सकाशात् पयः अर्घ्यादिजलं मा परासेचि अपगतं मास्तु सदैवाहमर्घ्यो भवानीत्यर्थः। अरिष्टास्माकमिति सन्धिश्छान्दसः। क्वचित्त्वरिष्टा अस्माकमित्येव पाठः। तथा—"आचामत्यामागन्यशसा संसृज वर्चसा। तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम्" इति। यजमानदत्तमाचमनीयं प्रतिगृह्य आमागन्निति मन्त्रेणाचामति सकृद्भक्षयेदित्यर्थः। अत्र च पानानन्तरविहितं स्मार्त्तं द्विराचमनं कार्यम्। तथा च याज्ञवल्क्यः—

स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासो विपरिधाय च॥ इति।

तदुक्तं रूपनारायणपद्धतौ—"मन्त्रेण सकृदाचामति ततः शुद्ध्यर्थं द्विराचमनं करोतीति। एवमेव हरिहरमदनसिंहादयः। इत्थं च द्विस्तूष्णीमिति रामदत्तादिलिखनमप्येतत्परमेव। तत्र द्विराचमने आस्यमार्जनादिरूपाङ्गसहितं त्रिरप्राशनरूपमाचमनं साङ्गमेवावर्त्ततेऽदृष्टार्थत्वात्। पादप्रक्षालनं तु तदङ्गमपि नावर्त्तते, दृष्टस्य

तत्प्रयोजनस्य प्रथमेनैव प्रक्षालनेन सम्पादितत्वादिति सकलप्रामाणिकनिबन्धृसिद्धान्तः। मन्त्रार्थस्तु—हे जल! मा मां यशसा आगन् आगमय। यद्वा आ अमेति छेदः, अमाशब्दः साहित्यवाची, तं मां यशसा सहभावम् आगमय मां यशस्विनं कुर्वित्यर्थः। आङुपसर्ग गन्नितिक्रियापदेन सम्बध्यते। तथा वर्चसा तेजसा संसृज संसृष्टं कुरु तेजस्विनं कुर्वित्यर्थः। तथा तं मां प्रजानां प्रियं कुरु, पशूनां गवादीनामधिपतिं कुरु, तनूनां शरीरावयवादीनाम् अरिष्टिम् आपद्रहितं कुर्विति। गदाधरस्तु तनूनाम् अरिष्टिम् अहिंसकं कुरु, हिंसा चात्र—

अनभ्यासेन वेदानामाचारस्य च लङ्घनात्।
आत्तस्यादानदोषाच्च मृत्युर्विप्रान् जिघांसति॥

इति दर्शितेति व्याचष्टे। गन्निति अन्तर्भावितण्यर्थाद् गम्धातोर्लोट्। मध्यमपुरुषैकवचने छान्दसे शब्लुकि सेर्लुकि च मोनो धातोरिति नत्वे निष्पन्नम्। अरिष्टिमित्यत्र क्वचिदरिष्टमिति पाठः। पारस्करः—"मित्रस्य त्वेति मधुपर्कं प्रतीक्षते"। मधुपर्कः प्रतिगृह्यतामिति यजमानोपनीतं मधुपर्कं प्रतिगृह्णामीति ग्रहीतुं प्रतिज्ञातं यजमानकरस्थमेवोद्घाटितं मधुपर्कं 'मित्रस्य त्वा चक्षुषा प्रतीक्षे' इति मन्त्रेण प्रतीक्षते पश्येदित्यर्थः।

मन्त्रार्थस्तु—हे मधुपर्क! त्वा त्वां मित्रस्य सूर्यस्य चक्षुषा नेत्रेण प्रतीक्षे पश्यामीति, अहमादित्येन चक्षुर्दानेनानुगृहीतस्त्वां पश्यामीति भावः। तथा—देवस्य त्वेति प्रतिगृह्णाति। यजमानदत्तं मधुपर्कं 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि' इति मन्त्रेण दक्षिणहस्तेन प्रतिगृह्णीयादित्यर्थः। मन्त्रार्थस्तु—हे मधुपर्क! त्वा त्वां प्रतिगृह्णामि आददे कस्मिन् सति देवस्य सवितुः सूर्यस्य प्रसवे अभ्यनुज्ञाने संमताविति यावत्, प्रपूर्वः सुवतिरभ्यनुज्ञाने इत्युवटादयः। काभ्याम्? अश्विनोः देवविशेषयोः बाहुभ्याम्, तथा पूष्ण आदित्यस्य हस्ताभ्यामिति सवितुः सम्मतौ अश्विभ्यां बाहुदानेनानुगृहीतः पूष्णा च हस्तदानेनानुगृहीतः त्वां प्रतिगृह्णामीति तात्पर्यम्। 'तथा—सव्ये पाणौ कृत्वा दक्षिणस्य हस्तस्यानामिकयाङ्गुल्या प्रदक्षिणं त्रिवारं नमः श्यावास्यायेति' मन्त्रेणालोडयेदित्यर्थः। मन्त्रार्थस्तु—हे अग्ने! ते तुभ्यं नमः किंभूताय श्यावास्याय कपिशमुखाय, "श्यावः स्यात् कपिशो धूम्रः" इत्यमरः। किञ्च, ते तव अन्नशने अन्नाशने मधुपर्करूपस्यान्नस्य भक्षणे, यद्वा अश्यते इत्यशनम् अन्नस्य मधुपर्कस्य अशने अदनीयभागे यद् आविद्धम् आपतितं मक्षिका-

तृणादि अनदनीयं द्रव्यं तद् निष्कृन्तामि निरस्यामीति। अन्नशने इति ह्रस्वश्छान्दसः। तथा—"अनामिकाङ्गुष्ठेन च त्रिर्निरुक्षयति।" चकारो भिन्नक्रमो निरुक्षयतीत्यनन्तरं द्रष्टव्यः। अनामिकाङ्गुष्ठेनेति प्रायश्चित्वादेकवचनम्। मधुपर्कैकदेशं दक्षिणहस्तानामिकाङ्गुष्ठेन पात्राद् बहिस्त्रिवारं प्रक्षिपेच्चेत्यर्थः। निरुक्षणं तूष्णीमेव, मन्त्रानुपदेशात्। अत्र यद्यपि समन्त्रकं त्रिःप्रयवणं ततस्तूष्णीं त्रिर्निरुक्षणमित्यावृत्तयोः क्रिययोः क्रमो गम्यते पाठक्रमात्, तथापि निरुक्षयतिना चकारान्वयात् प्रयौतिना समुच्चयः प्रतीयते, प्रतिप्रयवणं निरुक्षणमिति परमार्थः। इत्थं च निरुक्षणव्यवधानाभिन्नकर्मत्वेन प्रतिप्रयवणं मन्त्रावृत्तिः। तदुक्तम्—

"कर्मावृत्तौ तु मन्त्रस्याप्यावृत्तिर्गृह्यकर्मणि" इति।

इदमेवाभिप्रेत्य पुनस्तथैव द्विः प्रत्येकं क्षिपेदिति रामदत्तादिभिः स्वपद्धतौ लिखितम्, आचारोऽपि तथैव। एवमेव कर्कगदाधरादयः। तथा—"तस्य त्रिः प्राश्नाति यन्मधुनो मधव्यं परमं रूपमन्नाद्यम्। तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानीति।" तस्येत्यवयवलक्षणा षष्ठी, तस्य मधुपर्कस्यैकदेशमादाय 'यन्मधुनो मधव्यम्' इति मन्त्रेण त्रिः प्राश्नीयादित्यर्थः। त्रिरित्यन्वयात् प्रतिप्राशनं मन्त्रावृत्तिः। एतच्च प्रतिप्राशनमेकैकऋक्करणकत्वविधायकेन मधुमतीभिर्वा प्रत्यृचमित्यग्रिमसूत्रेणापि सूचितं भवति। एवमेव वर्द्धमानहरिहरगदाधररामदत्तादयः। अत्र च द्वितीयप्राशनादावुच्छिष्टस्यैव मन्त्रोच्चारणं न तत्राचमनापेक्षा। एवं हि स्मरन्ति—

मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च।
नोच्छिष्टस्तु भवेद्विप्रो यथाऽत्रैर्वचनं तथा॥ इति।

उच्छिष्टः अशुचिः, अप्सु इति प्राणाहुतिसाहचर्यप्राप्तापोशानविषयम्, अन्यत्र पीत्वाऽपोऽध्येष्यमाणश्चेत्याचमनविधानात्। मन्त्रार्थस्तु—मधुनो यद्रूपं किं भूतं मधव्यं मधुरम्, परमं उत्कृष्टम्, अन्नाद्यम् अन्नाद्यसदृशम्, व्रीह्यादि यथोपभुक्तं सद् बलादिकमादधाति तथैतदपीत्यर्थः। तेन मधव्येन परमेणान्नाद्येन मधुनो रूपेण परमम् उत्कृष्टं मधव्यो मधुरशीलः, अन्नादः प्रशस्तान्नभोक्ता असानि भवानीति। मधव्येनेत्यादि पुनरुपादानमादरातिशयप्रतिपादनार्थम्। तथा—"मधुमतीभिर्वा प्रत्यृचम्।" 'मधुवाता' इत्यादिभिस्तिसृभिर्ऋग्भिः प्रत्यृचम् एकैकया ऋचा वा त्रिः प्राश्नीयादित्यर्थः। वाशब्दोऽत्रैच्छिकविकल्पार्थः। पूर्ववद् ऋक्त्रयकरणके प्राशने आवृत्ति-

प्रसङ्गनिरासार्थं प्रत्यृचमित्यभिधानम्। तथा—"पुत्रायान्तेवासिनेवोत्तरत आसीनायोच्छिष्टं दद्यात्" उच्छिष्टप्राशितशेषं मधुपर्कम् उत्तरत आसीनाय उत्तरस्यां दिश्युपविष्टाय पुत्राय सूनवे अन्तेवासिने उपनयनप्रभृति विद्यार्थित्वेन आचार्यकुलवासिने शिष्याय वा दद्यात् प्रयच्छेदित्यर्थः। पक्षान्तरमाह स एव—"सर्वं वा प्राश्नीयात्" अथवा स्वयं सर्वं भक्षयेदित्यर्थः। पुनर्विकल्पयति स एव "प्राग्वाऽसञ्चरे निनयेत्" प्राक् पूर्वस्यां दिशि असञ्चरे जनसञ्चारवर्जिते देशे प्राशितशेषं निनयेत् प्रक्षिपेदित्यर्थः। अत्र पूर्वपूर्वासम्भवे उत्तरोत्तरां प्रतिपत्तिं कुर्यादिति हरिहरः। ऐच्छिको विकल्प इत्यपरे। तथा—"आचम्य प्राणान् संमृशति—वाङ्म आस्ये नसोः प्राणोऽक्ष्योश्चक्षुः कर्णयोः श्रोत्रं बाह्वोर्बलमूर्वोरोजोऽरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह" इति।

आचम्य भोजनानन्तरप्राप्तं स्मार्त्तमाचमनं विधाय "वाङ्म आस्ये" इत्यादिभिर्मन्त्रैः प्रतिमन्त्रं यथालिङ्गं प्राणान् प्राणायतनानि संमृशति स्पृशेदित्यर्थः। आचान्तोदकायेति वक्ष्यमाणत्वादनाचान्तस्यैव प्राणायतनसंमर्शनं मा भूदित्येतदर्थमाचम्येत्यभिधानम्। अत्र च साकाङ्क्षत्वात् सर्वत्रास्तित्वत्यध्याहारः, अरिष्टानि मेऽङ्गानीत्यत्र च सन्तित्वत्यध्याहारः। मे पदस्य च सर्वत्रानुषङ्ग इति भाष्यकृतः। नन्वध्याहारानुषङ्गयोः[1] को विशेष इति चेदुच्यते—श्रुतपदानयनमनुषङ्गः, यथा—"या तेऽग्नेऽ-

१. अयमत्राध्याहारानुषङ्गन्यायो ज्योतिष्टोम उपसद्धोमेष्वेवमाम्नायते—"या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा। उग्रं वचो अपावधीत्वेषं वचो अपावधीत् स्वाहा। याते अग्ने रजाशया, याते अग्ने हराशया" इति। अयमर्थः—'अयसा रजतेन हिरण्येन च निर्मिता अग्नेस्तिस्रस्तनवः, तास्वाद्या येयमुक्ता तनुः सातिशयेन वृद्धा, गह्वरे तीक्ष्णे द्रव्ये लोहेऽवस्थिता तया तन्वा क्षुत्पिपासे उपपातकं वीरहत्यादिमहापातकं च हतवानस्मि' इति। तत्र स्वाहान्तः प्रथमो मन्त्रः संपूर्णवाक्यत्वान्निराकाङ्क्षो द्वितीयतृतीयमन्त्रयोराकाङ्क्षां पूरयितुमुचितो वाक्यशेषोऽध्याहर्तव्यः। नहि 'तनूर्वर्षिष्ठा' इत्यादिभागस्तयोरन्वेतुं योग्यः, तस्य प्रथममन्त्रशेषत्वादिति प्राप्ते, ब्रूमः—वैदिकयोर्मन्त्रयोराकाङ्क्षा वैदिकेनैव वाक्यशेषेण पूरणीया। ततः 'तनूर्वर्षिष्ठा' इत्यादिभाग उत्तरयोर्मन्त्रयोरनुषज्यते। यद्यप्यसावन्यशेषः, तथाऽपि बुद्धिस्थः संकल्पनीयादध्याहारात्सन्निकृष्यते। तस्मादनुषङ्गः कार्य इत्यनुषङ्गन्यायः।

तथा अग्नीषोमीये पशौ श्रूयते—"सं ते प्राणो वातेन गच्छताम्, समङ्गानि यजत्रैः सं यज्ञपतिराशिषा" इति। अयमर्थः—'भो पशो तव प्राणो वातेन वायुना

याशया तनूर्वर्षिष्ठा गह्वरेष्ठा उग्रं वचो ह्यपावधीत्वेषंवचो अपावधीत्स्वाहा या ते अग्ने रजाशया या ते अग्ने हराशया" इत्यादौ अग्ने रजाशया हराशयेत्येतयोरनन्तरं तनूर्वर्षिष्ठेति पदद्वयस्य। वाक्यनिराकाङ्क्षत्वार्थमश्रुतस्य लौकिकपदस्यानयनमध्याहारः। यथा–"संयजत्रैरङ्गानि संयज्ञपतिराशिषा" इत्यादौ गच्छन्तामित्यादेरिति। तत्र चाध्याहृतपदस्य संहितावत्प्रयोगो न भवति पार्थक्यात्, अपि तु सावसानमेवेति कर्कगदाधरादयः। अत एव रामदत्तादिभिरपि "वाङ्म आस्ये अस्तु" इत्याद्यसंहितमेव पद्धतौ लिखितम्। अत्र नव्यवर्द्धमानो भोजनान्तरप्राप्तमाचमनमाचम्येत्यनेनानूद्यते,

रेतोमूत्रसकृन्मोक्षे भोजनेऽध्वपरिश्रमे।
शौचमेवंविधं प्रोक्तमीषच्चान्यत्र वर्त्तते॥

इत्यनेन तत्रैव नित्यवत्प्राप्तमिन्द्रियस्पर्शनं प्राणान् संमृशतीत्यनेनानूद्यते केवलं तत्तदिन्द्रियस्पर्शे "वाङ्म आस्ये" इत्यादिर्मन्त्रो विधीयते, न तु तत्तदिन्द्रियस्पर्शसहितं शुद्ध्यर्थमाचमनं कृत्वा समन्त्रकमास्यादिस्पर्शनमितीत्याह, तन्मन्दम्, वैषम्येणानुवादकत्वासम्भवात्। तथा हि—आचमनाङ्गाङ्गस्पर्शेषु कनिष्ठाङ्गुष्ठेन नासिकास्पर्शनं विहितं न चात्र तथा, एवमिहोरुस्पर्शनं विहितम् आचमनाङ्गे च न तथेति। तस्मादाचमनाङ्गादतिरिक्तमेवैतदास्यादिस्पर्शनमिति युक्तम्, आचारोऽप्येवम्। अत एव प्रकृतसूत्रव्याख्याने स्मार्तमाचनं कृत्वा "वाङ्म आस्ये अस्तु" इति मुखमित्यादि भाष्ये लिखितम्। स्मार्तमाचमनं चेन्द्रियस्पर्शसंवलितमेवेति दिक्। मन्त्रार्थस्तु—मे मम आस्ये मुखे वाग् वचनमस्तु। मे मम नसोर्नासिकयोः प्राणः श्वासवायुरस्तु। अक्ष्योः चक्षुर्गोलकयोः चक्षुरिन्द्रियमस्तु। कर्णयोः कर्णशष्कुल्योः श्रोत्रमिन्द्रियमस्तु। बाह्वोर्बलं सामर्थ्यमस्तु, ऊर्वोरोजो गमनशक्तिरस्तु, अङ्गानि शिरः प्रभृतीनि अरिष्टानि

वायुना संगच्छताम्, तव हृदयाद्यङ्गानि यागविशेषैः संयुज्यन्ताम्, यज्ञपतिराशिषा संयुज्यन्ताम्' इति। "यज्ञपतिः" इत्यस्मिन् तृतीये मन्त्रे 'सम्' इत्युपसर्गस्य क्रियापदाकाङ्क्षत्वात्प्रथममन्त्रगतस्य 'गच्छताम्' इति पदस्यैकवचनान्तस्य यज्ञपतिशब्देनान्वेतुं योग्यत्वात्पूर्ववद् बुद्धिस्थत्वेन सन्निहितत्वादाकाङ्क्षासन्निधियोग्यतानां सद्भावेन क्रियापदमनुषज्यते इति प्राप्ते, ब्रूमः—मध्यमन्त्रे बहुवचनान्तेन 'अङ्गानि' इत्यनेनान्वेतुमयोग्यत्वात्तद्वयवायेन बुद्धिसन्निध्यभावान्नास्त्यनुषङ्गः। ततो द्वितीयतृतीयमन्त्रयोर्यथोचितं वाक्यशेषोऽध्याहर्तव्य इत्यध्याहारन्याय इति विभावनीयम्।

आपद्रहितानि सन्तु, तन्वा देहावयविना सह तनूर्देहावयवा अरिष्टाः सन्त्विति । सुचक्षा अहमक्षीभ्यां भूयासमित्यादिदर्शनादक्षिपर्यायोऽक्षीशब्दः, तस्माच्चयोरितिरूपम् । क्वचिदक्ष्णोरित्येव पाठः । पारस्करः—"आचान्तोदकाय शासमादाय गौरिति त्रिः प्राह" । आचान्तं उदकं च येनासावाचान्तोदकोऽर्हणीयस्तदर्थं शासं खड्गमादाय गामानीय गौर्गौर्गौरित्येवं त्रिब्रूयादित्यर्थः । आचान्तोदकग्रहणात्पुनराचमनमिति केचित्, तन्न, पूर्वेणैवाचमनेन परत्राप्युपकारसिद्धेरिति व्याख्यातारः, आचारोऽप्येवम् । आचान्तोदकायेति तादर्थ्ये चतुर्थी । शासादानस्य तादर्थ्यं तु तदर्थालम्भनद्वारकम् । अत्र च गौर्गौर्गौरित्यभिधानं नापितकर्तृकम्, यथा हि विष्टरादित्रिरभिधानस्य कर्तृसन्देहे गोभिलानुक्तमपि अन्यः प्राहेति पारस्करोक्तं यजमानव्यतिरिक्तकर्तृकत्वम्—

यन्नाम्नातं स्वशाखायां पारक्यमविरोधि यत् ।
विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ॥

इति वचनेन गोभिलीयैरप्यङ्गीक्रियते, लिखितं च शुभकर्मनिर्णये तथैव, तथेहापि गौर्गौर्गौरित्यभिधानस्य कर्तृसन्देहे उपदर्शितवचनेन पारस्करानुक्तमपि "आचान्तोदकाय गौरिति नापितस्त्रिब्रूयात्" इति गोभिलोक्तं नापितकर्तृकत्वं पारस्करीयैरपि ग्राह्यम् । अत एव पद्धतिकारै रामदत्तादिभिर्नापितेन गौर्गौर्गौरित्यभिहिते इति लिखितम् । इत्थं च यजमानकर्तृकं गौर्गौर्गौरित्यभिधानमिति वदन्तो निरस्ताः, शिष्टचारविरोधाच्च । "श्रुतिः स्मृतिः सदाचारः" इत्यादिना याज्ञवल्क्येन शिष्टाचारस्यापि प्रामाण्याभिधानादिति दिक् ।

पारस्करः—"प्रत्याह माता रुद्राणां दुहिता वसूनां स्वसादित्यानाममृतस्य नाभिः । प्र नु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट मम चामुष्य च पाप्मानं हनोमीति यद्यालभेत" यद्यानीतां गां आलभेत हन्यात् तदा मातेत्यादि हनोमीत्यन्तं प्रतिवचनं कुर्यादर्हणीय इत्यर्थः । तत्रामुष्येति पदस्थाने षष्ठ्यन्तं यजमानस्य नाम प्रयोज्यम्, अदसो नामपरत्वात् । तथा च चतुर्वर्गचिन्तामणौ हेमाद्रिः—अमुष्येत्यत्रचैयितुर्नामग्रहणमिति । इत्थं च मम च देवदत्तशर्मणो यजमानस्य चेति प्रयोग इति हरिहरादयः । यजमानस्येति न प्रयोज्यं मानाभावादिति वर्द्धमानः । अमुष्य चामुकशर्मणो यजमानस्येतिप्रयोग इति पद्धतिकृतो रामदत्तादयः । तेषामयमाशयः—अमुष्येत्युक्तौ कस्येत्याकाङ्क्षोदये तत्पूरणसमर्थदेवदत्तशर्मणो यजमानस्येति वाक्यशेषः क्रियते, "सं यजत्रैरङ्गानि सं यज्ञपतिराशिषा" इत्यादौ गच्छन्तामित्यादिवाक्यशेषवत्, न तु

अमुष्येतिपदमुद्धृत्य तत्स्थाने यजमाननामप्रयोगः, बुद्धिविशेषविषयपरस्यादृशब्दस्य प्रकृतेऽबाधितार्थत्वेनोद्वापे प्रमाणाभावात्, यत्र हि "अग्नये त्वा जुष्टं निर्वपामि" इत्यादौ सूर्योद्देश्यकनिर्वपणादौ अग्नये इत्यादिपदं बाधितार्थम्, तत्रैवाग्नये इत्यादिपदानामुद्वाप इति नवमाध्याये सिद्धान्तितम्, न चात्र तथेत्यमुष्यपदं प्रयोज्यमेव। यजमानस्येत्यपि दृढतराकाङ्क्षानिवृत्त्यर्थं प्रयोज्यमिति। मन्त्रार्थस्तु—हे पूजकाः! यत इयं गौः रुद्राणां माता जननी, वसूनां दुहिता कन्या, आदित्यानां स्वसा भगिनी, अमृतस्य देवभक्ष्यस्य घृतस्य नाभिः कारणमुत्पत्तिस्थानम्, नु वितर्के, अतो हेतोरहं प्रवोचं प्रब्रवीमि। छन्दसि व्यवहिताश्चेति प्रशब्दस्य तथा प्रयोगः, चिकितुषे चेतनावते जनाय मादृशाय तादर्थ्ये चतुर्थी मदर्थमिति यावत्, अनागामनागसमनपराधाम् अदितिमखण्डनीयामिमां गां मावधिष्ट न मारयत अहं च मम चार्हणीयस्य अमुष्य चार्घयितुश्च पाप्मानं पापं हनोमि गो स्थाने हन्मीति। अत्र चिकितुषे जिज्ञासवे शुश्रूषवे जनाय प्रवोचमित्यन्वयः, यस्य श्रवणेच्छा नास्ति तस्योपदेशनमयुक्तमिति चिकितुषे इति विशेषणमिति हलायुधः। पारस्करः—"अथ यद्युत्सिसृक्षेन्मम चामुष्य च पाप्मा हतः ओमुत्सृजत तृणान्यत्त्विति ब्रूयात्।" अथ यद्यर्हणीयो गामुत्सृष्टुमिच्छेत्तदा मातेत्यादि वधिष्टेत्यन्तं मन्त्रं पठित्वा मम चामुष्य च पाप्मा हतः ओमुत्सृजत तृणान्यत्त्विति ब्रूयादित्यर्थः। अत्राप्यमुष्येत्यत्रार्घयितुर्नाम ग्रहणम्। वाक्यशेषार्थस्तु—मम चामुष्य च पाप्मा पापं हतः हिंसितः, ओमिति स्वीकारे उत्सृजत गोस्थाने पापं हतं तस्मादिमां गां मुञ्चत तृणान्यत्तु उत्सृष्टा सतीयं गौस्तृणानि घासान् अत्तु भक्षयत्विति। अत्रैतन्मन्त्रपाठानन्तरमर्हणीयस्तृणं छिनत्तीति समाचारः, लिखितं च पद्धतिकृद्भिः वरः तृणं छिन्द्यादिति, अत्र मूलं नोपलभ्यते। तदित्थमिह तर्कः 'पाप्माहतः' इत्युच्यते, न च तद्धननमनुभूतम् तस्माद् यथा विष्टरे वैर्यध्यासं कृत्वा तदधःकरणमेव वैर्यधःकरणमिति "इमं तमभितिष्ठामि" इत्यत्रोक्तम्, तथेहापि तृण एव पापाध्यासं कृत्वा तच्छेदनमेव पापहननमिति प्रदर्शनाभिप्रायेण तथाचरणमिति। अत्र "पाप्माहतः" इत्यन्तमुपांशु पठित्वा "ओमुत्सृजत तृणान्यत्तु" इत्युच्चैर्ब्रूयादिति भाष्यकृतः।

तेषामयमाशयः—"उच्चैर्ऋचा क्रियते उच्चैः साम्ना उपांशु यजुषा" इति श्रुतेर्माता रुद्राणामित्यादेरुपांशुत्वम्, ओमुत्सृजतेत्यस्य च निगदत्वादुच्चैस्त्वम्। तथा च उच्चैर्निगदेनेति। अयं चानुवादो न विधिः, अर्थप्राप्तत्वात्। तथा हि—

"परसम्बोधनार्था निगदा भवन्ति" परसम्बोधनं च नान्तरेणोच्चैस्त्वं घटते इत्यर्थसिद्धं निगदानामुच्चैस्त्वमिति, निरूपितं चैतदर्थाच्चेति सूत्रे शाबरभाष्ये। प्रकृतमनुसरामः। इत्थमिह गोरालम्भ उत्सर्गो वेति पक्षद्वयमाचार्येण प्रदर्शितम्। तत्राद्यः कलौ प्रतिषिद्धः। तथा च हेमाद्रावादित्यपुराणम्—

दीर्घकालं ब्रह्मचर्यं धारणं च कमण्डलोः।
देवरेण सुतोत्पत्तिर्दत्तकन्या प्रदीयते॥
कन्यानामसवर्णानां विवाहश्च द्विजातिभिः।
आततायिद्विजाग्र्याणां धर्मयुद्धे निहिंसनम्॥
वानप्रस्थाश्रमस्यापि प्रवेशो विधिदेशितः।
वृत्तस्वाध्यायसापेक्षमप्यसङ्कोचनं तथा॥
प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम्।
संसर्गदोषः पापेषु मधुपर्के पशोर्वधः॥

इत्यादीन्यभिधाय,

एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः।
निवर्त्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः॥ इति।

तस्मादन्त्य एव पक्षो ग्राह्य इति पद्धतिकृद्भिस्तदनुसारेणैव प्रयोगो लिखितः। अत एव गोसंमुखीकरणकाले सूत्रोपदिष्टमपि खड्गादानं गौर्गौर्गौरिति वाक्यशेषत्वेन भाष्यादिलिखितमप्यालभ्यतामिति वाक्यं पद्धतिकारैरुपेक्षितम्, अर्थलोपेन[1] तद्बाधात्।

वरार्हणञ्च तच्छाखीयगृह्यविधिनैव कर्त्तव्यम्। तदुक्तं गृह्यपरिशिष्टे—

वरस्य या भवेच्छाखा तच्छाखागृह्यचोदितः।
मधुपर्कः प्रदातव्यो ह्यन्यशाखेऽपि दातरि॥ इति।

तदुक्तम्—"अर्घ्यशाखया मधुपर्कः" इति। याज्ञिकास्तु— यच्छाखीयं कर्म तच्छाखीयो मधुपर्क इति वदन्ति।

---

१. "प्राजापत्यं घृते चरुं निर्वपेच्छतकृष्णलमायुष्कामः" इति काम्येष्टिकाण्डे पठ्यते। कृष्णलशब्दः सुवर्णशकलवाची। प्रकृतौ व्रीहीनवहन्तीति पुरोडाशहेतूनां व्रीहीणामवघातो विहितः, सोऽत्र चोदकेन प्राप्तः कृष्णलेषु कर्त्तव्यो न वेति विचारणायां वितुषीकरणरूपस्य प्राकृतप्रयोजनस्यात्र लुप्तत्वान्नावघातानुष्ठानं तद्वदर्थलोपेनेत्यर्थः।

अथ विवाहेतिकर्त्तव्यतामाह पारस्करः— "उपलिप्त उद्धतावोक्षितेऽग्निमुपसमाधाय"। गोमयोदकेनोपलिप्ते स्फ्येन स्रुवमूलेन वोल्लिखिते जलेनाभ्युक्षिते प्रदेशे लौकिकमावसथ्यं वाग्निं स्थापयित्वा वक्ष्यमाणं कर्म कार्यमिति शेषः। अयं च लेपनादिविधिर्नापूर्वः, किन्तु परिसमुह्येत्यादि पूर्वोक्तस्यैवानुवादः। तेनानुक्तमपि परिसमूहनमुद्धरणं च भवतीति भाष्यकृतः। तथा—"निर्मन्थ्यमेके विवाहे।" एके आचार्या विवाहे परिणये निर्मन्थ्यमारणेयमग्निं वैवाहिकहोमाधिकरणमिच्छन्ति, अन्ये पुनर्लौकिकमेवाग्निमिच्छन्तीत्यर्थः। अत्राग्निस्थापनानन्तरं कौतुकागारान्मण्डपे कन्यानयनं वरकर्तृकमिति समाचारः। तथा—"अथैनां वासः परिधापयति, जरां गच्छ परिधत्स्व वासो भवाकृष्टीनामभिशस्तिपावा। शतञ्च जीव शरदः सुवर्चा रयिञ्च पुत्राननु संव्ययस्वायुष्मतीदं परिधत्स्व वासः" इति। अथाग्निस्थापनानन्तरं वरो 'जरां गच्छ' इति मन्त्रं पठित्वा एनां कुमारीं वासो वस्त्रं परिधापयति परिहितं कारयेदित्यर्थः। अत्राहतं वासो ग्राह्यम्। तथा च गृह्यान्तरम्—"अहतेन वसनेन पतिः परिदध्यात्" इति, परिदध्यात् परिधापयेदित्यर्थः। तदुक्तं कश्यपेन—

[1]अहतं यन्त्रनिर्मुक्तं वासः प्रोक्तं स्वयम्भुवा।
शस्तं तन्मङ्गले नूनं तावत्कालन्न सर्वदा॥

अहतलक्षणमाह गृह्यासंग्रहः—

सकृद्धौतं नवं श्वेतं सदशं यन्न धारितम्।
अहतं तद्विजानीयात्सर्वकर्मसु पावनम्॥

अत्र श्वेतमिति न सार्वत्रिकम्—

धारयेदथ रक्तानि नारी चेत्पतिसंयुता।
विधवा च न रक्तानि कुमारी शुक्लवाससी॥

इति मत्स्यपुराणम्। परिधानप्रकारमाहतुः शङ्खलिखितौ—"न नाभिं दर्शयेत् कुलवधूरागुल्फाभ्यां वासः परिदध्यात्, न स्तनौ विवृतौ कुर्यादिति।" वासोविन्यासविशेषस्तु तत्तद्देशाचारानुसारीति रत्नाकरादयः। मन्त्रार्थस्तु—हे आयुष्मति जरां गच्छ वृद्धत्वमाप्नुहि चिरञ्जीविनी भवेति यावत्, वासः परिधत्स्व परिधेहि, आकृष्यन्ते कामादिभिरित्याकृष्टयो मनुष्यास्तेषामभिशस्तिरभिशापस्तस्मात्पातीत्यभिशस्तिपावा भव, पाधातोर्वनिप्, यद्वा आकर्षति मानसमित्याकृष्टिस्तादृशी भव, प्रथमैक-

१. मु० पु० नास्ति।

वचनस्य षष्ठीबहुवचनं छान्दसम्, अभिशस्तिः शयनं तत्र पावा पवित्रा च भवेत्यर्थः। किञ्च सुवर्चाः शोभनदीप्तियुता सती शतं शरदो वर्षाणि जीव च प्राणिहि, रयिं धनं पुत्रांश्च अनुसंव्ययस्व उत्पादय राशीकुरु धारयेति वा, इदं वासः परिधत्स्वेत्यनुवाद आदरार्थ इति जयरामादयः, हलायुधेन तु प्रथमस्य परिधत्स्व वास इत्यस्य वस्त्रं धारय कदाचिदपि वस्त्रवियुक्ता मा भवेत्यर्थं इति व्याख्यानमुक्त्वा द्वितीयं परिधत्स्व वास इति वाक्यं यदेतदेवाशासितं तत्प्राप्तये इदं वासः परिधत्स्वेति व्याख्यातम्।

तथा—"अथोत्तरीयम्—या अकृन्तन्नवयन्या अतन्वत याश्च देवीस्तन्तूनभितो ततन्थ। तास्त्वा देवीर्जरसे संव्ययस्वायुष्मतीदं परिधत्स्व वासः॥" इति। अथ परिधानानन्तरं वरो या अकृन्तन्निति मन्त्रं पठित्वा उत्तरीयं वासः परिधापयतीत्यर्थः। मन्त्रार्थस्तु—हे आयुष्मति! या देवीर्देव्यः तन्तून् अकृन्तन् तत्सामर्थ्यदानेन कर्त्तितवत्यः, तथा या अवयन् वापितवत्यः, तथा या अतन्वत विस्तारितवत्यः, याश्च अभितो ततन्थ ओतान् प्रोतांश्च तन्तून् तुरीवेमादिव्यापारेणोभयपार्श्वयोरपि ग्रथितवत्यः कर्त्रीनादिव्यापारेण पटं सम्पादितवत्य इति समुदितार्थः, ता देवीर्देव्यस्त्वा त्वां जरसे वृद्धत्वाय दीर्घकालजीवनायेति यावत्, इदं वासः संव्ययस्व परिधापयन्तु त्वं परिधत्स्व परिधेहीति। पुरुषादिव्यत्ययश्छान्दसः।

अत्राचारात् कन्याप्रदोपनीतवस्त्रयुगं वरोऽपि परिदध्यात्, आच्छाद्य चार्चयित्वा चेति मनुवचनाच्च। परिधानमन्त्रो यथा—"परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि शतञ्च जीवामि शरदः पुरूची रायस्योषमभिसंव्ययिष्ये"। अस्यार्थः—परिधास्यै परिधानं करिष्यामि, यशोधास्यै कीर्त्तिं धारयिष्यामि, अनयोर्हेतुहेतुमद्भावः, अनेन परिधानेन यशो भविष्यतीत्यर्थः, जरदष्टिरस्मि जरद् वार्द्धकमश्नुते व्याप्नोति जरदष्टिर्वृद्धश्चिरंजीवीति यावत् तादृशो भवामि। किञ्च, पुरूचीः बहुतेजाः, यद्वा पुरुभिर्बहुभिः पुत्रधनादिभिरुचः संयोगो यस्येति पुरूची, उच समवाये, तादृशः सन् शतं शरदो जीवामि, दीर्घायुत्वाय चिरजीवित्वाय रायस्पोषं रायस्पोषाय धनवृद्ध्यर्थम्, अभिसंव्ययिष्ये अभि सर्वतोभावेन सम्यग् व्ययिष्ये आवरणं करिष्यामीति। पुनः पुनरुक्तिरादरातिशयार्था। यशश्चिरायुष्ट्वतेजोधनानां प्राप्त्यर्थमहं परिधानं करोमीति वाक्यार्थः। हलायुधेन तु पुरूचीरित्यस्य स्थाने सुवर्चा इति पठितम्। उत्तरीयमन्त्रो यथा—"यशसा मा द्यावापृथिवी यशसेन्द्रावृहस्पती। यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम्॥" अस्यार्थः—द्यावापृथिवी द्यावापृथिव्यौ मा मां यशसा

आच्छादयेताम्, मां यशसाऽच्छादयेताम्, किञ्च यशः कीर्त्तिः भगः सौभाग्यं च मा माम्, विदत् प्राप्नोतु, किं च मा मां यशः प्रतिपद्यतामागच्छतु। पुनः पुनरभिधानमादरातिशयार्थम्, आच्छादयेतामिति क्रियापदमध्याहार्यम्। अत्र वस्त्रपरिधानानन्तरं कन्यावरयोरुभयोः द्विराचमनम्, तन्निमित्तेषु "वासो विपरिधाय च" इति याज्ञवल्क्येनाभिधानात्।

पारस्करः—"अथैनौ समञ्जयति—समञ्जन्तु विश्वेदेवाः समापो हृदयानि नौ। सम्मातरिश्वा सन्धाता समुदेष्ट्री दधातु नौ॥" इति। अथ वस्त्रपरिधानानन्तरं परस्परं समञ्जेथामिति प्रैषेण कन्यापिता एनौ वधूवरौ समञ्जयति सम्मुखयेद् वरश्च सम्मुखीभूय "समञ्जन्तु विश्वेदेवाः" इति मन्त्रं पठेदित्यर्थः। अत्र सत्यपि कारितत्वे वरस्यैव मन्त्रपाठो मन्त्रलिङ्गात्, कारयितृत्वं च कन्यापितुरेव सन्निधानात्, सन्निहितो ह्यसौ, प्रदातृत्वात्। मन्त्रार्थस्तु—हे कन्ये! नौ आवयोर्हृदयानि हृदये व्यत्ययेन द्विवचनस्य बहुवचनम्, यद्वा—हृदयानि तद्धर्मान् संकल्पादीन् विश्वेदेवाः आपश्च समञ्जन्तु सङ्गमयन्तु गुणातिशयाधानेन संस्कुर्वन्तु वा, तथा सम्मातरिश्वा सम्यग्भूतः प्राणवायुः तथा सन्धाता सम्यग् अनुकूलः प्रजापतिः, तथा समुदेष्ट्री समीचीना उदेष्ट्री इच्छाकर्त्री देवता कामदेवः उत्पूर्वकादिच्छतेस्तृच् नौ आवयोर्हृदयानि सन्दधातु संयोजयतु। समाप इत्यत्र संशब्दो दधात्वित्यनेन सम्बद्ध्यते। यद्वा सम्मातरिश्वा नौ आवां सन्दधातु तथा सन्धाता नौ सन्दधातु, तथा देष्ट्री धर्माद्युपदेशकर्त्री त्रयी लक्षणवाग् नौ सन्दधातु, उ इत्यव्ययमप्यर्थे इति व्याख्येयम्।

वरकर्तृकैतन्मन्त्रपाठानन्तरं च कन्याप्रदकर्तृकं जन्मग्रन्थिबन्धनम्, "दाता ग्रन्थिं तु पातयेत्" इति परिशिष्टवचनात्।

एतदनन्तरमिह कन्यादानं कर्त्तव्यम्, पित्रा प्रत्तामादायेत्युत्तरसूत्रदर्शनात्। तत्राधिकारिणः प्रदर्शयति याज्ञवल्क्यः—

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः॥

परः पर इति दर्शनात्पूर्वपूर्वनाशे इति द्रष्टव्यम्[1]। प्रकृतिस्थः पातित्योन्मादादिदोषरहितः। विष्णुः—"पिता पितामहो भ्राता सकुल्यो मातामहो माता चेति

---

१. इति वाक्यं मु० पु० नास्ति।

कन्याप्रदाः" इति। अत्र याज्ञवल्क्यानुसाराद्व्यवहाराच्च मातुरभावे मातामहाधिकारो द्रष्टव्यः।

नारदः—

पिता दद्यात् स्वयं कन्यां भ्राता वानुमते पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते॥

अत्रानुमते पितुरिति मातामहादिभिरपि सम्बद्ध्यते, तेन निर्दुष्टे पितरि जीवति तदनुमत्या भ्रात्रादीनामप्यधिकारः, तदननुमतौ तु नेत्यर्थः। उपलक्षणमिदम्। तेन यदा यस्याधिकारस्तदा तदनुमत्या परेषामप्यधिकार इति बोध्यम्। इहापि पूर्वोक्तयुक्तेः सर्वेषामिति पदेन पितृभ्रातृसकुल्या एव विवक्षिता इति मन्तव्यम्, रत्नाकरादयोऽप्येवम्। गौडास्तु—प्रकृतनारदवचनानुसारेण मातामहाद्युत्तरं मातुरधिकार इति वदन्ति। सकुल्येषु च यो यदपेक्षया सन्निहितस्तदपेक्षया तस्यैव पूर्वमधिकारः, औचित्यादाचाराच्च। अप्रकृतिस्थेन तु पित्रादिना यत्कृतं वाग्दानादि तदप्यकृतमेव, अनधिकारिकृतत्वात्, प्रकृतिस्थ इति विशेषणात्।

नारदोऽपि—

स्वतन्त्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः॥

पितृत्वादिना स्वतन्त्रोऽपि सन् अप्रकृतिस्थत्वेन हेतुना यदि परतन्त्रो भवति, तदा तत्कृतं वाग्दानादिकमकृतमेवेत्यर्थः। यदि तु विवाहो निर्वृत्तस्तदा दानाधिकारिवैकल्यरूपेऽङ्गवैकल्येऽपि न पुनस्तदावृत्तिः, प्रधानस्य निष्पन्नत्वात्। तथा च कात्यायनः—

प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः।
तदङ्गस्याक्रियायान्तु नावृत्तिर्न्नैव तत्क्रिया॥

समाप्ते कर्मणि यत्र प्रधानस्याकरणज्ञानं तत्र साङ्गमेव तत्प्रधानं पुनः कर्त्तव्यं यत्र तु प्रधानं कृतमेव तदङ्गमात्रमकृतं तत्र न पुनः साङ्गप्रधानावृत्तिः, नापि तदङ्गमात्रकरणमित्यर्थः।

कन्यादानकालमाह गौडनिबन्धे—

सप्तसंवत्सरादूर्ध्वं विवाहः सार्ववर्णिकः।
कन्यायाः शस्यते राजन्नन्यथा धर्मगर्हितः॥

दाक्षिणात्यनिबन्धे—

षडब्दमध्ये नोद्वाह्या कन्या वर्षद्वयं यतः।
सोमो भुङ्क्ते ततस्तद्वद् गन्धर्वश्च तथाऽनलः॥

वस्तुतस्तु पञ्चमाब्देऽपि कन्याविवाहः—

वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः।
पतिसेवा गुरौ वासो गृहार्थेऽग्निपरिष्क्रिया॥

इति मनुवचनेन स्त्रीणां विवाहस्यौपनायनिकत्वाभिधानेन तत्कालिकत्वाति-देशात् "ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे" इत्यनेन पञ्चमाब्देऽप्युपनयन-विधानादिति सकलप्रामाणिकनिबन्धसिद्धान्तः। यत्तु औपनायनिक इत्यस्योपनयन-कार्यैकारीति कुल्लुकादिव्याख्यानदर्शनेन स्त्रीणां विवाहः संस्कार इत्यायाति न तु तत्कालेन कालवत्तेति केषाञ्चिल्लिखनं तदसत्, उभयातिदेशे बाधकाभावात्। माधवी-येऽपि—"जन्मतो गर्भाधानाद्वा पञ्चमाब्दात्परं शुभम्। कुमारीवरणं दानं मेखला-बन्धनं तथा॥" इति लिखितम्, तत्र गर्भवर्षापेक्षया पञ्चमाब्दपरत्वं पञ्चमाब्देऽपि व्यक्तमेव, अपि च—

उत्कृष्टायाभिरूपाय सदृशाय वराय च।
अप्राप्तामपि तां कन्यां पिता दद्याद्यथाविधि॥

इति मनुना गुणवद्वरलाभे कालस्याप्रयोजकत्वाभिधानेन पञ्चमाब्देऽपि कन्या-दानं निष्प्रतिपक्षम्। अप्राप्तामित्यस्य हि अप्राप्तशास्त्रोक्तविवाहवयस्कामपीत्यर्थ इति व्याख्यातारः। नन्वेवं गुणवद्वरलाभे प्रथमसंवत्सरादावपि कन्यादानप्रसङ्ग इति चेन्नैवम् "अर्यमणं देवम्" इत्यादिमन्त्राणां वधूपठनीयत्वेन सम्यक् तत्पाठयोग्यताया अपेक्षणीयत्वादाचारविरोधाच्चेत्यलं विस्तरेण।

कन्यादानफलमाह भविष्यपुराणम्—

ब्राह्मदेयां तु यः कन्यामलङ्कृत्य प्रयच्छति।
सप्तभूतान् भविष्यांश्च स्वकुले स तु मानवान्॥

तेन कन्याप्रदानेन तारयिष्यत्यसंशयम् ।
लोकमाप्नोति हि तथा दक्षस्यैव प्रजापतेः ॥
कन्यया सह दत्तं हि द्रव्यं यद्वसनादिकम् ।
सर्वं शतगुणं तस्य फलमुक्तं पुरातनैः ॥
विष्णुपूजा समं पुण्यं भवेत्तत्पूजया ध्रुवम् ॥

ब्राह्मदेयां ब्राह्मविवाहविधिना देयाम्, तत्पूजया वरपूजया ।

कश्यपः—

अग्निष्टोमातिरात्राणां शतं शतगुणीकृतम् ।
लभते कन्यकां दत्त्वा होममन्त्रैस्तु संस्कृताम् ॥

अत्र होममन्त्रैस्तु संस्कृतां दत्त्वेति क्रमो न विवक्षितो गृह्ये दानानन्तरं होम-विधानात् ।

तथा—

अनड्वहां सहस्राणां दशानां धुर्यवाहिनाम् ।
सुपात्रे विधिवद्दानं कन्यादानं च तत्समम् ॥

देवलः—

तिस्रः कन्या यथान्यायं पालयित्वा निवेद्य च ।
न पिता नरकं याति नारी वा स्त्रीप्रसूयिनी ॥

हेमाद्रौ वह्निपुराणम्—

ब्राह्मेण तु विवाहेन यस्तु कन्यां प्रयच्छति ।
ब्रह्मलोकं व्रजेत्क्षिप्रं ब्रह्माद्यैः पूजितः सुरैः ॥
दैवेन तु विवाहेन यस्तु कन्यां प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्यस्य स्वर्गलोकं स गच्छति ॥
गान्धर्वेण विवाहेन यस्तु कन्यां प्रयच्छति ।
गन्धर्वलोकमासाद्य क्रीडते देववच्चिरम् ॥

ब्राह्मानुवृत्तौ संवर्त्तः—

तां दत्त्वा तु पिता कन्यां भूषणाच्छादनाशनैः ।
पूजयन् स्वर्गमाप्नोति नित्यमुत्सववृत्तिषु ॥

नित्यं चिरकालीनम्, उत्सववृत्तिषु उत्सवादीनां वाद्यादीनां वर्त्तनेषु सत्सु दत्त्वेति सम्बन्धः। तत्फलमाह मत्स्यपुराणम्—

मङ्गल्यानि च वाद्यानि ब्रह्मघोषं च गीतकम्।
ऋद्ध्यर्थं कारयेद्धीमानमङ्गल्यविनाशनम्॥

अङ्गिराः—

गौरीं ददद्विष्णुलोकं ब्रह्मलोकं च रोहिणीम्।
कन्यां ददत् स्वर्गलोकं रौरवं च रजस्वलाम्॥
अष्टवर्षा भवेद् गौरी नववर्षा च रोहिणी।
दशवर्षा भवेत् कन्या अत ऊर्ध्वं रजस्वला॥

वशिष्ठः—

सर्वेषामेव दानानामेकजन्मानुगं फलम्।
हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्॥

कूर्मपुराणम्—

कन्यामलङ्कृतां वित्तशक्त्या दत्त्वा सकौतुकम्।
गौरीलोकमवाप्नोति विप्राय गुणशालिने॥

यमः—

कूपारामप्रपाकारी तथा वृक्षादिरोपकः।
कन्याप्रदः सेतुकारी स्वर्गमाप्नोत्यसंशयम्॥

भविष्योत्तरे—

कन्यां चैवानपत्यानां ददतां गतिमुत्तमाम्। जानीयादिति शेषः।

विष्णुपुराणम्—

विशिष्टफलदा कन्या निष्कामानां च मुक्तिदा॥

लिङ्गपुराणे—

यावन्ति सन्ति रोमाणि कन्यकायास्तनौ पुनः।
तावद्वर्षसहस्राणि रुद्रलोके महीयते॥
दासीदासासनाद्यञ्च भूषणाच्छादनादिकम्।
क्षेत्राणि च धनं चापि तथान्यदपि दापयेत्॥

दापयेत् दद्यात्।

यत्किञ्चिद्दीयते तत्र तदानन्त्याय कल्पते ॥

विष्णुधर्मोत्तरे—

अनाथां कन्यकां दत्त्वा सदृशे वाधिके वरे।
द्विगुणं फलमाप्नोति कन्यादाने यदीरितम् ॥

यदीयं कन्यादि तदर्थं तद्देयमाह आपस्तम्बः—"अन्ते वास्यर्थांस्तदर्थेषु धर्मकृत्येष्वेव योजयेद् दुहिता वा" इति। तदेतेषां दानफलानां विकल्पेनान्वयादेकदानेन कामनाविषयस्यैकस्यैव फलस्य सिद्धिर्न तु मिलितानाम्, मिलितत्वेनानुपस्थितेः। यथा हि एकैकस्मै वा अन्या इष्टयः कामाय आह्रियन्ते सर्वेभ्यो दर्शपौर्णमासावित्यत्रोपस्थितफलेष्वन्यतमफलत्वं दर्शपौर्णमासयोः, न तु मिलितसकलफलत्वम्, मिलितानुपस्थिते स्तथेहापीत्यवधेयम्। ननु इष्टान्ते सर्वेभ्य इति श्रवणात् साहित्येनैव सकलफलोपस्थितिसत्त्वात् कथमुच्यते मिलितानुपस्थितेरिति चेन्नैवम्, तत्तत्फलोद्देशेन दर्शपौर्णमासयोः साधनत्वेन विधानात् साहित्यस्योद्दिश्यमाननिष्ठतया लिङ्गादिवदविवक्षितत्वात्। तदुक्तम्—

कामोद्देशेन कर्मैव साधनत्वेन चोद्यते।
तेषां चोद्दिश्यमानानां साहित्यं न विवक्षितम् ॥ इति।

शाबरभाष्येऽपि—"न सर्वे कामाः कर्मणः श्रूयन्ते ये सर्वे कामास्तेभ्यो हि कर्म विधीयते, तस्मान्न कामानां साहित्यम्" इति। इत्थञ्च यत्र प्रत्येकं क्रिया समाप्तिर्यथा प्रकृतकन्यादानफलेषु, यत्र वा विकल्पार्थकशब्दश्रवणम्, यथा—"श्रीकामश्शान्तिकामो वाग्रहयज्ञं समाचरेत्" इत्यादौ, तत्र प्रत्येकमेव फलत्वं न तु मिलितानामिति न सकृदनुष्ठितेन तत्तत्कर्मणा सकलतत्तत्फलसिद्धिरपि तु प्रतिफलं पृथगेव तदनुष्ठानम्। अथमेव हि योगसिद्धिन्यायः 'पर्यायो योगसिद्धिरिति' शाबरभाष्यम्। यत्र तु प्रत्येकं न क्रियासमाप्तिर्न वा विकल्पार्थकशब्दश्रवणं यथा—"शरत्काले महापूजा" इत्यादौ, "ज्येष्ठे मासि सिते पक्षे दशमी हस्तसंयुता। हरते दश पापानि" इत्यादौ च, तत्र प्रदर्शितानां मिलितानां फलत्वमित्यलं पल्लवितेन। अत्र च स्वगतफलकामवत्पित्रादिगतफलकामोऽप्यधिकारी,

रत्नवस्त्रमहीयानसर्वभोगादिकं वसु।
विभवे सति विप्रेभ्यो योऽस्मानुद्दिश्य दास्यति ॥

इति विष्णुपुराणीयपितृगीतादर्शनात्, तत्रादिपदेन देयसकलवस्तुसंग्रहादिति वदन्ति।

शङ्खः—

प्राङ्मुखायाभिरूपाय वराय शुचिसन्निधौ।
दद्यात् प्रत्यङ्मुखः कन्यां क्षणे लक्षणसंयुते॥

शुचिसन्निधौ वह्निसन्निधौ।

ऋष्यशृङ्गः—

वरगोत्रं समुच्चार्य प्रपिता[1]महपूर्वकम्।
नाम संकीर्त्तयेद्विद्वान् कन्यायाश्चैवमेव हि॥
वरः पूर्वमुखस्तिष्ठेद्दाता प्रत्यङ्मुखो वदेत्।
मधुपर्कार्चितायैनां दद्यात् कन्यां सदक्षिणाम्॥

अत्र मधुपर्कार्चिताय दद्यादिति दर्शनात् कन्यादानात्पूर्वमेवार्हणेति लभ्यते।

आश्वलायनः—

कन्यां वरयमाणानामेष धर्मोऽभिधीयते।
प्रत्यङ्मुखा वरयन्ति प्रतिगृह्णन्ति प्राङ्मुखाः॥
उभयस्यापि पक्षस्य पैतापौत्रीन् त्रिरभ्यसेत्।

वरयन्ति गोत्रप्रवराद्यभिधानपूर्वकं ददति। पैतापौत्रीति रूपमुभयपदवृद्ध्या, पितृनिर्देशानन्तरं पुत्रनिर्देशः। स च त्रिरावृत्त इत्यर्थः। कात्यायनः—

नान्दीमुखे विवाहे च प्रपितामहपूर्वकम्।
वाक्यमुच्चारयेद्धीमानन्यत्र पितृपूर्वकम्॥
एतदेव त्रिरुच्चार्य कन्यां दद्याद्यथाविधि।

मत्स्यपुराणम्—

तुलापुरुषदाने च तथा च हाटकाचले।
कन्यादाने तथोत्सर्गे कीर्त्तयेत्प्रवरादिकम्॥

---

(१) "अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रायामुकशर्मणः पौत्रायामुकशर्मणः पुत्राय" इति वरपक्षे। "अमुकगोत्रस्यामुकप्रवरस्यामुकशर्मणः प्रपौत्रीममुकशर्मणः पौत्रीममुकशर्मणः पुत्रीम्" इति कन्यापक्षे।

व्यासः—

नामगोत्रे समुच्चार्य प्रदद्याच्छ्रद्धयान्वितः।
परितुष्टेन भावेन तुभ्यं सम्प्रददे इति॥

वाक्ये अहम्पदप्रयोगमाह छन्दोगपरिशिष्टम्—

अहमस्मै ददानीति एवमाभाष्य दीयते॥

वृद्धवशिष्ठः—

नामगोत्रे समुच्चार्य सम्प्रदानस्य चात्मनः।
सम्प्रदेयं प्रयच्छन्ति कन्यादाने च पुंत्रयम्॥

गोतमः—

फलं समभिसन्धाय प्रदद्याच्छ्रद्धयान्वितः।

आपस्तम्बः—

"सर्वाण्युदकपूर्वाणि दानानि" इति।

जीवतां नाम श्रीपूर्वमेवोच्चार्यम्। तदुक्तम्—

देवं गुरुं गुरुस्थानं क्षेत्रं क्षेत्राधिदेवताः।
सिद्धं सिद्धाधिकारांश्च श्रीपूर्वं समुदीरयेत्॥

स्वर्गकामत्वादिना सिद्धोऽधिकारो येषां ते सिद्धाधिकारा जीवन्तः।

स्मृतिः—

मासपक्षतिथीनां च निमित्तानां च सर्वशः।
उल्लेखनमकुर्वाणो न तस्य फलभाग् भवेत्॥

विष्णुधर्मोत्तरे—

अभयं सर्वदैवत्यं भूमिर्वै विष्णुदेवता।
कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्त्तिताः॥

सर्वत्र दानवाक्ये देयविशेषणत्वेनामुकदैवतमित्यभिधानमाचारात्।

तथा—

द्रव्यस्य नाम गृह्णीयाद्ददानीति तथा वदेत्।
तोयं दद्यात्तथा दाता दाने विधिरयं स्मृतः॥

अत्रैतदवधेयम्—मासादीनामुल्लेखः सकृदेव, आवृत्तौ प्रमाणाभावात्। एवं वरकन्ययोर्गोत्रादिकीर्त्तनमपि सकृदेव, उक्तयुक्तेः। उभयोः प्रपितामहादिकीर्त्तनं तु त्रिरावर्त्तते,

पैतापौत्रीं त्रिरभ्यसेत्, एतदेव त्रिरुच्चार्येत्याद्यभिधानात्। तत्रापि वरगोत्रं समुच्चार्येत्यादिऋष्यशृङ्गवचनपर्यालोचनाद् वरपक्षस्य प्रथममभिधानम्, तत्र वाक्ये पत्नीत्वेनेत्यपि प्रयुज्यते, तच्च हेतौ तृतीयान्तम्। यद्यपि पत्नीत्वं दानस्य फलं न तु हेतुः, तथाप्यध्ययनेन वसतीत्यादाविव फलस्यापि हेतुत्वमुन्नेयम्। तेनैतदुक्तं भवति—पत्नीत्वस्यैव सम्पादकमिदं दानं न तु दासीत्वादेः, तस्माद् दासीत्वादिना नेयं व्यवहर्त्तव्येति। तदुक्तं तडागामृतलताकृद्भिः—'कन्यादानवाक्ये पत्नीत्वेनेत्यस्य दानविक्रयाद्युपयोगप्रकारान्तरव्यावृत्तिपरत्वेनेष्टत्वादिति'। शङ्खस्थतोयादिना च यदेतद् दानं यश्च तत्र तिलाद्यन्वयबाधः, तत्राचार एव शरणम्। यत्तु—

अद्भिरेव द्विजाग्र्याणां कन्यादानं प्रशस्यते।
इतरेषां तु वर्णानामितरेतरकाम्यया॥

इति मनुवचने अद्भिरेवेति श्रवणात् कन्यादाने तिलादिबाध इति द्वैतपरिशिष्टलिखनं तदसत्, उत्तरार्द्धस्वरसविरोधात्। अद्भिरेवेत्येवकारेण ब्राह्मणानां कन्यावरयोः परस्परानुरागो नावश्यक इति रत्नाकरादिव्याख्यानविरोधाच्च, क्षत्रियादीनां कन्यादाने तिलाद्यन्वयविरहे मानाभावप्रसङ्गाच्च। [1]दानात्प्राग् वरदक्षिणहस्तोपरि कन्यादक्षिणहस्तनिधानमप्याचारादेवेति।

वायुपुराणे—

दानं प्रतिग्रहो होमो भोजनं बलिकर्म च।
साङ्गुष्ठेन सदा कार्यममुरेभ्योऽन्यथा भवेत्॥
एतान्येव तु कर्माणि दानादीनि विशेषतः।
अन्तर्जानुविशेषेण तद्वदाचमनं नृप॥

साङ्गुष्ठेन अङ्गुलीसङ्गताङ्गुष्ठेन, अन्तर्जानु जानुमध्ये यथा हस्तौ भवेतां तथा। ब्रह्माण्डपुराणम्—

सोत्तरीयस्ततः कुर्यात् सर्वकर्माणि भावुकः।

---

१. प्राङ्मुखोपविष्टायामुकगोत्रायामुकप्रवरायाऽमुकशर्मणे प्रत्यङ्मुखोपविष्टाममुकगोत्रामममुकप्रवराममुकनाम्नीमिमां कन्यां सालङ्कारां प्रजापतिदैवत्यां पुराणोक्तशतगुणीकृतज्योतिष्टोमातिरात्रसमफलप्राप्तिकामो भार्यात्वेन तुभ्यमहं संप्रददे इत्युक्त्वा सकुशाच्चतजलं वरदक्षिणहस्तोपरि कन्यादक्षिणहस्ते निधाय देयमिति समाचारः।

अधौतं काकधौतं च परिदध्यान्न वाससी।
ददानः प्रतिगृह्णंश्च दध्यादहतमेव च ॥

व्यासः—

श्रद्धायुक्तः शुचिर्दान्तो दानं दद्यात् सदक्षिणम्।
अदक्षिणं तु यद् दानं तद् दानं निष्फलं भवेत्॥
दक्षिणाभिरुपेतं हि कर्म सिद्ध्यति मानवे।
सुवर्णमेव सर्वासु दक्षिणासु विधीयते ॥

सर्वास्वित्यभिधानं विशेषविहितदक्षिणेतरविषयम्। सुवर्णपदमत्र हिरण्यसामान्यपरं नपुंसकनिर्देशात्, पुंलिङ्गस्तु सुवर्णशब्दोऽशीतिरक्तिकापरिमित एव प्रयुज्यते। तथा च मनुः—

"पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" इति।

यत्तु—गोमिथुनं वा रुद्रदैवतं दक्षिणां दद्यादिति पद्धतौ लिखितम्, तदार्षविवाहाभिप्रायेण। महाभारते—

रात्रौ दानं न शंसन्ति विना चाभयदक्षिणाम्।
विद्यां कन्यां द्विजश्रेष्ठा दीपमन्नं प्रतिश्रयम्॥

अभयदक्षिणाम् अभयदानम्, प्रतिश्रयं प्रवासिनामाश्रयम्, विवाहे रात्रौ दानान्तरमप्याह देवलः—

राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्युर्निशि काम्यव्रतेषु च ॥

हेमाद्रौ स्कन्दपुराणम्—

वैवाहिकप्रदानं वा यो ददाति दयापरः।
विमानेन विचित्रेण किङ्किणीजालमालिना॥
महेन्द्रभवनं याति सेव्यमानोऽप्सरोगणैः।

विवाहानुवृत्तौ शङ्खलिखितौ—सर्वैरलङ्कारः स्त्रीधनं च देयम्। द्वयमपीदं यथाशक्तीति रत्नाकरः। प्रतिग्रहविधिमाह चतुर्वर्गचिन्तामणावादित्यपुराणम्—

ओङ्कारमुच्चरन् प्राज्ञो द्रविणं सकुशोदकम्।
गृह्णीयाद् दक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत्॥

लाट्यायनसूत्रम्—"ओमिति वा प्रतिगृह्णीयात्"। ब्रह्माण्डपुराणम्—

कृतोत्तरीयको नित्यमन्तर्जानुकरस्तथा ।
दातुरिष्टमभिध्यायन् गृह्णीयात् प्रयतः शुचिः ॥

विष्णुधर्मोत्तरे—

करे गृह्य तथा कन्यां दासदास्योर्द्विजोत्तमाः ।
करं तु हृदि विन्यस्य धर्म्यो ज्ञेयः प्रतिग्रहः ॥

परिशिष्टान्तरम्—"द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु" इति ब्रूयात् । मन्त्रार्थस्तु प्रव्यक्त एव । आकाशसदृशस्तव पिता कामपूरकत्वात्, पृथिवीसदृशश्चाहं सर्वाश्रयत्वादिति च तात्पर्यम् ।

विष्णुधर्मोत्तरे—

समापयेत्ततः पश्चात् कामं स्तुत्वा प्रतिग्रहम् ।

कामस्तुतिर्यथा—

कोऽदात् कस्मा अदात् कामोऽदात् कामायादात् ।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते ॥

अस्यार्थः—कः अदात् दत्तवान् कस्मै अदात् प्रश्नद्वयमेतत्, कामोऽदात् कामायादादित्युत्तरम्, यतः कामो दाता कामः प्रतिग्रहीता अत एव हे काम ! एतत् प्रतिगृहीतं कन्यादिकं वस्तु ते तवेति । अत्र कामशब्देनेच्छा विधीयते, यत इच्छायामेव सत्यां दीयते प्रतिगृह्यते च, तस्मादिच्छैव दात्री प्रतिग्रहीत्री चेति, तस्या एवैतदिति कामस्तुतिरियम् ।

पारस्करः—"पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामति यदैषि मनसा दूरं दिशोऽनुपवमानो वा हिरण्यपर्णो वै कर्णः स त्वा मन्मनसां करोत्वित्यसाविति" । पित्रा जनकेन प्रत्तां दानविधिना दत्तां कन्यामादाय प्रतिग्रहविधिना प्रतिगृह्य गृहीत्वा पाणौ धृत्वा "यदैषि मनसा दूरम्" इति मन्त्रेण निष्क्रामति मण्डपाद् वेदिकायां स्थापितमग्निं प्रति गच्छेदित्यर्थः । असावित्यस्य स्थाने सम्बुद्ध्यन्तं कन्याया नाम प्रयोज्यम् । तथा च कात्यायनः—'असाविति नाम गृह्णातीति ।' मन्त्रार्थस्तु—हे अमुकदेवि ! यद् मनसा हृदयेन दूरम् एषि गच्छसि पितृकुलाद् बहिर्भूता केन कुत्र नीये इति हृदयेन दूरं यासि सोत्कण्ठा भवसीति यावत्, तत्र दिशः प्राच्यादिदशदिशः,अनु तदनन्तरं पवमानो वा वायुश्च, वाशब्दः समुच्चये, हिरण्यपर्णः सूर्यः वैकर्णः विकर्णे कोटरे तिष्ठतीति वैकर्णोऽग्निः स ते दिग्वायुसूर्याग्नयः त्वा त्वां मन्मनसां मद्गतहृदयां करोतु कुर्व-

न्त्विति, वचनव्यत्ययश्छान्दसः। चित्तस्य मद्गतत्वे च तवेयमुत्कण्ठा निवर्त्स्यतीति भावः। यद्वा दिशोऽनुलक्षीकृत्य वायुरिव चाञ्चल्याद् यस्माद् मनसा दूरमेषि तस्मात् स पवमानः त्वा मन्मनसां करोतु। कीदृशः? हिरण्यवदूर्जस्वत् पर्णं पतनं यस्य तादृशः, तथा विशिष्टौ कर्णौ यस्य स विकर्णो विकर्ण एव वैकर्णः स्वार्थेऽण्णिति व्याख्येयम्, वाशब्दः सादृश्ये। ततो वेदिदक्षिणस्यां दिश्यूर्द्ध्वं तिष्ठतो मौनिनः पुरुषस्य स्कन्धे वारिपूर्णं दृढकलशं धारयेदभिषेकार्थम्। तथा च वक्ष्यति 'निष्क्रमणप्रभृत्युदकुम्भं स्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवतीति'। पारस्करः—अथैनौ समीक्षयति "अघोरचक्षुरपतिघ्न्येधि शिवा पशुभ्यः सुमनाः सुवर्चाः। वीरसूर्देवकामा स्योनाशंन्नो भव द्विपदे शञ्चतुष्पदे॥ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः। तृतीयोऽग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ सोमो ददद् गन्धर्वाय गन्धर्वो दददग्नये। रयिञ्च पुत्रांश्चादादग्निर्मह्यमथो इमाम्॥ सा नः पूषा शिवतमा मैरयसान ऊरू उशती विहर। यस्यामुशन्तः प्रहराम शेपं यस्यानुकामा बहवो निविष्ट्या॥" इति। अथ निष्क्रमणोत्तरं कन्यापिता "परस्परं समीक्षेथाम्" इति प्रैषेण एनौ वधूवरौ समीक्षयति समीक्षणं कारयेत्। वरश्चाघोरचक्षुरित्यादीन् निविष्ट्यै इत्यन्तान् मन्त्रान् पठेदित्यर्थः। सत्यपि कारितत्वे वरस्यैव मन्त्रपाठो मन्त्रलिङ्गात्, कारयितृत्वं च कन्याप्रदातुरेव सन्निधानात्। मन्त्रार्थस्तु—हे कन्ये! अघोरचक्षुः सौम्यदृष्टिः सती अपतिघ्नी पतिहिता एधि भव, तथा पशुभ्यो गवादिभ्यः पशुवदाश्रितेभ्य इति वा शिवा कल्याणकारिणी तथा सुमनाः प्रसन्नचित्ता सुवर्चाः शोभनदीप्तिः वीरसूः वीर्यवत्पुत्रजननी देवकामा देवं क्रीडनं कामयते देवानन्यादीन् कामयते सेवार्थमिति वा सा, तथा स्योना सुखयुक्ता, एधीति सर्वत्र सम्बद्ध्यते, तथा नोऽस्माकं द्विपदे मनुष्यवर्गे शं कल्याणकारिणी भव, अस्माकं चतुष्पदे पशुवर्गे शं कल्याणकारिणी भव। यद्वा नोऽस्मभ्यं शं भव द्विपदे मनुष्यवर्गाय, चतुष्पदे पशुवर्गाय च शं भवेति व्याख्येयम्। इत्थमाश्वास्य कन्यास्तुतिमाह—हे कन्ये! सोमः चन्द्रः, ते तव प्रथम आद्यः पतिः, ते त्वां विविदे लब्धवान्, अथोत्तरो द्वितीयः ते पतिः गन्धर्वः त्वां विविदे, अथ तृतीयः ते पतिरग्निः त्वां विविदे। उक्तञ्च—

पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः।
सोमः शौचं ददौ तासां गन्धर्वश्च शुभां गिरम्॥
पावकः सर्वमेध्यत्वं मेध्या वै योषितोह्यतः। इति।

अथ तुरीयः चतुर्थः ते पतिर्मनुष्यजाः मनुष्यजातोऽहमित्यर्थः। ते इति द्वितीया स्थाने व्यत्ययेन षष्ठी, मनुष्यजा इति बहुवचनमप्येवम्। तत्किमिदानीं चतुर्णामपीयं पत्नीत्याशङ्क्याह—सोम इमां गन्धर्वाय अददत्, गन्धर्वोऽग्नये अददत्, अथो तदनन्तरमग्निर्मह्यमिमामदात् दत्तवान्, न केवलमिमामपि तु रयिं च धनमपि, पुत्रांश्च सुतानपि मह्यमग्निरदादित्यथेः। किञ्च उशन्तः सुखादीनिच्छन्तो वयं यस्यां शेपमिन्द्रियं प्रहराम प्रक्षिपाम यस्यामु यस्यामेव बहवः कामा अभिलषिता निविष्ट्यै निवेशिताः, सेयं कन्या पूषा वृद्धिकारिणी शिवतमा अतिशयितकल्याणी नोऽस्मान् मा ऐरय न त्यजतु। अटो दर्शनं विभक्तेरदर्शनं च छान्दसम्। किञ्च, सा नोऽस्मान् उशती कामयमाना ऊरू ऊरूद्वयं विहर विवृणोतु प्रसारयत्विति यावत, विभक्तिव्यत्ययश्छान्दसः। यद्वा या सर्वलोककर्मसाक्षिणी पूषा देवता सा इमां शिवतमां कल्याणगुणशीलां कृत्या नोऽस्मान् प्रति ऐरय ईरयतु प्रक्षिपतु अस्मदनुरक्तां करोत्विति यावत्। किञ्च, यस्यां कन्यायामुशन्तो वयं शेपं शिश्नं प्रहराम यस्यां च बहवः कामाः धर्मपुत्रादयो निविष्ट्यै स्वर्लोकादिप्रवेशनाय भवन्तीति शेषः। सा त्वं नोऽस्मान् उशती ऊरू विहर विवृणिवत्यर्थः। उ इत्यव्ययं सम्बोधने इति व्याख्यातारः। सा त्वं नोऽस्माकम् ऊरू ऊरूयुगे विहर विहारं रचयेत्यर्थः। ऊर्वोर्विहाराधिकरणत्वेऽप्यकर्मकधातुयुक्तत्वाद् द्वितीयेत्यस्माकं प्रतिभाति। तथा—"प्रदक्षिणमग्निं पर्याणीयैके।" एके आचार्या अग्नेः प्रदक्षिणं कारयित्वा कन्याया वासः परिधानादिकं कर्त्तव्यमिति वदन्ति। अपरे तु समीक्षणान्तेऽग्निप्रदक्षिणाकरणं वदन्तीत्यर्थः। तदत्र विकल्पः। तथा—"पश्चादग्नेस्तेजनीं कटं वा दक्षिणपादेन प्रहृत्योपविशति"। अग्नेः पश्चात् पूर्वस्थापितस्याग्नेः पश्चिमतः तेजनीं तृणपूलकं कटं वा तृणग्रथितमासनं वा दक्षिणपादेन प्रहृत्य आक्रम्य तदुपरि दक्षिणचरणं दत्वेति यावत्, उपविशति वर उपविशेदित्यर्थः। वधूश्च तद्दक्षिणत उपविशेत्, 'दक्षिणतः पाणिग्राहस्योपविशतीति' गृह्यान्तरदर्शनात्। कर्मान्तरे कात्यायनोऽपि—पश्चादग्नेरुपविशतो दक्षिणतः पत्नीति। आश्वलायनः—

वरस्य दक्षिणे भागे वधूं तामुपवेशयेत्।

तत्र तृणपूलकः कटो वा वस्त्रवेष्टित एवादेयः। तथा च गृह्यान्तरम्—"संवेष्टितं कटमेवं जातीयं वान्यदिति संवेष्टितं सम्यग्वाससा वेष्टितम्, अन्यत् तृणपूलकादीति व्याख्यातारः। अत्र विवाहाङ्गाहुतीनामनुष्ठेयतया तदङ्गभूतत्वादवशिष्टं ब्रह्मोपवेश-

नादिकं कुशण्डिकाप्रकाशोपदर्शितरीत्या विधेयम्, तदनन्तरं च सकलहोमकर्मसाधारणयादाघारादिचतुर्दशाहुतयोऽपि तत्रैव प्रदर्शितविधया विधेयाः। तत्र विशेषमाह पारस्करः—"सर्वप्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानं विवाहे"। सर्वप्रायश्चित्तं "त्वन्नो अग्ने" इत्याद्याहुतिपञ्चकम्, प्राजापत्यं प्रजापतिदेवताको होमः, तयोरन्तरं मध्यं एतेषां राष्ट्रभृदादीनां वक्ष्यमाणानामावापस्थानम्, अन्यत्र विहितस्य होमजपादेः कर्मान्तरे प्रक्षेप आवापः, तस्य स्थानं कालो विवाहे तन्नामधेये कर्मणीत्यर्थः। गदा-[१] धरादयस्तु-एतदिति पृथक्पदमङ्गीकृत्य सर्वप्रायश्चित्तप्राजापत्यान्तरं यत्तदेतद्विवाहे आवापस्थानं वक्ष्यमाणानां राष्ट्रभृदादीनामनुष्ठानकाल इति व्याचख्युः। राष्ट्रभृदादीनामागन्तुकत्वादन्ते निवेशो मा भूदित्येतत्सूत्रारम्भः। इत्थं च सर्वप्रायश्चित्तानन्तरं राष्ट्रभृदादीन् विधाय प्राजापत्यं विधेयमिति सिद्धम्। तमेवावापमाह पारस्करः—"राष्ट्रभृत इच्छन्"। अस्मिन्विवाहकर्मणि इच्छन् राष्ट्रभृद्धोमफलं कामयमानः राष्ट्रभृतः राष्ट्रभृत्संज्ञिका 'ऋतावाड्घृतधामाग्निः' इत्यादि मन्त्रकरणिका द्वादशाहुतीर्जुहुयादनिच्छन् पुनर्नेत्यर्थः। तथा—'जयाभ्यातानाश्च जानन्।" चित्तञ्च स्वाहेत्यादि मन्त्रकरणकाः त्रयोदशहोमा जयसंज्ञकाः 'अग्निर्भूतानामधिपतिः' इत्यादि मन्त्रकरणकाश्चाभ्यातानसंज्ञकाः, तानपि जानन् तत्फलमिच्छन्नेव जुहुयात्, न त्वन्यथेत्यर्थः। नन्विच्छयैवैता आहुतय इत्यत्र किं प्रमाणमित्यत आह स एव—"येन कर्मणोत्सेंदिति वचनात्।" येन कर्मणोत्सेंत् तत्र जयाञ्जुहुयात् राष्ट्रभृतो जुहोति अभ्यातानान् जुहोतीति श्रुतेरित्यर्थः। ईत्सेंत् ऋद्धिमिच्छेत्। अत्र हरिहरो जयाभ्यातानांश्चेत्येतावदेवैकं सूत्रं मत्वा तत्र पूर्वसूत्रादिच्छन्नित्यनुवर्त्य तद्व्याख्याय जानन् येन कर्मणोत्सेंदिति वचनादित्येतावदग्निमसूत्रमभ्युपेत्य यथा तथा व्याख्यातवान्, तदसत्, इतिवचनादित्युक्तयसंगत्यापत्तेः, जानन् येन कर्मणोत्सेंदित्याकारकवचनाभावादिति विभावनीयम्। राष्ट्रभृदादिहोमेष्वन्वारम्भः संस्रवधारणं च नास्ति प्रापकाभावात्। राष्ट्रभृन्मन्त्रा यथा—"ऋतावाड्घृतधामाग्निर्गन्धर्वस्स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट्।" अस्यार्थः—योऽग्निर्गन्धर्वः गन्धर्वरूपः ऋतावाड् ऋतं सत्यं सहते तादृशः सत्यसहकृत इति यावत्, ऋतधामा ऋतं सत्यं धाम स्थानं यस्य स तथाभूतः, स नोऽस्माकमिदं ब्रह्मज्ञानं क्षत्रं वीर्यं च पातु रक्षतु तस्मै अग्नये स्वाहा स्वाहाकृतं हुतमिति

१. 'गदाधरस्तु' इति मु० पु० पाठः।

यावत् वाट् वहत्विति ।१। तथा—"ऋतावाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोऽप्सरसो मुदो नाम ताभ्यः स्वाहा ।" अस्यार्थः—योऽग्निर्गन्धर्वरूपः तस्याप्सरस ओषधयः व्रीह्यादयः गन्धर्वाणामप्सरसो भवन्तीत्येवमुक्तिः । किं भूताः ? मुदोनाम मुदनाम्न्यः, मोदन्त आभिः सर्वे इति व्युत्पत्तेः, ताभ्यः स्वाहा सुहुतं भवत्विति । तथा च ता अप्यस्माकं ज्ञानं वीर्यं च रक्षन्त्वित्याशंसाभिप्रायविषयः ।२। तथा–"सꣳहितो विश्वसामा सूर्यो गन्धर्वस्स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ।" अस्यार्थः—यः सूर्यो गन्धर्वः संहतः दिवसं रात्रिं च सन्दधातीति संहितः विश्वसामा सकलसामवेदमयः अन्यत्पूर्वसमानम् ।३। तथा–"सꣳहितो विश्वसामा सूर्यो गन्धर्वस्तस्य मरीच्योऽप्सरस आयुवो नाम ताभ्यः स्वाहा ।" अस्यार्थः—तस्य सूर्यस्य गन्ध[1]र्वस्याप्सरसो मरीचयो रश्मयः आयुवो नाम आयुवन्ति योजयन्तीत्यायुवः अन्यत्समानम् ।४। तथा—"सुषुम्णः सूर्यरश्मिः चन्द्रमा गन्धर्वस्स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ।" अस्यार्थः—यश्चन्द्रमा गन्धर्वः किं भूतः सुषुम्णनामा सूर्यरश्मिः अन्यत्समानम् ।५। तथा—"सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ताभ्यः स्वाहा ।" अस्यार्थः—तस्य चन्द्रमसोऽप्सरसो नक्षत्राणि किं भूतानि भेकुरयो नाम समानमन्यत् ।६। तथा—"इषिरो विश्वव्यचा वातो गन्धर्वस्स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ।" अस्यार्थः—यो वातो गन्धर्वः इषिरो गमनस्वभावः विश्वव्यचाः सर्वगतः समानमन्यत् ।७। तथा—"इषिरो विश्वव्यचा वातो गन्धर्वस्तस्यापोऽप्सरस ऊर्जो नाम ताभ्यः स्वाहा" । अस्यार्थः—तस्य वातस्याप्सरस आपो जलानि किं भूता ऊर्जन्ति प्राणन्त्याभिरित्यूर्जम् इति व्युत्पत्तेः 'आपोमयः प्राणः' इति हि श्रुतिः, समानमन्यत् ।८। तथा—"भुज्युस्सुपर्णो यज्ञो गन्धर्वस्स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ।" अस्यार्थः—यो यज्ञो गन्धर्वो भुज्युः भुनक्ति पालयति सर्वाणि भूतानीति तादृशः, सुपर्णाः शोभनगतिः, तुल्यमन्यत् ।९। तथा—"भुज्युस्सुपर्णो यज्ञो गन्धर्वस्तस्य दक्षिणा अप्सरसस्तावा नाम ताभ्यः स्वाहा ।" अस्यार्थः—तस्य यज्ञस्याप्सरसो दक्षिणाः किम्भूताः तावा नाम समानमन्यत् ।१०। तथा—"प्रजापतिर्विश्वकर्मा मनो गन्धर्वस्स न इदं ब्रह्मक्षत्रं पातु तस्मै स्वाहा वाट् ।" अस्यार्थः—यन्मनो गन्धर्वः प्रजापतिः प्रजानामीश्वरः विश्वकर्मा विश्वं कर्म यस्य तद्व्यापारेण विश्वस्य निर्माणात्तादृशः अपरं समानम् ।११। तथा—"प्रजापतिर्विश्वकर्मा

१. गन्धर्वाप्सरसो इति मु०पु०पाठः ।

मनो गन्धर्वस्तस्य ऋक्सामान्यप्सरस एष्टयो नाम ताभ्यः स्वाहा ।" अस्यार्थः—तस्य मनसो गन्धर्वस्याप्सरसः ऋक्सामानि ऋचः सामानि च किं भूतानि एष्टयो नाम इष्टिरिच्छा आ इष्टय एष्टयः अतिशयितेच्छाःसमानमपरम् ।१२। जयमन्त्रानाह पारस्करः—"चित्तञ्च चित्तिश्चाकूतञ्चाकूतिश्च विज्ञातञ्च विज्ञातिश्च मनश्च शक्वरीश्च दर्शश्च पौर्णमासञ्च बृहच्च रथन्तरञ्च॥ प्रजापतिर्जयानिन्द्राय वृष्णे प्रायच्छदुग्रः पृतनाजयेषु तस्मै विशस्समनमन्त सर्वाः स उग्रः स इ हव्यो बभूव स्वाहा ।" इति । अत्र भतृयज्ञः चित्तञ्चेत्येवमादीनि शाखान्तरोपदिष्टानि देवतापदानि, तस्माच्चतुर्थ्यन्ततयैतेषां प्रयोग इत्याह। कर्कहरिहरजयरामादयस्तु-नैतानि देवतापदानि किन्तर्हि ? मन्त्रा एते, मन्त्राश्च यथाम्नाता एव प्रयोक्तव्या इति नैतेषां चतुर्थ्यन्ततया प्रयोग इत्याह। स्वाहापदप्रयोगस्तु भवत्येव 'स्वाहाकारप्रदाना' इति श्रुतेः। त्यागवाक्ये तु चतुर्थ्यन्तता भवत्येव तस्यामन्त्रत्वात्। रामदत्तादयः पद्धतिकृतोऽप्येवम्। अत्र शेषवाक्यपठितं जयानिति लोऽन्ततया विपरिणतं तत्रत्यमेव, प्रायच्छदिति च सर्वत्र सम्बद्ध्यते, सर्वे चकारा अप्यर्थाः। तथा च यथा प्रजापतिरिन्द्राय जयान् प्रायच्छत् तथा चित्तादि मह्यमपि जयान् प्रयच्छत्वित्यर्थः। यद्वा चित्तञ्चेत्येवमादीनि सर्वाणि शेषवाक्यपठितजयानित्यत्राभेदेनान्वीयन्ते। तथा च चित्तञ्चेत्येवमादीन् जयान् जयसंज्ञान्मन्त्रान् प्रजापतिरिन्द्राय प्रायच्छदिति व्याख्येयम्। तत्र चित्तं ज्ञानं हृदयं वा ज्ञानेन्द्रियं वा जातावेकवचनम्, चित्तिः परिच्छेदः चेतना वा ज्ञानेन्द्रियदेवता वा, आकूतमभिमतं कर्मेन्द्रियं वा, आकूतिरभिमानः कर्मेन्द्रियाणां देवता वा, विज्ञातं शिल्पादिज्ञानम्, विज्ञातिः तद्देवता, मनः प्रसिद्धम्, शक्वरीश्च छन्दोविशेषः तद्देवता वा, दर्शपौर्णमासे प्रसिद्धे तद्देवते वा, बृहद्रथन्तरे सामविशेषौ तद्देवते वा, वाक्यार्थश्च सर्वेषामुक्त एव। "प्रजापतिर्जयानिन्द्राय" इति, मन्त्रार्थो यथा—प्रजापतिः परमेश्वरः उग्रः विपक्षसेनाविजयी इन्द्राय जयान् प्रायच्छत् ददौ किमर्थं वृष्णे अभिवाञ्छितवर्षणाय वृष्णे इतीन्द्रविशेषणं वा, ततः स इन्द्रः पृतनाजयेषु शत्रुसेनाविजयाख्यकर्मसु उग्रः प्रचण्डो बभूव। ततः तस्मै इन्द्राय सर्वा विशः प्रजाः समनमन्त सम्यङ् नेमुः, इशब्दश्चार्थे स चेन्द्रः हव्यो हवनीय ईज्यो बभूव, स्वाहा तस्मै सुहुतमस्त्विति। अयमर्थस्तैत्तिरीयेऽभिहितः। तथाहि—"देवासुराः संयत्ताः आसन्, स इन्द्रः प्रजापतिमुपाधावत्, स तस्मा एतान् जयान् प्रायच्छत्, तस्माज्जयाः प्राजापत्याः, तानजुहोत्, ततो देवा असुरान् जयन् यदजयंस्तज्जयानां जयत्वमिति" अत्र वासुदेवहरिहरगणपत्यादिपद्धतिषु "इदं प्रजापतये जयानिन्द्राय"

इति त्यागवाक्यं लिखितं तत्र जयानिन्द्रायेति लिखनमयुक्तम्, अनन्वितार्थत्वात्, नहि जयानिन्द्रेति देवतापदमस्ति, अत एव गदाधरपद्धतौ संस्कारप्रबोधे च नैतल्लिखितमिति विभावनीयम् ।१३। अभ्यातानमन्त्रानाह पारस्करः—"अग्निर्भूतानामधिपतिस्समावत्विन्द्रो ज्येष्ठानां यमः पृथिव्या वायुरन्तरिक्षस्य सूर्यो दिवश्चन्द्रमा नक्षत्राणां बृहस्पतिर्ब्रह्मणो मित्रस्सत्यानां वरुणोऽपाꣳसमुद्रः स्रोत्यानामन्नꣳसाम्राज्यानामधिपतिस्तन्मावतु सोम ओषधीनाꣳसविता प्रसवानाꣳ रुद्रः पशूनां त्वष्टा रूपाणां विष्णुः पर्वतानां मरुतो गणानामधिपतयस्ते मावन्तु पितरः पितामहाः परेवरेततास्ततामहा इह मावन्त्वस्मिन्ब्रह्मण्यस्मिन् क्षत्रे श्यामा शिष्यस्यां पुरोधायामस्मिन् कर्मण्यस्यां देवहूत्याꣳस्वाहा ।" इति । एतेऽष्टादशमन्त्रा अभ्यातानसंज्ञकाः । अभ्यातानसंज्ञा चैषां श्रुतिसिद्धा । तथा हि—"यद्देवा अभ्यातानेवासुरानभ्यातन्वत तदभ्यातानामभ्यातानत्वम्" इति । पारस्करः—'सर्वत्रानुषजति' "अग्निर्भूतानाम्" इत्यादिष्वष्टादशमन्त्रेषु प्रतिमन्त्रं यथालिङ्गं यथावचनं मावत्वित्यादि देवहूत्याꣳ स्वाहेत्यन्तं वाक्यैकदेशम् अनुषजति संयुज्यादित्यर्थः । पूर्वसूत्रेऽन्नꣳ साम्राज्यानामित्यादिष्वधिपतीत्यादीनामुपादानं तु लिङ्गादिविशेषप्रदर्शनार्थमेवेत्यवधेयम् । तथा च प्रथममन्त्रो यथा—"अग्निर्भूतानामधिपतिस्स मावत्वस्मिन् ब्रह्मण्यस्मिन् क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिं कर्मण्यस्यां देव हूत्याꣳ स्वाहा ।" अस्यार्थः—योऽग्निर्भूतानां स्थावरादीनामधिपतिः प्रभुः स मा माम् अवतु रक्षतु, कुत्र अस्मिन् ब्रह्मणि ब्रह्मकर्मणि होमादौ ब्राह्मण्ये वा क्वचिद् ब्रह्मन्निति पाठस्तत्र छान्दसस्सप्तम्या लुक्, अस्मिन् क्षत्रे क्षत्रकर्मणि प्रजापालनादौ वीर्ये वा, अस्यामाशिषि ब्राह्मणाशीर्वादे पुत्रादिसुखकामनायां वा अस्यां पुरोधायां पुरः स्थितायां कन्यायां अस्मिन् कर्मणि विवाहे, अस्यां देवहूत्यां देवानां हूतिराह्वानं देवहूतिस्तस्यां स्वाहा सुहुतमस्त्विति । एवमन्येऽपि सप्तदशमन्त्रा व्याख्येयाः । तत्र द्वितीयमन्त्रे ज्येष्ठानामित्यस्य श्रेष्ठानामिति, अष्टमे सत्यानामित्यस्याविनाशिनामिति, एकादशे साम्राज्यानामित्यस्यैश्वर्याणामिति, त्रयोदशे प्रसवानामित्यस्य प्रसूतिधर्मिणामिति, अष्टादशे परे इत्यस्य प्रपितामहा इति, वरे इत्यस्य वृद्धप्रपितामहा इति, तता इत्यस्य वृद्धप्रपितामहात्पूर्वपुरुषा इति, ततोऽपि पूर्वपुरुषा इति ततामहा इत्यस्य व्याख्यानं द्रष्टव्यम्, शेषं स्पष्टम् । १८ । पारस्करः—"अग्निरैतु प्रथमो देवतानाꣳ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् तदयꣳ राजा वरुणोऽनुमन्यतां

यथेयꣳ स्त्रीपौत्रमघन्न रोदात्स्वाहा। इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः। अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभिविबुद्धयतामियꣳ स्वाहा। स्वस्ति नोऽग्ने दिवा पृथिव्या विश्वानि धेह्य यथा यजत्र। यदस्यां महिदिविजातं प्रशस्तं तदस्मासु प्रविणं धेहि चित्रꣳ स्वाहा। सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मन्नध्येह्यजरन्न आयुः। अपैतु मृत्युरमृतं म आगाद्वैवस्वतो नो अभयं कृणोतु स्वाहा' इति। अभ्यातानहोमोत्तरम् "अग्निरैतु प्रथमः इत्यादिभिः चतुर्भिर्मन्त्रैः चतस्र आज्याहुतीर्जुहुयादित्यर्थः। तत्राग्निरैतु प्रथम इति प्रथमा, इमामग्निरिति द्वितीया, स्वस्ति न इति तृतीया, सुगन्नु पन्थामिति चतुर्थी। मन्त्रार्थस्तु—देवतानां प्रथमो मुख्योऽग्निरैतु आ एतु आगच्छतु, सोऽग्निरस्यै अस्याः कन्यायाः प्रजां भावि-पुत्रादिरूपां मृत्युपाशाद् मुञ्चतु मोचयतु चिरजीविनीं करोतु। यद्वा मृत्युपाशादग्निरस्यै कन्यायै प्रजां मुञ्चतु ददातु। तत्प्रजामोचनमयं राजा वरुणोऽनुमन्यतामनुजानातु यथा येनानुशानेन प्रकारेण वा इयं स्त्री कन्या पौत्रं पुत्रभवमघं दुःखमुद्दिश्य न रोदात् मा रोदीदिति कदाचिदप्यपत्यवियोगो मा भवत्विति भावः। १। द्वितीयमन्त्रार्थो यथा—इमां कन्यां गार्हपत्योऽग्निः गार्हपत्यनामा वह्निस्त्रायताम्, अग्निहोत्रसम्बन्धेन रक्षतु, तथा अस्यै प्रजां पुत्रादिन्नयतु प्रापयतु, तथा दीर्घमायुश्च नयतु, यद्वा अस्यै इति षष्ठ्यर्थे चतुर्थी, अस्याः प्रजां दीर्घमायुर्न्नयतु, तथा इयं कन्या अशून्योपस्था नित्यं भर्तृसङ्गता अस्तु भवतु, तथा जीवतां माता अस्तु जीवपुत्रा भवतु, तथा पौत्रं पुत्रसम्बन्धजमानन्दं सुखम् अभिविबुद्धयतां सर्वतो भावेनानुभवत्विति। २। तृतीयमन्त्रार्थस्तु—हे अग्ने! यजत्र यजन्तं त्रायते तादृशं नोऽस्माकं विश्वानि सर्वाणि स्वस्ति कल्याणानि दिवा दिवि स्वर्गे पृथिव्या पृथिव्याम् अयथाक्रमव्यतिरेकेण एकदैवेति यावत् धेहि धारय पोषयेति वा, दिवा द्युलोकेन पृथिव्या पृथिवीलोकेन च सह स्वस्ति धेहीति वा, तथा अस्यां महि पृथिव्यां दिवि स्वर्गे च जातमुत्पन्नं प्रशस्तं श्रेष्ठं चित्रं नानारूपं यद् द्रविणं वसु तदस्मासु धेहीति, यद्वा हे अग्ने! नोऽस्माकं अयथाकृतानि विश्वानि सकलानि कर्माणीति शेषः। स्वस्ति शुभकराणि धेहि धारय अनुकूलानि कृत्वा स्थापयेति यावत्, तथा दिवा स्वर्गे पृथिव्या पृथिव्यां च यत् महि महत्वं तदस्मासु धेहि तथा अस्यां पृथिव्यां दिवि च जातं प्रशस्तं चित्रं गोभूहिरण्यादिभेदेन नानारूपं यद् द्रविणं तदस्मासु धेहीति व्याख्येयम्। ३। चतुर्थमन्त्रार्थो यथा—हे ज्योतिर्मध्ये सारभूतेति शेषः ज्योतिषां तेजस्विनां-

मध्ये सारभूतश्रेष्ठ! हे अग्ने! इति यावत्' नोऽस्माकं सुगं सुखगम्यं पन्थां पन्थानम् अर्चिरादिमार्गं प्रदिशन् सम्पादयन् तथा नोऽस्माकम् आयुर्निर्दुष्टजीवनम् अजरम् अहापयन् एहि हविर्ग्रहणायागच्छ, नु इति निश्चये, हिः प्रसिद्धौ। किञ्च भवत्प्रसादेनास्माकं मृत्युरपैतु अपगच्छतु तथा अमृतमानन्दं मे मह्यम् आगात् आगच्छतु तथा वैवस्वतो यमश्च नोऽस्माकमभयं कृणोतु करोत्विति। जयरामगदाधरानन्तादिभाष्येषु "ज्योतिष्मद्धेह्यजरन्न" इति पाठः, तन्मते हे अग्ने! ज्योतिष्मत् तेजोयुक्तम् अजरं जरारोगादिपराभवरहितम् आयुर्निर्दुष्टजीवनं नोऽस्मभ्यं धेहि प्रयच्छेति व्याख्यानं द्रष्टव्यम्। ४।

पारस्करः—"परं मृत्यविति च" एतदाहुतिचतुष्टयानन्तरं "परं मृत्यो अनुपरेहि" इति मन्त्रेणाप्याज्याहुतिं जुहुयादित्यर्थः।

तथा—'एके प्राशनान्ते' एके आचार्याः परं मृत्यो अनुपरेहीति मन्त्रकरणिकामाज्याहुतिं प्राशनान्ते संस्रवप्राशनान्ते जुहुयादितीच्छन्ति। अपरे तु नेत्यर्थः, तदत्र विकल्पः। मन्त्रो यथा—"परं मृत्यो अनुपरेहि पन्थां यस्ते अन्य इतरो देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमिमानः प्रजाꣳरीरिषोमोतवीरान्।" हे मृत्यो! परमुत्कृष्टम् अहिंसात्मकं पन्थां पन्थानम् अनु इहि अनुगच्छ, ते तव योऽन्योऽहिंसात्मकभिन्नो लोकहिंसात्मकः तं पन्थानं परा इहि परावृत्य गच्छ, किं भूतोऽसौ पन्थाः देवयानात् इतरः अन्येषां देवानां यानान्मार्गादन्यः केनापि देवेन नानुगतोऽसौ पन्थाः अत एव तं परेहीति हेतुगर्भविशेषणमिदम्। किं च चक्षुष्मते सकललोकव्यवहारं पश्यते शृणुते आकर्ण्यते च ते तुभ्यं ब्रवीमि कथयामि नोऽस्माकं प्रजां मा रीरिषः मा हिंसीः उत अपि च अस्माकं वीरान् पुत्रान मारीरिषः मा हिंसीरिति। वीरशब्देन पुत्रोऽभिधीयते "पुत्रो वै वीर" इति श्रुतेः।

पारस्करः—"कुमार्था भ्राता शमीपलाशमिश्रान् लाजानञ्जलावावपति।" कुमार्याः कन्यका भ्राता सोदरः शमीपलाशमिश्रान् शमीपत्रयुक्तान् लाजान् भृष्टानि धान्यानि अञ्जलिना कन्याया अञ्जलावावपति प्रक्षिपेदित्यर्थः। भ्रातुरभावे पितृव्यपुत्रादयः। तथा चाश्वलायनगृह्यम्—'भ्राता भ्रातृस्थानो वेति'। भ्रातृस्थानमाह बह्वृचकारिका—

भ्रातृस्थानः पितृव्यस्य मातुलस्य च यः सुतः।
मातृष्वसुः सुतस्तद्वत् सुतस्तद्वत्पितृष्वसुः॥ इति।

गृह्यकारिकायाम्—

अन्यो भ्रातुरभावे स्याद् बान्धवो ज्ञातिरेव वा।

पारस्करः—"तान् जुहोति सꣳहतेन तिष्ठत्यर्यमणं देवं कन्या अग्निमयक्षत। स नो अर्यमा देवः प्रेतो मुञ्चतु मापतेः स्वाहा॥ इयन्नार्युपब्रूते लाजानावपन्तिका। आयुष्मानस्तु मे पतिरेधन्तं ज्ञातयो मम स्वाहा। इमां लाजानावपाम्यग्नौ समृद्धिकरणं तव मम तुभ्य च संवदनन्तदग्निरनुमन्यतामियꣳस्वाहा।" इति। ततः तिष्ठती ऊर्ध्वं स्थिता कुमारी तान् स्वाञ्जलौ स्थितान् लाजान् संहतेन अविरलेनाञ्जलिना "अर्यमणं देवम्" इत्यादिभिस्त्रिभिर्मन्त्रैर्जुहोति विवाहाग्नौ प्रक्षिपेदित्यर्थः। ततः प्रक्षिप्तलाजांस्त्रिधा विभज्यैकैकस्य भागस्यैकैकेन मन्त्रेण हवनम्, एवञ्च होमत्रयं भवति, पतिश्च वधूमग्रतः कृत्वा स्वाञ्जलिना तदञ्जलिं गृहीत्वोर्ध्वं तिष्ठेत्, तथा च गृह्यान्तरम्—"अनुपृष्ठं पतिः परिक्रम्यावतिष्ठते वध्वञ्जलौ गृहीत्वा" इति। गृह्यकारिकापि—

तिष्ठन्त्यास्तिष्ठता पत्या गृहीताञ्जलिनैव सा।
अञ्जलिस्थांस्त्रिधा सर्वान् प्राङ्मुखी प्रतिमन्त्रतः॥
प्राजापत्येन तीर्थेन दैवेनैवेति बह्वृचाः।

लाजाश्च घृताभिघारिता एव, तथा च गृह्यान्तरम्—"तं सोपस्तीर्णाभिघारितमग्नौ जुहोत्यविच्छिन्दत्यञ्जलिमिति।" तं लाजाञ्जलिम्, सा वधूः। अविच्छिन्दत्यञ्जलिं वराञ्जलेर्विच्छेदमकुर्वती। अभिघारणं चाज्येन शमीपलाशमिश्राणामेव लाजान न तु केवलानाम्। तदुक्तं गृह्यासंग्रहे—

सोमप्रकृतिरेषा हि लाजानाश्रित्य तिष्ठति।
विरुद्धमाज्यं सोमेन नाभिघारणमर्हति॥
शमीपलाशमिश्राणां लाजानामभिघारणम्।
पूर्वाणामुपक्लृप्तानामाचार्यैः कल्पितं यथा॥ इति।

अयं च होमः प्राजापत्यतीर्थेन। तथा च हारीतः—"आवपनहोमतर्पणानि प्राजापत्यतीर्थेन[1] कुर्यादिति" होमो लाजादिहवनम्, तर्पणं सनकादीनाम्। प्रजापत्यतीर्थमाह स एव—"कनिष्ठायाः पश्चात् प्राजापत्यम्" इति। अत्र केचित्—वरपठित-

---

१. प्राजापत्येन इति मु० पु० पाठः।

मन्त्रेणायं होमो वध्वा कार्यो मन्त्रलिङ्गानुरोधात्। नहि वधूपठनीयत्वे इयं नारीति मन्त्रलिङ्गमुपपद्यत इत्याहुः। वस्तुतस्तु—मन्त्रपाठहोमयोः समानकर्तृकत्वस्य सूत्रादुत्सर्गतश्च लाभादियं मद्रूपा नारीत्यर्थकतया मन्त्रलिङ्गोपपत्तेश्च मन्त्रपाठोऽपि वधूकर्तृक एव, वरपठनीयत्वेऽपि "स नो अर्यमा देवः" इत्यादिमन्त्रलिङ्गविरोधाच्च, सकलमैथिलाचारोऽप्येवम्। मन्त्रार्थस्तु—कन्या मद्रूपा अग्निं वह्निस्वरूपमर्यमणं सूर्यं देवमयक्षत पूजयते लकारादिव्यत्ययश्छान्दसः। स चार्यमा देवः इतोऽस्मात्पतेः पत्युः सकाशान्नोऽस्मान् मा प्रमुञ्चतु न प्रमोचयत्विति। यद्वा कन्याः पूर्वा अर्यमणं देवमयक्षत पूजितवत्यः। स चार्यमा देवस्ताभिर्यतः पूजितो नोऽस्मान् इतः पतेर्मा प्रमुञ्चतु न प्रमोचयत्विति। यद्वा पूर्वं कन्याभिः पूजितोऽर्यमा देव इदानीं मयेष्टः सन् इतः पितृकुलान्मा मां प्रमुञ्चतु भिन्नगोत्रां करोतु पतेर्नो प्रमुञ्चतु न मोचयतु, नोशब्दः प्रतिषेधार्थ इति व्याख्येयम्। द्वितीयमन्त्रार्थो यथा—इयं नारी मद्रूपा वधूः उप पत्युः समीपे ब्रूते कथयति, किं कुर्वती? लाजान् भृष्टधान्यानि आवपन्तिका अग्नौ विभागशः प्रक्षिपन्ती, स्वार्थे कः। किं ब्रूते तदाह—मम पतिरायुष्मानस्तु भवतु, मम ज्ञातयो बान्धवा एधन्तं वर्द्धन्तामिति, एधन्तमिति छान्दसं ह्रस्वत्वम्। क्वचित्तु एधन्तामित्येव पाठः। तृतीयमन्त्रार्थो यथा—हे पते! तव समृद्धिकरणं समृद्धिहेतून् इमांल्लाजानग्नावावपामि, समृद्धिकरणमिति क्रियाविशेषणं वा तत्तस्मान्मम तुभ्य च षष्ठ्यर्थे चतुर्थी, विभक्तिलोपः छान्दसः। संवदनमभिमुखीकरणमग्निरनुमन्यतामनुमोदयतु, न केवलमग्निरपि तु इयं स्वाहा तद्भार्यापि, स्वाहाशब्दस्यावृत्त्या होमार्थतापि। यद्वा हे पते! इयमहमिमांल्लाजानग्नावावपामि, किमर्थं तव समृद्धिकरणं भवत्समृद्धिकरणाय, विभक्तिव्यत्ययश्छान्दसः। अपि च मम तुभ्य च यत्संवदनमन्योन्यानुरागः तदयमग्निरनुमन्यतामित्यर्थः।३। पारस्करः—अथास्यै दक्षिणं हस्तं गृह्णाति साङ्गुष्ठम्, गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथाऽसः। भगो अर्यमा सविता पुरन्धिर्मह्यन्त्वाऽदुर्गार्हपत्याय देवाः। अमोहमस्मि सात्वꣳ सात्वमस्य मो अहम् सामाहमस्मि ऋक्त्वम्, द्यौरहं पृथिवी त्वम्। तावेहि विवहावहै सह रेतो दधावहै प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहून्। ते सन्तु जरदष्टयः संप्रियौ रोचिष्णू सुमनस्य मानौ। पश्येम शरदः शतञ्जीवेम शरदः शतꣳ शृणुयाम शरदः शतम्। इति। अथ लाजहोमानन्तरम् अस्यै अस्याः कुमार्याः साङ्गुष्ठमङ्गुष्ठेन सहितं दक्षिणं हस्तं "गृभ्णामि" इति मन्त्रेण गृह्णाति सुदक्षिणहस्तेन वरो गृह्णीयादित्यर्थः।

गृह्यकारिकायाम्—

साङ्गुष्ठहस्तमुत्तानं गृह्णात्यस्याः पतिस्ततः।
गृभ्णामि ते सौभगत्वायेति मन्त्रेण दक्षिणम्॥

मनुः—

पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते।
असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि॥
शरः क्षत्रियया ग्राह्यः प्रतोदो वैश्यकन्यया।
वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने॥

"क्षत्रियया ग्राह्यः" इत्युक्त्या पूर्वं वरेण गृहीतं शरं क्षत्रिया गृह्णीयादिति लभ्यते, एवमुत्तरत्रापि। याज्ञवल्क्यः—

पाणिग्राह्यः सवर्णासु गृह्णीयात् क्षत्रिया शरम्।
वैश्या प्रतोदमादद्याद् वेदने त्वग्रजन्मनः॥

मन्त्रार्थस्तु—हे कन्यके। ते तव हस्तं गृभ्णामि गृह्णामि 'हृग्रहोर्भश्छन्दसि' इति हस्य भत्वम्, यथा—येन गृहीतेन हस्तेन पत्या मया सह त्वं जरदष्टिर्वृद्धा बहुवर्षायुष्मती आसः भवसि, व्यत्ययश्छान्दसः। हस्तग्रहणे कुतस्तवाधिकार इत्याकाङ्क्षायामाह—"भग इति" देवास्त्वां मह्यम् अदुर्दत्तवन्तः। के ते? भगोऽर्यमा सविता च पुरन्धिर्लक्ष्मीश्च। यद्वा पुरन्धिरिति त्वामित्यस्य विशेषणम्, द्वितीयार्थे प्रथमा, पुरन्धीरूपिणी युवतिः। किमर्थम्? दुर्गार्हपत्याय गृहस्वामिनीत्वाय, भाविगार्हपत्यं सेवितुं वा। किं च सौभगत्वाय, सुभगानां समूहः सौभगं तस्य भावः सौभगत्वं तस्मै निरतिशयानन्दावाप्तये। यद्वा सौभगत्वाय सौभाग्याय ते हस्तं गृह्णामीति व्याख्येयम्। अहम् अमोऽस्मिन् विद्यते मा लक्ष्मीर्यस्य स तथा तादृगस्मि, त्वं मा लक्ष्मीरसि त्वया विना लक्ष्म्या रहितोऽहमतस्त्वं मम लक्ष्मीर्भवेत्याशयः। सा त्वमस्य मो अहमिति पुनरभिधानमादरातिशयार्थम्। यद्वा अमति सर्वत्र गच्छति सर्वं जानातीति वा अमो विष्णुरहमस्मि त्वं सा लक्ष्मीरसि उक्तमेवार्थं दृढीकरणार्थमनुवदति सा त्वमस्य मो अहमिति। तथा च यास्कः—"पुनर्वचनेन भूयांसमर्थं लभन्ते" इति। किञ्च अहं सामास्मि सामवेदोऽस्मि त्वं ऋगसि त्वदायत्तोऽस्मीत्याशयः सामगानस्य ऋगाश्रयत्वात्, तथाऽहं द्यौरस्मि त्वं पृथिव्यसि उत्पत्स्यमानप्रजां प्रत्यावयोर्मातापितृत्वादित्याशयः, "पृथिवी माता द्यौः पिता" इति श्रुतेः। ततश्च एहि अभि-

मुखी भव तावावां विवहावहै विवाहं कर्वावहै, तथा सति सह संयुक्तौ भूत्वा रेतः शुक्रं दधावहै धारयावहै, प्रजां सन्ततिं प्रजनयावहै उत्पाद्यावहै, बहून् पुत्रान्विन्द्यावहै लभावहै, तथा ते पुत्रादयो जरदष्ट्यो दीर्घायुष्मन्तः सन्तु भवन्तु, तथा आवां संप्रियौ अन्योन्यानुरक्तौ, रोचिष्णू दीप्यमानौ, सुमनस्यमानौ शोभनमनोवृत्तिं कुर्वाणौ भवाव, तथा पुत्रादिसहिता वयं शतं शरदो वत्सरान् पश्येम रूपग्रहणसमर्थाः स्याम, शतं शरदो जीवेम निरुपद्रवप्राणान् धारयेम, शतं शरदः शृणुयाम निर्दुष्टशब्दग्रहणसमर्थश्रवणेन्द्रिययुक्ता भवामेति । पारस्करः—अथैनामश्मानमारोहयत्युत्तरतोऽग्नेर्दक्षिणपादेन "आरोहेममश्मानमश्मेव त्वꣳ स्थिरा भव, अभितिष्ठ पृतन्यतोऽववाधस्व पृतनायत" इति । अथ पाणिग्रहणानन्तरं एनां वधूम् उत्तरतोऽग्नेः स्थापितमश्मानं दृषदं दक्षिणपादेन कृत्वा "आरोहेममश्मानम्" इति मन्त्रेणारोहयति वर आरोहयेदित्यर्थः । गृह्यकारिकायाम्—'वधूपादं तु दक्षिणम् । शिलामारोहयेत्प्रागायतां दक्षिणपाणिना ।' अथ दृषदुपलं दक्षिणपादेनारोहयति वर इति रामदत्तादिपद्धतौ लिखितम्, तत्र दृषच्छिला पेषणाधारस्वरूपा उपलश्च पेषणकरणात्मको लोढक इति प्रसिद्धः । तयोश्च समाहारद्वन्द्वेन निर्देशे उभयारोहणं चोभयासादनोपदेशात्, तथा चाश्वलायनगृह्यम्—'दृषदमश्मानं प्रतिष्ठाप्येति' दृषत्प्रसिद्धा अश्मा तत्पुत्रक इति भाष्यकृतः । दृषद एवारोहणं न तु तत्पुत्रकस्येति तु समाचारः । अत एव मङ्गलार्थमेव तत्पुत्रकासादनमुक्तं नारायणभाष्ये, सूत्रस्वरसोऽप्यत्रैवेति दिक् । मन्त्रार्थस्तु—हे कन्यके ! इमं पुरोवर्त्तिनमश्मानं पाषाणम् आरोह आक्राम अधितिष्ठेति यावत्, आरोहणेन संस्कृता त्वम् अश्मेव पाषाणवत् स्थिरा दृढा भव, किञ्च पृतन्यतः त्वत्प्रतिपक्षतया आत्मनः पृतनां सेनामिच्छन्ति पृतन्यन्ति पृतन्यन्तीति पृतन्यन्तः तान् पृतन्यतः स्वविरोधिनः पुरुषान् अभितिष्ठ अभिभूय वर्त्तस्व, अपि च पृतनाभिः सेनाभिर्यतन्ते इति पृतनायतस्तान् पृतनायतोऽववाधस्व खण्डयेति । पारस्करः—अथ गाथां गायति, "सरस्वति प्रेदमव सुभगे वाजिनीवति । यां त्वा विश्वस्य भूतस्य प्रजायामस्यग्रतः ॥ यस्यां भूतꣳ समभवद्यस्यां विश्वमिदञ्जगत् । तामद्य गाथां गास्यामि या स्त्रीणामुत्तमं यशः ॥" इति । अथ कन्याया दक्षिणपादेऽश्मनि स्थित एव "सरस्वती प्रेदमव" इतीमां गाथां वरस्तिष्ठन् गायति गायेदित्यर्थः । गृह्यकारिकायाम्—

सरस्वत्यादिकां तिष्ठन् वर एवाधिकारतः ।

मन्त्रार्थस्तु—हे सरस्वति ! वाग्देवते ! सुभगे कल्याणि वाजिनीवति अन्नवति, "अन्नं वाज" इति श्रुतेः, यद्वा वाजा पक्षाः सन्त्यस्या इति वाजिनी हंसी तद्वति इदं दम्पतिरूपं युग्मं विवाहाख्यं कर्म वा प्राव प्रकर्षेण रक्ष, यां त्वा त्वाम् अस्य विश्वस्य भूतस्य पृथिव्यादेरग्रतः प्रजायाम् अग्रतः प्रजां याति तथाभूतामादिजननीम् । यद्वा—प्रजायन्तेऽस्यां प्रजा या प्रकृष्टजननी ताम् अग्रतः प्रथमामाहुरिति शेषः । एतदेव प्रपञ्चयति यस्यां प्रकृतिरूपायां त्वयि इदं भूतं पृथिव्यादि समभवत् सम्यग् बभूव, तथा यस्यां त्वयि इदं विश्वं जगत् प्रलयसमये अस्तं गच्छत् स्थितम्, या च स्तुता सती स्त्रीणामुत्तमं श्रेष्ठं यशः कीर्त्तिं ददाति तां गाथां गाथात्मिकाम्, अद्येदानीं गास्यामि गायामि कीर्त्तयामि, यद्वा तां तत्सम्बन्धिनीं गाथां गास्यामि, यद्वा या स्त्रीणामुत्तमं यशः कीर्त्तिस्तां गाथां गास्यामीति । तथा—'अथ परिक्रामतः "तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतु ना सह, पुनः पतिभ्यो जायां दा अग्ने प्रजया सह" इति । अथ गाथायां समाप्तायां वधूवरौ परिक्रामतः अग्निं प्रदक्षिणीकुर्यातां "तुभ्यमग्रे" इति मन्त्रेणेत्यर्थः । मन्त्रपाठश्च वरस्यैव मन्त्रलिङ्गात् । तथा च गृह्यकारिका—'तौ परिक्रामतस्तुभ्यमग्ने पर्यवहन्निति' स च लिङ्गाद्वरस्यैव मन्त्रपाठो भवेदिति । प्रदक्षिणक्रियायां चाग्रे वधूर्भवति पश्चाद्वरः, तथा च गृह्यान्तरम्—'हुते पतिर्यथेतं परिव्रज्य प्रदक्षिणमग्निं परिणयतीति' । यथेतं यथा येन प्रकारेण पत्नीपृष्ठदेशेन इतं गतं गमनं कृतम् अनुपृष्ठं पतिः परिक्रम्येति पूर्वसूत्रात् तथैव पत्नीपृष्ठदेशेन परिव्रज्येत्यर्थः । वरस्याग्रगमने दोषो यथा कर्मकौमुद्याम्—

"यदि चाग्रे वरो गच्छेद्रोगः शोको धनक्षयः" इति ।

अत्र हरिहरभाष्यानुसारिणः—प्रणीताब्रह्मसहितस्याग्नेः प्रदक्षिणीकरणमाहुः । तत्र प्रणीतासहितस्येति युक्तम् । तथा च परिभाषाध्याये कात्यायनः—हविष्पात्रस्वाम्यृत्विजांपूर्वम्पूर्वमन्तरम्, हविर्ग्रहियवादिपात्राणि शूर्पादीनि, स्वामी यजमानः पत्नी च, ऋत्विजो ब्रह्माद्याः, एतेषामेकत्र समावेशे पूर्वं पूर्वमस्मिन् सूत्रे प्रथमं प्रथममुपदिष्टमन्तरमग्निसन्निकृष्टं भवति, अर्थात्पश्चात्पश्चादुपदिष्टं तदपेक्षया बहिर्भवति, पात्रहविरादीनामितस्ततो नयने ऋत्विग्यजमानानाञ्चेतस्ततो गमनागमने कर्मार्थमुपवेशने सर्वत्रायमन्तर्बहिर्भावो ज्ञेय इति तदर्थः । अनेन च प्रदक्षिणीकुर्वतोर्वधूवरयोरपेक्षया प्रणीतापात्रस्य वह्निसन्निकृष्टत्वमवगम्यते । ब्रह्मसहितस्येत्यंशस्तु चिन्तनीय एव, अनेनैव वधूवरयोरपेक्षया ब्रह्मणो बहिर्भावावगमात् । एवमेव गदाधरादयः ।

रेणुकोऽप्याह—

दम्पत्योर्गच्छतोस्तत्र ब्रह्माग्नी अन्तरा गतिः इति ।

गृह्यासंग्रहोऽपि—

लाजानाज्यं स्रुवं कुम्भं प्राजनाश्मानमेव च ।
प्रदक्षिणानि कुर्यातां दम्पती तु विना ग्रहम् ॥
प्राजग्राहमुदग्राहं तथा ब्रह्माणमृत्विजम् ।
एतानि बाह्यतः कृत्वा शेषाणां तु प्रदक्षिणम् ॥
दक्षिणां दिशमाश्रित्य यमो मृत्युश्च तिष्ठतः ।
तयोः संरक्षणार्थाय तस्माद् ब्रह्मा बहिर्भवेत् ॥ इति ।

इत्थं च ब्रह्मसहितस्याग्नेः प्रदक्षिणाचारोऽन्धपरम्परानुपातित्वादिति दिक्। मन्त्रार्थस्तु—हे अग्ने ! अग्रे प्रथमं तुभ्यं त्वत्सेवार्थं पर्यवहन् सोमादय एतां परिगृहीतवन्तः, ततः सूर्यान्नवोढामिमां पतिभ्यः सोमादिभ्यो भवान् ना पुरुषो भूत्वा वहतु उवाह तां जायां प्रजया भाविन्या सह दाः मह्यं देहि व्यत्ययश्छान्दसः । यद्वा हे अग्ने ! अग्रे पूर्वं वहतु ना परिणेत्रा मनुष्येण सह सोमादयः, तुभ्यं त्वत्सेवार्थं सूर्यां पर्यवहन् त्वं च पतिभ्यः सोमादिसेवार्थं प्रजया सह समेतां जायां मह्यं दाः देहीति । हलायुधस्तु—पर्यवहदित्येकवचनान्तपाठं मन्यमानो हे अग्ने ! अग्रे प्रथमं सूर्यां सूर्यवत्कान्तिशालिनीमेतां कन्यां तुभ्यं पर्यवहत् त्वं विवाहितवान् एतां त्वया सह पुनर्ना मनुष्यो वहतु विवाहयतु, ततश्च पतिभ्यो मनुष्यपतये प्रजया सहैतां जायान् दाः देहीति व्याख्यातवान् । पारस्करः—'एवं द्विरपरं लाजादि' लाजादि कुमार्या भ्रातेत्यारभ्य परिक्रमणान्तं यावत्कर्मोक्तं तावद्द्विः वारद्वयमपरं पुनरपि एवमुक्तप्रकारेण भवतीत्यर्थः । गृह्यकारिकायाम्—

एवं द्विरपरं कर्म लाजाहोमादिकं भवेत् ।

पारस्करः—'चतुर्थं शूर्पकुष्ठया सर्वान् लाजानावपति'–"भगाय स्वाहा" इति । तृतीयपरिक्रमणानन्तरं कुमार्या भ्रात्रा शूर्पकुष्ठया शूर्पस्य कोणेन सर्वान् शूर्पेऽवशिष्टान् लाजान् कुमार्या अञ्जलावावपति निक्षिपति तान् लाजान् तिष्ठन्ती कुमारी "भगाय स्वाहा" इति मन्त्रेण चतुर्थं जुहोतीत्यर्थ इति हरिहरादयो भाष्यकृतः ।

गृह्यकारिकाऽपि—

आवपत्यखिलांल्लाजान् चतुर्थं शूर्पकुष्ठया।
तान् जुहोति भगायेति सर्वान् सैव सकृत्ततः॥ इति।

ततोऽवशिष्टलाजैः कन्याभ्रातृदत्तैरञ्जलिस्थशूर्पकोणेन वधूर्जुहोतीति लिखितवतां पद्धतिकृतां रामदत्तादीनां मते तु कुमारीभ्राता सर्वांल्लाजान् कुमार्या अञ्जलावावपति कुमारी च चतुर्थं होमं "भगाय स्वाहा" इति मन्त्रेण शूर्पकुष्ठया जुहोतीत्यर्थः। यद्वा—"भगाय स्वाहा" इत्यनेन मन्त्रेण चतुर्थं चतुर्थवारं सर्वान् लाजान् पूर्ववद् भ्रातृदत्तान् शूर्पकुष्ठया आवपति अग्नौ निक्षिपति कुमारीत्यर्थः। युक्तं चैतत्, हरिहरादिव्याख्याने जुहोतिक्रियाध्याहारे गौरवात्, वाक्यभेदापत्तेः, दूरान्वयापत्तेः, वाक्यमध्ये वाक्यान्तरप्रवेशापत्तेश्च, आवपति भगाय स्वाहेतीत्युक्त्या स्वरसतः प्रतीयमानस्य सूत्रकारशैलीसिद्धस्य चावपने भगाय स्वाहेति मन्त्रकरणकत्वस्य बाधापत्तेश्च। संवदति चामुमर्थं गृह्यान्तरम्—'तथा हि शूर्पेण शेषमग्नावुप्येति' शेषं लाजशेषम् उप्य प्रक्षिप्य। अत एवैतद्गृह्ययोः संवादः प्रदर्शितो मुरारिमिश्रैः।

गृह्यासंग्रहेऽपि—

यथा लाजाञ्जलिर्वध्वा हूयतेऽङ्गुलिपर्वभिः।
एवं लाजहविःशेषं हूयते शूर्पजिह्वया॥

शौनकोऽप्याह—

"हुतावशिष्टं लाजानां वधूः स्वाभिमुखं ततः।
शूर्पाग्रेणैव जुहुयात्" इति।

आश्वलायनोऽपि—

"अवशिष्टान्वधूर्लाजान् शूर्पकोणेन चैव हि।
अभ्यात्मं जुहुयात्" इति।

आचारोऽप्येवमिति दिक्।

कात्यायनः—

मुसलोदूखले वाद्यं स्वायते सुदृढे तथा।
इच्छाप्रमाणे भवतः शूर्पं वैणवमेव च॥

मन्त्रार्थस्तु—भगाय कामाय स्वाहा सुहुतं भवत्विति। ततः समाचारात्तूष्णीं चतुर्थं परिक्रमणं वधूवरौ कुरुत इति वासुदेवगङ्गाधरहरिहररेणुदीक्षितादयः, रामदत्तादयोऽप्येवम्। पारस्करः—"त्रिः परिणीतां प्राजापत्यं हुत्वा" त्रिः वारत्रयं परिणीतां कुमारीं प्राजापत्यं हुत्वा पूर्ववदुपविश्य ब्रह्मणान्वारब्ध "ओं प्रजापतये स्वाहा" इति। प्रजापतिदेवताकं होमं विधायेत्यर्थः, अस्योदीचीं सप्तपदानि प्रक्रामतीत्युत्तरत्रान्वयः। त्रिर्ग्रहणमितरथावृत्तिव्युदासार्थम्, उक्तं हि परिभाषायाम्—विवृत्यावृत्य वेतरथावृत्तिरिति, विवृत्य अप्रदक्षिणमावर्त्तनं कृत्वा, आवृत्य वा प्रदक्षिणमावर्तनं कृत्वा वा इतरथावृत्तिः कर्त्तव्येत्यर्थः। यत्र शास्त्रतः प्रदक्षिणावृत्तिः कृता तत्र तदानीमेवाऽविहिताऽप्यप्रदक्षिणावृत्तिः सर्वत्र कर्त्तव्या। यत्र चाप्रदक्षिणावृत्तिः शास्त्रतः कृता तत्र तदानीमेव प्रदक्षिणावृत्तिरविहिताऽपि सर्वत्र कर्तव्येति यावत्। ततश्चात्रापि प्राप्तेतरथावृत्तिः त्रिर्ग्रहणेन निरस्यते। तथा च रेणुः—

"न स्यादितरथावृत्तिः त्रिःप्रणीतादिसूत्रणात्" इति।

अत्र यद्यप्येतन्नित्यं सर्वत्रेत्युक्तेर्नित्यत्वात् सर्वप्रायश्चित्तप्राजापत्यान्तरमेतदावापस्थानमिति सूत्रेण राष्ट्रभृदादीनां प्राजापत्यपूर्वत्वाभिधानाच्चानुच्यमानमपि प्राजापत्यं प्राप्नोत्येव, तथाप्यत्रैतदनुपादाने राष्ट्रभृदादिवत्सप्तपदाक्रमणादेरपि प्राजापत्यात् पूर्वमनुष्ठानं स्यात्। एवं प्राजापत्यं स्विष्टकृच्चेति सूत्रदर्शनात्प्राजापत्यानन्तरमेव स्विष्टकृदपि स्यात्तदेतद्व्यदासार्थं प्राजापत्यं हुत्वा उदीची प्रक्रामयतीत्यभिधानम्। तथा—'अथैनामुदीचीं सप्तपदानि प्रक्रामयति "एकमिषे द्वे ऊर्जे त्रीणि रायस्पोषाय चत्वारि मायोभवाय पञ्च पशुभ्यः षडृतुभ्यः सखे सप्तपदा भव सा मामनुव्रता भव विष्णुस्त्वा नयत्विति सर्वत्रानुषजति।" अथ प्राजापत्यहोमानन्तरं एनां वधूं उदीचीं उत्तरां दिशं 'एकमिष' इत्येतैः सप्तभिर्मन्त्रैः सप्तपदानि प्रक्रामयति वरः प्रक्रमणं कारयेत्, कीदृशीं त्रिःपरिणीतां त्रीन् वारानग्नेः प्रादक्षिण्येनानीतामिति पूर्वेण सम्बन्धः। "विष्णुस्त्वा नयतु" इत्येतावन्मन्त्रभागं सर्वत्र "एकमिषे" इत्यादिषु सप्तमन्त्रेषु अनुषर्जति संबध्नातीत्यर्थः। तथा च "एकमिषे विष्णुस्त्वा नयतु" इत्येवमादिप्रयोगः। मन्त्रपाठश्च वरस्यैव, मन्त्रलिङ्गात्। प्रक्रमणञ्च दक्षिणपादेन दक्षिणेन प्रक्रम्येति गृह्यान्तरदर्शनात्। अत्र कारितत्वोपदेशात् सप्तपदानि परिक्रमस्वेत्यध्येषणेति गदाधरादयः। "एकमिषे" इत्यादि मन्त्रपाठमात्रं वरस्येति हरिहरः, कुमार्या दक्षिणपादाङ्गुष्ठं गृहीत्वाऽग्रे अग्रे स्थापयेदित्यपरे। समाचारोऽप्येवम्। इदं चाक्रमणमात्रपल्लवस्थदध्यक्षतयुतेष्वातर्प-

णेनोत्तरोत्तरकृतसप्तमण्डलेष्विति समाचारः। मन्त्रार्थस्तु—हे सखे! कान्ते! इषे अन्नाय ईप्सिताय वा एकं प्रथमं पदं विष्णुस्त्वा त्वां नयतु प्रापयतु ऊर्जे बलाय द्वे पदे विष्णुस्त्वां नयतु एवमुत्तरत्र योज्यम्, रायस्पोषाय धनवृद्धयै मायोभवाय मायः सौख्यं तस्य भव उत्पत्तिस्तदर्थम्, यद्वा मयः सुखं तस्य भवो मयोभवस्तस्य भावो मायोभवस्तदर्थम्, पशुभ्यो गवादिभ्य ऋतुभ्यः ऋतुजन्यभोगार्थम्, हे सखे! पूर्वपदैः सह सप्तपदा भव, सा च त्वं मामनुलक्षीकृत्य व्रता व्रतवती भवेति सप्तपदा भूरादिसप्तलोकविख्याता भव मामनुव्रता अनुवर्त्तिनी च भवेति वा। पत्न्याः सख्यं च—

"सख्यं साप्तपदीनं स्यान्मैत्री साप्तपदीति च"

इति स्मृतिसिद्धम्। तथा—'निष्क्रमणप्रभृत्युदकुम्भंस्कन्धे कृत्वा दक्षिणतोऽग्नेर्वाग्यतः स्थितो भवत्युत्तरत एकेषाम्'। निष्क्रमणप्रभृति पित्रा प्रत्तामादाय गृहीत्वा निष्क्रामतीत्यादित आरभ्य कश्चित्पुरुष उदकुम्भं जलपूर्णं कलशं स्कन्धे कृत्वाऽग्नेर्दक्षिणस्यां दिशि वाग्यतो मौनी स्थितो भवति तिष्ठेत्, एकेषामाचार्याणां मते त्वग्नेरुत्तरतः स्थितो भवेदित्यर्थः। स च ब्राह्मण एव—

गन्धमाल्यैरलङ्कृत्य सकुम्भो वाग्यतः शुचिः।
धारयेत्त्रिषु वर्णेषु प्रावृताङ्गो द्विजोत्तमः॥

इति वचनात्। तथा—'अथैनां मूर्द्धन्यभिषिञ्चति—"आपश्शिवाश्शिवतमाः शान्ताश्शान्ततमास्तास्ते कृण्वन्तु भेषजम्" इति। अथ तस्मात् स्कन्धस्थितादुदकुम्भादाचारादाम्रपल्लवेन जलमादाय एनां वधूं मूर्धनि शिरसि "आपश्शिवाः" इत्यनेन मन्त्रेण वरोऽभिषिञ्चेदित्यर्थः। मन्त्रार्थस्तु—हे कन्यके! या आपः शिवाः कल्याणहेतवः शिवतमाः अतिशयाभ्युदयकारिण्यः शान्ताः पापहारिण्यः शान्ततमाः मनोमलक्षालनसमर्थाश्च भवन्ति ता आपः ते तव भेषजमारोग्यं कृण्वन्तु कुर्वन्त्विति। तथा-'आपो हिष्ठेति च तिसृभिः'। पुनस्तथैवोदकमादाय "आपो हिष्ठा" इत्यादिभिस्तिसृभिः ऋग्भिर्वधूं मूर्द्धन्यभिषिञ्चेदित्यर्थः। मन्त्रो यथा—"आपो हिष्ठामयो भुवस्तान ऊर्जे दधातन महेरणाय चक्षसे। यो वः शिवतमो रसस्तस्य भाजयते हनः। उशतीरिव मातरः। तस्मा अरङ्गमामवो यस्य क्षयाय जिन्वथ आपो जन यथा च नः।" अस्यार्थः—हे आपः! हि यस्मात् यूयं मयोभुवः मयः सुखं तस्य भुवो भावयित्र्यः स्थ भवथ ता तस्मात् नोऽस्मान् ऊर्जे अन्नाय दधातन स्थापयत किं च

महे महते रणाय रमणीयाय चक्षसे दर्शनाय ब्रह्मदर्शनायेति यावत् दधातनेति पूर्वेणैव सम्बन्धः। यतो यूयं सुखदायिन्यस्तस्मादैहिकेनान्नादिना आमुष्मिकेण च परब्रह्मदर्शनेनास्मान् योजयतेत्याशयः। "ष्ठा" इत्यत्र षत्वदीर्घौ छान्दसौ, एवं "महे" इत्यादौ तकारलोपादयोऽपि। तथा—हे आपः वो युष्माकं यः शिवतमोऽत्यन्तकल्याणरूपो रसस्तस्येह नोऽस्मान् भाजयत भागिनः कुरुत तेन रसेन सम्बद्धान् कुरुतेति यावत्। का इव ? उशतीः पुत्रकल्याणमिच्छन्त्यो मातर इव, मातरो यथा पुत्रान् कल्याणयुक्तान् कुर्वन्ति, तथा यूयमपि कल्याणात्मकनिजरससम्बद्धानस्मान् कुरुतेत्याशयः। तथा हे आपः! वो युष्माकं तस्मै तस्य रसस्य अरं रलयोरैक्यादलं पर्याप्तिं गमाम वयं गच्छाम तस्मै तद्रसनिमित्तं अरं शीघ्रं गमामेति वः। किं च नोऽस्मान् तस्मै रसाय यूयं जनयथा च तद्रसभोक्तृत्वेनास्मान् यूयं परिकल्पयतेति यावत्। तस्मै कस्मै यस्य रसस्य क्षयाय स्थानाय ब्रह्मादिस्तम्बपर्यन्तजगद्रूपाय जिन्वथ प्रीणयथेति जनयथा इति दीर्घश्छान्दसः। तथा—अथैनां सूर्यमुदीक्षयति—"तच्चक्षुरिति।" अथाभिषेकानन्तरं एनां वधूं सूर्यं दिवाकरमुदीक्षयति "सूर्यमुदीक्षस्व" इति प्रैषेण दर्शयेत्। सा च वरप्रेषिता तच्चक्षुरिति मन्त्रेण सूर्यं पश्येदित्यर्थः। एतच्च दिवा विवाहपक्षे, न तु रात्रिविवाहपक्षेऽप्यसम्भवात्, अस्तमिते सूर्ये ध्रुवप्रदर्शनरूपपक्षान्तरस्याचार्येण वक्ष्यमाणत्वाच्च। गृह्यकारिकाऽपि—

ततः सूर्यमुदीक्षस्वेत्याह तां स नितम्बिनीम्।
द्युश्चेत्सोदीक्षते सूर्यं तच्चक्षुरिति मन्त्रतः॥

मन्त्रो यथा—"तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च शरदः शतात्।" अस्यार्थः—तत्पूर्वोक्तं सूर्यरूपं चक्षुर्नेत्रं कीदृशं देवहितं देवानामिष्टं शुक्रं रलयोरैक्याच्छुक्लं निर्मलं पुरस्तात्प्राच्यां दिशि उच्चरत् उद्गच्छत् शतं शरदो वत्सरान् पश्येम तथा शरदः शतं जीवेम तथा शरदश्शतं शृणुयाम तथा शरदः शतं प्रब्रवाम अस्खलितवागिन्द्रिया भवेम तथा शरदः शतमदीनाः श्याम न कस्याप्यग्रे दैन्यं कुर्याम शतात् शरदः शतवर्षोपर्यपि भूयश्च बहुकालं पश्येमेत्यादि। तथा—'अस्तमिते ध्रुवं दर्शयति—"ध्रुवमसि ध्रुवं त्वा पश्यामि ध्रुवैधि पोष्या मयि मह्यं त्वादाद् बृहस्पतिः मया पत्या प्रजावती सञ्जीव शरदः शतमिति।" अस्तमिते सूर्ये सूर्यदर्शनस्थाने "ध्रुवमसि" इत्यनेन मन्त्रेण ध्रुवं नक्षत्रविशेषं दर्शयति

वधूं समीक्षयेद् वर इत्यर्थः। अत्र कर्काचार्यः—कारितार्थे चायमेव मन्त्रः पश्यामीत्यन्तर्भूतण्यर्थे यदुक्तं "भवति दर्शयामि" इति तदुक्तं भवति पश्यामीतित्याह। एतेन "ध्रुवमुदीक्षस्व" इति प्रैषो नेत्युक्तं भवति, एवमेव गदाधरादयः। "ध्रुवमुदीक्षस्व" इति प्रैषेण ध्रुवं दर्शयतीति हरिहरगङ्गाधरादयः, रामदत्ताद्योऽप्येवम्, समाचारोऽप्येवमेव। मन्त्रपाठश्च वरस्यैव मन्त्रलिङ्गात्। यदप्याचार्येण हृदयालम्भादिविधानोत्तरमेतत्सूत्रं प्रणीतं तथापि तत्सिंहावलोकनन्यायेन, तस्माद्रात्रिश्चेत्तदा सूर्यप्रदर्शनस्थान एव ध्रुवप्रदर्शनमनुष्ठेयम्, अत एव रामदत्तादीनां तथैव लेखः, समाचारोऽप्येवम्। केषाञ्चिदन्यथा लिखनं तु शिष्टाचारविरोधादुपेक्ष्यम्। मन्त्रार्थस्तु—हे वधु! त्वं ध्रुवमसि अविनाशिनी भवसि लिङ्गव्यत्ययश्छान्दसः। त्वा त्वां ध्रुवं तारकाविशेषं पश्यामि दर्शयामि अतस्त्वमपि मयि ध्रुवा शाश्वती पोष्या पोषणीया सत्प्रजापालिनी वा एधि भव किं च बृहस्पतिर्ब्रह्मा त्वा त्वां मह्यमदात् दत्तवान् अतो मया पत्या भर्त्रा सह प्रजावती पुत्रपौत्रादियुक्ता शतं शरदो वर्षाणि सञ्जीव सम्यक् प्राणिहीति। पश्यामीत्यन्तर्भावितण्यर्थः। अनन्तस्तु—त्वा त्वां ध्रुवं ध्रुवां स्थिरां पश्यामीत्येवं व्याचष्ट। तथा—'सा यदि न पश्येत्पश्यामीत्येव ब्रूयात्।' सा वधूर्यदि न पश्येद् ध्रुवसंज्ञकं सूक्ष्मं नक्षत्रं नेक्षेत तथापि पश्यामीत्येव ब्रूयाद् वदेन्न तु न पश्यामीति ब्रूयादित्यर्थः। तथा—'अथास्यै दक्षिणांसमधि हृदयमालभते, "मम व्रते ते हृदयन्दधामि मम चित्तमनुचित्तं ते अस्तु मम वाचमेकमना जुषस्व प्रजापतिष्ट्वा नियुनक्तु मह्यम्" इति। अस्यै इति चतुर्थी षष्ठ्यर्थे, अथ सूर्यध्रुवान्यतरोदीक्षणानन्तरम् अस्यै वध्वा दक्षिणांसमधि दक्षिणस्यांसस्य स्कन्धस्य अधि उपरि हस्तं नीत्वा "मम व्रते" इत्यनेन मन्त्रेण हृदयमालभते स्पृशेद्वर इत्यर्थः। मन्त्रार्थस्तु—हे कन्यके! मम व्रते शास्त्रविहितनियमादौ ते तव हृदयं मनो दधामि स्थापयामि तद्विषयकं करोमीति यावद् ते तव चित्तं मम चित्तमनु मच्चित्तानुकूलमस्तु भवतु त्वं च एकमना अनन्यचित्ता सती मम वाचं वचनं जुषस्व सेवस्व कुरुष्वेति यावत्। अपि च प्रजापतिर्धाता त्वा त्वां मह्यं नियुनक्तु नियोजयतु मत्सेविनीं करोत्विति यावत्। तथा—अथैनामभिमन्त्रयते—"सुमङ्गलीरियं वधूरिमाँ॰ समेत पश्यत। सौभाग्यमस्यै दत्वा याथास्तं विपरेतनेति।" अथ हृदयालम्भनानन्तरमेनां वधूं "सुमङ्गलीः" इत्यनेन मन्त्रेणाभिमन्त्रयते वरोऽभिमन्त्रयेदित्यर्थः। गृह्यकारिकायाम्—

पाणिभ्यां संहताभ्यां च वरस्तामभिमन्त्रयेत्।

मन्त्रार्थस्तु—हे जनाः ! इयं वधूः सुमङ्गलीः शोभनमङ्गलयुक्ता । विभक्तिलोपाभाव आर्षः । अत इमां समेत संगच्छत पश्यत आलोकयत तथा अस्यै कन्यायै सौभाग्यं दत्वा अस्तं गृहम् "अस्तं गृहः" इति श्रुतेः याथ गच्छत न विपरेत न विमुखतया परा इत अपगच्छत पुनरागमनाय व्रजतेति यावत् । यद्वा यद्यस्तं याथ तर्हि विपरेतन परावृत्त्या गच्छत । यद्वा सौभाग्यं दत्वाथ दत्वा अथानन्तरम् अस्तं गृहं विपरेतन परावृत्त्य गच्छतेति दत्वायेति छान्दसम् । तथा—तां दृढपुरुष उन्मथ्य प्राग्वोदग्वाऽनुगुप्त आगार आनडुहे रोहिते चर्मण्युपवेशयति, "इह गावो निषीदन्त्विहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो यज्ञ इह पूषा निषीदतु" इति। ततः तां वधूं दृढपुरुषः कश्चिद् उन्मथ्य उत्थाप्य प्राग्वा पूर्वस्यां दिशि वा उदग्वा उदीच्यां वा दिशि अनुगुप्ते सर्वतः परिवृते अगारे पूर्वकल्पिते गृहे आनडुहे आर्षभे रोहिते लोहितवर्णे चर्मण्यजिने पूर्वमास्तीर्णे उपवेशयत्यासयेत् "इह गावः" इति मन्त्रेणेत्यर्थः । चर्म च प्राग्ग्रीवमुपरिलोमास्तीर्णं भवति, चर्मण्युत्तरलोमानि प्राग्ग्रीवाणीति परिभाषासूत्रात् । गृह्यान्तरमपि 'आनडुहं रोहितं चर्म प्राग्ग्रीवमुपरिलोमास्तीर्णं भवतीति । दृढपुरुषो जितेन्द्रिय इति भर्तृयज्ञः । बलवान कश्चित्पुमानिति हरिहरः । जामातैव दृढपुरुष इति गङ्गाधरगदाधरादयः । गृह्यकारिकायाम्—

ततः प्राच्यामुदीच्यां वाऽनुगुप्ते निलये वरः ।
चर्मण्यानडुहे रक्ते तामुत्तिष्ठ्योपवेशयेत् ॥

एतच्च कर्मेदानीन्तना नानुतिष्ठन्ति तत्कस्मादिति न प्रतीमः । मन्त्रार्थस्तु—हे कन्ये ! इहास्मिन् वृषचर्मणि त्वया उपविशन्त्या सह गावः अश्वाः पूरुषाः परिजनमनुष्याश्च निषीदन्तु उपविशन्तु इह पदावृत्तिः कर्तृभेदापेक्षया, अपि च उशब्द एवार्थे इहैव सहस्रदक्षिणो बहुदक्षिणो यज्ञो निषीदतु तथा इह पूषा सूर्यो निषीदत्विति । यद्वा उशब्दोऽप्यर्थे, इह यज्ञो निषीदतु पूषापि निषीदत्वित्यर्थः । अथात्र प्राप्तावसरः स्विष्टकृद्धोमः संस्रवप्राशनं ब्रह्मदक्षिणा ब्रह्मोत्थापनं प्रणीताजलेन शिरःसम्मार्जनं प्रणीतान्युञ्जीकरणं बर्हिर्होमः पूर्णाहुतिः त्र्यायुषकरणं एतानि कुशण्डिकाप्रकाशोक्तरीत्या विधेयानि । ततः समाचाराद्वरकर्तृकं शमीशराशङ्खसुवर्णप्रेरितं वधूशिरसि सिन्दूरकरणम् । पारस्करः—'ग्रामवचनं च कुर्युः ।' ग्रामवचनं स्वकुलवृद्धस्त्रीणां वाक्यं तदपि विवाहे कुर्युरनुतिष्ठेयुरित्यर्थः । यतः स्वकुलवृद्धाः स्त्रियः पूर्वपुरुषानुष्ठीयमानं सदाचारं स्मरन्ति, तस्मात्तद्वचनं सदाचारबोधकमिति तत्प्रमाणमेवे-

त्याशयः। एवमेव हरिहरादयः। ग्रामवचनं लोकवचनमिति भर्तृयज्ञः। एतेन सूत्रानुपनिबद्धान्यपि वरनासिकाधारणजन्मग्रन्थिबन्धनादीनि संगृहीतानि। ततः कर्मदक्षिणा, ततः समाचाराद् दूर्वाक्षतादिग्रहणम्। पारस्करः—'त्रिरात्रमक्षारालवणाशिनौ स्यातामधः शयीयाताम्'। विवाहदिनमारभ्य त्रिरात्रं त्रीण्यहोरात्राणि अक्षारालवणाशिनौ अक्षारं च अलवणं च अक्षारालवणं तदश्नीत इत्येवं शीलौ स्यातां भवेताम् अधो भूमावेव न खट्वायां शयीयातां स्वपेतामित्यर्थः। अधःशब्दो खट्वाव्युदासार्थो न त्वास्तरणव्युदासार्थ इति भाष्यकृतः। तथा—"संवत्सरं न मिथुनमुपेयातां द्वादश रात्रं षड्रात्रं त्रिरात्रमन्ततः।" विवाहदिनमारभ्य संवत्सरं वर्षं यावन्मिथुनमभिगमनन्नोपेयातां नोपगच्छेताम् अथवा द्वादशरात्रं षड्रात्रंवा। यद्वा अन्ततः संवत्सरादिपक्षाणामन्ते त्रिरात्रमित्यर्थः। संवत्सरादिपक्षाशक्तौ त्रिरात्रपक्षाश्रयणेऽपि चतुर्थीकर्मानन्तरमभिगमनम्, चतुर्थीकर्मणः प्राक् विवाहसंपूर्त्तिविरहाद् विवाहैकदेशत्वाच्चतुर्थीकर्मण इति भाष्यकृतः। स्मृतिसुधाकरोऽप्येवम्। युक्तं चैतत् चतुर्थीकर्माभिधाय तामुदूह्य यथर्तुप्रवेशनमिति पारस्करेण सूत्रणात्तस्य विवाहाङ्गत्वप्रतीतेः। अत एवाशौचेऽपि तदनुष्ठानम्, न विवाह्याग्नयोः पूर्वसम्भृतयोरिति वचनात्। नहि चतुर्थ्यां विशिष्याशौचापवादोऽस्ति। यत्त्वेवं वैवाहिकशुद्धसमयस्तत्राप्यादेयः, अङ्गानां प्रधानकालान्वयादिति, तच्चिन्त्यम्, प्रधा[1]नारम्भेणैवाङ्गारम्भात् समापने च कालानियमात्। एवमेव ठक्कुरमधुसूदनादयोऽपीति दिक्। शौनकः—

---

१. "इष्टिरारम्भसंयोगादङ्गभूतान्निवर्तेतारम्भस्य प्रधानसंयोगात्" इति जैमिनीयं सूत्रम्। अस्यार्थः—इष्टिः = आरम्भणीयेष्टिः। अङ्गभूतात् = दीक्षणीयादिकात्। निवर्तेत = निवृत्ता भवेत्। आरम्भसंयोगात् = आरम्भद्वारकत्वात्। आरम्भस्य प्रधानसंयोगात् = अङ्गेषु पृथगारम्भाभावादित्यर्थः। अयं भावः—दर्शपूर्णमासयोरारम्भणीया श्रुता। सा प्रकृतिविकृत्योरारम्भभेदाद् विकृतिषु कर्तव्या। ज्योतिष्टोमाङ्गभूतदीक्षणीयापि विकृतित्वाविशेषादारम्भणीयाभाग् भवतीति प्राप्ते — आरम्भद्वारेणारम्भणीया प्रकृतावङ्गमासीत्। अतो विकृतिष्वपि तद्द्वारैव प्राप्तः। न चाङ्गभूतासु दीक्षणीयादिषु पृथगारम्भोऽस्ति। ज्योतिष्टोमे प्रवृत्तोऽर्थादङ्गेष्वपि प्रवृत्तो भवतीति प्रधानारम्भेणैवाङ्गानामारब्धत्वान्न तेषां पृथगारम्भोऽस्तीति लुप्तार्थत्वान्न कर्तव्या। ज्योतिष्टोमस्यापूर्वत्वात्तत्रापि सा नेति सर्वथा लोप एवेति।

अत ऊर्ध्वं त्रिरात्रं तौ द्वादशाहमथापि वा।
शक्तिं वीक्ष्य तथाब्दं वा चरतां दम्पती व्रतम्॥
अक्षारालवणाहारौ भवेतां भूतले तथा।
शयीयातां समावेशं न कुर्यातां वधूवरौ॥

समावेशं मैथुनम्, हिरण्यकेशीसूत्रम्—"त्रिरात्रमक्षारालवणाशिनावधः-शायिनावलङ्कुर्वाणौ ब्रह्मचारिणौ वसतः" इति।

तथा—

विवाहे दम्पती स्यातां त्रिरात्रं ब्रह्मचारिणौ।
अलङ्कृतावधश्चैव सह शय्यासनाशनौ॥

एषां पक्षाणां व्यवस्थोक्ता ब्रह्मपुराणे—

कृते विवाहे वर्षं तु वस्तव्यं ब्रह्मचारिणा।
यद्यष्टवर्षा कन्या स्यात्तथा तत्त्रिगुणः पुमान्॥
अथवा द्वादशाहानि त्रिंशद्वर्षेण सर्वदा।
यदि द्वादशवर्षा स्यात्कन्या रूपगुणान्विता॥
द्वात्रिंशद्वर्षपूर्णेन यदि षोडशवार्षिकी।
लब्धा तदा तु षड्रात्रं वस्तव्यं संयमेन तु॥
विंशत्यब्दा यदा कन्या वस्तव्यं तत्र वै त्र्यहम्।
अत ऊर्ध्वमहोरात्रं वस्तव्यमिति सम्मतम्॥

धर्मप्रवृत्तौ—

वध्वा सहैव कर्त्तव्यो निवासः श्वसुरालये।

विधानपारिजाते—

मात्रा सहोपनीतौ स्याद्विवाहे भार्यया सह।
अन्यत्र सह भुञ्जानः पातित्यं प्राप्नुयान्नरः॥

हेमाद्रौ प्रायश्चित्तकाण्डे गालवः—

एकयानसमारोहे एकपात्रे च भोजनम्।
विवाहे पथि यात्रायां कृत्वा विप्रो न दोषभाक्॥
अन्यथा दोषमाप्नोति पश्चाच्चान्द्रायणं चरेत्॥

दम्पतिकृत्यविशेषमाह शौनकः—

दम्पती रोहिणीसोमौ भूत्वा प्रथमकेऽहनि ।
दाक्षायणीं यजेयातां द्वितीयदिवसेऽपि ताम् ॥
पूजयेतां महादेवीं गन्धर्वाप्सरसौ च तौ ।
अग्निस्वाहे तृतीयेऽह्नि पूजयेतां च कालिकाम् ॥
चतुर्थ्यां तौ यजेयातां शाङ्करीं मानवस्त्रियौ ।

संग्रहे—

सर्वत्र कर्मणामन्ते मन्त्राशिषमनुत्तमाम् ।
दद्युर्विप्राः स्वशाखोक्तामादौ तत्कायवशाखिनः ॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके विवाहप्रकाशः ॥

———

अथ चतुर्थीकर्म

तत्र पारस्करः—चतुर्थ्यामपररात्रेऽभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वाज्यभागाविष्ट्वाऽज्याहुतीर्जुहोति, "अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि। ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पतिघ्नी तनूस्तामस्यै नाशय स्वाहा। वायो प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै प्रजाघ्नी तनूस्तामस्यै नाशय स्वाहा। सूर्यप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै पशुघ्नी तनूस्तामस्यै नाशय स्वाहा। चन्द्रप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै गृहघ्नी तनूस्तामस्यै नाशय स्वाहा। गन्धर्वप्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकाम उपधावामि यास्यै यशोघ्नी तनूस्तामस्यै नाशय स्वाहा" इति। चतुर्थ्यां विवाहदिवसाद्या चतुर्थी रात्रिस्तस्यामपररात्रेऽन्तिमप्रहरेऽभ्यन्तरतो गृहमध्ये अग्निमुपसमाधाय पञ्चभूसंस्कारान् कृत्वा वैवाहिकाग्निं स्थापयित्वा दक्षिणतो ब्रह्माणमुपवेश्य अग्नेर्दक्षिणतो ब्रह्मोपवेशनार्थं कुशानास्तीर्य तत्र ब्रह्माणमुपवेश्य उत्तरत उदपात्रं प्रतिष्ठाप्य अग्नेरुत्तरतः प्रणीतास्थलं त्यक्त्वा जलपूर्णं ताम्रादिपात्रं स्थापयित्वा स्थालीपाकं श्रपयित्वा स्थालीपाकं चरुं श्रपयित्वा यथाविधि विक्लेदयित्वा[1] आज्यभागाविष्ट्वा पर्युक्षणान्ते आघारानन्तरमाज्यभागौ हुत्वा आज्याहुतीराज्येन पञ्चाहुतीः "अग्ने प्रायश्चित्ते" इत्यादिभिः पञ्चभिर्मन्त्रैर्जुहोति जुहुयादित्यर्थः। अत्रापररात्रग्रहणं पूर्वाह्णव्युदासार्थम्, चतुर्थीकर्मणो विवाहाङ्गत्वाद् बहिःशालायां मा भूदित्यभ्यन्तरत इत्युक्तम्, अग्निमुपसमाधायेत्यभिधानमाभ्यन्तरत्वगुणविधानार्थम्, ब्रह्माणमुपवेश्येति चोदकपात्रस्थापनावसरविधानायोक्तम्, श्रपयित्वेत्यभिधानं भूतोपादानं मा भूदित्येतदर्थम्, आज्यभागाविष्ट्वेत्युक्तिराज्याहुतिकालविधानार्था।

स्मृत्यालोके—

सामगानां चतुर्थेऽह्नि रात्रिशेषे यजुर्विदाम्।
चतुर्थीकर्म कथितं सम्यगुद्वाहसिद्धये॥

---

१. 'विक्लेद्य' इति मु० पु० पाठः।

गृह्यकारिकायाम्—

ब्रवीम्यथ विवाहाङ्गं चतुर्थीकर्म विस्तरात्।
विवाहतश्चतुर्थेऽह्नि रात्रेरपरभागतः॥
गृहाभ्यन्तरतस्तत्स्यादप्यङ्गत्वान्न मण्डपे।
स्नात्वैतदाचरेत्कर्म एवं कात्यायनोऽब्रवीत्॥

इदं च स्नानं तैलोद्वर्त्तनादि कृत्वा युगकाष्ठ उपविश्य विधेयमाचारात्। मन्त्रार्थस्तु—हे अग्ने! हे प्रायश्चित्ते! सकलदोषापकरणस्वरूप त्वं देवानामिन्द्रादीनां प्रायश्चित्तिः दोषापकर्त्ता असि भवसि, अतः कारणाद् ब्राह्मणो ब्रह्मण्योऽहं त्वा त्वां उपधावामि उपसर्पामि आराधयामि वा, किंभूतोऽहं नाथकामः याञ्चाकामः का सा याञ्चेत्याकाङ्क्षायामाह—अस्यै अस्या वध्वाः या पतिघ्नी तनूः तन्वा अवयवः तां अस्यै इमामुपकर्त्तुं नाशय अपनय तुभ्यं स्वाहा सुहुतमस्त्विति, अस्यै इति चतुर्थी षष्ठ्यर्थे, समुदायवाचकोऽपि तनूशब्दोऽत्रावयववाचकः तेन यदस्याः पतिनाशकमङ्गलक्षणं हस्तरेखादि सामुद्रिकोक्तं तदपाकृत्य शोभनमङ्गं विधेहीति वाक्यार्थः। एवमुपर्यपि व्याख्येयम्, तत्र तनुविशेषणं देवता च भिद्यते, तद्यथा—हे वायो! पवन! प्रजाघ्नी अपत्यनाशिनी, एवमुत्तरत्रापि योज्यम्। पारस्करः—स्थालीपाकस्य जुहोति "प्रजापतये स्वाहा" इति। आज्याहुत्यनन्तरं स्थालीपाकस्य चरोरेकामाहुतिं "प्रजापतये स्वाहा" इति मन्त्रेणोपांशुपठितेन जुहोतीत्यर्थः। स्थालीपाकस्येत्यवयवलक्षणा षष्ठी। तथा "हुत्वा हुत्वैतासामाहुतीनामुदपात्रे संस्रवान्त्समवनीय तत एनांमूर्द्धन्यभिषिञ्चति, "या ते पतिघ्नी प्रजाघ्नी पशुघ्नी गृहघ्नी यशोघ्नी निन्दिता तनूर्जारघ्नी तत एनाङ्करोमि सा जीर्य त्वं मया सहासौ" इति। एतासाम् "अग्ने प्रायश्चित्ते" इत्यादीनां प्राजापत्यान्तानां षण्णामाहुतीनां प्रत्येकं हुत्वा संस्रवान् स्रुवलग्नाज्यचर्वयवान् उदपात्रे उत्तरतः प्रतिष्ठापिते जलपात्रे समवनीय प्रक्षिप्य ततस्तस्मात्संस्रवमिश्रमुदकं गृहीत्वा एनां वधूं मूर्द्धनि मस्तके अभिषिञ्चति "या ते पतिघ्नी" इति मन्त्रेणेत्यर्थः। हुत्वा हुत्वेत्यभिधानं प्रत्येकाहुतौ संस्रवधारणं यथा स्यादित्येवमर्थम्। असावित्येतत्स्थाने सम्बोधनान्तं वधूनाम ग्राह्यम्, मूर्द्धाभिषेकश्चायमागन्तुकत्वात्सर्वकर्मान्ते भवति, तेन स्थालीपाकहोमानन्तरमवशिष्टं सर्वप्रायश्चित्तहोमादिकं कर्म विधेयम्। तत्र महाव्याहृतिभ्यः प्रागेव स्विष्टकृत्, आज्यादन्यस्य चरोरप्यत्र हविषः सद्भावात्। यथोक्तं पुरस्तात् प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यत्रेदाज्याद्धविरिति। मन्त्रार्थस्तु—हे असौ

अमुकि कन्यके! ते तव या पत्यादिघातिनी पञ्चधा दुष्टा तनूरत एव निन्दिता तामेनां ततोऽनेनाभिषेचनेन जारघ्नीमुत्पादिदोषघातिनीमुपपतिघातिनीं वा करोमि। सा त्वं मया पत्या सह जीर्य निर्दुष्टवृद्धत्वं गच्छेति। तथा—अथैनां स्थालीपाकं प्राशयति—"प्राणैस्ते प्राणान्त्सन्दधाम्यस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचम्" इति। अथाभिषेकानन्तरं एनां वधूं स्थालीपाकं चरुं "प्राणैस्ते प्राणान्" इति मन्त्रेण वरः प्राशयेदित्यर्थः। प्राशनं च सकृदेवेति भाष्यकृतः। "प्राणैस्ते प्राणान्" इत्यादिभिश्चतुर्भिर्मन्त्रैः चतुर्वारं प्राशनमिति गर्गानुसारिणो रामदत्तादयः, समाचारोऽप्येवम्। अत्र ते इत्यस्य सन्दधामीत्यस्य च सर्वत्रानुषङ्गः। अयं च वधूसंस्कारो न तु द्रव्यप्रतिपत्तिः, अतो द्रव्यस्य नाशदोषादावन्यद्रव्यप्राशनं विधेयम्। तदुक्तं गृह्यकारिकायाम्—

वधूसंस्कार एवायं प्रतिपत्तिरियं न तु।
अतो द्रव्यविनाशादौ द्रव्येणान्येन तद्भवेत्।
शेषद्रव्यविनाशादौ लुप्यन्ते प्रतिपत्तयः॥ इति।

मन्त्रार्थस्तु—हे कन्यके! ते तव प्राणान् स्वकीयैः प्राणैः सन्दधामि संयोजयामि, एवमुपर्यपि व्याख्येयम्। तथा—अथास्यै दक्षिणांसमधिहृदयमालभते—"यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्, वेदाहं तन्मां तद्विद्यात्पश्येम शरदश्शतं जीवेम शरदश्शतꣳ शृणुयाम शरदश्शतम्" इति। अथ स्थालीपाकप्राशनानन्तरमस्यै अस्या भार्यायाः दक्षिणांसं दक्षिणस्कन्धं अधि उपरि दक्षिणं हस्तं नीत्वा तेनैव हस्तेन हृदयमालभते स्पृशेत् "यत्ते सुसीमे" इति मन्त्रेणेत्यर्थः। अयञ्च हृदयालम्भः पत्न्यभिगमनोत्तरकालीनः प्राक्कालीन इत्यपर इति कर्कभाष्यम्, अभिगमनोत्तरकालीन एवेति जयरामादयः। स्थालीपाकप्राशनानन्तरमेवेति रामदत्तादयः। तेषामयमाशयः—चतुर्थीकर्मप्रकरणे स्थालीपाकप्राशनोत्तरं यत्पत्न्यभिगमनोल्लिखनं तत्प्रासङ्गिकं कर्मान्तरत्वात्। तस्मादेवंविच्छ्रोत्रियस्य दारेण नोपहासमिच्छेदिति परेषां परपत्न्योपहासप्रतिषेधवत्, अत एव अथर्तुमतीञ्जायामभिगच्छेदित्यादिना हृदयालम्भादीतिकर्त्तव्यतासहितं पुनस्तत्कर्मोल्लिखितं सूत्रकृता। हृदयालम्भस्य तु प्राकरणिकत्वाच्चतुर्थीकर्माङ्गत्वमबाधम्, तस्मात्पत्न्यभिगमनोल्लेखानन्तरमेतत्सूत्रप्रणयनं सिंहावलोकनन्यायेन, समाचारोऽप्येवमेवेति।

मन्त्रार्थस्तु—हे सुसीमे ! शोभनसीमन्तिनि । यत्ते तव हृदयं मनः दिवि वर्त्तमाने चन्द्रमसि चन्द्रे श्रितं स्थितं मनसश्चन्द्राधिष्ठितत्वात्, तदहं वेद जानीयां तच्च मनो मां विद्यात् । एवं मिथोऽनुबद्धहृदया वयं शरदः शतं पश्येमेत्यादि गदितार्थम् । ततः कङ्कण-मोक्षणादीन्याचारपरिप्राप्तानि विधाय पूर्णाहुतिं दत्वा त्र्यायुषं कुर्यात् ।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
चतुर्थीकर्मप्रकाशः ॥

—❀—❀—

अथ गर्भाधानम्[1]

तत्र पारस्करः—

तामुदूह्य यथर्त्तुप्रवेशनम्, एवं पूर्वोक्तेन प्रकारेण तां वधूम् उदूह्य विवाह-कर्मणा भार्यां सम्पाद्य यथर्त्तु ऋतावृतौ प्रवेशनमभिगमनं कुर्यादिति शेषः। तथा— अथास्यै दक्षिणां समधिहृदयमालभते "यत्ते सुसीमे हृदयं दिवि चन्द्रमसि श्रितम्,

---

१. तत्र गर्भाधानहेतुरजोदर्शने प्रशस्ताप्रशस्तकालानाह नारदः—

कुलीरवृषचापान्त्यनृयुक्कन्यातुलाघटाः।
राशयः शुभदा ज्ञेया नारीणां प्रथमार्तवे॥

कुलीरः कर्कटः। चापो धनुः। अन्त्यो मीनः। नृयुक् मिथुनम्। घटः कुम्भः।

स्मृतिचन्द्रिकायाम्—

शुक्लपक्षे सुशीला स्यात् कृष्णे सा कुलटा भवेत्।
कृष्णस्य द्वादशीं यावन्मध्यमं फलमादिशेत्॥

तिथ्यादिविषये तत्रैव—

अमारिक्ताष्टमीषष्ठीद्वादशीप्रतिपत्स्वपि।
परिघस्य च पूर्वार्धे व्यतीपाते च वैधृतौ।
सन्ध्यासूपप्लवे विष्ट्यामशुभं प्रथमार्तवम्॥

उपप्लवो ग्रहणम्।

अथ वारफलम्—

रोगी पतिव्रता दुःखी पुत्रिणी भोगभागिनी।
पतिव्रता क्लेशयुक्ता सूर्यवारादिषु क्रमात्॥

नक्षत्रफलमाह गर्गः—

सुभगा चैव दुःशीला वन्ध्या पुत्रसमन्विता।
धर्मयुक्ता व्रतघ्नी च परसन्तानमोदिनी॥
सुपुत्रा चैव दुःपुत्रा पितृवेश्मरता सदा।
दीना प्रज्ञावती चैव पुत्राढ्या चित्रकारिणी॥

वेदा तं तन्मां तद्विद्यात्पश्येम शरदश्शतं जीवेम शरदश्शतं शृणुयाम शरदश्शतम्" इति। इदं सूत्रं चतुर्थीकर्मप्रकरणीयमिति रामदत्तादयो मन्यन्ते, तदनुसारेण तत्रैव व्याख्यातमेतत्। अभिगमनोत्तरकालीनहृदयस्पर्शविधायकमेतद् गर्भाधानीयमेवेति भाष्यकृतः। गोभिलः—यदा ऋतुमती भवत्युपरतशोणिता तदा सम्भवकालः। सम्भवकालो मैथुनकालः।

साध्वी पतिव्रता नित्यं सुपुत्रा कष्टचारिणी।
स्वकर्मनिरता हिंस्रा पुण्या पौत्रादिसंयुता।
नित्यं धनकथासक्ता पुत्रधान्यसमन्विता।
मूर्खाऽथाढ्या गुणवती दत्तर्त्वादेः क्रमात् फलम्॥

वेलाफलं स्मृतिरत्ने—

शुभं चैव तु पूर्वाह्णे मध्याह्ने मध्यमं फलम्।
अपराह्णे तु वैधव्यं पूर्वरात्रौ शुभं भवेत्।
मध्यरात्रे तु मध्यं स्यात् पररात्रे शुभान्विता॥

स्थलविशेषेण फलमाह वसिष्ठः—

ग्रामाद् बहिः परग्रामे चेत् स्यात्सा व्यभिचारिणी।
पतिव्रता पतिस्थाने सुशीला गृहमध्यके॥
ग्राममध्ये च वृद्धिश्च विधवा च दिगम्बरा।
परागारे च दुःशीला आयुष्यं जलसन्निधौ।
धनमध्ये तु कन्या या धनधान्यसमृद्धिदा॥

परगृह इत्यनेन पित्रादिगृहमपि गृह्यते। वस्त्रविशेषेण फलभेदमाह वसिष्ठः—

सुभगा श्वेतवस्त्रा स्याद् दृढवस्त्रा पतिव्रता।
क्षौमवस्त्रा क्षितीशा स्यान्नववस्त्रा सुखान्विता॥
दुर्भगा जीर्णवस्त्रा स्याद्रोगिणी रक्तवाससा।
नीलाम्बरधरा नारी विधवा पुष्पिता यदि।
मलिनाम्बरतो नारी दरिद्रा स्याद्रजस्वला॥

देवरातः—

सम्मार्जनीकाष्ठतृणाग्निशूर्पान् हस्ते दधाना कुलटा तदा स्यात्।
तल्पोपभोगे तपसि स्थिता चेद् दृष्टं रजो भाग्यवती तदा स्यात्॥ इति।

आपस्तम्बः—

स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते।
गम्या निवृत्ते रजसि नानिवृत्ते कथञ्चन॥

पराशरः—

ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति।
स गच्छेन्नरकं घोरं ब्रह्महेति तथोच्यते।

सन्निधावित्युक्तेरसन्निहितस्य गमनाभावे न दोषः।

इदं फलं प्रथमरजोदर्शन एव। रजोबिन्दुफलमाह वसिष्ठः—

वस्त्रे स्युर्विषमा रक्तबिन्दवः पुत्रमाप्नुयात्।
समाश्चेत् कन्यका चेति फलं स्यात्प्रथमार्तवे॥

रजस्वलानियमानाह दक्षः—

आर्तवाभिप्लुता नारी नैकवेश्मनि संविशेत्।
न संसर्गं व्रजेत् सर्वैः स्नात्वा पापैः प्रमुच्यते॥
अञ्जनाभ्यञ्जने स्नानं प्रवासं दन्तधावनम्।
न कुर्यात् सार्तवा नारी ग्रहाणामीक्षणं तथा॥
नखानां कृन्तनं रज्जुतालपत्रादिबन्धनम्।
दग्धे शरावे भुञ्जीत पेयं चाञ्जलिना पिबेत्॥

चतुर्थदिने च स्नानादिना शुद्धा भवति। "सचैलं सङ्गवे स्नायात्" इति वचनविरोधात्, सूर्योदयात् पूर्वं स्नानाचरणं दुराचार एव।

प्रथमर्तौ तु विशेषः स्मृतिचन्द्रिकायां स्मृत्यन्तरे—

प्रथमर्तौ तु पुष्पिण्याः पतिपुत्रवतीस्त्रियः।
अक्षतैरासनं कुर्यात्तस्मिंस्तामुपवेशयेत्॥
हरिद्रागन्धपुष्पादीन् दद्यात्ताम्बूलकं स्रजम्।
आशिषो वाचयेयुस्ताः पतिपुत्रवती भव॥
दीपैर्नीराजनं कुर्यात् सदीपे वासयेद् गृहे।
लवणापूपमुद्गादि दद्यात्ताभ्यः स्वशक्तितः॥ इति।

देवलः—

यः स्वदारानृतुस्नातान् स्वस्थः सन्नोपसर्पति ।
भ्रूणहत्यामवाप्नोति गर्भं प्राप्य विनाश्य सः ॥

स्वस्थः रोगादिरहितः । अस्वास्थ्ये तु न दोषः ।

अथ रजस्वलाया ग्रहणादिनिमित्तकस्नानप्राप्तौ नोदकमज्जनरूपं स्नानम्, किन्तु पात्रान्तरितजलेन स्नात्वा "न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत्" इति । एवं मृताशौचादिनिमित्तकस्नानप्राप्तावपि ।

ज्वरे तूशनाः—

ज्वराभिभूता या नारी रजसा च परिप्लुता ।
कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा ॥
चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम् ।
सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् ॥
दश द्वादशकृत्वो वा आचामेच्च पुनः पुनः ।
अन्ते च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥ इति ।

इदं चातुरमात्रे ज्ञेयम् । "आतुरे स्नान उत्पन्ने दशकृत्वो ह्यनातुरः" इति पराशरोक्तेः ।

अथ सगोत्रयोर्योनिसम्बन्धिन्योर्वा रजस्वलयोः परस्परं स्पर्शे तदैव स्नानमात्रेण शुद्धिः । बुद्ध्या स्पर्शे एकरात्रमुपवासः । अथ रजसि प्रथमदिननिर्णयः—रात्रेः पूर्वभागद्वये पूर्वं दिनं प्रथम् । तृतीयभागे रजोदर्शने उत्तरदिनं प्रथमम् । यद्वा अर्धरात्रात्पूर्वं पूर्वदिनं प्रथमम् । अर्धरात्रादूर्ध्वमुत्तरदिनं प्रथमम् ।

यस्याः प्रायेण मासे रजोदर्शनं तस्याः सप्तदशदिनपर्यन्तं पुना रजोदर्शने स्नानाच्छुद्धिः । अष्टादशाहे एकरात्रमशुचित्वम् । एकोनविंशे द्विरात्रम् । विंशतिप्रभृति त्रिरात्रम् ।

अथ गर्भाधाने अस्तादिविचारः—गर्भाधाने गुरुशुक्रास्ताधिकमासादिदोषो नास्ति । मुख्यकालातिक्रमे त्वस्तादिदोषोऽस्त्येवेति । ऋतुशान्तिरस्तादौ न कार्या । तदनुरोधेन गर्भाधानं च न कार्यमिति ।

बौधायनः—

त्रीणि वर्षाण्यृतुमतीं यो भार्यां नोपगच्छति ।
स तुल्यं ब्रह्महत्याया दोषमृच्छत्यसंशयम् ॥

प्रथमोद्गतर्त्तुकालात् त्रीणि वर्षाणि तत्सन्निधिर्न त्याज्येत्यर्थः ।

तथा—

ऋतौ नोपेति यो भार्यामनृतौ चोपगच्छति ।
तुल्यमाहुस्तयोर्दोषमयोनौ यश्च सिञ्चति ॥

अयोनौ योनीतररन्ध्रे ।

गौतमः—

'ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम् ।' सर्वत्र ऋतावनृतौ च ।

बृहस्पतिः—

ऋतुकालाभिगमनं कुर्यात् पर्वाणि वर्जयेत् ।
स्त्रियाः शुक्रेऽधिके स्त्री स्यात्पुमान् पुंसोऽधिके भवेत् ॥
तस्माच्छुक्रविवृद्ध्यर्थं वृष्यं स्निग्धञ्च भक्षयेत् ।
लघ्वाहारां स्त्रियं कुर्यादेवं सञ्जनयेत् सुतम् ॥
ऋतुकालाभिगमनं पुंसा कार्यं प्रयत्नतः ।
सदैव वा पर्ववर्जं स्त्रीणामभिमतं हि तत् ॥

ऋतुः स्त्रीणां गर्भग्रहणयोग्यावस्था, तदुपलक्षितः काल ऋतुकालः । वृष्यं वृषः शुक्रं तस्मै हितं क्षीरादि । सदैव वेति अनृतावपीत्यर्थः । पर्ववर्जमिति ऋतावनृतावपि, पर्वपदं निषिद्धकालोपलक्षणम् । अत्रेदं तत्त्वम्—ऋतौ गमनमावश्यकं स्त्रियः सकामत्वे त्वनृतावपि तद्रक्षार्थं गमनं कार्यम्, अनृतूपगमे दोषाभिधानं त्वकामोपगमविषयमिति ।

मनुः—

ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः ।
तासामाद्याश्चतस्रस्तु निन्दितैकादशी च या ॥
त्रयोदशी च शेषास्तु प्रशस्ता दशरात्रयः ।
युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ॥

तथा—

नोपगच्छेत् प्रमत्तोऽपि स्त्रियमार्त्तवदर्शने ।
समानशयने चैव न शयीत तया सह ॥
रजसाऽभिप्लुतां नारीं नरस्याभ्युपगच्छतः ।
प्रज्ञा यशो बलञ्चक्षुरायुश्चापि प्रहीयते ॥
तां विवर्जयतस्तस्य रजसा समभिप्लुताम् ।
प्रज्ञा लक्ष्मीर्यशश्चक्षुरायुश्चैव प्रवर्द्धते ॥

तथा—

शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला ।
दैवे कर्मणि पित्र्ये च पञ्चमे शुद्धिमाप्नुयात् ॥
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी ।
तृतीये रजकी प्रोक्ता चतुर्थेऽह्नि शुद्ध्यति ॥

अत्र चाण्डालीत्वाद्यतिदेशस्तत्तज्जातीयवदस्पृश्यत्वबोधनार्थः ।

हेमाद्रौ व्यासः—

रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः ।
पञ्चम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः ॥
सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः पुमान् ।
नवम्यां सुभगा नारी दशम्यां प्रवरः सुतः ॥
एकादश्यामधर्म्या स्त्री द्वादश्यां पुरुषोत्तमः ।
त्रयोदश्यां सुता ज्ञेया वर्णसङ्करकारिणी ॥
धर्मज्ञश्च कृतज्ञश्च आत्मवेदी दृढव्रतः ।
प्रजायते चतुर्दश्यां पञ्चदश्यां पतिव्रता ।
आश्रयः सर्वभूतानां षोडश्यां जायते पुमान् ॥

पारस्करः—

'यदि दिवा मैथुनं व्रजेत् क्लीबा अल्पवीर्या अल्पायुषश्च प्रसूयन्ते तस्मादेतद्वर्जयेत् ।' शङ्खलिखितौ—

'यस्मिन्भावोऽर्पितः स्त्रीणामार्त्तवे तच्छीलं पुत्रञ्जनयन्ति ।'

यमः—

यदि संयोगकाले तु पुरुषो रागमोहितः ।
द्विधा समुत्सृजेच्छुक्रं यमकं तत्र जायते ॥

विष्णुपुराणम्—

ऋतुकालाभिगामी स्याद्यावत्पुत्रो न जायते ।
ऋणापकर्षणार्थं हि पुत्रस्योत्पादनं प्रति ॥

यतितव्यमिति शेषः ।

तथा—

नास्नातां तु स्त्रियं गच्छेन्नातुरां न रजस्वलाम् ।
नानिष्टान्न प्रकुपितान्नाप्रशस्तान्न गुर्विणीम् ॥
नादक्षिणान्नान्यकामान्नाकामान्नान्ययोषितम् ।
क्षुत्क्षामामतिभुक्तां वा स्वयञ्चैभिर्गुणैर्युतः ॥
नान्ययोनावयोनौ च नोपयुक्तौषधिस्तथा ।
देवद्विजगुरूणां च व्यवायी नाश्रमे भवेत् ॥
चैत्यचत्वरतीरेषु नैव नैव चतुष्पथे ।
नैव श्मशानोपवने सलिलेषु महीपते ॥
प्रोक्तपर्वसु शेषेषु नैव भूपाल सन्ध्ययोः ।
गच्छेद्व्यवायं मतिमान्न मूत्रोच्चारपीडितः ॥

गुर्विणीनिषेधः षष्ठाष्टममासयोरेवेति गौडाः ।

प्रोक्तपर्वसु—

चतुर्दश्यष्टमी चैव अमावास्याऽथ पूर्णिमा ।
पर्वाण्येतानि राजेन्द्र रविसंक्रान्तिरेव च ॥

इत्युक्तेषु । व्यवायो मैथुनम् । मदनरत्ने व्यासः—

वृद्धां वन्ध्यामसद्वृत्तां मृतापत्यामपुष्पिणीम् ।
कन्यां च बहुपुत्राञ्च वर्जयन् मुच्यते भयात् ॥

वृद्धां गतरजस्काम् ।

विष्णु :—

न श्राद्धं भुक्त्वा, न दत्वा, नामन्त्रितः श्राद्धे, न व्रती, न दीक्षितो न देवतायत्न-श्मशानेषु, न शून्यालयेषु, न वृक्षमूले, न दिवा, न सन्ध्ययोः, न मलिनां नाभ्यक्तां नाभ्यक्तः न रोगार्त्तान्न रोगार्त्तः न हीनाङ्गीन्नाधिकाङ्गी तथैव च वयोऽधिकाम्, नोपेयाद् गर्भिणीन्नारीन्दीर्घमायुर्जिजीविषुः।

दत्वेत्यत्र श्राद्धमित्यनुषज्यते। वयोधिका उपरतरजस्केति चिन्तामणिः। अत्र गर्भिणीनिषेधोऽप्यकामविषयः। अत एववशिष्ठ :—

अपि च काठके प्रवचने विज्ञायते 'अद्य श्वो वा विजनिष्यमाणाः पतिभिः सह शयीरन्निति स्त्रीणामिन्द्रदत्तो वर' इति।

तदेव वरप्रदानं स्पष्टयति पैठीनसिः—

त्वाष्ट्रं विश्वरूपञ्जघान वज्रेणेन्द्रः। तं देवा ब्रह्महन्नित्यवदन् स स्त्रिय उपागृह्णाद् वरं दास्यामीति, ततोऽस्यास्तृतीयं ब्रह्महत्यायाः प्रपद्यन्ते एकं भूमिर्वनस्पतयश्चैकम् आसां मघवा तुष्टः प्रायच्छद्वरं भूमेः स्थिरत्वं वृक्षाणां छिन्नप्ररोहणं स्त्रीणां सर्वकालेषु सम्भव इति।

सम्भवः सम्भोगः। आपस्तम्बः—

सदा निशायां दारानलङ्कुर्यात्।

विष्णुपुराणे—

स्नातः सुगन्धिधृक् प्रीतो नाध्मातः क्षुधितोऽथवा।
सकामः सानुरागश्च व्यवायं पुरुषो व्रजेत्॥

मनुः—

यदा तु दक्षिणे पार्श्वे देहे वहति मारुतः।
तदा ऋतौ व्रजेत् कान्तां पर्ववर्जं सकृत् बुधः॥

वृद्धशातातपः—

ऋतौ तु गर्भशङ्कित्वात् स्नानं मैथुनिनः स्मृतम्।
अनृतौ तु सदा कार्यं शौचं मूत्रपुरीषवत्॥

अत्यन्तलेपे पुरीषवत्, अल्पलेपे मूत्रवदिति व्यवस्थितो विकल्पः।

गौतमः—

न मिथुनीभूय शौचं प्रति विलम्बेत।

शौचमत्र लेपप्रक्षालनाचमनमात्रं पूर्वोक्तम्, ऋतुगमने स्नानं तु कर्माधिकारापादकं न तु चाण्डालादिस्पर्शवदृतुगमनेनाप्रायत्यं जन्यते, तच्च स्नानेनापनीयते। येन रात्रावपि स्नानं स्यात्तस्मात् स्नानं प्रातरेवेति निबन्धारः।

वृद्धशातातपः—

द्वावेतावशुची स्यातां दम्पती शयनङ्गतौ।
शयनादुत्थिता नारी शुचि स्यादशुचिः पुमान्॥

शुचिः स्नानप्रोक्षणे विनापि, न तु लेपप्रक्षालनाचमनयोर्निवृत्तिः, तयोर्मलसम्बन्धोपाधिप्रयुक्तयोर्न्यायप्राप्तत्वे मैथुनानन्तरमनिवार्यत्वादित्याहुः। कृतशौचौ च तौ न तस्यां रात्रावेकशय्यायां शयीयाताम्।

यदाह आपस्तम्बः—

'यावत्सन्निपातं सह शय्या ततो नाना।'

सन्निपातोऽभिगमः। नाना भिन्ना शय्या।

विष्णुपुराणे—

ऋतावभिगमश्शस्तः स्वपत्न्यामवनीपते।
पुन्नक्षत्रे शुभे काले तासु युग्मासु रात्रिषु॥

याज्ञवल्क्यः—

एवं गच्छन् स्त्रियं श्यामां मघां मूलं च वर्जयेत्।

वामनपुराणे—

बुधे च जायान्न समाचरेत। तथा—पूर्णासु योषित्परिवर्जनीया।

ज्योतिषे—

ज्येष्ठा मूला मघाश्लेषा रेवती कृत्तिकाश्विनी।
उत्तरात्रितयं त्यक्त्वा पर्ववर्जं व्रजेदृतौ॥

सोमशेखरे—

सर्पाश्विमघमूलासु पौष्णे गर्भो विगर्हितः।
श्रीकामश्च त्यजेन्नारीं पञ्चम्यामुत्तरात्रये॥

दाक्षिणात्यनिबन्धे श्रीधरः—

षष्ठ्यष्टमीम्पञ्चदशीञ्चतुर्थीञ्चतुर्दशीमप्युभयत्र हित्वा ।
शेषाः शुभाः स्युस्तिथयो निषेके वाराः शशाङ्कार्यसितेन्दुजानाम् ॥

उभयत्र पक्षद्वये ।

कृत्यचिन्तामणौ—

पौष्णमूलमघास्त्याज्या इति भीमपराक्रमः ।
लग्नञ्च सूतिकारिष्टं वर्जितं शुभदं भवेत् ॥
नवपञ्चमोदयगते सुरमन्त्रिणि भार्गवे च बलयुक्ते ।
पापेषु दुर्बलेषु च जन्मविलग्नेषु चाधानम् ॥

वराहः—

शशाङ्कलग्नोपगतैः शुभग्रहैस्त्रिकोणजायार्थसुखास्पदस्थितैः ।
तृतीयलाभारिगतैश्च पापैः सुखी सगर्भो रविणा च वीक्षितः ॥

तथा—नखदशनक्षतानि कुर्याद्दतुसमये पुरुषः स्त्रियः कथञ्चित् । अनेकभार्यस्य ऋतुयौगपद्ये देवलः—

यौगपद्ये तु तीर्थानां विवाहक्रमशो व्रजेत् ।
रक्षणार्थमपुत्रां वा ग्रहणक्रमशोऽपि वा ॥

तीर्थम् ऋतुः । अपुत्रां वेति अपुत्रामादौ व्रजेदित्यर्थः । ग्रहणमृतुग्रहणम् । यदि केनचित्कारणेनात्र मुख्यकालातिपातस्तत्राह गृह्यासंग्रहकारः—

ऋतु पुंसवने दैवात् स्वकालेन कृते यदि ।
सीमन्तकरणात् पूर्वं कृत्वा सीमन्तमाचरेत् ॥

अत्र केचिद् गृह्यान्तर्गततया पठन्ति, अथ गर्भाधानं स्त्रियाः पुष्पवत्याश्चतुरहादूर्ध्वं स्नात्वा विरजायाः । तथा—तस्मिन्नेव दिवा आदित्यं गर्भमित्यादित्यमवेक्षते । तथा—दक्षिणेन पाणिना ऊरू प्रसार्य प्रजास्थानमभिमृशति—"पूषा भगं सविता मे ददातु रुद्रः कल्पयति ललामगुम्, विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु, आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥" तथा—

गर्भं धेहि सिनीवाली गर्भं धेहि पृथुष्टुके ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ इति ।

संसृजेथास्तेजो वैश्वानरो दद्याद् ब्रह्माणमामन्त्रयते—"ब्रह्मा गर्भं दधातु" इति, प्राङ्मुख उदङ्मुखो वोपविष्टो मन्थयते। तथा "रेतो मूत्रम्" इति चैके श्रावणं कुर्यात्। तथा कण्डिकान्तरे—"जाया हृदयमालभ्य पूर्ववत्" इति। रामदत्तपद्धतिरप्येतदनुसारिण्येव। वस्तुत एतत्सर्वं बहुषु गृह्यपुस्तकेष्वनुपलम्भात्कर्कहरिहरजयरामगदाधरादिभिर्भाष्यकृद्भिरव्याख्यातत्वात्तेषां पद्धतिविसंवादाच्च गृह्यबहिर्भूतमेव, अत एव अथ गर्भाधानमन्त्रव्याख्येति प्रतिज्ञाय यत्तो सुसीम एत्येक एव मन्त्रः शत्रुघ्नानन्तहलायुधादिभिर्व्याख्यातो न तूपदर्शितमन्त्रा अपीत्यलं विस्तरेण।

अभिगमनानन्तरं दैवाद् गर्भस्याग्रहणे तद्ग्रहणोपायमाह पारस्करः—"सा यदि गर्भं न दधीत सिंह्याः श्वेतपुष्प्या उपोष्य पुष्येण मूलमुत्थाप्य चतुर्थेऽहनि स्नातायां निशायामुदपेषं पिष्ट्वा दक्षिणस्यां नासिकायामासिञ्चति "इयमोषधी त्रायमाणा सहमाना सरस्वती। अस्या अहं बृहत्याः पुत्रः पितुरिव नाम जग्रभमिति"॥ सा नारी चेद् गर्भं न दधीत धारयेत्तदा उपोष्य पुनर्वसुनक्षत्रदिवसे उपवासं कृत्वा श्वेतपुष्प्याः शुक्लप्रसूनायाः सिंह्याः कण्टकारिकाया मूलं शिफां पुष्येण चन्द्रमसा युक्तेन पुष्यनक्षत्रेण उत्थाप्य उद्धृत्य धारयेत्तद्रजोदर्शनाच्चतुर्थेऽहनि स्नातायां भार्यायां सत्यां निशायामुदपेषं पिष्ट्वा जलेन पिष्ट्वा तस्या दक्षिणस्यां नासिकायामासिञ्चति प्रक्षिपेत् "इयमोषधी त्रायमाणा" इति मन्त्रेणेत्यर्थः। मन्त्रार्थो यथा—इयं बृहती ओषधी व्याधिनाशकरी त्रायमाणा रक्षाकरी सहमाना उत्पन्नदोषमर्षणकरी सरस्वती वाक्प्रसादहेतुः, अतोऽस्या बृहत्याः प्रभावात् पुत्र उत्पत्स्यमानरूपोऽहम् "आत्मा वै जायते पुत्रः" इति श्रुतेः पितुरिव पितृसदृशं नामप्रसिद्धिं जग्रभं गृह्णीयामिति। हलायुधस्तु—अस्यां बृहत्यां पुत्रः पितुरिव नाम जग्रभदिति पाठमङ्गीकुर्वाणोऽस्यां बृहत्यां पुत्रो नाम जग्रभत् प्रकाशं गृह्णातु किंभूतं नाम पितुरिव पितृसदृशमित्यर्थे इति व्याख्यातवान्।

अथ गर्भिणी तत्पतिधर्मा, यथा दाक्षिणात्यनिबन्धे वराहः—

सामिषमशनं यत्नात्प्रमदा परिवर्जयेदतः प्रभृति।

तत्रैव गृह्यकारिकायाम्—

अङ्गारभस्मास्थिकपालचुल्लीशूर्पादिकेषूपविशेन्न नारी।
सोलूखलाद्ये दृषदादिके वा यन्त्रे तुषाद्ये न तथोपविष्टा॥
नो मार्जनीं गोमयपिण्डकादौ कुर्यान्न वारिण्यवगाहनं सा।
अङ्गारभूत्या न नखैर्लिखेत् क्ष्मां कलिं वपुर्भङ्गमथो न कुर्यात्॥

नो मुक्तकेशी विवसाऽथवा स्याद् भुङ्क्ते न सन्ध्यावसरे न शेते।
नामङ्गलं वाक्यमुदीरयेत् सा शून्यालयं वृक्षतलं न यायात्॥

तत्रैव विष्णुधर्मोत्तरे—

कटुतीक्ष्णकषायाणि अत्युष्णालवणानि च।
आयासं च व्यवायं च गर्भिणी वर्जयेत् सदा॥

हेमाद्रौ कौण्डिन्यः—

मुण्डनं पिण्डदानं च प्रेतकर्म च सर्वशः।
न जीवत्पितृकः कुर्याद् गुर्विणीपतिरेव च॥

मिताक्षरायाम्—

उदन्वतोऽम्भसि स्नानं नखकेशादिकर्त्तनम्।
अन्तर्वत्न्याः पतिः कुर्वन्न प्रजा जायते ध्रुवम्॥

उदन्वतः समुद्रस्य, अन्तर्वत्न्याः गर्भिण्याः।

प्रयोगपारिजाते कश्यपः—

गर्भिणी कुञ्जराश्वादिशैलहर्म्यादिरोहणम्।
व्यायामं शीघ्रगमनं शकटारोहणं त्यजेत्॥

मदनरत्ने स्कान्दे—

हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा।
कूर्पासकं च ताम्बूलं मङ्गल्याभरणं शुभम्॥
केशसंस्कारकबरी करकर्णविभूषणम्।
भर्त्तुरायुष्यमिच्छन्ती गर्भिणी दूरयेन्नहि॥

बृहस्पतिः—

चतुर्थे मासि षष्ठे वाप्यष्टमे गर्भिणी यदा।
यात्रा नित्यं विवर्ज्या स्यादाषाढे तु विशेषतः॥

याज्ञवल्क्यः—

दोहदस्याप्रदानेन गर्भो दोषमवाप्नुयात्।
वैरूप्यं मरणं वापि तस्मात्कार्यं प्रियं स्त्रियाः॥

दोहदं गर्भिणीप्रियम्।

आश्वलायनः—

वपनं मैथुनं तीर्थं वर्जयेद् गर्भिणीपतिः ।
श्राद्धं च सप्तमान्मासादूर्ध्वं चान्यत्र वेदवित् ॥

श्राद्धं च तद्भोजनमिति प्रयोगपारिजातः ।

मुहूर्त्तदीपिकायाम्—

क्षौरं शवानुगमनं नखकृन्तनं च युद्धादिवास्तुकरणं त्वतिदूरयानम् ।
उद्वाहमौपनयनं जलधेश्च गाहमायुःक्षयार्थमिति गर्भिणिकापतीनाम् ॥

गालवः—

दहनं वपनं चैव चौलं च गिरिरोहणम् ।
नावश्चारोहणं चैव वर्जयेद् गर्भिणीपतिः ॥

सूतिकागृहं नैर्ऋत्यां कार्यम्, तथा च वशिष्ठः—

वारुण्यां भोजनगृहं नैर्ऋत्यां सूतिकागृहम् । इति ।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके गर्भाधानप्रकाशः ॥

——

अथ पुंसवनम्

तत्र पारस्करः—

अथ पुंसवनम्,[1] अथावसरप्राप्तं पुंसवनम्, पुमान् सूयते येन कर्मणा 'पुंसवनात् पुंसीकरोतीति' स्मरणात्, तत्पुंसवनं संस्कारविशेषो व्याख्यास्यत इत्यर्थः। तथा— पुरा स्पन्दत इति मासे द्वितीये तृतीये वा, तच्च पुरा प्राक् स्पन्दतः स्पन्दनाद्भवतीति हेतोर्गर्भधारणकालाद् द्वितीये तृतीये वा मासे कार्यमित्यर्थ इति कर्कः। पुरा अग्रे स्पन्दते चलिष्यति यावत्पुरानिपातयोरिति भविष्यति लट्, इति हेतोर्द्वितीये तृतीये वा मासे तत्कर्मानुष्ठेयमित्यर्थ इति हरिहरः। फले तु न भेदः।

राजमार्त्तण्डे व्यासवाक्यम्—

अरिक्तायां तिथौ शुक्ले करणे विष्टिवर्जिते।
व्यतीपाते न वा वज्रे शूले गण्डे च हर्षणे॥
व्याघाते वैधृतौ योगे क्षीणे नास्तङ्गते विधौ।
हस्तार्द्रातिष्यमूलानि सौम्यो विष्णुः पुनर्वसूः॥
प्रोष्ठपदाद्वयं प्रोक्तमाषाढाद्वयमेव च।
श्रेष्ठान्येतानि हारीत धिष्ण्यान्येकादशैव तु॥
कन्यालिमीनसिंहेषु कर्कटस्योदये तथा।
गुर्वादित्यकुजानां च वारे पुंसवनं हितम्॥

नन्दः—

चन्द्रं सौरिं बुधं त्यक्त्वा कुर्यात्पुंसवनादिकम्।

व्यवहारसमुच्चये—

दशमैकादशत्रिस्थाः शत्रुस्थाश्चाशुभग्रहाः।
लग्नात् पुंसवने कुर्युः पुत्रं केन्द्रे शुभग्रहाः॥

---

१. इदं पुंसवनं प्रतिगर्भं कार्यं गर्भसंस्कारत्वात्। प्रथमगर्भे लोपे तु प्रतिगर्भं तयोर्लोपप्रायश्चित्तमावश्यकम्। न च प्रथमापत्ये तस्य प्रायश्चित्तेन द्वितीयादिगर्भाणां संस्कारसिद्धिर्भवति। प्रायश्चित्तेन हि प्रत्यवायपरिहारमात्रं न त्वपूर्वाख्यातिशयोत्पादनम्, तत्तु संस्कारविधिनैवेति युक्तं प्रतिगर्भं प्रायश्चित्तम्।

कृत्यचिन्तामणौ—

केन्द्रत्रिकोणनिधनव्ययलग्नभेषु पापाः स्थिता दधति कष्टफलं वधूनाम् ।
एकोऽपि चेद्भवति केन्द्रगतस्त्रिकोणे सौम्यः करोति चिरजीवितगर्भपुष्टिम् ॥

पारस्करः—यदहः पुंसा नक्षत्रेण चन्द्रमा युज्येत तदहरुपवास्याप्लाव्याहते वाससी परिधाप्य न्यग्रोधावरोहाञ्छुङ्गाँश्च निशायामुदपेषं पिष्ट्वा पूर्ववदासेचनं "हिरण्यगर्भोऽद्भ्यः संभृतः" इत्येताभ्याम् । यदहर्यस्मिन्नहनि पुंसा नक्षत्रेण पुन्नामधेयेन हस्तपुष्यादिना चन्द्रमा युज्येत चन्द्रस्य योगो भवेत्तदहस्तस्मिन्नहनि उपवास्य भार्य्यामभोजनं कारयित्वा आप्लाव्य स्नापयित्वा अहते नवे सदसे सकृत्प्रक्षालिते वाससी अन्तरीयोत्तरीये वसने परिधाप्य परिधानं कारयित्वा न्यग्रोधावरोहान् न्यग्रोधस्य वटस्य अवरोहान् अवाचीनमधो रोहन्ति जायन्ते इत्यवरोहा 'बड़रुख' इति प्रसिद्धास्तान् शुङ्गांश्च अग्रपल्लवान् मुकुलाकारानपि निशायां रात्रावुदपेषं पिष्ट्वा जलेन पिष्ट्वा पूर्ववद् गर्भधारणोक्तवद् वधूनासिकादक्षिणपुटे आसेचनं कुर्यात्, "हिरण्यगर्भः" इति "अद्भ्यः सम्भृतः" इत्येताभ्यां मन्त्राभ्यामित्यर्थः । पुन्नक्षत्राणि च रत्नकोशे प्रदर्शितानि यथा—"हस्तो मूलं श्रवणः पुनर्वसुमृगशिरःपुष्याणि" इति । तत्र प्रथममन्त्रो यथा—"हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत् । स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥" अस्यार्थः—अग्रे प्रथमं हिरण्यगर्भः तन्नामा पुरुषः समवर्त्तत समभवत्, यो हिरण्यगर्भो जातो जातमात्रो भूतस्य प्राणिजातस्य एकोऽद्वितीयः पतिरासीत् स्वामी बभूव, एवंभूतः स पृथिवीं दाधार धृतवान्, न केवलं पृथिवीमपि तु इमां द्यामुत अन्तरीक्षमपि, एवंभूताय कस्मै काय प्रजापतये देवाय हविषा विधेम विदधुरिति । द्वितीयमन्त्रो यथा—"अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्मणः समवर्त्तताग्रे । तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे ॥" अस्यार्थः—यो विष्णुः अग्रे प्रथमम्, अद्भ्यः जलात् पृथिव्यै पृथिव्या अपि चकारो भिन्नक्रमः सम्भृतः समवर्त्तत उत्पन्नोऽभवत् जलपृथिव्योरुपादानं पञ्चभूतोपलक्षणार्थम्, कस्माद् रसात् कामात् सिसृक्षारूपान्निमित्तकारणात्, तस्य विश्वकर्मणो विष्णोर्यद् रूपं मूर्त्तिं विदधद्धारयन् त्वष्टा आदित्यः, अग्रे पुरतः सर्वेषामपरोक्षमेति आगच्छति तद्रूपं मर्त्यस्य मनुष्यस्य देवत्वं देवत्वेनैव भवति किं भूतम् आजानं यावज्जीवमिति । विष्णुः सृष्ट्यादौ सिसृक्षां निमित्तकारणं प्राप्य पञ्चमहाभूतेभ्य उपादानकारणेभ्य उत्पद्यते तदनु तस्य रूपं धारयन् सवितागच्छतीति

सर्वेषां प्रत्यक्षं तद्रूपञ्च मनुष्यस्य देवत्वेन भवतीति यावत्। तथा—'कुशकण्टकं सोमांशुञ्चैके'। एके आचार्या न्यग्रोधावरोहशुङ्गेषु पिष्यमाणेषु कुशस्य कण्टकं मूलं सोमांशुं सोमलताखण्डं च प्रक्षिपन्तीत्यर्थः। एतत्पक्षे द्रव्यचतुष्टयपेषणम्, एतच्च पुंसवनाख्यं कर्म कालातिक्रमेऽपि कार्यमेव। तदुक्तम्—

एतदेव पुरा गर्भचलनादकृतं यदि।
सीमन्तात्प्राग्विधातव्यं स्पन्दितेऽपि बृहस्पतिः॥ इति।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके पुंसवनप्रकाशः[1] ॥

---

१. अथ पुंसवनप्रयोगः—गर्भाधानोत्तरं द्वितीये तृतीये वा मासि पूर्वोक्तकाले कर्ता शुचिर्गर्भिणीमुपवासं कारयित्वा स्नापयित्वाऽहते वाससी परिधाप्य कालाद्युल्लिख्य 'अस्य गर्भस्य बीजगर्भसमुद्भवैनोनिबर्हणार्थं पुंसवनं करिष्ये' इति सङ्कल्प्य पुण्याहमातृपूजाभ्युदयिकानि कृत्वा न्यग्रोधाऽवरोहाग्रपल्लवानुदकेन पिष्ट्वा 'हिरण्यगर्भोऽसद्यः संभृतः' इति द्वाभ्यामृग्भ्यां पत्न्या नासिकादक्षिणपुटे आसिञ्चेत। अत्र यदि मे वीर्यवान् पुत्रो भवत्विति कामना तत उदकपूर्णं शरावं वध्वा उपस्थे स्थापयित्वा "सुपर्णोऽसि" इति विकृतिच्छन्दस्कया 'स्वःपत' इत्यन्तया गर्भाशयं स्पृष्ट्वा अभिमन्त्रयेत्। इति पुंसवनम्।

अथ सीमन्तोन्नयनम्

तत्र पारस्करः—'अथ सीमन्तोन्नयनम्'। अथ पुंसवनानन्तरं क्रमप्राप्तं सीमन्तोन्नयनं सीमन्तस्य "सीमन्तः कथ्यते स्त्रीणां केशमध्ये तु पद्धतिः" इत्युक्तलक्षणस्य उन्नयनमूर्ध्वप्रापणं येन कर्मणा तत्सीमन्तोन्नयनं संस्कारविशेषो व्याख्यास्यत इत्यर्थः। तथा—'पुंसवनवत्' तच्च सीमन्तोन्नयनं पुंसवनवत् कर्त्तव्यमित्यर्थः। अनेन यदहः पुंसा नक्षत्रेण चन्द्रमसो योगस्तदहरुपवास्याप्लाव्याहते वाससी परिधाप्येति लभ्यत इति कर्कः। पुन्नक्षत्रमात्रं लभ्यत इति भर्तृयज्ञादयः। तथा—'प्रथमगर्भे मासे षष्ठेऽष्टमे वा' प्रथमगर्भे गर्भाधानप्रभृति षष्ठेऽष्टमे वा मासि नियमेन तत्कर्त्तव्यम्, गर्भान्तरे त्वनियम इत्यर्थ इति कर्कः। अपरे तु—प्रथमगर्भ एव सीमन्तोन्नयनं विधेयमित्यर्थं वर्णयन्ति। युक्तं चैतत्,

सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता।

इति देवलवचनात्,

सकृच्च कृतसंस्काराः सीमन्तेन द्विजस्त्रियः।
यं यं गर्भं प्रसूयन्ते स सर्वः संस्कृतो भवेत्॥

इति हारीतवचनाच्च, 'प्रथमे गर्भे सीमन्तोन्नयनसंस्कारः' इत्याश्वलायनगृह्यपरिशिष्टाच्च।

भीमपराक्रमः—

वारेण भौमार्कबृहस्पतीनां पुन्नामऋक्षे सितपक्ष एव।
सौम्ये नवांशे यदि कामिनीनां सीमन्तकार्यं शुभकेन्द्रयोगे॥

सुधाकरनिबन्धे—

मासे षष्ठेऽष्टमे वा बलिनि तदधिपे शीतगौ चेष्टपृष्ठे
पुन्नामर्क्षोपजाते नवभवननवांशोदये कामिनीनाम्।
कार्यं सीमन्तकर्म त्रिदशपतिगुरौ केन्द्रगे वा त्रिकोणे
क्रूरैः केन्द्रत्रिकोणव्ययनिधनबहिर्गर्भपुष्टिः शुभः स्यात्॥

ज्योतिषे—

मृगाजरहिते लग्ने नवांशे पुंग्रहस्य च।
केचिद्वदन्ति सीमन्तं तथा रिक्ततरे तिथौ॥

पारस्करः—"तिलमुद्गमिश्रं स्थालीपाकं श्रपयित्वा प्रजापतेर्हुत्वा।" तिलैर्मुद्गैर्मिश्रस्तिलमुद्गमिश्रस्तं स्थालीपाकं चरुं श्रपयित्वा विक्लेद्य प्रजापतेर्हुत्वा तेन चरुणा प्रजापतिदेवताकं होमं विधायेत्यर्थः। इयं चाहुतिराज्यभागानन्तरं स्विष्टकृतः प्राग्विधेया, ततश्चाज्यचरुभ्यां स्विष्टकृद्धोमं विधाय महाव्याहृत्यादिहोमा विधेयाः, "प्राङ्महाव्याहृतिभ्यः स्विष्टकृत्" इति सूत्रात्, ततोऽवशिष्टं बर्हिहोमान्तं कर्म विदध्यात्। एतच्च कर्म बहिश्शालायां भवति, पञ्चसु बहिश्शालायामित्युक्तत्वात्। तथा—'पश्चादग्नेर्मद्रपीठ उपविष्टायां युग्मेन शलाटुग्रप्सेनौदुम्बरेण त्रिभिश्च दर्भपिञ्जुलैस्त्रैण्या शलल्या वीरतरशङ्कुना पूर्णचात्रेण सीमन्तमूर्ध्वं विनयति भूर्भुवःस्वरिति'। अग्नेः पश्चात् पश्चिमतो भर्त्तुर्दक्षिणतो मद्रपीठे मृद्वासने उपविष्टायामासीनायां गर्भिण्यां सत्यां औदुम्बरेण उदुम्बरवृक्षोद्भवेन युग्मेन द्वयादियुग्मफलवता शलाटुग्रप्सेन अपक्वफलस्तवकेन त्रिभिर्दर्भपिञ्जुलैस्त्रिभिर्दर्भपवित्रैः त्रैण्या त्रिषु स्थानेषु एताश्वेताश्चेणी तया शलल्या शलल्याख्यपक्षकण्टकेन वीरतरशङ्कुना शरेषीकया पूर्णचात्रेण सूत्रपरिपूर्णतक्कुणा च एतैः पुञ्जीकृतैः सीमन्तं स्त्रियाः केशरचनाविशेषमूर्द्ध्वं भर्त्ता विनयति प्रापयेत्, केशललाटयोः सन्धिमारभ्योर्ध्वं केशान् द्विधा कुर्यात् 'भूर्भुवःस्वः' इति मन्त्रेणेत्यर्थः। अत्र साकाङ्क्षत्वात् विनयामीत्यध्याह्रियते। मद्रपीठशब्दो गोमयपीठे चतुरस्रे प्रसिद्ध इति भर्तृयज्ञः। ग्रप्सः स्तबकसंघात इति गदाधरः, शाखेत्यपरे। वीरतरशङ्कुः शर इति जयरामः। अश्वत्थशङ्कुः शरेषीका वेति हरिहरः। साम्राश्वत्थशङ्कुरित्यपरे, खादिरः शङ्कुरित्यन्ये, शङ्कुः काण्डः, चात्रं सूत्रकर्त्तनसाधनभूतः कीलस्तकुरिति प्रसिद्धः। तच्च पीतसूत्रपूर्णमिह ग्राह्यमिति रामदत्तादयः। एतच्च कर्म सर्वान्ते भवति, आगन्तुकत्वात्। मन्त्रार्थस्तु—हे पत्नि! भूरादिलोकत्रयं देवत्रयमग्नित्रयं प्राणत्रयं वा त्वत्सुखार्थं तव सीमन्तं विनयामि प्रापयामीति। तथा—'प्रतिमहाव्याहृतिभिर्वा'। प्रत्येकाभिर्महाव्याहृतिभिर्वा विनयनं कार्यमित्यर्थः। वाशब्दो विकल्पार्थः। अत्रापि विनयामीत्यध्याहारः, तथा च भूर्विनयामीत्येवमादिकः प्रयोगः। तथा—त्रिवृतमाबध्नाति, "अयमूर्जावतो वृक्ष ऊर्जीव फलिनी भवेति"। त्रिभिर्वर्त्यते इति त्रिवृद् वेणी, तां प्रति पुञ्जीकृतमौदुम्बरादिपञ्चकं भर्त्ता आबध्नाति, "अयमूर्जा"

इति मन्त्रेणेत्यर्थः। मन्त्रार्थस्तु—हे सीमन्तिनि! अयं वृक्ष ऊर्जावान् ऊर्जा बलं तद्वान् व्यत्ययेन प्रथमास्थाने षष्ठी, अस्य चोर्जावतो वृक्षस्य ऊर्जीव सफलशाखेव त्वमपि फलिनी फलवती भवेति। तत आचाराद्धूमीवायामनेनैव मन्त्रेणोदुम्बरफलयुग्म-सुवर्णघटितकर्करादियुतसूत्रडोलकबन्धनम्। तथा पुष्पविल्वादिफलयुताष्टभाण्डानामेकं गृहीत्वा तज्जलेन विनैव मन्त्रेण वधूस्नपनम्, एवमन्यान्यपि भाण्डान्यादाय तज्जलेन वधूं स्नपयेत्, इत्थं चाष्टवारं स्नपनं भवति, फलपुष्पादिकं च नूतनवस्त्रेण प्रतीक्ष्य वध्वा धर्त्तव्यम्। पारस्करः—"अथाह वीणागाथिनौ राजानं सङ्गायेतां यो वाऽप्यन्यो वीरतर इति" अथौदुम्बरादिपञ्चकबन्धनानन्तरं वीणागाथिनौ वीणां गृहीत्वा गाथां गायनौ। यद्वा—वीणा च गाथा च वीणागाथे ते ययोः स्तः तौ तथा, तौ प्रति राजानं भूपतिं सङ्गायेतां [१]तद्वर्णनसम्बन्धध्रुवादिकं सम्यग्गायेतामित्याह ब्रूयात्। अथवा—अन्योऽपि यो वीरतरः प्रकृष्टशूरः तं गायेतामिति ब्रूयादित्यर्थः। ततश्च विकल्पः। तथा—नियुक्तामप्येके गाथामुपोदाहरन्ति, "सोम एव नो रोजेमा मानुषीः प्रजाः। अविमुक्त चक्र आसीरँस्तीरे तुभ्यमसाविति", एके आचार्या नियुक्तां गाने विहितां सोम एवेति गाथामपि मन्त्रमप्युपोदाहरन्ति, समीपे गायन्ति, अन्ये पुनर्नेत्यर्थः। अपिशब्दः समुच्चये। अपरे तु अपिशब्दं विकल्पार्थकं मत्वा राजवीरतरैतद्गाथाना-मन्यतमस्यैव गानमिच्छन्ति। अपरे तु एतद्गाथागानमेव राजगानमिति वदन्ति। असावित्यत्र नामादेशमाह पारस्करः—'यां नदीमुपावसिता भवति तस्या नाम गृह्णाति'। सीमन्तिनी यां नदीमुपावसिता यस्या नद्याः समीपे स्थिता भवति, तस्या नद्या गाथा-गानकर्त्ता गङ्गे! यमुने! इत्येवमादि सम्बोधनान्तं नाम सोम एवेति मन्त्रे असावित्ये-तत्स्थाने गृह्णीयादित्यर्थः। मन्त्रार्थस्तु—नोऽस्माकं सोम एव चन्द्र एव राजा प्रभुः, अत इमाः प्रजा मानुषीः मानुष्यः सौम्याः न तु राक्षसः, 'यथा राजा तथा प्रजा' इति स्मृतेः। हे गङ्गादिनदि! तुभ्यं तव सोमरूपायास्तीरे प्रजा आसीरन् त्वामाश्रित्य स्थिताः, कीदृशे अविमुक्तचक्रे अनुल्लङ्घितराजाज्ञे "चक्रं रथाङ्गे व्यूहे च राजाज्ञायां प्रवर्त्तने" इत्यभिधानात्। अत इमाः प्रजा भवत्या पालनीया इति।

तथा—'ततो ब्राह्मणभोजनम्' निगदव्याख्यातमेतत्।

यत्तु पराशरमाधवीये—

---

१. तद्वर्तन इति क० पु० पाठः।

[1]ब्रह्मोदने च सोमे च सीमन्तोन्नयने तथा।
जातकर्मनवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्॥

इति धौम्यवचनं तत्कर्माङ्गब्राह्मणभोजनविषयं न त्विष्टकुटुम्बादिभोजनविषयमिति मिश्राः।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
सीमन्तोन्नयनप्रकाशः।

---

१. ऋग्विधाने तु—"अरा इवे जपेन्मन्त्रं शतवारं न संशयः। सीमन्ते च यदा भुङ्क्ते मुच्यते किल्बिषात्तदा॥" इति। स तु मन्त्रो यथा—"अरा इवेदचरमा अहेव प्र प्रजायन्ते अकवा महोभिः। पृश्नेः पुत्रा उपमासो रभिष्ठाः स्वया मत्या संमिमिक्षुः॥" (ऋ० सं० अ ४ अ० ३) इति अस्यार्थः—'अरा इवेत् रथशङ्कव इव अचरमा अनिकृष्टाः सर्वसमाः सहैवोत्पन्नाश्चेत्यर्थः। अहेव अहानीव। दिवसा यथा षष्टिघटिकात्मकाः, तद्वत्सप्तसंख्योपेतसप्तगणरूपेण समा इत्यर्थः। अनेन दृष्टान्तद्वयेन वैसादृश्याभावः प्रतिपादितः। एवमुक्तलक्षणा महोभिस्तेजोभिः प्रप्रजायन्ते प्रकर्षेण प्रादुर्भवन्ति। ते चाकवाः अनल्पाः। यद्वा महोभिरित्यस्य विशेषणम्। पृश्नेर्मध्यमिकाया वाचो गोरूपाया अन्तरिक्षस्य वा (पुत्राः) पुत्रस्थानीयाः उपमासः प्रत्येकं समाना रभिष्ठाः प्रकृष्टवेगाः। एवं महानुभावा मरुतः स्वया मत्या स्वकीयैवानुग्रहबुद्ध्या संमिमिक्षुः वृष्ट्या सम्यक् सिञ्चन्ति' इति। अस्य मन्त्रस्य मरुद्देवतात्मकत्वात्तेषामेवास्मिन् प्रकरणे शुद्धिकरणसामर्थ्यमिति गम्यते।

अथ जातकर्मप्रकाशः[1]

तत्र पारस्करः—सोष्यन्तीमद्भिरभ्युक्षति, "एजतु दशमास्यः" इति। तत्र प्रथमं सोष्यन्तीं गर्भं विमुञ्चन्तीं विजनयन्तीं शूलादिप्रसववेदनान्वितां स्त्रियं भर्त्ता सुखप्रसवार्थं "एजतु दशमास्यः" इति मन्त्रेणाद्भिर्जलेनाभ्युक्षति प्रसिञ्चेदित्यर्थः। मन्त्रो यथा—"एजतु दशमास्यो गर्भो जरायुणा सह, यथा यं वायुरेजति यथा समुद्र एजति, एवायं दशमास्योऽसज्जरायुणा सह।" अस्यार्थः—दशमास्यो दशमासकालावच्छिन्नः सम्पूर्णप्रसवकालीन इति यावत्, गर्भः प्रसिद्धार्थः, एजतु कम्पतां न केवलं गर्भोऽपि तु जरायुणा गर्भवेष्टनेन सह, यथा वायुरेजति कम्पते तथा समुद्र एजति एवायं एवमयं दशमास्यो गर्भो जरायुणा सह अस्रत् अधःपतत्विति। अस्रदित्याशंसायां लिङ्, छान्दसान्यडागमादीनि। तथा—अथावरापतनम्, "अवैतु पृश्नि शैवलं शुने जरायुत्तवे, नैव मांसेन पीवरि न कस्मिंश्चनायतमव जरायु पद्यताम्" इति। अथाभ्युक्षणानन्तरं अवरावपतनं अवरस्योल्वस्यावपतनमधःपतनमनेन जप्तेनेत्यवरापतनः, तं अवतु पृश्नीति मन्त्रं स्त्रीसमीपे उपविश्य भर्ता जपेदित्यर्थः। मन्त्रार्थस्तु—हे सोष्यन्ति! तव जरायु अवैतु अधः पततु, किं भूतं पृश्नि पिङ्गलरूपं शैवलं पिच्छलं जलोपचितं वा, किमर्थं शुने शुनः अन्तवे भक्षणाय, हे पीवरि! गर्भधात्रि! तच्च जरायु मांसेनान्त्ररूपेण सहनैवावपद्यतां मा पततु, पुनः किं भूतं आयतं विस्तृतम्, न कस्मिंश्च न गर्भोपघातके निमित्ते सत्यपीति। तथा—'जातस्य कुमारस्याच्छिन्नायां नाड्यां मेधाजननायुष्ये करोति'। ततो जातस्योत्पन्नस्य कुमारस्य पुत्रस्याच्छिन्नायां नाड्यामखण्डिते नाले नालच्छेदनात् प्रागिति यावत्, मेधा जननायुष्ये मेधां धारणावतीं बुद्धिं जनयतीति मेधाजननं कर्म, आयुषे हितमायुष्यं जीवनबर्द्धनं कर्म, ते करोति पिता कुर्यादित्यर्थः। कुमारग्रहणादतः प्रभृत्युच्यमानानि स्त्रिया न भवन्तीति भाष्यकृतः।

विष्णुपुराणे—

जाते पुत्रे पितुः स्नानं सचैलस्य विधीयते।
जातकर्म ततः कुर्याच्छ्राद्धमभ्युदये च यत्॥

---

१. अस्य फलमाहाश्वलायनः—

गर्भाम्बुपानदोषाणामपनुत्यै शिशुं पिता।
प्राशयेन्मधुना सार्धं साज्यं हैमरसं शुभम्॥ इति।

रत्नमालायाम्—

प्राङ्नाभिवर्द्धनात् पुंसो जातकर्म विधीयते।

नाडीवर्द्धनं नाडीच्छेदनम्।

ब्रह्मपुराणे—

जातश्राद्धेन दद्यात्तु पक्वान्नं ब्राह्मणेषु हि।

एवंविधे श्राद्धे अवनेजनपिण्डदानादि नास्तीति भर्तृयज्ञस्वामिनाविति रत्नाकरः।

संवर्त्तः—

जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते।

एतच्च स्नानं रात्रावपि कर्तव्यम्, नैमित्तकत्वात्।

यदाह व्यासः—

रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः।

नैमित्तकं तु कुर्वीत स्नानं दानं च रात्रिषु॥

नैमित्तिकं दानमप्याह स एव—

ग्रहणोद्वाहसंक्रान्तियात्रादौ प्रसवेषु च।

दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति॥

जैमिनिः—

यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम्।

छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते॥

हेमाद्रौ दानखण्डे वराहपुराणम्—

यावत्कालं सुते जाते न नाडी छिद्यते पुनः।

चन्द्रसूर्योपरागेण तमाहुः समयं समम्॥

विष्णुधर्मोत्तरे—

अच्छिन्ननाड्यां यद्दत्तं पुत्रे जाते द्विजोत्तमाः।

संस्कारेषु च पुत्रस्य तदक्षय्यं प्रकीर्त्तितम्॥

मदनपारिजाते शङ्खः—

कुमारप्रसवे नाभ्यामच्छिन्नायां गुडतिलहिरण्यवस्त्रगोधान्यप्रतिग्रहेष्वदोषः।

कृत्यचिन्तामणौ देवलः—

जाते पुत्रे पिता श्रुत्वा सचैलं स्नानमाचरेत्।

ब्राह्मणेभ्यो यथाशक्ति दत्त्वा पुत्रं विलोकयेत्॥

गर्गः—

श्रुत्वा पुत्रस्य वै जन्म कृत्वा वेदोदिताः क्रियाः।
अच्छिन्ननालं पश्येत्तं दत्वा रुक्मफलान्वितम्॥

आदिपुराणम्—

सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः।
कृत्वा सचैलं स्नानं तु शुद्धो भवति तत्क्षणात्॥

विधिदर्पणे—

जातेऽथ जातकर्म स्यान्न कश्चित्काल इष्यते।

हेमाद्रौ—

जन्मनोऽनन्तरं कार्यं जातकर्म यथाविधि।
दैवादतीतकालं चेदतीते सूतके भवेत्॥

जातकर्मादौ यथोक्तकालातिक्रमात् कालान्तरे क्रियमाणे नक्षत्रादिविचारो ज्ञेयः।
तथा च बृहस्पतिः—

मुख्यालाभे विधिज्ञेन विधिश्चिन्त्यः प्रमाणतः।
नक्षत्रतिथिलग्नानां विचारोऽयं न चान्यथा॥

श्रीपतिः—

मृदुध्रुवक्षिप्रचरेषु भेषु सूनोर्विधेयं खलु जातकर्म।

नारायणपद्धतौ—

जातकर्मकरणं स्थिरलग्ने केन्द्रपञ्चनवमस्थितसौम्ये।
त्र्यायषष्ठसमधिष्ठितपापे जीवसौम्यशशिशुक्रदिनेषु॥

प्रजापतिः—

अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्।
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः॥

अन्ये तु—

मृताशौचस्य मध्ये तु पुत्रजन्म यदा भवेत्।
अशौचापगमे कार्यं जातकर्म यथाविधि॥

इति स्मृतिसंग्रहलिखनादशौचान्ते जातकर्मानुष्ठानमित्याहुः। मेधाजननमाह पारस्करः—अनामिकया सुवर्णान्तर्हितया मधुघृते प्राशयति, "घृतं वा भूस्त्वयि

दधामि भुवस्त्वयि दधामि भूर्भुवःस्वः सर्वं त्वयि दधामि" इति। सुवर्णान्तर्हितया सुवर्णेनाच्छादितया अनामिकयाऽङ्गुल्या मधुघृते एकीकृते घृतं वा केवलं घृतं वा "भूस्त्वयि दधामि" इत्यादि "सर्वं त्वयि दधामि" इत्यन्तेन मन्त्रेण प्राशयति पिता कुमारं प्राशयेदित्यर्थः। अनामिका च दक्षिणैव, दक्षिणस्य पाणेरुपकनिष्ठकयेति गृह्यान्तरदर्शनात्। नन्वत्र "भूस्त्वयि दधामि" इत्यादिवाक्यसमुदायस्य कथमेकमन्त्रत्वमिति चेत्? उच्यते—सर्वान्ते मन्त्रावसानज्ञापकेतिशब्दप्रयोगान्मन्त्रैकत्वमवगम्यते, यथा—दारुभिर्ज्वलन्तमादधाति "भूर्भुवः स्वः" इति आहवनीयमादधाति "भूर्भुवः स्वः" इत्यादौ द्वयोरेव व्याहृत्योस्तिसृणामेव चैकमन्त्रत्वम् इतिशब्दकरणात्तथेहापीति। एवमन्यत्रापि बहूनां मन्त्रवाक्यानामितिकारादिनैकमन्त्रत्वमवधेयम्। प्रतिवाक्यं प्राशनमित्यन्ये। यदि च स्वकाले मेधाजननं केनचित्कारणेन नानुष्ठितं तदा कालान्तरे न भवति, नियतकालत्वात्। तथा च श्रूयते "तस्मात्कुमारं जातं घृतं चैवाग्ने प्रतिलेहयन्ति स्तनं वानुधापयन्तीति" अग्रे घृतं प्रतिलेहयन्ति अनु तत्पश्चात् स्तनं धापयन्ति पाययन्तीति तदर्थः। मन्त्रार्थस्तु—हे कुमार! मेधाजननार्थं केवलं मधुघृतं न दधामि, किन्तु भूरादिलोकत्रयमपीति, पुनरुक्तिरादरार्था। भूस्ते दधामीति क्वचित्पाठः।

आयुष्यकरणमाह पारस्करः—अथास्यायुष्यं करोति नाभ्यां दक्षिणे वा कर्णे जपति, "अग्निरायुष्मान्त्सवनस्पतीभिरायुष्मांस्तेन त्वायुषायुष्मन्तं करोमि। सोम आयुष्मान्त्स ओषधीभिरायुष्माँस्तेनत्वायुषायुष्मन्तं करोमि। ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वायुषायुष्मन्तं करोमि। देवा आयुष्मन्तस्तेऽमृतेनायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। ऋषय आयुष्मन्तस्ते व्रतैरायुष्मन्तस्तेन त्वायुषायुष्मन्तं करोमि। पितर आयुष्मन्तस्ते स्वधाभिरायुष्मन्तस्तेनत्वायुषायुष्मन्तं करोमि। यज्ञ आयुष्मान्त्सदक्षिणाभिरायुष्माँस्तेन त्वायुषायुष्मन्तं करोमि। समुद्र आयुष्मान्त्संस्रवन्तीभिरायुष्माँस्तेन त्वायुषायुष्मन्तं करोमि" इति त्रिः। अथ मेधाजननानन्तरं अस्य शिशोरायुष्यमायुषे हितमायुष्यं कर्म करोति पिता कुर्यात्, तद्यथा—नाभ्यां नाभिप्रदेशे दक्षिणे कर्णे वा "अग्निरायुष्मान्" इत्यादीनष्टौ मन्त्रान् त्रिर्जपति त्रीन् वारान् जपेत्, उपांशु पठेदित्यर्थः। मन्त्रार्थस्तु—अग्निरायुष्मानस्ति स च वनस्पतीभिरिध्मादिभिः काष्ठैः कृत्वाऽयुष्मान् भवति, वनस्पतीभिरिति दीर्घश्छान्दसः, क्वचित्तु ह्रस्वपाठ एव दृश्यते, तेनाग्निसम्बन्धिना आयुषा हे कुमार! त्वा त्वामायुष्मन्तं निर्दुष्टं दीर्घायु-

षं करोमि, एवमुत्तरत्रापि बोध्यम्, तत्र सोमश्चन्द्र ओषधीभिर्व्रीह्यादिभिः। ब्रह्मवेदो ब्राह्मणैरध्येतृभिः। देवा अमृतेन। ऋषयो व्रतैश्चान्द्रायणादिभिः। पितरोऽग्निष्वात्तादयः स्वधाभिः श्राद्धान्नैः। यज्ञो दक्षिणाभिः। समुद्रः स्रवन्तीभिर्नदीभिरित्येतावान् विशेषः। तथा—"त्र्यायुषमिति", उक्तमन्त्राष्टतयपाठानन्तरं त्र्यायुषं "त्र्यायुषं जमदग्नेः" इत्यादि "तन्नो अस्तु त्र्यायुषम्" इत्यन्तं च मन्त्रं तथैव त्रिर्जपेदित्यर्थः। मन्त्रो यथा—"त्र्यायुषञ्जमदग्नेः, कश्यपस्य त्र्यायुषम्, यद्देवेषु त्र्यायुषम्, तन्नो अस्तु त्र्यायुषम्"। अस्यार्थः—जमदग्नेः जमदग्निसंज्ञकऋषेर्यत् त्र्यायुषं त्रयाणामायुषामवस्थानां बाल्ययौवनवार्द्धकानां समाहारः, यच्च कश्यपस्य ऋषेः त्र्यायुषं देवेषु ब्रह्मादिषु यत्त्र्यायुषं तत् त्र्यायुषं नोऽस्माकमस्तु भवत्विति। अत्र यद्यपि कर्तृगोचरा आशंसा पठ्यते, तथापि कुमारगोचरैव।

तथा च श्रुतिः—

यां वै कां चित् यज्ञ ऋत्विज आशिषमाशासते यजमानस्यैव सेति।

पारस्करः—'स यदि कामयेत सर्वमायुरियादिति वात्सप्रेणैनमभिमृशेत् संस्कारकर्ता' अयं कुमारः सर्वं सम्पूर्णं शतवर्षमायुर्जीवितमियात्प्राप्नुयादिति यदि कामयेत इच्छेत्तदा एनं कुमारं वात्सप्रेणानुवाकेनाभिमृशेत् सर्वतः स्पृशेदित्यर्थः। ननु दिवस्परीत्यादि द्वादशर्चानुवाकस्य वत्सप्रीऋषिसम्बन्धित्वाद्वात्सप्रेत्यभिधानम्, तथा च सर्वानुक्रमे कात्यायनः—दिवस्पर्याग्नेयं त्रैष्टुभं द्वादशर्चं वत्सप्रीर्भालन्दन इति, दिवस्परि प्रथममित्येतद्वादशर्चमग्निदैवतं त्रिष्टुप् छन्दस्कं भलन्दनस्य पुत्रो वत्सप्रीर्ऋषिरपश्यदिति तदर्थः। इत्थं च वात्सप्रेणैवमभिमृशेदित्युक्त्या द्वादशभिर्ऋग्भिरभिमर्शनं प्राप्तमत आह पारस्करः—"दिवस्परीतेत्यस्यानुवाकस्योत्तमामृचं परिशिनिष्टि" दिवस्परीत्यादि द्वादशर्चस्यानुवाकस्योत्तमामन्त्यां द्वादशीमस्ताव्यग्निरित्येतामृचं परिशिनष्टि व्युदस्येत्, तां परित्यज्यैकादशभिर्ऋग्भिरभिमृशेदित्यर्थः। यत्तु दिवस्परीत्येतस्यानुवाकस्योत्तमामृचमस्ताव्यग्निरित्येतां वर्जयित्वावशिष्टमेकादशर्चं वात्सप्रमुच्यत इति गदाधरादिव्याख्यानं तदुपदर्शितकात्यायनसूत्रविसंवादादनादेयम्। मन्त्रो यथा—दिवस्परि प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परिजातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एवं जरते स्वाधीः॥१॥ विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा। विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यत आ जगन्थ॥ २॥

समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षा ईधे दिवो अग्न ऊध न। तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्द्धन् ॥३॥ अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिह-द्वीरुधः समञ्जन्। सद्यो जज्ञानो विहीमिद्धो अख्यदारोदसी भानुना भात्यन्तः ॥४॥ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पण सोमगोपाः। वसुः सूनुः सहसो अप्सु राजा विभात्यग्र उषसामिधानः ॥५॥ विश्वस्य केतुर्भुवनस्य गर्भ आ रोदसी अपृणा-ज्जायमानः। वीडुच्चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥६॥ उशिक् पावको अरतिः सुमेधा मर्त्येष्वग्निरमृतो निधायि। इयर्त्ति धूममरुषम्भरिभ्रदुच्छुक्रेण शोचिषा द्यामिनक्षन् ॥७॥ दृशानो रुक्म उर्व्या व्यद्यौदुर्मर्षमायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिर्यदेनं द्यौरजनयत्सुरेताः ॥८॥ यस्ते अद्य कृणवद्भद्रशोचेऽपूपं देव घृतवन्त-मग्ने। प्रतं नय प्रतरं वस्यो अच्छाभि सुम्नं देवभक्तं यविष्ठ ॥९॥ आतं भज सौश्रव-सेष्वग्न उक्थ उक्थ आ भज शस्यमाने। प्रियः सूर्ये प्रियो अग्ना भवात्युज्जात्तेन भिनददुज्जनि त्वैः ॥१०॥ त्वामग्ने यजमाना अनु द्यून् विश्वा वसुदधिरेवार्याणि। त्वया सह द्रविणमिच्छमाना व्रजं गोमन्तमुशियो विवव्रुः ॥११॥ एतेषां व्याख्यानं स्व-शाखीयत्वाद्विस्तरभयाच्च नेह प्रदर्शितं दिङ्मात्रेण वेददीपादौ द्रष्टव्यम्।

पारस्करः—"प्रतिदिशं पञ्च ब्राह्मणानवस्थाप्य ब्रूयादिममनुप्राणितेति पूर्वो ब्रूयात्प्राणेति व्यानेति दक्षिणोऽपानेत्यपर उदानेत्युत्तरः समानेति पञ्चम उपरिष्टादवे-क्षमाणो ब्रूयात्"। ततः संस्कारकर्त्ता कुमारस्य प्रतिदिशं प्राच्यादिषु चतसृषु दिक्षु मध्ये चैवं पञ्च ब्राह्मणानवस्थाप्य सन्निवेश्य तान् प्रति इममनुप्राणितेति प्रैषं ब्रूयात्। ततः प्रेषितेषु तेषु कुमारं लक्षीकृत्य प्राणेति पूर्वो ब्रूयात्, व्यानेति दक्षिणः, अपानेत्यपरः पश्चिमः, उदानेत्युत्तरः, समानेति मध्यम उपरिष्टादवेक्षमाणो ब्रूयादित्यर्थः। मन्त्रार्थस्तु—इमं कुमारमनुलक्षीकृत्य प्राणित प्राणादिपञ्चवायुयुक्तं कृत्वा दीर्घायु-ष्ट्वेनायुष्मन्तं कुरुतेति, प्राणादयः पञ्चवायवः प्रसिद्धाः। प्राणेत्यादीनि सम्बोधन-पदानीति हलायुधः। अपरे तु—प्राणिहीत्यादिषु प्राप्तेषु प्राणेत्यादीनि छान्दसानि क्रियापदानि। भो कुमार! त्वं प्राणैर्हृदि सुस्थित प्राणो भवेत्यादिक्रमेण तेषां व्याख्या-नमाहुः। तथा—'स्वयं वा कुर्यादनुपरिक्राममविद्यमानेषु।' अविद्यमानेष्वसत्सु ब्राह्मणेषु स्वयं वा स्वयमेवानुपरिक्रामं पूर्वादिकां दिशं परिक्रम्य परिक्रम्यानुप्राणनं कुर्यादित्यर्थः। श्रुतिश्च—'यदयुतान्न विन्देदपि स्वयमेवानुक्राममनुप्राणयादिति। अस्मिन् पक्षे इममनुप्राणितेति प्रैषो नास्ति, स्वात्मनि स्वात्मकर्तृकप्रैषायोगात्।

पारस्करः—स यस्मिन् देशे जातो भवति तमभिमन्त्रयते—"वेद ते भूमि हृदयं दिवि चन्द्रमसि श्रितम्। वेदाहं तन्मां तद्विद्यात् पश्येम शरदश्शतं जीवेम शरदश्शतꣳ शृणुयाम शरदश्शतम्।" इति। स बालको यस्मिन् देशे भूभागे जात उत्पन्नो भवति तं देशं "वेद ते भूमि हृदयम्" इति मन्त्रेणाभिमन्त्रयते अभिमन्त्रयेत, मन्त्रं जपन् हस्तेन स्पृशेदित्यर्थः। मन्त्रार्थस्तु—हे भूमि! भूमे! ते तव हृद्धृदयं अयं प्रत्यगात्मा सूर्यो वेद जानाति, कीदृशं दिवि वर्त्तमाने चन्द्रमसि श्रितं प्रसादरूपेण स्थितम्, यद्वा कलङ्करूपेण चन्द्रमसि श्रितं तच्चन्द्रमसि न्यदधदिति श्रुतेः। अहमपि तत् ते हृद्वेद जानामि, तच्च कर्तृभूतं हृत् मां विद्यादुपकर्त्तुं जानातु, अतस्तद्दत्तपुत्रेण सह वयं पश्येम, शरदश्शतमित्याद्युक्तार्थम्। तथा—अथैनमभिमृशति, "अश्मा भव परशुर्भव हिरण्यमस्तृतं भव। आत्मा वै पुत्र नामासि स जीव शरदश्शतम्।" इति। अथ जन्मप्रदेशाभिमन्त्रणानन्तरमेनं कुमारमभिमृशति पिता स्पृशेत्—"अश्मा भव" इति मन्त्रेणेत्यर्थः। श्रुतिरपि—अथैममभिमृशति,—"अश्मा भव परशुर्भव" इत्यादि। स्पर्शश्चायं हृदीति जयरामः। मस्तक इति रेणुः, सर्वाङ्गे इति हरिहरः। वात्सप्राभिमर्शनाद्येतदभिमर्शनान्तं कर्म कालातिक्रमेऽपि भवति, संस्कारत्वादिति कर्कादयः। मन्त्रार्थस्तु—हे कुमार! त्वमश्मा भव पाषाणवद् दृढाङ्गो भव, परशुर्भव कुठार इव विरोधिनां छेदको भव, अस्तृतं अनभिभूतं अप्रच्युतस्वरूपमिति यावत् हिरण्यं हिरण्यवत्तेजोयुक्तो महणीयश्च भव। किं च यतस्त्वं पुत्र नामा आत्माऽसि अतः स त्वं वै निश्चयेन शरदश्शतं जीव प्राणिहीति। क्वचित्तु सञ्जीवेति पाठः। तथा—अथास्य मातरमभिमन्त्रयते, "इडासि मैत्रावरुणी वीरे वीरमजीजनथाः। सा त्वं वीरवती भव या अस्मान्वीरवतोऽकरत्॥" इति। अथानन्तरमस्य कुमारस्य मातरञ्जननीम्, "इडासि" इति मन्त्रेणाभिमन्त्रयते तदभिमुखीभूय मन्त्रश्रावणेन संस्कुर्यादित्यर्थः। श्रुतिरपि—अथास्यमातरमभिमन्त्रयते इडासिमैत्रावरुणीति। मन्त्रार्थस्तु—हे वीरे! आरब्धान्तगामिनि! त्वं इडा मानवी मैत्रावरुणी मित्रावरुणयोरंशोत्पन्ना चासि यथा इडायां पुरूरवा उत्पन्नो यथा च मैत्रावरुण्यां वशिष्ठ उत्पन्नस्तथा त्वय्ययं पुत्र इति भावः। यतस्त्वं वीरं पुत्रमजीजनथाः असौषीः अतः सा त्वं वीरवती जीवत्पुत्रवती भव, या त्वमस्मान् वीरवतः जीवद्बहुपुत्रानकरत् अकरोरिति। पुरुषादिव्यत्ययश्छान्दसः। तथा—अथास्यै दक्षिणं स्तनं प्रक्षाल्य प्रयच्छति "इमं स्तनम्" इति। अथानन्तरमस्यै अस्याः कुमारमातुर्दक्षिणं स्तनं प्रक्षाल्योदकेन क्षालयित्वा कुमाराय पिता

प्रयच्छति पानार्थं दद्यात् "इमं स्तनम्" इति मन्त्रेणेत्यर्थः। मन्त्रो यथा—"इमं स्तनमूर्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मध्ये। उत्सञ्जुषस्व मधुमन्तमर्वन्त्समुद्रियं सदनमाविशस्व॥" अस्यार्थः—हे अग्ने! सरिरस्य लोकस्य मध्ये वर्त्तमानं त्वमिमं स्तनं धय पिव "इमे वै लोकाः सरिरम्" इति श्रुतेः सरिरशब्देन लोका उच्यन्ते, किं भूतमूर्जस्वन्तं प्राणहेतुभूतं ऊर्जो रसः तद्युक्तं वा तथा अपां दुग्धानां अपशब्देन दुग्धमुच्यते सादृश्यात् प्रपीनं पूर्णम् हे अर्वन्! इयर्त्ति सर्वतो गच्छति तादृशाग्ने मधुमन्तं मधुस्वादेन दुग्धेन युक्तमुत्सं उत्स्यन्दनं स्तनं जुषस्व सेवस्व समुद्रियं समुद्रसम्बन्धि सदनं गृहमाविशस्व तृप्तः सन् समुद्रं गच्छेति। तथा—"यस्ते स्तनः" इत्युत्तरमेताभ्याम्, तत उत्तरं वामं स्तनं प्रक्षाल्य "यस्ते स्तनः" इत्येताभ्यां ऋग्भ्यां कुमाराय प्रयच्छेदित्यर्थः। अत्र "यस्ते स्तनः" इत्येकामेव ऋचमुपन्यस्यैताभ्यामिति द्विवचननिर्देशस्यानुपपत्तेरिमं स्तनमित्युपदर्शितमन्त्रस्येहाऽपि सम्बन्धोऽवगम्यते, तथा च कर्कः द्विवचनोपदेशादिमं स्तनमित्येत्र द्वितीयेति। तत्रेमं स्तनमित्येष मन्त्रो व्याख्यातः। 'यस्ते स्तन' इति मन्त्रो यथा—"यस्ते स्तनः शशयो योमयो भूर्यो रत्नधावसुविद्यः। येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवेऽकः॥" अस्यार्थो यथा—हे सरस्वति! तं स्तनमिहास्मिन् स्थाने धातवे पानार्थं अकः कुरु मम पानाय प्रयच्छ, तं कं यस्ते तव स्तनः स्तन इव स्तनः शशयः सुप्त इवास्ते अन्यैरनुपभुक्तत्वात्, यस्ते स्तनो[1] निहितो गुहायामिति श्रुतेः। यश्च स्तनो मयोभूः सुखप्रापकः, यश्च रत्नधाः रमणीयधनधारयिता, यश्च वसुवित् धनवान् सुदत्रः सुष्ठु दाता, किञ्च येन स्तनेन विश्वा सर्वाणि वार्याणि वरणीयानि वस्तूनि त्वं पुष्यसि पुष्णासि तमिति। तथा—उदपात्रं शिरस्तो निदधाति "आपो देवेषु जाग्रथ यथा देवेषु जाग्रथ। एवमस्यां सूतिकायां सपुत्रिकायां जाग्रथ॥" इति। तत उदपात्रं वारिपूर्णभाजनं शिरस्तः सूतिकायाः शिरः प्रदेशे "आपो देवेषु" इति मन्त्रेण निदधाति स्थापयेदित्यर्थः। एतच्चोदपात्रं सूतिकोत्थानपर्यन्तं तत्रैव धार्यं रक्षार्थत्वात्। मन्त्रार्थस्तु—हे आपो यूयं देवेषु देवकार्यनिमित्तं जाग्रथ तत्साधनत्वेन तिष्ठथ, अतो यथा देवेषु जाग्रथ एवमस्यां सपुत्रिकायां पुत्रसहितायां सूतिकायां प्रसवित्र्यां तत्कार्यसाधनाय जाग्रथ जागृतेति। तथा—द्वारदेशे सूतिकाग्निमुपसमाधायोत्थानात्संधिवेलयोः फलीकरणमिश्रान्तसर्षपानग्नावावपति, "शणडामर्का उपवीरः शौण्डिकेय उलूखलः। मलिम्लुचो द्रोणासश्च्यवनो नश्यतादितः स्वाहा, आलिखन्ननिमिषः

किंवदन्त उपश्रुतिः। हर्यक्षः कुम्भीशत्रुः पात्रपाणिर्नृमणिर्हन्त्रीमुखः सर्षपारुणश्च्यवनो नश्यतादितः स्वाहा।" इति। द्वारदेशे सूतिकागृहस्य द्वारदेशे सूतिकाग्निमुपसमाधाय पञ्च भूसंस्कारपूर्वकं सूतिकाग्निं स्थापयित्वा उत्थानात् आ उत्थानात् उत्थानं यावत् सन्धिवेलयोः सायंप्रातः फलीकरणमिश्रान् तण्डुलकणमिश्रितान् सर्षपानग्नौ तस्मिन् वह्नावावपति प्रक्षिपेत् "शण्डामर्का' इति "अलिखन्" इति मन्त्राभ्यामित्यर्थः। सूतिकाग्निग्रहणमावसथ्यनिवृत्त्यर्थमिति भर्तृयज्ञः। अत्रावपनोपदेशाद्धोमेतिकर्तव्यता न भवति, कर्कादयोऽप्येवम्, अत्राग्निर्देवतेति जयरामः। मन्त्रोक्ता देवता इत्यनन्तादयः। रेणुरप्याह—

अनयोर्देवताग्निः स्यान्मन्त्रोक्ताः कैश्चिदीरिताः।

एतच्च बालरक्षार्थं कर्म स्वकाल एव भवति, नियतकालत्वात्। मन्त्रार्थस्तु—शण्डाः शृणाति हिनस्तीतिशण्डः, मर्काः मारयतीति मर्कः, उभयत्रापि छान्दसो वचनव्यत्यय; उपघाते वीर उपवीरः, शौण्डिकेयः विघ्नकुशलः, उलूखल आश्रितघातकः, मलिम्लुचोऽतिमलिनाशयः, द्रोणासः द्रुरिव नासा नासिका यस्य स तथा आर्षोगुणः, च्यवनः च्यावयतीन्द्रियाणीति स तथा, एते सप्तबालग्रहाः, अयं सर्वोऽपीतः सूतिकागृहहोमान्नश्यतात् नश्यतु, इतः सूतिकागृहादपगच्छत्विति वेति। द्वितीय मन्त्रार्थो यथा—आसमन्ताल्लिखतीत्यालिखन् तत्तत् परानभिभवितुम्, अव्यवच्छिन्नदृष्टिरनिमिषः, किम्वदन्ती जनश्रुतिर्विद्यते यस्य स किम्वदन्तः अर्शं आद्यच्, अपकर्त्तुमुपश्रृणोतीत्युपश्रुतिः, हर्यक्षः पिङ्गलनयनः, कुम्भयति स्तम्भयति इति कुम्भी, बालं शातयतीति शत्रुः, पात्रपाणिः खपरहस्तः, नृन् मिनोति हिनस्तीति नृमणिः, हन्त्री हिंसा मुखे यस्य स हन्त्रीमुखः, सर्षपवदरुणा उग्रो धूसरो वा सर्षपारुणः, येनोपद्रुतश्च्यवति प्रकृतेः परिभ्रश्यत्यसौ च्यवनः, अयं सर्वोऽपि बालग्रह इतो नश्यतादिति। तथा—यदि कुमार उपद्रवेज्जालेन प्रच्छाद्योत्तरीयेण वा पिताऽङ्क आधाय जपति, "कूर्क्कुरः सुकुर्क्कुरः कूर्क्कुरो बालबन्धनः। चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेता-पह्वर। तत्सत्यं यत्ते देवा वरमददुः स त्वं कुमारमेवा वृणीथाः। चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेता पह्वर। तत्सत्यं यत्ते सरमा माता सीसरः पिता श्यावशवलौ भ्रातरौ। चेच्चेच्छुनक सृज नमस्ते अस्तु सीसरो लपेता पह्वरेत्यभिमृशति न नामयति न रोदिति न हृष्यति न ग्लायति यत्र वयंवदामो यत्र चाभिमृशामसीति॥" कुमारशब्देनात्र कुमारग्रहोऽभिधीयते, स यदि उपद्रवेद् बालकमभि-

भवेत्तदा तं बालकं जालेन मत्स्यग्रहणसाधनेन तदलाभे उत्तरीयेण वा प्रच्छाद्य अङ्के उत्सङ्गे आधाय "कूर्कूरः" इत्यादि मन्त्रं पिता जपति जपेत्, जपान्ते च "न नामयति" इति मन्त्रेणाभिमृशति बालकं सर्वतः स्पृशेदित्यर्थः। एतच्च नैमित्तिकम्, यदि कुमार उपद्रवेदित्यभिधानादतो निमित्ताभावे नानुष्ठीयते। मन्त्रार्थस्तु—कूर्कूरः भीषणः, सुकूर्कुरोऽतिभीषणः, कूर्कुरः कर्कशः, बालान्बध्नातीति बालबन्धनः, सीसरोऽङ्गसारकः, हे शुनक! पूर्वोक्तविशेषणविशिष्टस्त्वं सृज एतं कुमारं विसृज परित्यजेति यावत् ते तुभ्यं नमोऽस्तु, हे लपेत! लापन रोदकेति यावत् अपह्वर! गात्रसङ्कोचक! चेच्चेत् चेच्चेच्छब्दं कुर्वन्निति। लपेतेत्यादीनि सम्बोधनपदानि शुनकविशेषणानि। द्वितीय-मन्त्रार्थो यथा—हे शुनक! तत्सत्यं यत्ते तुभ्यं देवा वरं प्रार्थितमददुः दत्तवन्तः स च त्वं हिंसाविहारः कुमारमेवावृणीथाः वृतवानसीति शेषमुक्तार्थम्। तृतीय मन्त्रार्थो यथा—हे शुनक! तत्सत्यं यत्ते तव सरमा देवशुनी माता, सीसरो श्वा पिता श्यावश-वलौ च भ्रातरौ इति, शिष्टमुक्तार्थम्। न नामयतीत्यस्यार्थो यथा—यत्र यस्मिन् कुमारे वयं वदामः मन्त्रं जपामः यत्र चाभिमृशामसि अभितः स्पर्शनं कुर्मः, स कुमारो न नामयत्यङ्गानि न रोदिति न च भूताविष्टो हृष्यति न ग्लायति न च ग्लानो भवतीति, मृशामसीति प्रयोगः छान्दसः।

मार्कण्डेयपुराणे—

अग्न्यम्बुशून्ये च तथा निर्यूपे सूतिकागृहे।
प्रदीपशस्त्रमुसलभूतिसर्षपवर्जिते॥
अनुप्रविश्य जातं तमपहृत्यात्मसम्भवम्।
क्षणप्रसविनी बालं तत्रैवोत्सृजति द्विज॥
सा जातहारिणी नाम सुघोरा पिशिताशिनी।
तस्मात्संरक्षणं कार्यं यत्नतः सूतिकागृहे॥

यूपो यूपाकारः काष्ठविशेषः।

वैजवापः—

षष्ठेऽह्नि रात्रिजागरणं जन्मगानं च कारयेत्।
जन्मगानं जन्मोत्सवव्यञ्जकगीतगानम्॥

इति हर्षनाथशर्मविरचिते संस्कारदीपके
जातकर्मप्रकाशः॥

अथ नामकरणम्

तत्र पारस्करः—दशम्यामुत्थाप्य ब्राह्मणान् भोजयित्वा पिता नाम करोति। प्रसवाद्दशम्यां रात्र्यामतीतायामेकादशेऽहनि सूतिकागृहात्सूतिकामुत्थाप्य नामकरण-कर्माङ्गतया त्रीन् ब्राह्मणान् भोजयित्वा पिता कुमारस्य नाम नामधेयं व्यवहारार्थं करोति कुर्यादित्यर्थः। अत्र दशम्यामिति सूतकान्तोपलक्षणम्, तथा च मदनरत्ने नारदीयम्—"सूतकान्ते नामकर्म विधेयं स्वकुलोचितमिति" गोभिलगृह्यम्—"जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयकरणम्", व्युष्टे अतिक्रान्ते।

भविष्यपुराणे—

नामधेयं दशम्यां तु केचिदिच्छन्ति पार्थिव।
द्वादश्यामपरे रात्र्यां मासे पूर्णे तथा परे॥
अष्टादशेऽह्नि च तथा वदन्त्यन्ये मनीषिणः॥

रात्रिपदमहःपरमिति मिश्राः। श्रुतिः—"एकादशे द्वादशे वाऽहनि पिता नाम कुर्यात्।"

गृह्यकारिकायाम्—

एकादशे द्वादशे वा मासे पूर्णे तथाऽपरे।
अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः॥
शतरात्रे व्यतीते वा पूर्णे संवत्सरेऽथवा।

अत्रैकादश इति मुख्यः कल्पः, स्वगृह्योक्तत्वात् समर्थस्य क्षेपायोगाच्च। अतएव भट्टभाष्ये श्रुतिः—"न श्वः समुपासीत को समर्थस्य श्वो वेदेति" एकादशेऽह्नि नामकरणाशक्तौ तु स्मृत्यन्तरोक्तद्वादशाहादि कालो ग्राह्यः।

तदुक्तम्—

मुख्यकाले यदा नामधेयं कर्त्तुं न शक्यते।
उक्तानामन्यतमस्मिन् दिने स्यात्तु गुणान्विते॥

भोजराजः—

वस्वादित्यगुरूत्तरादितिमृगैश्चित्रानुराधानिलै-
र्मूलारेवतिवैष्णवैन्द्रसलिलैः संज्ञां प्रकुर्याच्छुभाः।
वारेणार्कशशिज्ञवाक्पतिभृगोर्लग्ने स्थिरे शोभने
सौम्यैः केन्द्रनवात्मजर्क्षसहितैः पापैश्च शेषस्थितैः॥
व्यतीपाते तथा साध्ये विष्ट्यङ्गारकवासरे।
दग्धे दिने निरंशे च प्रयत्नेनापि वर्जयेत्॥
नार्थहीनं न चास्पष्टं नापशब्दयुतं तथा।
नामङ्गल्यं जुगुप्सं च नाम कुर्यात्समाक्षरम्॥

विधिरत्ने—

आदित्यतिष्यश्रवणाश्विष्ठाः पूषा विरञ्चिः श्वसनोऽपि मित्रम्।
शस्ता मघार्द्रा वरुणश्च मूलं त्रीण्युत्तराण्याहुरृक्षाणि नाम्नः॥

गर्गोच्चये—

नामकर्मकरणं स्थिरलग्ने
केन्द्रपञ्चनवमस्थितसौम्ये।
न्यायषष्ठसमधिष्ठितपापे
जीवशुक्रविसौम्यदिनेषु॥

तच्च नाम कीदृशं कार्यं तत्राह पारस्करः—"द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानं कृतं कुर्यान्न तद्धितम्।" द्वे अक्षरे स्वरौ यस्य तद्व्यक्षरं चत्वार्यक्षराणि स्वरा यस्य तच्चतुरक्षरं एतयोरन्यतरत् घोषवदादि घोषाभिधप्रयत्नवद्वर्णं आदिर्यस्य तादृशं अन्तन्तस्थं अन्तर्मध्ये अन्तस्थो वर्णो यस्य तादृशं दीर्घाभिनिष्ठानं दीर्घं गुर्वक्षरमभिनिष्ठानमवसानं यस्य तथाभूतं कृतं कृत्संज्ञकप्रत्ययान्तं कुर्यात् कुमारस्य नामधेयं विदध्यात्, न तद्धितं तद्धितप्रत्ययान्तं न कुर्यादित्यर्थः। द्व्यक्षरं चतुरक्षरं वेति यदुक्तं तत्काम्यमपि, तथा चाश्वलायनगृह्यम्—"द्व्यक्षरं प्रतिष्ठाकामः चतुरक्षरं ब्रह्मवर्चस काम इति, वर्गाणां तृतीयचतुर्थपञ्चमा यरलवा हकारश्चेत्येते घोषवन्तः।" यरलवा अन्तस्थाः। कृतं कुर्यादित्यस्य पितामहादीनां यन्नाम कृतमस्ति तदेव कुर्यान्नान्यदित्यर्थ इत्यपरे वदन्ति। पारस्करः—"अयुजाक्षरमाकारान्तं स्त्रियै तद्धितम्।"

अयुजानि विषमाणि त्र्यादीन्यक्षराणि यस्मिन् तादृशम् आकारान्तं आकारोऽन्ते यस्य तथाभूतं तद्धितप्रत्ययान्तं स्त्रियै स्त्रिया नाम[१] कुर्यादित्यर्थः। तथा—"शर्म ब्राह्मणस्य वर्म क्षत्रियस्य गुप्तेति वैश्यस्य।" शर्मशब्दः सुखनीयवचनः सुखनीयं ब्राह्मणस्य कर्त्तव्यं यथा—शुभङ्करः प्रियङ्कर इति। वर्मशब्दः शौर्यवचनः, शौर्ययुक्तं क्षत्रियस्य कर्त्तव्यम्। गुप्तशब्द आढ्यवचनः, आढ्यताभिधायि वैश्यस्य नाम विधेयमित्यर्थ इति कर्कः। ब्राह्मणादीनां पूर्वोक्तलक्षणानामन्ते शर्मादिपदं प्रयोक्तव्यमित्यर्थ इति भर्तृयज्ञहरिहरादयः।

मनुः—

शर्मान्तं ब्राह्मणस्य स्याद्वर्मान्तं क्षत्रियस्य तु।
वैश्यस्य धनसंयुक्तं शूद्रस्य प्रेष्यसंयुतम्॥

कल्पतरौ शङ्खलिखितौ कुलदेवनक्षत्राभिसम्बद्धं पिता नाम कुर्यात्तदन्यो वा कुलवृद्धः। अत्र च स्नातस्य परिहिताहतवाससः कुमारस्य प्राङ्मुखस्य स्वदक्षिणकर्णे "अमुकनामासि" इति त्रिर्नाम श्रावणमिति समाचारः॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
नामकरणप्रकाशः॥

---

१. स्त्रीषु विशेषमाह गोभिलः-"अयुग्दान्तं स्त्रीणाम्" इति। दान्तं यशोदा शर्मदेत्यादिकम्।

अथ निष्क्रम'णम्

तत्र पारस्करः—"चतुर्थे मासि निष्क्रमणिका", कुमारस्य जननाच्चतुर्थे मासि निष्क्रमणिका गृहाद् बहिर्नयनं कर्त्तव्येत्यर्थः।

ज्योतिर्निबन्धे—

तृतीये वा चतुर्थे वा मासि निष्क्रमणं भवेत्।
ततस्तृतीये कर्त्तव्यं मासि सूर्यस्य दर्शनम्॥
चतुर्थे मासि कर्त्तव्यं शिशोश्चन्द्रस्य दर्शनम्।

मदनरत्ने—

अन्नप्राशनकाले वा कुर्यान्निष्क्रमणक्रियाम्।

नारायणपद्धतौ—

अष्टमी द्वादशी षष्ठी रिक्ताऽमावास्यया सह।
त्र्यहस्पृशावमौ त्याज्यौ शिशुनिष्क्रमणे विधौ॥

व्यवहारसमुच्चये—

मूलानुराधा श्रवणाश्विपुष्या चित्राम्बुशक्रोत्तरवायुपौष्णाः।
ब्रह्मा धनिष्ठेन्दुकरादितेया निष्काशने यात्रिकवासरादि॥

भागुरिः—

वारेषु जीवभृगुभानुशशीन्दुजानां।
निष्काशनं शुभकरं कथितं शिशूनाम्॥

---

१. अत्र विशेषमाह कारिकायाम्—

आदाय गेहान्निष्क्रम्य गच्छेयुर्देवतालयम्।
अभ्यर्च्य देवतां सम्यगाशिषो वाचयेदथ॥
कृत्वा प्रदक्षिणं गेहमानयन्ति ततः स्वकम्।
मातृस्वसुर्गृहं वाऽपि मातुलादेर्गृहं नयेत्॥ इति।

मातुलादिर्बालस्य।

पृथुयशोनिबन्धे—

केन्द्रत्रिकोणगाः सौम्याः पापाश्चोपचयर्क्षगाः ।
सिंहगोयुग्मकन्याश्च शस्ता निष्क्रमणे विधौ ॥

व्यासः—

कुर्यान्निष्क्रमणं शिशोर्बुधगुरौ शुक्रेऽप्यरिक्ते तिथौ
कन्याकुम्भतुलामृगारिभवने सौम्यग्रहालोकिते ।

पारस्करः—"सूर्यमुदीक्षयति तच्चक्षुरिति", गृहाद् बहिर्नयनानन्तरं "तच्चक्षुः" इति मन्त्रेण सूर्यं दिवाकरमुदीक्षयति पिता कुमारं दर्शयेदित्यर्थः। तच्चक्षुरिति मन्त्रो विवाहप्रकरणे व्याख्यातः। अत्र च फलपुष्पसमन्वितेन पयसा भास्करायार्घो दीयत इति समाचारः।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
निष्क्रमणप्रकाशः ॥

अथान्नप्राशनम्

तत्र पारस्करः—"षष्ठे मासेऽन्नप्राशनम्" जन्मतः षष्ठे मासे कुमारस्यान्न-प्राशनं संस्कारविशेषः कर्त्तव्यमित्यर्थः।

कृत्यचिन्तामणौ—

अन्नस्य प्राशनं कार्यं मासि षष्टेऽष्टमे बुधैः।
स्त्रीणां तु पञ्चमे मासि सप्तमे वा जगौ मुनिः॥

शङ्खः—

संवत्सरे प्राशनमर्द्धवत्सर इत्येके।

भुजबलभीमे—

षष्ठे मासि निशाकरे शुभकरे रिक्तेतरे वा तिथौ
सौम्यादित्यसितेन्दुजीवदिवसे पक्षे च कृष्णोतरे।
प्राजेशादितिपौष्णवैष्णवयुगैर्हस्तादिसप्तोत्तरै—
राग्नेयाप्पतिपैत्रभैश्च नितरामन्नादिभक्तं शुभम्॥

युगैरिति प्राजेशादौ प्रत्येकं सम्बद्ध्यते।

कृत्यचिन्तामणौ—

द्वादशीसप्तमीनन्दारिक्तासु पञ्च पर्वसु।
बलमायुर्यशो हन्याच्छिशूनामन्नभक्षणम्॥

व्यवहारसमुच्चये—

वृषलग्ने च मीने च कन्यायां मिथुने तथा।
कर्त्तव्यं प्राशनं कर्म शिशुवृद्धिकरं बुधैः॥

भुजबलभीमे—

दुष्टः शशधरो लग्नात् षष्ठाष्टस्थोऽन्नभक्षणे।

नारायणपद्धतौ—

उक्ते नवांशके वापि सौम्ये केन्द्रत्रिकोणगे।
त्रिषडायगते पापे बालान्नप्राशनं शुभम्॥

पारस्करः—"स्थालीपाकं अपयित्वाऽज्यभागाविष्ट्वाऽज्याहुती जुहोति।" स्थालीपाकं चरुं यथाविधि अपयित्वा आज्यभागौ हुत्वा द्वे आज्याहुती वक्ष्यमाणमन्त्रैर्जुहोति जुहुयादित्यर्थः। अत्रोच्यमानाहुतीनामागन्तुकत्वादन्ते निवेशे प्राप्ते आज्यभागानन्तरविधानार्थमाज्यभागाविष्ट्वेत्यभिधानम्, आघारयोराज्यभागपूर्वकालीनत्वात्पूर्वमेवानुष्ठानम्, स्विष्टकृद्धोमश्च महाव्याहृत्यादिहोमेभ्यः प्रागेव, आज्यव्यतिरिक्तस्यापि हविषः सद्भावात्। कर्म चैतद् गृह्याभ्यन्तर एव भवति, पञ्चस्वेव बहिः शालाकर्त्तव्यतोपदेशेनान्यत्रातथात्वात्। नन्वाज्याहुती जुहोतीत्युक्तं ते के आहुती इत्यपेक्षायां पारस्करः—"देवीं वाचमजनयन्त देवाः तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्टुतैतु स्वाहेति, वाजानो अद्येति च द्वितीयाम्॥" "देवीं वाचम्" इति मन्त्रेण प्रथमामाज्याहुतिं हुत्वा चकारात्पूर्वोक्तेन "देवीं वाचम्" इति मन्त्रेण सह "वाजानो अद्य" इति मन्त्रेण द्वितीयामाहुतिं जुहुयादित्यर्थः। मन्त्रार्थस्तु—देवीं द्योतमानां वाचं वाणीं देवाः प्राणादिवायवोऽजनयन्त उत्पादितवन्तः। ततः तां वाचं वैखर्याख्यां विश्वरूपाः नानारूपाः पशवो मनुष्यादयो वदन्ति, "पशुरेवं सदेवानाम्" इति श्रुतेः। सा वाक् अस्मानुपैतु सन्निहिता भवतु, सा कीदृशी नोऽस्माकं मन्द्रा हर्षकरी, इषमन्नमूर्जं रसं च दुहाना पूरयन्ती सर्वार्थदत्वाद्धेनुः सुष्टुता शोभनैर्मन्त्रैः स्तुतेति। क्वचिन्मन्द्रेष्टमूर्जं दुहानेति पाठः। द्वितीयमन्त्रो यथा—"वाजानो अद्य प्रसुवाति दानं वाजो देवा ऋतुभिः कल्पयाति। वाजो हि मां सर्ववीरं जजान विश्वा आशा वाजपतिर्जयेयम्।" अस्यार्थः—वाजोऽन्नमद्यान्नप्राशनसमये वोऽस्माकं दानं होमरूपं प्रसुवाति अभ्यनुजानातु, किं च वाजोऽन्नं देवानिन्द्रादीन् ऋतुभिः समयविशेषैः कल्पयाति योजयतु, अस्मिन्कर्मणि हुतेनान्नेन देवाश्चिरकालं वर्त्तन्तां अपि च हि यतः वाजोऽन्नं मां सर्ववीरं सर्वत्र कार्येषु क्षमं जजान चकार कृतवान्, अतः कारणात् वाजपतिरन्नेश्वरोऽहं विश्वाः सर्वा आशा दिशो जयेयमिति। प्रसुवाति कल्पयातीति लेटि रूपे। 'देवाऋतुभिः' इत्यनुनासिकमुपधेत्यधिकारस्थेन आकारोपधो यकारमिति प्रातिशाख्यसूत्रेण नकारस्य यत्वे उपधानुनासिक्ये च यलोपे सिद्धम्। तथा—"स्थालीपाकस्य जुहोति प्राणेनान्नमशीय स्वाहा, अपानेन गन्धानशीय स्वाहा, चक्षुषा रूपाण्यशीय स्वाहा, श्रोत्रेण यशोऽशीय स्वाहेति।" स्थालीपाकस्येत्यवयवलक्षणा षष्ठी, प्राणेनान्नमशीय स्वाहेत्यादिभिश्चतुर्भिर्मन्त्रैः स्थालीपाकस्य चरोश्चतस्र

आहुतीर्जुहोति जुहुयादित्यर्थः। मन्त्रार्थस्तु—प्राणेन प्राणवायुना अन्नमदनीयमशीय अन्नानि स्वाहा सुहुतमस्तु, एवमुत्तरार्धेऽपि योज्यानि। तथा—"प्राशनान्ते सर्वान्रसान् सर्वमन्नमेकत उद्धृत्याथैनं प्राशयेत्तूष्णीम्।" एतदाहुतिचतुष्टयानन्तरं प्राशनान्ते स्विष्टकृद्धोमादि संस्रवप्राशनान्ते कर्मणि कृते सति बर्हिर्होमान्तं सर्वं कर्म समाप्य सर्वान् रसान् मधुरादीन् सर्वमन्नं भक्ष्यभोज्यलेह्यादिकं चैकतः एकस्मिन्पात्रे उद्धृत्य कृत्वाऽथानन्तरमेनं कुमारं तूष्णीम् मन्त्ररहितम् प्राशयेत् भक्षयेदित्यर्थः। एकतोद्धृत्येति पाठे सन्धिरार्षः। पक्षान्तरमाह स एव—"हन्तेति वा हन्तकारं मनुष्याः" इति श्रुतेः। हन्तेतिमन्त्रेण वा प्राशयेत् कुतः हन्तकारं मनुष्या इति श्रुतेः, तस्यै द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं वषट्कारं हन्तकारं मनुष्याः स्वधाकारं पितर इति श्रवणादित्यर्थः। इत्थं चानयोर्विकल्प इति कर्कः। मार्कण्डेयः—

देवतापुरतस्तस्य धात्र्युत्सङ्गगतस्य च।
अलङ्कृतस्य दातव्यमन्नं पात्रे च काञ्चने॥
मध्वाज्यकनकोपेतं प्राशनं[1] शंसते ततः।

काम्यमाह पारस्करः—"भारद्वाजीमांसेन वाक्प्रसारकामस्य, कपिञ्जलमांसेनान्नाद्यकामस्य, मत्स्यैर्जवनकामस्य, कृकषाया आयुष्कामस्या, अट्या ब्रह्मवर्चसकामस्य, सर्वैः सर्वकामस्य।" भारद्वाजी पक्षिविशेषः भरथेति प्रसिद्धः तन्मांसेन कुमारस्य प्राशनं कारयितव्यं भवति, कस्य पितुः कथंभूतस्य वाक्प्रसारकामस्य वाचः प्रसारो बहुलत्वं कुमारस्य कामयते इति वाक्प्रसारकामस्तथाभूतस्येत्यर्थः। यद्वा—अस्मिन्वाचः प्रसारो भवत्वित्येवं कामो यस्मिन् कुमारे तस्य भारद्वाजी मांसेन प्राशनं विधेयमित्यर्थः। एवमग्रेऽपि योज्यम्। कपिञ्जलः पक्षिविशेषः। अन्नाद्यमन्नादिकम्। जवनं शीघ्रगमनम्, कृकषा कृकलासः। आटिर्जलचरः पक्षिविशेषः। सर्वैः पूर्वोक्तैः भारद्वाजीमांसादिभिः क्रमेण सर्वकामस्य उपदर्शितवाक्प्रसारादिसकलकामस्य। यदि तु वाक्प्रसारिकामस्येति पाठस्तदा अयं कुमारो वाक्प्रसारी वाग्मी स्यादित्येवं कामस्येत्यर्थः। तथा—"अन्नपर्याय वा," सर्वकामस्य अन्नपर्यायेण अन्नपरिपाट्या वा सर्वैर्मांसैः प्राशनमित्यर्थः। अन्नवत् सर्वमांसान्येकीकृत्य प्राशयेदिति यावत्। अन्नपर्यायेत्यविभक्तिकमार्षं पदम्। तथा—"ततो ब्राह्मणभोजनम्," व्यक्तार्थमेतत्।

१. प्राशयेत् पायसं तु तमिति पाठान्तरम्।

ततो बालं भूमावुपवेश्य तदग्रे पुस्तकादीनि विन्यस्य जीविकापरीक्षां कुर्यात्। शिशुः स्वेच्छया यत्प्रथमं स्पृशेत् सास्य जीविकेति जानीयात्। तदुक्तम्—

कृतप्राशनमुत्सङ्गाद्धात्री बालं समुत्सृजेत्।
कार्यं तस्य परिज्ञानं जीविका या अन्तरम्॥
देवताग्रे तु विन्यस्य शिल्प[1]भाण्डानि सर्वशः।
शस्त्राणि चैव शास्त्राणि ततः पश्येत्तु लक्षणम्॥
प्रथमं यत्स्पृशेद् बालः शिल्पभाण्डं स्वयं तदा।
जीविका तस्य बालस्य तेनैवेति भविष्यति॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपकेऽन्नप्राशनप्रकाशः॥

---

१. शिल्पस्य लेखनादेर्भाण्डं वस्तु लेखनीमषीपात्रादि, शस्त्रं युद्धवस्तु।

अथ चूडाकरणम्

तत्र पारस्करः—"सांवत्सरिकस्य चूडाकरणम्।" संवत्सरो जातो यस्य स सांवत्सरिकः तस्य बालकस्य चूडाकरणं कर्म कुर्यादिति शेषः। चूडानां केशपाशानां करणं संस्कारो येन कर्मणा तच्चूडाकरणमिति वक्ष्यमाणसंस्कारकर्मणो नामधेयम्। तथा—"तृतीये वाऽप्रतिहते," अथवा तृतीये संवत्सरे अप्रतिहते असम्पूर्णे चूडाकरणं कुर्यादित्यर्थः। तथा—"यथा मङ्गलं वा सर्वेषाम्" अथवा यथा मङ्गलं यथा कुलाचारं सर्वेषां वर्णानां चूडाकरणं कार्यम्। एतदुक्तं भवति—यस्य कुले सांवत्सरिकस्य चूडाकरणं क्रियते तस्य सांवत्सरिकस्य, यस्य तृतीये असम्पूर्णे तस्य तदैव, यस्य नियमो नास्ति तस्य यदृच्छया विकल्प इति। मनुः—

चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं स्मृतिचोदनात्॥

शङ्खलिखितौ—

तृतीयवर्षे चूडाकरणं पञ्चमे वा।

प्रयोगपारिजाते—

आद्येऽब्दे कुर्वते केचित् पञ्चमेऽब्दे तृतीयके।
उपनीत्वा सहैवैति विकल्पाः कुलधर्मतः॥

भोजराजः—

माघादिमासषट्के तु शार्ङ्गिनः शयनावधौ।
चूडाकर्म प्रशंसन्ति मुनयो व्रतकर्म च॥
षष्ठे च द्वादशे मासि द्वितीये दशमे तथा।
चतुर्थे चाष्टमे क्षौरं न कुर्यात्प्रथमं शिशोः॥

रत्नमालायाम्—

षष्ठ्यष्टमी चतुर्थीषु सिनीवाल्यां चतुर्दशीम्।
नवम्यामर्कमन्दारवारे क्षौरं विवर्जयेत्॥

मन्दः शनिः, आरो मङ्गलः।

ज्योतिषे—

अर्केन्दुकालशुद्धौ च जन्ममासेन्दुभेतरे ।
रिक्तादर्शाष्टमीषष्ठीप्रतिपद्वर्जिते सिते ॥

कृत्यचिन्तामणौ—

पौष्णाश्विपुष्यवसुवासववासुदेव-
वातार्कचन्द्रवरुणादितिचित्रभेषु ।
वारेषु सोमबुधवाक्पतिभार्गवाणां
क्षौरं हितं शुभफलासु च तारकासु ॥

पौष्णं रेवती, वसुभं धनिष्ठा, वासवभं ज्येष्ठा, वासुदेवभं श्रवणा, वातभं स्वाती, अर्कभं हस्तः, चन्द्रभं मृगशिराः, वरुणभं शतभिषा, अदितिभं पुनर्वसूः। चैत्रे वह्निसन्निधौ च रविवारेऽपि चूडाकरणं प्रतिप्रसूते भोजराजः—

उत्तरवर्त्मनि सवितरि चूडाकरणं जगुः शिशोर्यवनाः ।
चैत्रे मासि दिवाकरवारे शिखिसन्निधाने च ॥

दिवाकरवारविनिर्मोके तु गर्गः—

जन्मर्क्षे जन्ममासे च युग्मे मासे च वत्सरे ।
न कुर्यात्प्रथमं क्षौरं विशेषाच्चैत्रपौषयोः ॥

ज्येष्ठपुत्रकन्ययोस्तु ज्यैष्ठे दशाहाभ्यन्तरे चूडानिषेधो विवाहप्रकरणे उक्तः ।

राजमार्त्तण्डे—

प्राचीमुखः सौम्यमुखोऽपि भूत्वा कुर्यान्नरः क्षौरमनुत्कटस्थः ।

कृत्यचिन्तामणौ—

उत्तरत्रितययाम्यरोहिणीरौद्रसर्पपितृभेषु चाग्निभे ।
श्मश्रुकर्म सकलं विवर्जयेत्प्रेतकार्यमपि बुद्धिमान्नरः ॥

याम्यभं भरणी, रौद्रभमार्द्रा, सर्पभमश्लेषा, पितृभं मघा, अग्निभं कृत्तिका ।

कृत्यचिन्तामणौ—

सूर्ये दक्षिणमार्गगामिनि हरौ सुप्ते निरंशे रवौ
क्षीणे शीतरुचौ महीजयमयोर्वारे निशासन्ध्ययोः ।
भुक्तेऽभ्यक्ततनौ निषिद्धसमयेऽलङ्कारयुक्ते शिशोः
क्षौराद्रोगभयं वदन्ति यवना मृत्युं तथाऽन्ये जगुः ॥

अत्र निरंशे रवाविति श्रवणात्संक्रान्तिप्रयुक्तनिषेधनान्निरंशदिनत्वं तन्त्रमिति प्रतिभाति।

भुजबलभीमे—

अक्षौरिभेऽपि कर्त्तव्यं वारेण बधुसोमयोः।
आयुरारोग्यमैश्वर्यं क्षौरे तौ कुरुतः सदा॥

तथा—

नृपाज्ञया ब्राह्मणसम्मतेन बद्धस्य मोक्षे क्रतुदीक्षणे च।
विवाहकाले मृतसूतके च सर्वेषु शस्तं क्षुरकर्मभेषु॥

वृद्धगार्ग्यः—

केशवमानर्त्तपुरं पाटलिपुत्रं पुरीमहीच्छत्राम्।
दितिमदितिं च स्मरतः क्षौरविधौ भवति कल्याणम्॥

कर्म चैतद् बहिःशालायामेव 'पञ्चसु बहिःशालायाम्' इत्युक्तत्वात्। अत एव मण्डपे परिष्कृतभूमाविति पद्धतिः, प्राङ्गण एव क्रियत इति तु समाचारः, स च 'पुरस्ताच्छालाया उपलिप्तेऽग्निरुपसमाहितो भवति' इति गोभिलगृह्यदर्शनमूलक एवेति प्रतीमः। पारस्करः—"ब्राह्मणान् भोजयित्वा माता कुमारमादायाप्लाव्याहते वाससी परिधाप्याङ्के आधाय पश्चादग्नेरुपविशति।" त्रीन् ब्राह्मणान् भोजयित्वा माता कुमारजननी कुमारं स्वपुत्रमादाय हस्ते गृहीत्वा आप्लाव्य स्नापयित्वा अहते नवे सदृशे सकृद्धौते अधारिते वाससी वस्त्रे परिधाप्य अन्तरीयोत्तरीयत्वेन परिहिते कारयित्वा अङ्क आधाय कुमारमुत्सङ्गे स्थापयित्वा अग्नेः पश्चात् प्रतीच्यां दिश्युपविशति उपविशेदित्यर्थः। अत्राग्नेः पश्चादित्यभिधानादग्निस्थापनानन्तरमेतद्भवति। तथा—"अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते शीतास्वप्सूष्णा आषिञ्चति, उष्णेन वाय उदकेनेद्यदिते केशान् वपेति।" अन्वारब्धो ब्रह्मणा उपस्पृष्ट आज्याहुतीराघारादि स्विष्टकृदन्ताश्चतुर्दशाहुतीर्हुत्वा प्राशनान्ते संस्रवप्राशनान्ते बर्हिर्होमान्तं सर्वं कर्म समाप्यागन्तुकत्वात्तदनन्तरं शीतासु पूर्वमुपकल्पितास्वप्सु उष्णा अप आसिञ्चति प्रक्षिपेत् "उष्णेन वाय" इति मन्त्रेणेत्यर्थः। अन्वारब्धग्रहणमाघारादीनां नित्याज्याहुतीनामेवात्र ग्रहणं यथा स्यादित्येवमर्थम्, अत्र शीतोदकादीनामपि प्रयोजनवत्त्वात्पवित्रच्छेदनकुशादिवत्तेषामपि पूर्वमेवासादनं तदुक्तं 'पुरस्तात् अर्थवदासाद्येति'। तत्रापि पवित्रच्छेदनकुशाद्यासादनानन्तरं शीतोदकाद्यासादनमागन्तुकत्वादुपयोगक्रमानुरो-

धाच्चेति विवेकः। एवमाचारान्नलिनीदलादीन्यप्यासादनीयानि। मन्त्रार्थस्तु—हे वायो! हे अदिते! अखण्डित एहि अत्रागच्छ, आगत्य चोष्णेन उष्णजलसहितेनोदकेन शीतजलेन केशान् वप आर्द्रीकरणद्वारा छिन्धीति। तथा—"अथात्र नवनीतपिण्डं घृतपिण्डं दध्नो वा प्रास्यति।" अथ उष्णोदकसेकानन्तरम्, अत्र उष्णोदकमिश्रितशीतोदके नवनीतपिण्डं घृतपिण्डं दध्नो वा पिण्डं प्रास्यति प्रक्षिपेदित्यर्थः। तथा—तत आदाय दक्षिणं गोदानमुन्दति, "सवित्रा प्रसूता दैव्या आप उन्दन्तु ते तनूम्। दीर्घायुत्वाय वर्चसे" इति। ततस्तस्मादुदकात् किञ्चिदुदकमादाय दक्षिणं गोदानं गवि पृथिव्यां दीयते निधीयते शयनकाले स्थाप्यत इति गोदानं कर्णसमीपवर्त्ति शिरःप्रदेशम्, उन्दति क्लेदयेत् 'सवित्रा' इति मन्त्रेणेत्यर्थः। अत्र दक्षिणादिप्रदेशविज्ञानार्थं पूर्वनिशायामेव यद्दक्षिणपश्चिमोत्तरक्रमेण जूटिकात्रयबन्धनरूपं केशाधिवासनं तत्राचार एव शरणम्। मन्त्रार्थस्तु—हे कुमार! सवित्रा सूर्येण प्रसूता जनिता उत्पादिता आपो दैव्या दिवि आकाशे भवाः ते तव तनूं शरीरं चूडालक्षणमङ्गमुन्दन्तु क्लेदयन्तु, किमर्थम्? दीर्घायुत्वाय चिरं जीवनाय, वर्चसे प्रतापायेति। दीर्घायुत्वायेत्यत्र षकारलोप आर्षः, आयुष्पर्याय आयुशब्द उकारान्तोऽप्यस्तीत्यनन्तभाष्ये, क्वचित्तु दीर्घायुष्ट्वायेत्येव पाठः। तथा—"त्रेण्या शलल्या विनीय त्रीणि कुशतरुणान्यन्तर्दधात्योषध इति" त्रेण्या त्रिश्वेतया शलल्या शल्लकीकण्टकेन विनीय पृथक्कृत्य विरलान् कृत्वा त्रीणि कुशतरुणानि दर्भपत्राणि अन्तर्मध्ये दधाति धारयेत् "ओषधे त्रायस्व" इति मन्त्रेणेत्यर्थः। दर्भपत्राणि च केशमूलसंलग्नाग्रभागानि यथा भवन्ति तथा निधापनीयानि, तथा चाश्वलायनगृह्यम्—'त्रीणि कुशपिञ्जलान्यभ्यात्माग्राणि निदधातीति' कुमारस्याभ्यात्माग्राणीति नारायणभाष्यम्। गोभिलोऽप्याह—अभिशिरोग्रा निदधातीति, अभिशिरोग्राः शिरोऽभिमुखाग्रा इत्यर्थः। मन्त्रो यथा—"ओषधे त्रायस्व स्वधिते मैनꣳहिꣳसीः" अस्यार्थः—हे ओषधे! एनं कुमारं त्रायस्व रक्षस्व हे स्वधिते! वज्र! एनं कुमारं मा हिंसीः मा नाशयेति। कुशैः कृतरक्षमेनं वज्रं मा हिनस्त्वित्याशयः। तथा—'शिवो नामेति' लोहक्षुरमादाय निवर्त्तयामीति प्रवपति। ततः शिवो नामेति मन्त्रेण लोहक्षुरमादाय हस्तेन गृहीत्वा निवर्त्तयामीति मन्त्रेण प्रवपति, तं क्षुरं कुशतरुणेष्वन्तर्हितेषु स्थापयति, प्रपूर्वो वपतिः निधानार्थः, छेदनार्थत्वे तूत्तरसूत्रविहितं छेदनं नोपपद्यते। लोहक्षुरं ताम्रमयं क्षुरमिति कर्कः। ताम्रपरिष्कृतमयोमयमेव क्षुरमिति गदाधरः। शुद्धमेवायोमयं क्षुरमिति परे। मन्त्रो यथा—"शिवो

नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिंसीः।" अस्यार्थः-हे क्षुर! यत् त्वं नाम नाम्ना शिवः शान्तोऽसि, ते तव स्वधितिः वज्रं पिता अतस्ते तुभ्यं नमोऽस्तु, जन्यजनकयोरुभयोरुत्तमत्वं नमस्कारप्रयोजकम्, अत एव नतं मा मां मा हिंसीः मा विनाशयेति। द्वितीयमन्त्रो यथा—"निवर्त्तयाम्यायुषेऽन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय।" अस्यार्थः-हे क्षुर! आयुषे चिरजीवित्वाय, अन्नाद्याय अन्नादिकाय, प्रजननाय गर्भोत्पत्त्यै, रायस्पोषाय धनपुष्ट्यै, सुप्रजास्त्वाय शोभनापत्यभवनाय, सुवीर्याय शोभनवीर्याय च निवर्तयामि त्वां संयोजयामीति। तथा—"येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्। तेन ते ब्रह्मणो वपतेदमस्यायुष्यं जरदष्टिर्यथासदिति" सकेशानि प्रच्छिद्यानड्वहे गोमयपिण्डे प्रास्यत्युत्तरतो ध्रियमाणे। 'येनावपत् सविता' इति मन्त्रेण सकेशानि केशसहितानि कुशतृणानि प्रच्छिद्य च्छित्वाऽग्नेरुत्तरतो भूमौ ध्रियमाणेऽवस्थाप्यमाने आनड्वहे बलीवर्दसम्बन्धिनि गोमयपिण्डे प्रास्यति प्रक्षिपेदित्यर्थः। मन्त्रार्थस्तु—हे कुमार! ते तव तेन क्षुरेण ब्रह्मणः ब्रह्मा तथा वपते मुण्डयति। तेन केन? येन क्षुरेण विद्वान् वेदवित् सविता आदित्यः राज्ञः सोमस्य चन्द्रस्य वरुणस्य च अवपत् केशानच्छिनत् तथा, कथम्? यथा इदं चूडाकरणमस्य तव आयुष्यम् असत् भूयात्, किं भूतमायुष्यम्? जरदष्टिः जरदं वार्द्धकमश्नुते व्याप्नोतीति जरदष्टिर्वार्द्धकपर्यन्तमिति, ब्रह्मण इति प्रथमार्थे षष्ठी, वपतेदमिति सन्धिरार्षः। जरदष्टिरिति छान्दसं पुंस्त्वम्। तेन ब्रह्मणो वपतेदमिति पाठे हे ब्रह्मणो ब्राह्मणाः तेनास्य शिशोरायुष्यमिदं शिरो वपत मुण्डयत यथायं जरदष्टिरसत् भूयादिति व्याख्येयम्। तथा—'एवं द्विरपरं तूष्णीम्'। एवमुक्तप्रकारेण द्विः द्विवारमुन्दनादिगोमयपिण्डनिधानान्तम्, अपरं तूष्णीं मन्त्रं विना, दक्षिण एव गोदाने कर्म कुर्यादित्यर्थ इति गदाधरहरिहरौ, दक्षिणगोदाने उन्दनविनयनयोः कृतत्वात्कुशपत्रत्रयान्तर्निधानाद्येव पुनर्द्विवारं कर्त्तव्यमित्यपरे, छेदनमात्रं तूष्णीमन्यत्सर्वं पूर्ववत्समन्त्रकमिति रामदत्तादयः। तेषामयमाशयः—एवं द्विरपरं तूष्णीमिति सूत्रेण छेदनस्यैवामन्त्रकत्वं बोध्यते, अनन्तरत्वादिति। अत्र सूत्रकृता त्रिः छेदनस्योपदिष्टत्वात्तत्सौकर्यार्थ एव जूटिकायां भागत्रयकरणसमाचारः। तथा-'इतरयोश्चोन्दनादि' इतरयोः पश्चिमोत्तरयोर्गोदानयोरुन्दनादि सर्वं कर्म चकारादेवमेव कुर्यादित्यर्थः। तत्र पूर्वं पश्चिमगोदाने, तत उत्तरगोदाने कर्त्तव्यं प्रादक्षिण्यानुग्रहात्, अथ पश्चादथोत्तरत इत्यग्रिमसूत्रयोर्दर्शनाच्च। नन्वितरयोश्चोन्दनादीत्युक्त्या छेदनेऽपि पूर्वोक्तमन्त्रकरणकत्वप्रसक्तिरत आह स एव—'अथ पश्चात्त्र्यायुषम्' इति।

अथानन्तरं पश्चात् पश्चिमगोदानकर्मणि "त्र्यायुषम्" इति मन्त्रेण सकेशानि कुशतरुणानि सकृत् प्रच्छिद्य द्विस्तूष्णीं छिन्द्यादित्यर्थः। एष मन्त्रो जातकर्मणि व्याख्यातः। तथा—"अथोत्तरतो येन भूरिश्चिरादिवं ज्योक् च पश्चाद्धि सूर्यम्, तेन ते वपामि, ब्रह्मणा जीवातवे जीवनाय सुश्लोक्याय स्वस्तये" इति। अथोत्तरगोदानकर्मणि सकेशानां दर्भपत्राणां "येन भूरिश्चरा" इति मन्त्रेण सकृच्छेदनं द्विस्तूष्णीमित्यर्थः। मन्त्रार्थस्तु—येन ब्रह्मणा मन्त्रेण तपसा वा भूरिः प्रचुरः चराः चरणशीलो वायुः ज्योक् चिरम् आकल्पं दिवं द्यां पश्चात् सूर्यं चकारादन्यदपि सर्वं चरतीति शेषः, हिर्निश्चये, तेन ब्रह्मणा तपसा तन्मन्त्रेण वा ते तव शिरो वपामि मुण्डयामि, किमर्थम्? जीवातवे जीवनहेतवे धर्मार्थम्, जीवनाय प्राणनाय, सुश्लोक्याय शोभनयशसे, स्वस्तये मङ्गलाय चेति। क्वचित्तु—पश्चादधिसूर्यमिति पाठः, तत्र अधिसूर्यं सूर्ये इति व्याख्येयम्, पश्चाधिसूर्यमिति पाठे तकाराकारयोर्लोपश्छान्दसः। तथा—त्रिः क्षुरेण शिरः प्रदक्षिणं परिहरति, "यत्क्षुरेण मज्जयता सुपेशसा वप्त्वा वा वपति। केशाँश्छिन्धि शिरो मास्यायुः प्रमोषीः" इति। त्रिः त्रिवारं क्षुरेण शिरो मूर्द्धानं प्रदक्षिणं यथा भवति तथा परिहरति परिहरेत् "यत्क्षुरेण" इति मन्त्रेणेत्यर्थः। शिरः समन्तात् प्रदक्षिणं क्षुरं भ्रामयेदिति यावत्, सकृन्मन्त्रेण द्विस्तूष्णीमिति भाष्यकृतः। मन्त्रार्थस्तु—हे क्षुर! यद् यस्मात् क्षुरेण त्वया वप्त्वा मुण्डित्वा आवपति गोमयपिण्डे केशान् क्षिपति, अतोऽस्य केशांश्छिन्धि अवखण्डय, आयुर्मा प्रमोषीः मा अपहर, कथम्भूतेन क्षुरेण? अस्य कुमारस्य शिरो मज्जयता संस्कुर्वता, तथा सुपेशसा शोभयतेति। वाशब्दो वाक्यालङ्कारे। तथा—ताभिरद्भिः शिरः समुद्य नापिताय क्षुरं प्रयच्छति—"अक्षुण्वन् परिवप" इति। ताभिः प्रकृताभिः शीतोष्णाभिरद्भिः शिरः कुमारमस्तकं समुद्य क्लेदयित्वा नापिताय क्षुरं प्रयच्छति मुण्डनार्थं समर्पयेत् "अक्षुण्वन् परिवप" इति मन्त्रेणेत्यर्थः। मन्त्रार्थस्तु—हे नापित! अक्षुण्वन् क्षतमकुर्वन् परिवप समन्तान्मुण्डयेति। तथा—"यथामङ्गलं केशशेषकरणम्"। क्षुरसमर्पणानन्तरं नापितेन वपनं कार्यम्, तत्र यथामङ्गलं कुलाचारमनतिक्रम्य केशशेषकरणं शिखास्थापनं कार्यमित्यर्थः। यथा कुलधर्मं केशवेशान् कारयेदित्याश्वलायनगृह्यम्। पारस्करः—'अनुगुप्तमेतं सकेशं गोमयपिण्डं निधाय गोष्ठे पल्वल उदकान्ते वा" ततो वपनोत्तरं सर्वान् केशान् गोमयपिण्डे कृत्वा ततः सकेशं केशैः सहितमेतं गोमयपिण्डमनुगुप्तं वस्त्रादिना वेष्टितं कृत्वा गोष्ठे गवां व्रजे पल्वले वा अल्पोदकसरसि वा, अथवा उदकान्ते यत्र कुत्रचिदुदकसमीपे निधाय

स्थापयित्वेत्यर्थः। अत्र माता नूतनवस्त्रेण केशान् प्रतीक्ष्य दधिभक्तसमन्वितगोमय-पिण्डे निदधाति, ततो गोष्ठादौ प्रक्षिपतीति समाचारः। तथा—'आचार्याय वरं ददाति'। ततश्चूडाकरणकर्ता पित्रादिः स्वकीयाचार्याय वरमभिलषितद्रव्यं ददाति प्रयच्छेदित्यर्थः। अभिलषितद्रव्याभावे तु "चतुःकार्षापणो वरः" इति मूल्याध्यायोक्त-द्रव्यदानमिति भाष्यकृतः॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
चूडाकरण[1] प्रकाशः॥

---

१. अत्र विशेषान्तरमाह नारदः—

शिशोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्।
पञ्चमाब्दादथोर्ध्वं तु गर्भिण्यामपि कारयेत्॥ इति।

मातरि रजस्वलायां मेधातिथिः—

चौले च व्रतबन्धे च विवाहे यज्ञकर्मणि।
माता रजस्वला यस्य भवेत्तस्य न शोभनम्॥ इति।

अथ कर्णवेधः

अथ कर्णवेधकर्माह पारस्करः—'अथ कर्णवेधः'। अथानन्तरं कर्णवेधाख्यं कर्म व्याख्यास्यत इत्यर्थः। तथा—'वर्षे तृतीये पञ्चमे वा' कर्णवेधो विधेय इत्यर्थः। तथा—'पुष्येन्दुचित्राहरिरेवतीषु' स्पष्टम्। इन्दुः मृगशिराः, हरिः श्रवणा। तथा—'पूर्वाह्णे' सुगमम्। गर्गः—

कर्णवेधव्रतं कुर्यादुदङ्मार्गस्थिते रवौ।

व्यवहारसमुच्चये—

जन्मर्क्षोदयमासेषु क्रियते मङ्गल्यपौष्टिकं कर्म।
अशुभं वदन्ति गर्गाः श्रुतिवेधक्षौरयात्रासु॥

व्यासः—

ओजे संवत्सरे प्राहुः कर्णवेधविधिं बुधाः।

ओजे विषमे। कृत्यचिन्तामणौ वशिष्ठः—

न च जन्ममासे[1] न च चैत्रपौषे न युग्मवर्षे न हरौ प्रसुप्ते।
तिथौ न रिक्ते न च कृष्णपक्षे न जन्मभे कर्णविधिः प्रशस्तः॥

व्यवहारसमुच्चये—

अश्विनी रेवती पूर्वफल्गू हस्तः पुनर्वसू।
धनिष्ठा मृगपुष्येण स्वाती चोत्तरफल्गुनी॥
अनुराधोत्तराषाढा तथैवोत्तरभाद्रकम्।
एषु भेषु च कर्त्तव्या कर्णवेधनिका क्रिया॥

श्रीपतिसमुच्चये—

सौम्यग्रहाणां दिवसे कर्णवेधः प्रशस्यते।

---

१. जन्ममासनिषेधस्तु द्वितीयादिवर्षगतो नाद्यवर्षगतः, तस्य विहितत्वेन निषेधानवकाशात्। विशेष उक्तः सुबोधे—

शातकुम्भमयी सूची वेधने तु शुभप्रदा।
राजती वायसी वापि यथाविभवतः शुभा॥ इति।

श्रीकीर्त्तिः—

कन्यामिथुनमीनेषु गोगृहे तौलिभे तथा।
कर्णयोर्भूतिरायाति वेधनान्न च शेषभे॥

कृत्यचिन्तामणौ माण्डव्यः—

यदाऽपत्यद्वयं तिष्ठेत् संभवोऽप्यपरस्य च।
षट्कर्णं तद् विजानीयाद् गर्हितं तत् त्रयस्य च॥
इत्याशङ्क्य द्वयोर्मध्ये शुद्धिर्यस्याथ वत्सरे।
कर्णवेधो हितस्तस्य नात्र ज्येष्ठविचारणा॥
षट्कर्णोत्पत्तिमाशङ्क्य भानोः शुद्ध्यसमेऽपि च।
कर्णौ वेध्यो न दोषः स्यादन्यथा मरणं भवेत्॥

पारस्करः—'कुमारस्य मधुरं दत्वा प्रत्यङ्मुखोपविष्टाय दक्षिणं कर्णमभिमन्त्रयते "भद्रं कर्णेभिरिति, सव्यं वक्ष्यन्ती वेदेति च"। कुमारस्य यस्य कर्णवेधः क्रियते तस्मै कुमाराय मधुरं दत्वा प्रत्यङ्मुखोपविष्टाय प्रत्यङ्मुखोपविष्टस्य तस्य दक्षिणं कर्णं "भद्रं कर्णेभिः" इति मन्त्रेणाभिमन्त्रयेत्, "वक्ष्यन्ती वेदेति" मन्त्रेण सव्यं च वामकर्णमप्यभिमन्त्रयेदित्यर्थः। मन्त्रो यथा—"भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः। स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेम देवहितं यदायुः।" अस्यार्थः—हे देवाः! कर्णेभिः कर्णैः भद्रं कल्याणं शृणुयाम, हे यजत्राः! यजन्तं त्रायन्ते तादृशा देवा अक्षभिर्नेत्रैः भद्रं पश्येम, बहुलं छन्दसीत्यक्षिशब्दस्यानङादेशः, किञ्च देवहितं देवैः स्थापितं देवानां हितमुपासनयोग्यं वा यदायुर्जीवनं तद्वयं व्यशेमहि व्यश्नुवीमहि प्राप्नुयाम, कीदृशा वयं स्थिरैर्दृढैरङ्गैरवयवैः करचरणादिभिस्तनूभिः शरीरैश्च पुत्रादिभिर्वा युताः, स्तुष्टुवांसः भवतः स्तुवन्त इति। द्वितीयमन्त्रो यथा—"वक्ष्यन्ती वेदागनीगन्ति कर्णं प्रियꣳसखायं परिषस्वजाना। योषेव शिङ्क्ते वितताधिधन्वन् ज्या इयꣳसमने पारयन्ती॥ अस्यार्थः—इयं ज्या धन्वन् धन्वनि धनुषि अधिविततां उपरि विस्तारिता सती शिङ्क्ते अव्यक्तशब्दं कुरुते का इव योषेव यथा योषा कामिनी कामुकरञ्जनायाव्यक्तं वदति तथेयमपि, कीदृशी ज्या समने संग्रामे पारयन्ती पारं नयन्ती संग्रामादुत्तारयन्तीति यावत्, इयं का? या ज्या कर्णमागनीगन्ति आकृष्टा सती योद्धुः कर्णं प्रत्यत्यर्थमागच्छति, गमेर्यङ्लुकि रूपम्, कीदृशी वक्ष्यन्तीव

वक्तुमिच्छन्तीव, अन्योऽपि वक्तुमिच्छन् कर्णं प्रत्यागच्छति, प्रियं सखायमिष्टं मित्रं बाणरूपं परिषस्वजाना आलिङ्गन्ती इत्पादपूरणार्थः। तथा "अथ भिन्द्यात्", अथानन्तरं नापितद्वारा वेधयेदित्यर्थः। तथा "ततो ब्राह्मणभोजनम्" सुगमम्। इदमिहावगन्तव्यम् 'अथ कर्णवेध' इत्यारभ्य 'ततो ब्राह्मणभोजनम्' इत्यन्तं यदुक्तं तत्सर्वं याज्ञिकाः पठन्ति, न तु पारस्करीयम्, अत एव भाष्यकृद्भिर्न व्याख्यातमिति वदन्ति। अन्ये पुनः पारस्करीयमेव मन्यन्त इति। हेमाद्रौ देवलः—

कर्णवेधं रविच्छाया न विशेद्यजन्मनः।
तं दृष्ट्वा विलयं यान्ति पुण्यौघाश्च पुनः पुनः॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके कर्णवेधप्रकाशः॥

अथानुपनीतधर्मप्रकाशः

अथानुपनीतधर्माः। तत्र गोतमः—"प्रागुपनयनात्कामचारभक्षवादो नास्याचमनकल्पो विद्यते।" कामेति यथेष्टगमनभक्षणभाषण इत्यर्थः। अनेन वृथायानाश्लीलभाषणपर्युषितभक्षणादीनि न निषिद्धानीति प्रतिपादितम्, यानि पुनरत्यन्तपतनीयानि[1] तानि निषिद्धान्येव प्रायश्चित्तोपदेशात्। कल्पग्रहणादाचमनमात्रमस्तीति लब्धम्। तथा मद्यं नित्यं ब्राह्मणोऽनुपनीतोऽपि वर्जयेत्।

वशिष्ठः—"नह्यस्य विद्यते कर्म किञ्चिदामौञ्जिबन्धनात्, अन्यत्रोदककर्मस्वधापितृसम्बन्धेभ्यः।" उदककर्म तर्पणम्, स्वधा श्राद्धम्, पितृसम्बन्धो भूमिच्छत्रादिदानम्।

ब्रह्मपुराणे—

मातापित्रोरथोच्छिष्टं बालो भुञ्जन् भवेत् सुधीः।

वृद्धशातातपः—

शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम्।
रजस्वलादिसंस्पर्शे स्नानमेव कुमारके॥
प्राक् चूडाकरणाद् बालः प्रागन्नप्राशनाच्छिशुः।
कुमारस्तु स विज्ञेयो यावन्मौञ्जीनिबन्धनम्॥

मनुः—

नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते।
शूद्रेण हि समस्तावद्यावद्वेदान्न जायते॥

स्वधानिनयनात् श्राद्धमन्त्रात्।

दक्षः—

जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः।
स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शकः॥

समा वर्षाणि। व्यक्तीति व्यक्तिमात्रेण न तु कर्माधिकारित्वेनेत्यर्थः॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके अनुपनीतधर्मप्रकाशः॥

---

१. स्यात्कामचारभक्षोऽपि महतः पातकादृते इति षट्त्रिंशन्मतात्।

अथोपनयनप्रकाशः

अथोपनयनाख्यं कर्माह पारस्करः—'अष्टवर्षं ब्राह्मणमुपनयेद् गर्भाष्टमे वा'। प्रसवानन्तरं अष्टौ वर्षाणि यस्यासावष्टवर्षः, तादृशं ब्राह्मणमुपनयेत्, गर्भाष्टमे वा अथवा गर्भवर्षापेक्षया योऽष्टमो वर्षस्तस्मिन्नुपनयेदित्यर्थः। ऐच्छिकोऽत्र विकल्पः। उपनयनं च विधिना आचार्यसमीपनयनम् अग्निसमीपनयनं वा, सावित्रीवाचनं वा, अन्यदङ्गमिति स्मृत्यर्थसारादयः। उप गुरोः समीपे वेदाध्ययनार्थं नीयते येन गृह्योक्त-कर्मणा तदुपनयनम्। तदुक्तम्—

गृह्योक्तकर्मणा येन समीपं नीयते गुरोः।
बालो वेदाय तद्योगाद् बालस्योपनयं विदुः॥ इत्यपरे।

तथा—'एकादशवर्षं राजन्यम्, तथा द्वादशवर्षं वैश्यम्' एते पूर्वसूत्रवद्व्याख्येये। इहोभयत्रापि समस्तमपि गर्भपदं पूर्वसूत्रादनुवर्त्तते, वक्ष्यमाणगोभिलादिसंवादात्। तथा—'यथामङ्गलं वा सर्वेषाम्' अथवा सर्वेषां ब्राह्मणक्षत्रियविशां यथामङ्गलं यथा-कुलधर्ममुपनयनं भवतीत्यर्थः। यद्वा मङ्गलशब्देन शास्त्रान्तरमुच्यते, शास्त्रान्तर-विहितकालमनतिक्रम्योपनयनं भवतीत्यर्थः, तेन स्मृत्यन्तरोक्तकालान्तरसंग्रहः। देवलः—"प्रथमं मातापितृभ्यां गर्भाधानादिभिः संस्कृतो गर्भाष्टमे वर्षे तूपनयनार्हो भवति, तत्रोपाध्यायः पिता, गायत्री माता, एवमुपनीतो द्विपितृको द्विजातिः स्यात्" द्विपितृकः द्विमातापितृकः एकशेषात्, उपक्रमे द्वयोः कीर्त्तनात्। गोभिलः—"गर्भाष्टमेषु ब्राह्मण-मुपनयेद् गर्भैकादशेषु क्षत्रियम्, गर्भद्वादशेषु वैश्यम्। मनुः—

गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम्।
गर्भादेकादशे राज्ञो गर्भाच्च द्वादशे विशः॥

उपनयनमेवोपनायनम् स्वार्थे णिच्।

याज्ञवल्क्यः—

गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम्।
राज्ञामेकादशे सैके विशामेके यथाकुलम्॥

सैके एकेन सहिते एकादशे द्वादशे इत्यर्थः । 'एकादशे' इति 'सैके' इत्युभयत्रापि गर्भग्रहणमनुवर्त्तनीयम्, उपदर्शितगोभिलादिसंवादात् । एके यथाकुलं कुलस्थित्या केचिदुपनयनमिच्छन्ति ।

मनुः—

ब्रह्मवर्चसकामस्य[1] कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥

उपनयनमुपक्रम्य आपस्तम्बः—"सप्तमे ब्रह्मवर्चसकामं अष्टमे आयुःकामं नवमे तेजस्कामं दशमेऽन्नाद्यकामं एकादशे इन्द्रियकामं द्वादशे पशुकामम्" ।

विष्णुः—

षष्ठे तु धनकामस्य विद्याकामस्य सप्तमे ।
अष्टमे सर्वकामस्य नवमे कान्तिमिच्छतः ॥

पौलस्त्यः—

पञ्चमे षष्ठवर्षे तु सगर्भे सप्तमेऽपि वा ।
गुरुसूर्यशशाङ्कानां विशुद्ध्यारम्भयेद् व्रतम् ॥

यथोक्तकालेषूपनयनासम्भवे त्वाह पारस्करः—"आषोडशाद् वर्षाद् ब्राह्मणस्यानतीतः कालो भवति" । षोडशाद् वर्षादर्वाग् ब्राह्मणस्यानतीतोऽनतिक्रान्तः काल उपनयनसमयो भवतीत्यर्थ इति कर्कहरिहरगदाधरादयः । उत्तरसूत्रे अत ऊर्ध्वमित्यभिधानस्वरसादाषोडशादित्यत्राभिविधावाङ्, तेन षोडशवर्षपर्यन्त इति तु नारायणभाष्यम्, विज्ञानेश्वरमुरारिमिश्रादयोऽप्येवम् । अनयोर्मतयोगर्भजन्मप्रभृतिगणनाभ्यामविरुद्धार्थता । तथा च माण्डव्यः—

व्रतबन्धे विवाहे च वत्सरपरिगणनमाहुराचार्याः ।
आधानपूर्वकमेके प्रसूतिपूर्वं सदान्ये तु ॥ इतीत्यपरे ।

---

१. वेदाध्ययनतदर्थज्ञानादिप्रकर्षकृतं तेजो ब्रह्मवर्चसम् । हस्त्यश्वादिराज्यबलं बलशब्दार्थः । यद्यपि बालस्य कामना न संभवति, तथापिप्युपनेतृगतफलकामना तस्मिन्नुपचर्यते ।

तथा—'आ द्वाविंशाद्राजन्यस्य, तथा—आ चतुर्विंशाद्वैश्यस्य', एते पूर्वसूत्रवद्व्याख्येये। तथा—'अत ऊर्ध्वं पतितसावित्रीका भवन्ति'। अतः पञ्चदशादेकविंशात् त्रयोविंशाच्च वर्षादूर्ध्वं यथाक्रममनुपनीता ब्राह्मणादयः पतितसावित्रीका अधिकाराभावात् पतिता स्खलिता सावित्री येभ्यस्तथाभूता भवन्ति सम्पद्यन्त इत्यर्थ इति कर्कादयः। अत ऊर्ध्वं षोडशादेर्वर्षादूर्ध्वमिति नारायणादयः।

तथा—'नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न चैभिर्व्यवहरेयुः'। एनान् पतितसावित्रीकान् नोपनयेयुः, कैश्चिदतिक्रान्तनिषेधैरुपनीतानपि नाध्यापयेयुः, एवमध्यापितानपि न याजयेयुः, एवमेभिः सह न च व्यवहरेयुः स्नानासनशयनभोजनविवाहादिभिः कर्मभिर्व्यवहारमपि न कुर्युरित्यर्थः। उपनयेयुरित्यादौ बहूवचनं तत्कर्तृसंयोगेऽपि प्रायश्चित्तज्ञापनार्थम्।

तथा च स्मृतिः—

व्रात्याचार्यस्य भुक्त्वान्नं कृच्छ्रपादेन शुद्ध्यति।
यश्चोपनयते व्रात्यान् त्रिभिः कृच्छ्रैः स शुद्ध्यति॥ इति।

याज्ञवल्क्यः—

आषोडशाद् द्वाविंशाच्चतुर्विंशाच्च वत्सरात्।
ब्रह्मक्षत्रविशां काल औपनायनिकः परः॥
अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः।
सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः॥

परः नातः परमुपनयनकालोऽस्तीत्यर्थः। सावित्रीपतिताः पतितसावित्रीकाः।

अत्र व्रात्यस्तोमे कृते उपनयनाधिकारो न तूपनयनस्थान एव व्रात्यस्तोमविधिः, तस्य प्रायश्चित्तरूपस्य संस्कारत्वे मानाभावात्।

उक्तं च कात्यायनेन—

लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते।
प्रायश्चित्ते कृते पश्चात् तत्तत्कर्म समाचरेत्॥ इति बोध्यम्।

अत्र प्रायश्चित्तविधिः प्रायश्चित्तग्रन्थेषु द्रष्टव्यः। अत्रायं संक्षेपः—गर्भाष्टमोऽष्टमो वा वर्षो ब्राह्मणस्य, गर्भैकादशः क्षत्रियस्य, गर्भद्वादशो वैश्यस्योपनयने मुख्यः

कालः। तत ऊर्ध्वं गर्भषोडशगर्भद्वाविंशगर्भचतुर्विंशपर्यन्तो यथाक्रमं गौणः। अत ऊर्ध्वं यथाशास्त्रं प्रायश्चित्तं कृत्वोपनयनाधिकारिणो भवन्ति। पञ्चमवत्सरादौ तूपनयनं काम्यमिति।

उपनेतृक्रममाह वृद्धगर्गः—

पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः।
उपानयेऽधिकारी स्यात् पूर्वाभावे परः परः॥

तथा—

पितैवोपनयेत् पुत्रं तदभावे पितुः पिता।
तदभावे पितुर्भ्राता तदभावे तु सोदरः॥ इति।

आश्वलायनः—

'उदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे चौडकर्मोपनयनगोदानविवाहाः'। उदगयने उत्तरायणे आपूर्यमाणपक्षे शुक्लपक्षे।

आपस्तम्बः—

"वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्"। वसन्त इत्याद्यधिकफलार्थम्।

कृत्यचिन्तामणौ वाचस्पतिः—

माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः।
चैत्रे भवति मेधावी वैशाखे कोविदो भवेत्॥
ज्यैष्ठे गहननीतिज्ञ आषाढे क्रतुभाजनः।
शेषे[1]ष्वन्येषु रात्रिः स्यान्निषिद्धं निशि च व्रतम्॥

ज्येष्ठपुत्रस्य ज्यैष्ठे दशाहाभ्यन्तरे व्रतबन्धनिषेधो विवाहप्रकरणे उक्तः। शौनकः—

गर्भाष्टमे गर्गपराशराद्यैः फलं यदुक्तं व्रतबन्धनेषु।
ततोऽधिकं जन्मसु तारकासु मासेऽथवा जन्मनि जन्मभे वा॥

जन्मभे जन्मोदये।

मासश्चात्र सौर एव, 'विवाहादौ स्मृतः सौरः' इत्यादि पितामहवचनात्। अत्र यद्यपि—'त्यक्त्वा चतुर्थीमपि कृष्णपक्षेष्वाद्यं त्रिभागं शुभदं व्रते सत्' इति

---

१. मार्गशीर्षे भवेद् भ्रष्टः शेषे दुःखमवाप्नुयादिति चण्डेश्वरः।

वशिष्ठवचनात्, 'कृष्णादिमत्रिकलवेऽपि न चापराह्णे' इति मुहूर्त्तचिन्तामणि-दर्शनाच्च कृष्णपक्षे पञ्चमीपर्यन्तमुपनयनकरणमायाति। तथा—

विनर्तुना वसन्तेन कृष्णपक्षे गलग्रहे।
अपराह्णे चोपनीतः पुनः संस्कारमर्हति॥

इति नारदवचनपर्यालोचनेन वसन्ते संपूर्णकृष्णपक्षे तदायाति, तथापि 'आपूर्य-माणपक्षे' इत्याश्वलायनसाधारणनिर्देशात् 'कृष्णपक्षे द्वितीयायाम्' इत्यादि वक्ष्यमाण-वचनात् सर्वाः कृष्णपक्षतिथयो निषिद्धा इति सिद्धवद् वाचस्पतिमिश्रादिलिखनाच्छि-ष्टाचाराभावाच्च सर्वाः कृष्णपक्षतिथयो निषिद्धा एव, विनर्तुना वसन्तेनेति वचनं च वसन्तर्तुप्रशंसापरमेवेत्यास्तां विस्तरः।

अत्रायं संक्षेपः—

सौरमाघादिषट्कान्यतममासे शुक्लपक्षे व्रतबन्धो विधेयः। जन्ममासे च प्रशस्तः। एवं जन्मतारासु जन्मलग्ने च प्रशस्तः। अपराह्णे च निषिद्धः। ज्यैष्ठे मासि कृत्तिकास्थं रविं यावद् ज्येष्ठपुत्रस्य निषिद्ध इति।

कृत्यचिन्तामणौ—

प्रतिपदि मदिरासक्तः श्रुतिपटुरुचिरो भवेद् द्वितीयायाम्।
नीतिज्ञो मेधावी जितसकलारिस्तृतीयायाम्॥
मन्दमतिर्गतचित्तो दीनश्च पुनः खलश्चतुर्थ्यां स्यात्।
पञ्चम्यां बहुवित्तः पूर्णायुर्धनपतिर्मतिमान्॥
षष्ठ्यामशुचिरभार्यः सप्तम्यां व्याधियुक्तः स्यात्।
अष्टम्यां स्यादथाल्पायुर्नवम्यां नार्थभाजनम्।
दशम्यां सर्वपूर्णः स्यादेकादश्यां गुणान्वितः॥
द्वादश्यां श्रुतिशास्त्रज्ञः त्रयोदश्यां निधनं भवेत्।
चतुर्दश्यां भवेन्नाशः पञ्चदश्यां क्षयी ध्रुवम्॥

वृद्धगर्गः—

स्मृतिषूक्तानध्यायान् सप्तमीं च त्रयोदशीम्।
पक्षयोर्मासमासस्य द्वितीयां परिवर्जयेत्॥
अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी।
अमावास्योभयं हन्ति सर्वं हन्ति च पूर्णिमा॥

अत्र कृष्णपक्षे उपनयनाप्रसक्तावपि पक्षयोरिति द्विवचनं पुनरुपनयनाभिप्रायकं वेदितव्यम्, तत्र हि कृष्णपक्षादिदोषो नास्ति।

तथा च गर्गः—

अनध्यायेऽपि कुर्वीत यस्य नैमित्तिकं भवेदिति। अत्रापिना कृष्णपक्षादेः समुच्चय इति निबन्धारः। एवमन्यत्राप्यूहनीयम्।

व्यासः—

सा च यौधिष्ठिरी सेना गाङ्गेयशरपीडिता।
प्रतिपत्पाठशीलानां विद्येव तनुतां गता॥

गुणिसर्वस्वे—

मार्गे च फाल्गुने चैव आषाढे कार्त्तिके तथा।
पक्षयोर्मधुमासस्य द्वितीयां परिवर्जयेत्॥
कृष्णपक्षे द्वितीयायां भास्करे मृगकुम्भगे।
सप्तम्यां च नवम्यां च गतासुव्रतबन्धनात्॥

भास्करे मृगकुम्भगे द्वितीयायामित्यन्वयः।

राजमार्त्तण्डे—

प्रे को चै चा द्वितीया सा प्रेतपक्षगता तु या।
या तु कोजागरे जाते चैत्रावल्याः परा तु या॥
चातुर्मास्यनिवृत्तौ च द्वितीया या भवेत्तथा।
सर्वास्वेतास्वनध्यायः पुराणे परिकीर्त्तितः॥

नरसिंहपुराणे—

अयने विषुवे चैव शयने बोधने तथा।
अनध्यायं प्रकुर्वीत मन्वादिषु युगादिषु॥

मन्वादयस्तु मत्स्यपुराणे—

अश्वयुक्शुक्लनवमी द्वादशी कार्तिके तथा।
तृतीया चैत्रमासस्य तथा भाद्रपदस्य च॥
फाल्गुनस्य त्वमावास्या पौषस्यैकादशी तथा।
आषाढस्यापि दशमी माघमासस्य सप्तमी॥

श्रावणस्याष्टमी कृष्णा तथाषाढी च पूर्णिमा।
कार्तिकी फाल्गुनी चैत्री ज्यैष्ठी पञ्चदशी सिता॥
मन्वन्तरादयस्त्वेता दत्तस्याक्षयकारिकाः।

श्रावणस्याष्टमी कृष्णा शुक्लादिरीत्या, तेन भाद्रकृष्णाष्टमी पर्यवस्यति। अत्र श्रावणकृष्णाष्टमी फाल्गुनामावास्याव्यतिरिक्ताः सर्वास्तिथयः शुक्ला एव।

युगादयस्तु कृत्यचिन्तामणौ—

माघे पञ्चदशी शुक्ला नभस्ये च त्रयोदशी।
तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः॥

व्यासः—

नो सन्ध्यागर्जिते प्राहुर्व्रतोपनयनं बुधाः।
न च विष्ट्यामथाकालवृष्ट्यामासप्रवासरान्॥
न रात्रौ न च सन्ध्यायां नानध्याये गलग्रहे।

गलग्रहस्वरूपमाह वृद्धगर्गः—

अष्टम्या सप्तमी विद्धा चतुर्दश्या त्रयोदशी।
द्वितीया प्रतिपन्मिश्रा गलग्रह उदाहृतः॥
आरम्भानन्तरं यत्र प्रत्यारम्भो न विद्यते।
गर्गादिमुनयः सर्वे तमेवाहुर्गलग्रहम्॥

एवकारोऽप्यर्थे। अत्र पूर्ववचनेन दिवाचतुर्दशीविद्धत्रयोदश्या गलग्रहत्वकथनेन तत्र प्रत्यारम्भाभावात्तत्पूर्वद्वादश्या अपि गलग्रहत्वम्, उत्तरवचनात्। नन्वेवं तादृशद्वादश्या गलग्रहत्वेन तत्र प्रत्यारम्भाभावात्तत्पूर्वैकादश्या गलग्रहत्वापत्तिरिति चेन्मैवम्, एतद्वचनस्य द्वादश्यां चारितार्थ्येन तत्पूर्वैकादश्यां गलग्रहत्वप्रतिपादकत्वासम्भवात्, स्वबोध्यगलग्रहत्वप्रयुक्तप्रत्यारम्भाभावमवलम्ब्य पुनः स्वप्रवृत्तेरयोगात्, सकृत्कृते कृतः शास्त्रार्थ इति न्यायात्, उपक्रमोपसंहारबलेन यत्रोत्तरदिने 'अष्टम्या सप्तमी विद्धा' इति वचनबोधितगलग्रहत्वप्रयुक्तः प्रत्यारम्भाभावस्तत्पूर्वतिथेरेवानेन गलग्रहत्वबोधनाच्च। अत एवाक्षयतृतीयायां युगादित्वेनानध्यायत्वात् प्रत्यारम्भासम्भवेऽपि तत्पूर्वद्वितीयाया न गलग्रहत्वमिति दिक्।

मितक्षरायां वसिष्ठः—

स्युस्तिस्रस्तिथयो वारे एकस्मिन्नवमी तिथिः।
तिथिर्वारत्रये चैका सा त्रिस्पृक् द्वे च निन्दिते॥

कृत्यचिन्तामणौ—

यत्रैकः स्पृशति तिथिद्वयावसानं वारश्चेदवमदिनं तदुक्तमार्यैः।
या तु स्पृग्भवति तिथिस्त्रयस्य चाह्नां त्रिस्पृक् सा पुनरिदं द्वयं च नेष्टम्॥

इदमपि बहुभिर्निबन्धृभिर्नादृतम्। अत्रायं प्रकरणार्थः—

द्वितीयातृतीयापञ्चमीदशम्येकादशीद्वादश्य उपनयने विहिताः। तास्वपि माघफाल्गुनचैत्राषाढद्वितीया निषिद्धाः। चैत्रशुक्लतृतीया आषाढशुक्लदशमी पौषशुक्लैकादशी च मन्वन्तरादित्वेन निषिद्धाः। वैशाखशुक्लतृतीया युगादित्वेन निषिद्धा। त्रयोदशीचतुर्दश्योर्दिवावेधे तत्पूर्वद्वादशी प्रतिपन्मिश्रद्वितीया च गलग्रहत्वेन निषिद्धे। आषाढशुक्लैकादशीद्वादश्यौ हरिशयनान्तर्गतत्वेन निषिद्धे। एवमवमीतिथिस्त्र्यहस्पृक्तिथिश्च केषाञ्चिन्मते निषिद्धे। विष्ट्यां रात्रौ सन्ध्यायां च व्रतबन्धो निषिद्ध इति। माघशुक्लपञ्चमीनिषेधस्त्वनध्यायप्रकरणे विवेचयिष्यते।

ज्योतिषे—

संक्रान्तौ तरणेर्गलग्रहदिने नित्यं प्रसुप्ते हरौ
मन्वादावखिले युगादिषु तथाऽनध्यायपापांशयोः।
नो कुर्युर्व्रतबन्धनं ग्रहणभे केतूदये भार्गवे
जीवे नीचगते दिनेशशशिनोः सन्ध्याम्बुदे गर्जिते॥

अत्र संक्रान्तिप्रयुक्तनिषेधे लाघवेन संक्रान्तिमद्दिनत्वं तन्त्रं न तु संक्रान्तिप्रयुक्तपुण्यदिनत्वं मानाभावाद् गौरवाच्च। अत एव—

रविसंक्रमणे पुण्ये न स्नायाद्यस्तु मानवः।
सप्तजन्मान्यसौ रोगी दरिद्रश्चैव जायते॥

इत्यादौ स्नानादिविधौ पुण्यपदं प्रयुक्तम्, अन्यथा संक्रान्तिपदस्यैव तत्प्रयुक्तपुण्यकालपरत्वे तदुपादानं निरर्थकं स्यादिति प्राञ्चः। नव्यास्तु संक्रान्तिपुरस्कारेण विधिनिषेधयोरपि तत्प्रयुक्तपुण्यकालत्वमेव तन्त्रम्, 'रविसंक्रमणे पुण्ये' इत्यादिवचनेषु पुण्यत्वपुरस्कारेण विधिनिषेधश्रवणात्। नन्वेवं पुण्यकालापगमे तदहरेव मांसभक्ष-

णादिप्रसङ्गभिया तन्निमित्तपुण्यकालाधिकरणाहोरात्रत्वं तन्त्रं वाच्यम्, तदपेक्षया लाघवेन संक्रमणादिनत्वमेव तन्त्रमस्त्विति चेन्न; पुण्यकालपुरस्कारेण विधिनिषेध-श्रवणेन गौरवस्य प्रामाणिकत्वादित्याहुः।

स्मृत्यालोके तु—

विधीनामत्र विषयः पुण्यकालः प्रकीर्त्तितः।
निषेधानां तु तदहोरात्रगोचरता मता॥

इति लिखितम्। संक्रमणपूर्वोत्तरदिने अपि निषिद्धे, रविदग्धं दिनत्रयमिति वचनात्।

अथानध्यायाः—

ते च कतिपयेऽनुपदमुक्ताः, शेषा उच्यन्ते। तथा च हारीतः—

व्रताह्निपूर्वसन्ध्यायां वारिदो यदि गर्जति।
तदिनं स्यादनध्यायो व्रतं तत्र न कारयेत्॥

अत्र सन्ध्यायां पूर्वत्वं व्रतदिवसापेक्षया, तेन व्रतदिवसपूर्वदिवसीयसायं-सन्ध्यागजे उपनयनदिनमनध्यायं करोतीत्यर्थः। व्रताह्नीति सप्तमी च षष्ठ्यर्थे इति न तदर्थानुपपत्तिः। पूर्वसन्ध्यापदं व्रतदिवसीयप्रातःसन्ध्यापरमिति तु न भ्रमितव्यं पूर्वपदवैयर्थ्यापत्तेरिति प्राञ्चः। अत्रेदं वक्तव्यं षष्ठ्यर्थे सप्तमीति यदुक्तं तत्र षष्ठ्यर्थः कः? अवध्यवधिमद्भावो अवयवावयविभावो वा? कोऽप्यन्यो वा? नाद्यः, तत्र ग्रामात्पूर्वमित्यादाविव पञ्चम्या एव प्रसक्तेः, न हि चैत्रात्पूर्वः फाल्गुन इत्यर्थे चैत्रे पूर्वः फाल्गुन इति केनचित्कदाचित्प्रयुक्तम्। न चार्षत्वात्तथा, सत्यामुपपत्तावार्षत्वकल्पनाऽनवकाशात्। नापि द्वितीयः, तथा सति व्रतदिवसावयवसन्ध्याया एव प्रतीत्या भवदभिमतार्थालब्धेः। नापि तृतीयः, पूर्वपदनैराकाङ्क्ष्यात्। तस्मात् सप्तम्यर्थसामञ्जस्येन पूर्वसन्ध्यापदं व्रतदिवसप्रातःसन्ध्यापरमेवेति। यदपि पूर्वपदवैयर्थ्योद्घाटनं तदपि मन्दम्,

ततोऽखिलजगत्पद्मबोधायाच्युतभानुना।
देवक्यां पूर्वसन्ध्यायामाविर्भूतं महात्मना॥

इति विष्णुपुराणादिदर्शनेन पूर्वसन्ध्यापदस्य प्रातःसन्ध्यायां रूढ्यवगमात्, अनध्यायत्वकथनेनैव व्रतबन्धनिवृत्तौ पुनः 'व्रतं तत्र न कारयेत्' इत्यंशवत्पूर्वपदस्यापि स्पष्टार्थत्वाच्च। अपि च, पूर्वपदाभावे व्रतदिवसीयसायंसन्ध्याया अपि ग्रहणापत्त्या

तत्रत्यगर्जनस्यापि संक्रमणादिवत् स्वपूर्वकालदूषकत्वापत्तिः। न च संक्रमणादेर्भावि-नोऽपि ज्योतिःशास्त्रादिना पूर्वमेव निश्चयसम्भवः, भाविगर्जनस्य तु पूर्वं निर्णयासंभव-इति तयोर्विशेष इति वाच्यम्, भाविगर्जनस्य पूर्वनिर्णयासंभवेन तत्र निर्विचिकित्सोपन-यनानुष्ठानसम्भवेऽपि तत्कालस्य वस्तुत उपनयनानर्हतया तत्रत्योपनयने कालवैगुण्य-प्रयुक्तवैगुण्यप्रसङ्गात्, गुरुबाल्यादिप्रयुक्तकालाशुद्धिमविदुषा कृतोपनयनादिवत्।

अथ तत्रोपनेत्रादिकतिपयानां गुरुबाल्यादिप्रयुक्तकालाशुद्धिनिर्णयाभावेऽपि जगति कस्यचिदपि तन्निर्णयसम्भवः, भाविगर्जने तु न तथेति विशेष इति चेन्न; तस्या-किञ्चित्करत्वात्, कालाशुद्धेः स्वरूपसत्वेनैवोपनयनादिदूषकत्वाच्च, कस्यचित्-त्रिकालज्ञादेर्भाविगर्जननिर्णयस्यापि सम्भवेनाविशेषाच्च, सहस्रशोऽनुभूतप्रामाण्येन प्रश्नशास्त्रादिना सर्वेषां तन्निर्णयसम्भवाच्च। किञ्च, मध्याह्नसन्ध्याव्यावृत्त्यर्थमपि पूर्वपदम्। अपि च दिनान्ते तु 'सायंसन्ध्यापितृप्रसू' इत्यभिधानदर्शनेन प्रचुर-प्रयोगेण चासति विशेषयत्ने सन्ध्यापदेन सायंसन्ध्यैवावगम्यत इति पूर्वपदाभावे प्रातः-सन्ध्याप्रतीतिरेव न स्यादिति तत्प्रतीत्यर्थं पूर्वपदम्।

अत एव 'प्रभातसंध्यासमये च गर्जितम्, इत्यादौ प्रभातादिपदमुपात्तम्, अन्यथा तत्सार्थक्यं दुर्घटमेव। एवं स्थिते सट्ठकुरदेवनाथादिसंमतं पूर्वसन्ध्यापदस्य प्रातः-सन्ध्यापरत्वमेवाभ्युपेतव्यम्। एवमेव सन्मिश्रपक्षधरगोकुलनाथोपाध्यायादयः। गौडादिनिबन्धारोऽप्येवमेवेत्यलं पल्लवेन।

ज्योतिषे—

पयोधरैश्छन्नतरं खमण्डलं दिवानिशं वा व्रतबन्धवासरे।
प्रभातसन्ध्यासमये च गर्जितं तदा ह्यनध्यायमुशन्ति सूरयः॥

छन्नतरमिति, अनेनाविच्छिन्नवर्षणमभिमतम्। दिवानिशमिति व्रतबन्ध-समयात् प्रागित्यर्थः। उदीच्यवर्षणविच्छेदाविच्छेदयोर्ज्ञातुमशक्यत्वादिति द्वैत-निर्णयप्रदीपः।

इदं च वैशाखादावपि न तु पौषादिचतुष्के, मानाभावात्। अत एव वैशाख-ज्यैष्ठाषाढास्त्वतिवृष्ट्याऽनध्याय इति द्वैतनिर्णयः।

तात्कालिकानध्यायप्रकरणे याज्ञवल्क्यः—

देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे।
भुक्त्वार्द्रपाणिरम्भोन्तरर्द्धरात्रेऽतिमारुते ॥

अशुचौ देशे, अशुचावात्मनि च, तथा विद्युत् संप्लवे पुनः पुनर्विद्योतमनायां विद्युति, स्तनितसंप्लवे पुनः पुनर्मेघघोषे तात्कालिकोऽनध्यायः। भुक्त्वार्द्रपाणिर्नाधीयीत, जलमध्ये, अर्द्धरात्रे. अतिमारुते, अहन्यपि तावत्कालं नाधीषीतेत्यर्थः।

तथा—

श्वक्रोष्टुगर्दभोलूकसामवाणार्त्तनिस्वने।
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥

साम सामानि, वाणो वंशः, श्वादीनां निःश्वने, अमेध्यादीनां सन्निधाने च तावत्कालमनध्यायः।

वृद्धगर्गः—

पशुमण्डूकनकुलश्वाहिमार्जारमूषकैः।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते महोत्सवे ॥
सन्ध्यागर्जनभूकम्पनिर्घातोल्कानिपातने।
नाकालवृष्टौ कुर्वीत व्रतबन्धशुभक्रियाम् ॥

शक्रपाते शक्रध्वजस्यावरोपणदिवसे, महोत्सवे वैश्यानां सीरपञ्चमीदिने, इति लग्नदीपिका। शक्रध्वजस्यैवोच्छ्रयदिवसे 'शक्रपाते तथोच्छ्रये' इति याज्ञवल्क्यवचनैकमूलकत्वानुरोधादिति द्वैतनिर्णयप्रदीपः। लग्नदीपकानुसारिणः शिष्टास्तु सीरपञ्चमीदिने उपनयनं नानुतिष्ठन्ति।

गौडनिबन्धे—

रक्तस्रावे तथा शस्त्रक्षते पाठनिषेधनात्।
उपनयनं न तत्र स्यादिति मन्वादिसंमतम् ॥

अयमत्रप्रकरणार्थः—

प्राचां मते रविसंक्रमणदिनम्; नव्यमते तत्प्रयुक्तपुण्यदिनं तत्पूर्वदिनमुत्तरदिनं च व्रतबन्धे निषिद्धम्, प्रातःसन्ध्यागजनेऽतिवर्षणे च तद्दिनमनध्यायः। देशात्मनोर-

शुचित्वे विद्युद्विद्योतनघनगर्जनयोः पौनःपुन्येऽतिवाते च तात्कालिकोऽनध्यायः। जलमध्येऽर्द्धरात्रे भुक्त्वार्द्रपाणिश्च नाधीयीत, श्वक्रोष्टृगर्दभोलूकसामवेदवंशदुःखितजननिःस्वने, अमेध्यशवशूद्रान्त्यश्मशानपतितसन्निधौ च तावत्कालमनध्यायः। पशुभेकनकुलकुक्कुरसर्पमार्जारमूषकैरन्तरागमने कृते तदहोरात्रं शक्रध्वजावरोपणादिवसं सीरपञ्चमीदिनं चानध्यायः। रक्तस्रावे शस्त्रक्षते चोपनयनं निषिद्धमिति।

कृत्यचिन्तामणौ भुजबलभीमः—

स्वातीशक्रधनाश्विमित्रकरभं पौष्णेज्यनारायणा-
श्चन्द्रस्तोयपतिस्तथादितिसुतो भाद्रद्वयं सागरः।
केन्द्रस्थे भृगुजेऽङ्गिरः शशिसुते चन्द्रे च ताराबले
कर्त्तव्यं व्रतबन्धनं शुभतिथौ वारे सितार्के गुरौ॥

शक्रभं ज्येष्ठा, धनभं धनिष्ठा, अश्विभमश्विनी, मित्रभमनुराधा, करभं हस्ता, पौष्णं रेवती, इज्यः पुष्या, नारायणः श्रवणः, चन्द्रो मृगशिराः, तोयपतिः शतभिषक्, अदितिसुतः पूर्वफल्गुनी, भाद्रेति सागराचार्यमतेन, पूर्वभाद्रोत्तरभाद्रे अपि प्रशस्ते इत्यर्थः। सागरः पूर्वाषाढेत्यपरे व्याचख्युः। केन्द्रस्थे इत्यादिना लग्नप्रशंसा, चन्द्रे च शुद्धे इति शेषः। ताराबले ताराशुद्धौ।

वराहः—

दिनकरशशिजीवे गोचरे शोभनस्थे
ह्युदगयनगतेऽर्के लग्नयोगे प्रशस्ते।
हरिकरवसुचित्रासौम्यपौष्णाश्विशक्राः
सलिलपवनपुष्या मेखलाबन्धनेष्टाः॥

हरिः श्रवणा, वसवो धनिष्ठा, सौम्यं मृगशिराः, सलिलं पूर्वाषाढः, पवनः स्वाती।

ज्योतिषे—

हस्तत्रये दैत्यरिपुत्रये च पुष्येन्दुशक्राश्विनिरेवतीषु।
वारेषु शुक्रार्कबृहस्पतीनां हितानुबन्धी द्विजमौञ्जिबन्धः॥

हस्तत्रये हस्तादिनक्षत्रत्रितये। दैत्यरिपुत्रये, श्रवणादित्रये, अत्रानुराधोत्तरभाद्रयोः प्राशस्त्यमयुक्तम्, अक्षौरभेनादितौ चेति निषेधादिति लग्नदीपिकादयः। अक्षौरभे क्षुरकर्मनिषिद्धनक्षत्रे अनुराधादौ अदितौ पुनर्वसौ च नेति तदर्थः।

व्यवहारसमच्चुये—

अश्विनीमृगचित्रा च हस्ता स्वात्यथ शक्रभम्।
पुष्यश्च पूर्वफल्गुन्या श्रवणा रेवती तथा॥
शतभिषा वसुसंयुक्ता व्रतबन्धे प्रशस्यते।

कृत्यचिन्तामणौ श्रीधरकर्मकाण्डे—

शुभप्रदानि व्रतबन्धकार्ये ज्येष्ठां विहाय क्षुरकर्मभानि।
कश्चिच्च तामप्युररीचकार न तन्मतं भीमपराक्रमस्य॥

राजमार्तण्डे—

यज्वा वसन्तसमये बहुवित्तभोगी गर्भाष्टमे विविधशास्त्रविशारदस्तु।
वेदार्थपालनपरः खलु जन्ममासे ऋक्षेऽपि जन्मनि बहुऋतुभाजनं स्यात्॥

विहितमपि नक्षत्रं ग्रहणविद्धं निषिद्धम्, 'नो कुर्युर्व्रतबन्धनं ग्रहणभे' इति-प्रागुक्तवचनात्। तच्च कियद्दिवसपर्यन्तमित्यपेक्षायां ग्रासभेदेन तद्व्यवस्थामाह निर्णय-प्रदीपे रामाचार्यवचनम्—

नेष्टं ग्रहर्क्षं सकलार्द्धपादग्रासे क्रमात्तर्कगुणेन्दु मासान्। इति।

सकलग्रासे षट्, अर्द्धग्रासे त्रीन्, पादग्रासे एकमासं व्याप्य ग्रहर्क्षं त्याज्य-मित्यर्थः।

अयमत्रसमुदायार्थः—स्वाती धनिष्ठा अश्विनी हस्ता रेवती पुष्या श्रवणा मृगशिराः शतभिषा पूर्वफल्गुनी पूर्वाषाढः चित्रा एतानि नक्षत्राण्युपनयने विहितानि। पूर्वभाद्रस्यापि सागराचार्यमतेन विधानम्। अनुराधोत्तरभाद्रज्येष्ठाविहितनिषिद्धाः। जन्मर्क्षं प्रशस्तम्। विहितनक्षत्रमपि ग्रहणविद्धं सकलग्रासे षट्, अर्द्धग्रासे त्रीन्, पादग्रासे एकं मासं व्याप्य त्याज्यमिति। राजमार्तण्डभुजबलभीमपराक्रमयोः—

मेधा भानुदिने जडः शिशिरगौ चन्द्रात्मजेऽबोधता
पञ्चत्वं कुजमन्दयोर्भृगुसुते वाग्मी बलीयाञ्छुचिः।
षट्कर्माभिरतः सुखी सुरगुरौ विद्वांश्चिरायुस्तथा
क्षीणो पापनिपीडितेऽथ हिमगौ मूढो गतायुर्भवेत्॥

दाक्षिणात्यग्रन्थे नारदः—

अस्तंगतस्य सौम्यस्य वारो वर्ज्यो द्विजन्मना।

छन्दोगानां कुजवारोऽपि शाखाधिपतिवारत्वेन प्रशस्तः—

'शाखाधिपे बलिनि केन्द्रगतेऽथवाऽस्मिन्
वारेऽस्य चोपनयनं कथितं द्विजानाम्।

इति रत्नमालादर्शनात्। कुजः सामशाखाधिपः। तदुक्तं वाराहे—

ऋग्वेदाधिपतिर्जीवो यजुर्वेदाधिपः सितः।
सामशाखाधिपो वक्रः शशिजोऽथर्ववेदराडिति॥

एवं चाथर्ववेदिनां बुधवारोऽपि प्रशस्तः। स्मृतिसमुच्चये—

शशाङ्कतारयोः शुद्धिः कर्त्तव्या सर्वकर्मसु।
ग्रहाणामपि सर्वेषां तच्छुद्धौ स्याद्विशुद्धिता॥

दीपिकायाम्—

जीवार्केन्दूडुशुद्धौ हरिशयनबहिर्भास्करे चोत्तरस्थे।
स्वाध्याये वेदवर्णाधिप इह शुभदेऽक्षौरभेनादितौ च।
शुक्रार्केज्यैक्यलग्ने रविमदनतिथिं प्रोज्झ्य षष्ठाष्टमेन्दुं
नो जीवास्तातिचारेऽर्कसितगुरुदिने कालशुद्धौ व्रतं स्यात्॥

षष्ठाष्टमेन्दुमिति लग्नापेक्षया। व्रतबन्धे जन्मतारा: प्रशस्ताः, 'ततोऽधिकं जन्मसु तारकासु' इत्युक्तवचनात्।

राजमार्त्तण्डे—

मेषे भवति शुचार्त्तो धीमान् गवि रोगशोकपरिहीनः।
गदवान् मन्मथलग्ने विधनो दीनः कुलीरभे भवति॥
करिकुलवैरिणि बलवान् विद्यावानेव योषिति क्रूरः।
सुभगः सुखोपभोक्ता तौलिनि कीटे विनाशमुपयाति॥
धनुषि धनाढ्यः श्रेयानसितर्क्षयुगे धनैः परित्यक्तः।
षट्कर्माभिरतः स्यान्मीने धनवान् प्रवक्ता च॥

मन्मथलग्ने मिथुने, कुलीरभे कर्कटे, कीटे वृश्चिके, असितर्क्षयुगे असितः शनिः तस्य ऋक्षयुगे मकरकुम्भयोः। जन्मलग्नमतिप्रशस्तम् 'जन्मभे वा' इत्युक्तवचनात्।

अयमत्र संक्षेपः—रविगुरुशुक्रवारा व्रतबन्धे प्रशस्ताः। चन्द्रबुधवारौ मध्यमौ। शनिमङ्गलवारौ निषिद्धौ। छन्दोगानां मङ्गलवारोऽपि प्रशस्तः। आथर्वणानां बुधवारः प्रशस्तः। अस्तमितस्य सौम्यस्य वारः कस्यचिन्मते निषिद्धः। व्रतबन्धे चन्द्रतारयोः शुद्धिरावश्यकी। जन्मतारा अपि प्रशस्ताः। वृषसिंहतुलाधनुर्मीनलग्नानि प्रशस्तानि। जन्मलग्नं चातिप्रशस्तमिति। लग्नावधिकग्रहस्थित्यपेक्षायां राजमार्त्तण्डे—

भृगुसुतशशिपुत्रे केन्द्रसंस्थे च पापे
रिपुसहजगृहा ये सूर्यमाहेयमन्दे।
वृषतुरगतुलायां सिंहमीने प्रशस्तं
व्रतकरणमिहोक्तं नाष्टमस्थे शशाङ्के॥

रिपुः षष्ठः, सहजस्तृतीयः, आय एकादशः, माहेयः कुजः, तुरगो धनुः। भृगुसुतेत्युपलक्षणं गुरोरपि। 'केन्द्रस्थे भृगुजेऽङ्गिरः शशिसुते' इत्युपदर्शितवचनसंवादात्। तथा केन्द्रेत्यप्युपलक्षणं त्रिकोणस्यापि, सर्वत्र कार्ये बुधशुक्रजीवाः केन्द्रत्रिकोणोपगताः प्रशस्ता इति वचनान्तरसंवादात्। एवमष्टमस्थे इत्यप्युपलक्षणं षष्ठस्थे इत्यस्यापि, 'प्रोज्झ्य षष्ठाष्टमेन्दुम्' इति प्रागुक्तदीपिकावचनात्। तथा—

लग्ने सौरिदिवाकरावनिसुताः कुर्युर्वधं बन्धनं
वित्ते वित्तविनाशमाशु सहजे नैरुज्यमिष्टागमम्।
बन्धौ बन्धुविरोधमेव तनये पुत्रक्षयं षष्ठमे
सौभाग्यार्थसुखानि दारमरणं यच्छन्ति यामित्रमे॥

वित्ते द्वितीये, बन्धौ चतुर्थे, तनये पञ्चमे, यामित्रमे सप्तमे। तथा—

निधनभवनसंस्था मृत्युमर्थप्रणाशं
तपसि विविधरोगान् कर्महानिं दिशन्ति।
वियति रवियमारा नीचवृत्तिं तथाये
बहुविधधनलाभं ऋष्फगेऽर्थक्षयं च॥

निधनभवनं अष्टमं गृहम्, तपसि नवमे, वियति दशमे, ऋष्फगे द्वादशभवने, रवियमाराः सूर्यशनिकुजाः।

अयमत्र संक्षेपः बुधगुरुशुक्राः केन्द्रत्रिकोणस्थाः प्रशस्ताः। तृतीयषष्ठै-कादशगाः पापाः प्रशस्ताः। अन्यत्र निषिद्धाः। चन्द्रस्तु षष्ठगोऽष्टमगश्च निषिद्ध इति।

जन्मराश्यवधिकमहस्थित्यपेक्षायां बादरायणः—

सूर्यः षट्त्रिदशस्थितस्त्रिदशषट्सप्ताद्यगश्चन्द्रमा
जीवः सप्तनवद्विपञ्चमगतो वक्रार्कजौ षट्त्रिगौ।
सौम्यः षट्द्विचतुर्दशाष्टमगतः सर्वेऽप्युपान्ते शुभाः
शुक्रः षड्दशसप्तराशिसहितः शार्दूलवत् त्रासकृत्॥

उपान्ते एकादशे।

माण्डव्यः—

सूर्यो व्रतोपकरणे दशमे धनाढ्यं षष्ठे तृतीयभवने ऋतुभाजनं च।
एकादशे सकलशास्त्रकलाविधिज्ञं शेषेषु राशिषु नरं बहुदुःखभाजम्॥

करोतीति शेषः। सत्यः—

जन्माष्टमारिसहजोपगतः सुरेज्यो
मृत्युं व्रतोपनयने विदधाति नित्यम्।
अन्त्योपगे च दशमे नियतं चतुर्थे
द्रव्यक्षयं प्रकुरुते विमुखत्वमाशु॥

सुरेज्यो गुरुः। व्यासः—

राशौ पञ्चमके स्थितः सुरगुरुर्भोगार्थसौख्यप्रदो
नानाशास्त्रविशारदो नवमभे लाभे भवेद्दीक्षितः।
दीर्घायुर्मदने सुवर्णविभवः साधुर्द्वितीये भवे-
च्छेषेषु क्षयमेति सञ्चितधनं मृत्युं तथाऽन्ये जगुः॥

लाभे एकादशे, मदने सप्तमे। लघुहारीतः—

व्रतबन्धो द्विजातीनां विशुद्ध्या जीवशुक्रयोः।
चन्द्रशुद्ध्या तु वैश्यानां क्षत्रियाणां कुजार्कयोः॥

द्विजातीनां ब्राह्मणानाम्, क्षत्रियादीनां पृथगुपादानात्।

पौलस्त्यः—

यदा गर्भाष्टमे वर्षे शुद्धिर्नास्ति बृहस्पतेः।
अष्टमे वा तथाऽप्येवं व्रतं तत्र न कारयेत्॥

एवञ्चाष्टमवर्षावधिगुरुशुद्धिरावश्यकी, गौणकाले तु नावश्यापेक्षेति बहवः। परे तु गर्भाष्टमादौ मुख्यकालेऽपि गुरुशुद्धिरवश्यापेक्षणीया किमुतान्यत्रेति वचनार्थः, 'तथापि' इति शब्दस्वरसादित्याहुः।

नारदः—

बालस्य बलहीनोऽपि शान्त्या जीवो बलप्रदः।
यथोक्तवत्सरे कार्यमनुक्तेनोपनायनम्॥

बालस्य गर्भाष्टमादौ मुख्यकाले शान्तिं कृत्वोपनयनं कार्यम्, न तु गुर्वशुद्धावनुक्तवत्सरे नवमादाविति वाक्यार्थः।

अयमत्र संक्षेपः—तृतीयषष्ठदशमैकादशेषु सूर्यः प्रशस्तोऽन्यत्र निषिद्धः। जन्मतृतीयषष्ठसप्तमदशमेषु चन्द्रः प्रशस्तः। तृतीयषष्ठे च कुजशनी प्रशस्तौ। द्वितीयचतुर्थषष्ठाष्टमदशमेषु बुधः प्रशस्तः। एकादशस्थाः सर्वे प्रशस्ताः। षष्ठसप्तमदशमेषु शुक्रो निषिद्धः। द्वितीयपञ्चमसप्तमनवमैकादशेषु गुरुः प्रशस्तः। जन्मतृतीयषष्ठाष्टमद्वादशेष्वतिनिषिद्धः। चतुर्थे दशमे च निषिद्धः। व्रतबन्धे गुरुशुद्धिरवश्यापेक्षणीयेति। इदानीन्तनास्तु मैथिलग्रन्थानवलोकिनो जन्मराशेः पञ्चमनवमैकादशद्वितीयसप्तमस्थानेषु गुरुः प्रशस्तः, दशमषष्ठतृतीयप्रथमेषु पूजया शुभदः, चतुर्थाष्टमद्वादशेष्वतिनिषिद्ध इत्यर्थकेन—

वटुकन्याजन्मराशेस्त्रिकोणायद्विसप्तगः।
श्रेष्ठो गुरुः खषट्त्र्याद्ये पूजयान्यत्र निन्दितः॥

इति रामाचार्यवचनेन व्यवहरन्ति।

उपनयनेति कर्त्तव्यतायां पारस्करः—

'ब्राह्मणान् भोजयेत तं च।' उपनेता ब्राह्मणान् भोजयेत् तं च कुमारं भोजयेदित्यर्थः। चकारो भोजनक्रियानुकर्षणार्थः। तत्र माणवकस्य भोजनं दुग्धपानादिकमेव। तथा च कल्पतरौ ब्रह्मचारिकाण्डे शङ्खलिखितौ—

"पयोयवाग्वामिक्षा आहाराः क्रमशो द्विजातीनाम्" इति।

तथा 'पर्युप्तशिरसमलङ्कृतमानयन्ति।' पर्युप्तशिरसं परि सर्वत उप्तं मुण्डितं शिरो यस्य स तथा, तादृशमलङ्कृतं स्रगादिना भूषितं कुमारमानयन्ति आचार्यपुरुषा आचार्यसमीपं प्रापयेयुरित्यर्थः। अत्राग्निहोत्रं जुहोति यवागूं पचतीत्यत्रेवार्थक्रमेण शाब्दक्रमोल्लङ्घनात् प्रथमं वपनं ततो भोजनम्, न तु भोजनोत्तरं वपनम्।

न स्नातमात्रगमनोन्मुखभूषितानां
मभ्यक्तभुक्तकरणकालनिवासनानाम्।
सन्ध्यानिशाशनिकुजार्कदिनेषु रिक्ते
क्षौरं हितं प्रतिपदह्नि न चापि विष्ट्याम्॥

इत्यादि ज्योतिषे भोजनानन्तरं वपननिषेधादिति केचित्। तदसत्, अदृष्टार्थक्रमस्य ज्योतिःशास्त्रविरोधेनानुल्लङ्घनात्, दृष्टान्तेऽन्यथानुपपत्त्या तथा कल्पनेऽपि दार्ष्टान्तिके निषेधस्यान्यवपनविषयकत्वेनाप्युपपत्तौ तथा कल्पने मानाभावात्। अन्यथा रोहिण्यादौ नववस्त्रधारणनिषेधात्तत्र विवाहविधेरसाङ्गत्यापत्तेः। अत एव "यदहरुपैष्यन् माणवको भवति प्रग एवैनं तदहर्भोजयन्ति कुशलीकारयन्ति" इति गृह्यान्तरेऽपि भोजनानन्तरमेव मुण्डनं दर्शितम्। एवमेव मुरारिमिश्रादयः। रामदत्तादिपद्धतिस्वरसोऽप्येवम्।

याज्ञवल्क्यः—

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति।
उपनीय ददद् वेदमाचार्यः स उदाहृतः॥
एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते।
एते मान्या यथापूर्वमेभ्यो माता गरीयसी॥

क्रियाः गर्भाधानाद्युपनयनान्ताः। उपनीय उपनयनमात्रं कृत्वा। एकदेशं मन्त्रब्राह्मणयोरेकमङ्गानि वा।

यमः—

सत्यवाग् धृतिमान् दक्षः सर्वभूतदयापरः।
आस्तिको वेदनिरतः शुचिराचार्य उच्यते॥
वेदाध्ययनसम्पन्नो वृत्तिमान् विजितेन्द्रियः।
न याजयेद् वृत्तिहीनं वृणुयाच्च न तं गुरुम्॥

पारस्करः—

"पश्चादग्नेरवस्थाप्य ब्रह्मचर्यमागामिति वाचयति" आनयनानन्तर-माचार्योऽग्नेः पश्चात् स्वस्य दक्षिणतः कुमारमवस्थाप्यावस्थितं कृत्वा ब्रह्मचर्यमागा-मिति वाचयति ब्रह्मचर्यमागामिति ब्रूहीति प्रेषेण ब्रह्मचर्यमागामिति वाचयेदित्यर्थः। प्रेषितश्च कुमारो बद्धाञ्जलिः प्राङ्मुखस्तिष्ठन् ब्रह्मचर्यमागामिति वदेत्। अत्र पश्चादग्नेरित्युक्तत्वादेतत्पूर्वमेवाग्निस्थापनम्। तच्च बहिश्शालायामेव, 'पञ्चसु बहिश्शा-लायाम्' इत्युक्तत्वात्। मन्त्रार्थस्तु—ब्रह्मचर्यं प्रत्यहमागामागतोऽस्मीति। तथा—'ब्रह्मचार्यसानीति च'। तत आचार्यो ब्रह्मचार्यसानीति ब्रूहीति प्रेषेण ब्रह्मचार्यसानीति कुमारं वाचयेदित्यर्थः। चशब्दो वाचयतीत्यस्यानुकर्षणार्थः। माणवकश्च प्राङ्मुखस्तथैव तिष्ठन् ब्रह्मचार्यसानीति ब्रूयात्। मन्त्रार्थस्तु ब्रह्मचारी ब्रह्म वेदः, तद्ध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीत्येवं शीलोऽहमसानि भवानीति।

तथा—"अथैनं वासः परिधापयति

येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतम्।
तेन त्वा परिदधाम्यायुषे दीर्घायुत्वाय बलाय वर्चसे"॥ इति।

अथाचार्य एनं कुमारं वासोऽहतं वस्त्रं परिधापयति परिधापयेत् 'येनेन्द्राय' इति मन्त्रेणेत्यर्थः। वासांसि च शाणक्षौमाविकानि यथाक्रमं ब्राह्मणक्षत्रियविशां ज्ञेयानि, 'वासांसि शाणक्षौमाविकानि' इति वक्ष्यमाणत्वात्। अत्र च 'वासो विपरिधाय च' इति वचनान्माणवकस्य द्विराचमनम्। मन्त्रार्थस्तु—हे कुमार! येन विधिना इन्द्राय इन्द्रं संस्कर्तुं बृहस्पतिर्वासः पर्यदधात् परिधापितवान् तेन विधिना त्वा त्वाममृतमहतं वासः परिदधामि परिधापयामि। उभयत्रान्तर्भूतो णिजर्थः परिधापयतीति सूत्रितत्वात्। किमर्थम्? आयुषे इत्यादीति। आयुशब्द उकारान्तोऽपि।

तथा—"मेखलां बध्नीते।

इयं दुरुक्तं परिबाधमाना वर्णं पवित्रं पुनती म आगात्।
प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगामेखलेयम्॥" इति।
"युवा सुवासाः परिवीत आगात् स उ श्रेयान् भवति जायमानः।
तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः॥" इति वा तूष्णीं वा।

तत आचार्यो माणवककट्यां मेखलां रशनां बध्नीते बध्नीयात् 'इयं दुरुक्तम्' इति मन्त्रेण। अथवा 'युवा सुवासा' इति मन्त्रेण, अथवा तूष्णीमित्यर्थः। मेखला च "मौञ्जी रशना ब्राह्मणस्य, धनुर्ज्या राजन्यस्य, मौर्वी वैश्यस्य" इति वक्ष्यमाणत्वात्। अत्रैवं बन्धमाचार्यो मेखलामादाय वटोःकटिप्रदेशे प्रादक्षिण्येन त्रिर्वेष्टयति, तथा च गृह्यान्तरम्—'त्रिः प्रदक्षिणं मुञ्जमेखलां परिहरन्' इति। तत्र च प्रवरसंख्यया त्रयः पञ्च सप्त वा ग्रन्थयः कार्याः। तदुक्तम्—

त्रिवृत्ता मेखला कार्या त्रिवारं स्यात् समावृता।
तद् ग्रन्थयस्त्रयः कार्याः पञ्च वा सप्त वा पुनः॥ इति।

पञ्च वा सप्त वेति प्रवरभेदेन व्यवस्थितो विकल्पः। अत एव प्रवरसंख्यया ग्रन्थिनियमः। त्र्यार्षेयस्य ग्रन्थित्रयम्, पञ्चार्षेयस्य पञ्च, सप्तार्षेयस्य सप्तेति गर्गपद्धतिः। एवमेव हरिनाथहरिहररामदत्तादयः, समाचारोऽप्येवम्। आचार्यकर्तृक एव मन्त्र पाठ इति गदाधरः।

रेणुकोऽप्याह—

बध्नीयात् त्रिगुणां श्लक्ष्णामियं दुरुक्तमुच्चरन्।
आचार्यस्यैव मन्त्रोऽयं न वटोरात्मनेपदात्॥ इति।

आचार्यकर्तृकं मेखलाबन्धनं कुमारकर्तृकश्च मन्त्रपाठ इति वासुदेवहरिहरजयरामरामदत्तादयः। युक्तं चैतत्, मन्त्रपाठे माणवककर्तृकत्वस्य मन्त्रलिङ्गसिद्धत्वात्। मन्त्रार्थस्तु—इयं मेखला माम् आगात् आगता आगच्छतु वा, किं कुर्वती? दुरुक्तं दुष्टं भाषितमसत्याप्रियादिकम्, यद्वा उपलक्षणत्वात् कामचारकामवादकामभक्षादिकं दोषं परिबाधमाना सर्वतो निराकुर्वती, पवित्रं वर्णं ब्राह्मणत्वादिकं पुनती सत्कुर्वती, मे मम प्राणापानाभ्यां मरुद्भ्यां तयोर्बलं सामर्थ्यमादधाना स्थापयन्ती, स्वसा स्वस्रवद्धितकारिणी, देवी द्योतमाना, सुभगा सौभाग्यदायिनीति, आद्यन्तयोरियमिति वाक्यालङ्कारार्थः। द्वितीयमन्त्रार्थो यथा—यौति गुणानेकीकरोतीति युवा, सुवासाः शोभनवस्त्रः, परिवीतो वस्त्रपुष्पमालादिभिः समन्ततो वेष्टितः, एवंभूतो यः कुमारो मेखलार्थमागात् आगतः, स उ स एव जायमानः सन् श्रेयान् भवति, धीरासः धीराः, कवयः वेदवेदार्थप्रवक्तारः, स्वाध्याः शोभनचित्तवृत्तयो विद्वांसः, तमेव वटुमुन्नयन्ति उत्कर्षं गमयन्ति, किं कुर्वन्तः? मनसा मनोवृत्त्या देवयन्तः मोदयन्त इति।

अत्र यद्यपि सूत्रकारेण यज्ञोपवीतधारणं नोक्तम्, तथापि "दण्डाजिनोपवीतानि मेखलां चैव धारयेत्" इति याज्ञवल्क्येन ब्रह्मचारिण उपवीतधारणस्मरणात्,

सदोपवीतिना भाव्यं सदाबद्धशिखेन च।
विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ॥

इति छन्दोगपरिशिष्टाच्च यज्ञोपवीतधारणं तावत्प्राप्तम्, तच्च कुत्र कर्त्तव्यमित्यवसरापेक्षायामौचित्यादुपदर्शितयाज्ञवल्क्यवचने मेखलासाहचर्याद् मेखलानन्तरं 'कार्पासमुपवीतं स्यात्' इति मनूक्तेः, मेखलाबन्धनानन्तरं "पवित्रं चास्मै प्रयच्छति" इति जातूकर्ण्यात्, सदाचाराच्च मेखलाबन्धनानन्तरमेव युज्यते। एवमेव कर्करेणुकहलायुधवासुदेवहरिहरगदाधररामदत्तानन्तादयः। तत्र यज्ञोपवीतधारणात् प्राक् सफलानि सयज्ञोपवीतान्यष्टौ भाण्डानि ब्राह्मणेभ्यो देयानीति समाचारः।

यज्ञोपवीतधारणं च "यज्ञोपवीतं परमम्" इति मन्त्रेण, "यज्ञोपवीतं परममितिमन्त्रेण धारयेत्" इति वचनात्।

मन्त्रो यथा—

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥

अस्यार्थः—इदं यज्ञोपवीतं ब्रह्मसूत्रं प्रतिमुञ्च प्रतिमुञ्चानि धारयाणि। पुरुषव्यत्ययश्छान्दसः। किंभूतं यज्ञोपवीतम्? यज्ञाय कर्मानुष्ठानार्थमुपवीतं कर्त्तितम्, परमं पवित्रं परमपावित्र्यसाधनम्, प्रजापतेर्ब्रह्मणोः यत् सहजं सहोत्पन्नं पुरस्तात् प्राग्भवम्। अत इदमायुष्यमायुषे हितम्, अग्र्यं मुख्यम् शुभ्रं निर्मलम्, बलं धर्मसामर्थ्यदम्, तेजःप्रभावप्रदं चास्तु भवत्विति। अत्र च यज्ञोपवीतं सूत्रत्रयात्मकतानीरूपमेकमेव, तानीद्वितीयं तु समावर्त्तनानन्तरम्।

तदुक्तम्—

ब्रह्मचारिण एकं स्यात् स्नातस्य द्वे बहूनि वा।
तृतीयमुत्तरीयं वा वस्त्राभावे तदिष्यते ॥ इति।

इदमेवाह हलायुधः—

'त्रिकामेकां परिदध्यात्' इति।

गोभिलः—

'यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वा कुशरज्जुमेव वा'।

अत्रैवकारेण वस्त्रकुशरज्ज्वोर्यज्ञोपवीतानुकल्पयोस्त्रिसरत्वादिव्यवच्छेदः। सूत्रं सूत्रविशेषः।

कात्यायनः—

ऊर्ध्वं तु त्रिवृतं कार्यं तन्तुत्रयमधोवृतम्।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते॥

वामावर्त्तवलितं त्रिगुणं कृत्वा तदेव त्रिगुणं सकृद्दक्षिणावर्त्तवलितं कार्यम्, तदेव त्रिवृतं त्रिसरं सदेकमुपवीतम्, तस्य चैको ग्रन्थिः, एकमेव कौटिल्यम्। भ्रमिस्तु प्रवरानुसारेणैवेत्यर्थः।

निगमे—

कार्पासक्षौमगोबालशणवल्कतृणोद्भवम्।
सदा सम्भवतो धार्यमुपवीतं द्विजातिभिः॥

तृणमुलपादि। सम्भवत इत्यभिधानात्पूर्वपूर्वाभावे उत्तरोत्तरविधिः। निगमपरिशिष्टम्—वाससा यज्ञोपवीतं कुरुते, तदभावे त्रिवृता सूत्रेण, कुशमुञ्जबालप्रतिसररज्जुभिर्वा। बालो गोबालः। पतिसर उलपादिः। अत्र वस्त्राभावे सूत्रविधानं त्रितन्तुकमात्रपरम्, अतो न गोभिलविरोधः।

मनुः—

कार्पासमुपवीतं स्याद् विप्रस्योर्ध्ववृतं त्रिवृत्।
शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रिकम्॥

त्रिवृद् नवगुणम्, "नव वै त्रिवृत्" इति श्रुतेः। सूत्रनवकमित्यर्थः।

देवलः—

यज्ञोपवीतं कुर्वीत सूत्रेण नवतन्तुकम्।

कात्यायनः—

पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम्।
तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम्॥

इदं च वामस्कन्धे धृत्वा परिमेयम्।

स्मृत्यर्थसारे—

विच्छिन्नं वाऽप्यधो यातं भुक्त्वा निर्मितमुत्सृजेत् ।

मनुः—

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥

एवमिह यज्ञोपवीतधारणानन्तरं सूत्रकारानुक्तमप्यजिनरूपोत्तरीयधारणं कुर्यादुक्तयुक्तेः, "यज्ञोपवीतमजिनं च" इत्याश्वलायनोक्तेश्च । तं च तूष्णीं "मित्रस्य चक्षुः" इति मन्त्रेण वेति वासुदेवः । तूष्णीमेवेति बहवः । समाचारोऽप्येवम् । अजिनानि चैणेयादीनि । तथा च वक्ष्यति 'ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य' इत्यादि ।

पारस्करः—

"दण्डं प्रयच्छति तं प्रतिगृह्णाति—यो मे दण्डः परापतद्वैहायसोऽधिभूम्याम् । तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय" इति ।

तद् आचार्यो माणवकाय तूष्णीं दण्डं प्रयच्छति समर्पयेत्, माणवकश्च दक्षिणहस्तेन तं दण्डं प्रतिगृह्णाति आदद्यात् 'यो मे दण्डः' इति मन्त्रेणेत्यर्थः । दण्डाश्च पालाशादयः, 'पालाशो ब्राह्मणस्य दण्डः' इत्यादिवक्ष्यमाणत्वात् । मन्त्रार्थस्तु हे आचार्य ! यो दण्डो मे मदर्थं परापतत् आभिमुख्येनागतः । कीदृशः ? वैहायसः आकाशे प्रसृतः, कुत्रागतः ? अधिभूम्यां भूमेरुपरि, तं दण्डमहमायुषे जीवनाय, ब्रह्मणे वेदग्रहणाय, ब्रह्मवर्चसाय याजनाध्यापनोत्कर्षतेजसे पुनरादद इति । यद्वा यो मे दण्डोऽधिभूम्यां परापतत् प्राग्जन्मनि पतितः, तमहमिदानीं पुनरादद इति ।

तथा—अथास्याद्भिरञ्जलिं पूरयति 'आपो हिष्ठेति' तिसृभिः । अथाचार्यः स्वेनाञ्जलिना अप आदाय ताभिरद्भिरस्य कुमारस्याञ्जलिं पूरयेदापो हिष्ठेति तिसृभिर्ऋग्भिरित्यर्थः । तिस्रोऽपि ऋचो व्याख्याता विवाहप्रकरणे । तथा—'अथैनं सूर्यमुदीक्षयति तच्चक्षुरिति' । अथानन्तरमेनं कुमारं सूर्यमुदीक्षयति सूर्यमुदीक्षस्वेति प्रैषेण दर्शयेत् । स च प्रेषितस्तच्चक्षुरित्यादिमन्त्रेण पश्येदित्यर्थः । मन्त्रपाठो माणवकस्य लिङ्गात् । अयमपि मन्त्रस्तत्रैव व्याख्यातः ।

तथा—"अथास्य दक्षिणांसमधिहृदयमालभते—

मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं ते अस्तु ।
मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यम् ॥" इति ।

अथाचार्योऽस्य कुमारस्य दक्षिणांसमधि दक्षिणस्कन्धस्योपरि स्वीयं दक्षिणहस्तं नीत्वा हृदयं वक्ष आलभते स्पृशेत् 'मम व्रते ते' इति मन्त्रेणेत्यर्थः। अयमपि मन्त्रस्तत्रैव व्याख्यातः। इयानत्र विशेषः—बृहस्पतिस्त्वा नियुनक्तु मह्यमिति। बृहस्पतिष्ट्वेति षकारपाठे षत्वमार्षम्।

तथा—अथास्य दक्षिणां हस्तं गृहीत्वाह 'को नामासि' इति। अथाचार्योऽस्य कुमारस्य दक्षिणं हस्तं स्वदक्षिणहस्तेन गृहीत्वा 'को नामासि' इत्याह ब्रूयादित्यर्थः। तथा—'असावहं भो' इति प्रत्याह। असाविति सर्वनामस्थाने आत्मनो नामग्रहणम्। एवमाचार्येण पृष्टः कुमारः 'अमुकशर्माहं भो' इति प्रत्याह प्रतिवचनं दद्यादित्यर्थः।

तथा—अथैनमाह 'कस्य ब्रह्मचार्यसि' इति। अथाचार्य एनं कुमारं कस्य ब्रह्मचार्यसीत्याह ब्रूयादित्यर्थः।

तथा—भवत इत्युच्यमाने 'इन्द्रस्य ब्रह्मचार्यस्यग्निराचार्यस्तवाहमाचार्यस्तवासौ' इति। आचार्यं प्रति कुमारेण भवत 'इत्युच्यमाने 'इन्द्रस्य ब्रह्मचार्यसि' इति मन्त्रमाचार्यः पठेदित्यर्थः। असावित्यस्य स्थाने संबोधनविभक्त्यन्तं कुमारस्य नाम गृह्णीयात्।

मन्त्रार्थस्तु—हे कुमार ! इन्द्रस्य परमेश्वरस्य ब्रह्मचारी त्वमसि, तवाग्निराचार्यः "गुरुरग्निर्द्विजातीनाम्" इत्युक्तेः, इदानीं तूपनेतृत्वादहमपि तवाचार्योऽस्मीति।

तथा—अथैनं भूतेभ्यः परिददाति 'प्रजापतये त्वा परिददामि देवाय त्वा सवित्रे परिददाम्यद्भ्यस्त्वौषधीभ्यः परिददामि द्यावापृथिवीभ्यां त्वा परिददामि विश्वेभ्यस्त्वा भूतेभ्यः परिददामि सर्वेभ्यस्त्वा भूतेभ्यः परिददाम्यरिष्ट्यै' इति। अथानन्तरमेनं कुमारमाचार्यो भूतेभ्यः प्रजापतिप्रभृतिभ्यः परिरक्षितुं ददाति प्रयच्छेत् 'प्रजापतये त्वा' इति मन्त्रेणेत्यर्थ इति हरिहरादयः। परि परितः सर्वतो दिक्षु ददातीत्यर्थ इत्यपरे। एतदनुसारेणैव 'पूर्वादिदिक्षु प्रदक्षिणमुपस्थानं कारयति' इति रामदत्तादिपद्धतिः। आचारोऽप्येवम्। मन्त्रार्थस्तु—हे कुमार ! अरिष्ट्यै अहिंसायै रक्षायै इति यावत् त्वा त्वां प्रजापतये स्रष्ट्रे परिददामि प्रयच्छामीत्यादि। अत्र विश्वेभ्यस्त्वा भूतेभ्य इत्यत्र विश्वेभ्यस्त्वा देवेभ्य इति हलायुधादिसंमतः पाठः।

तथा—'प्रदक्षिणमग्निं परीत्योपविशति'। परिदानानन्तरं कुमारः प्रदक्षिणं यथा भवति तथाऽग्निं परीत्य परिक्रम्योपविशेदित्यर्थः। उपवेशनं च पश्चादग्ने-

राचार्यस्योत्तरत इति जयरामहरिहरौ। आचार्यस्य दक्षिणत इति गर्गपद्धतिः। एवमाचारोऽपि।

तथा—"अन्वारब्ध आज्याहुतीर्हुत्वा प्राशनान्ते"। ततो ब्रह्मवरणाद्यवशिष्टं कर्म कृत्वा ब्रह्मणान्वारब्ध आचार्य आज्याहुतीराघारादिस्विष्टकृदन्ताश्चतुर्दशाज्याहुतीर्हुत्वा प्राशनान्ते संस्रवप्राशनोत्तरं संशास्तीत्युत्तरेणान्वयः। अनुशासनं च कृतकर्मत्वाद् दक्षिणादानपूर्वकब्रह्मोत्थापनानन्तरं विधेयम्। अत्राप्यन्वारम्भानुवाद आघारादिनित्यहोमातिरिक्तहोमव्युदासार्थः।

तथा—"अथैनं संशास्ति ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा दिवा सुषुप्था वाचं यच्छ समिधमाधेह्यपोऽशानेति"। अथानन्तरमाचार्य एनं कुमारं संशास्ति शिक्षयेत् ब्रह्मचार्यसीत्येवमादिभिः प्रैषवाक्यैरित्यर्थः। प्रेषितश्च कुमारः प्रतिप्रैषमसानीत्येवमादि प्रत्युत्तरं दद्यात्। प्रत्युत्तरस्य दातुं युक्तत्वात्। तद्यथा—

ॐ ब्रह्मचार्यसीत्याचार्येणोक्ते ॐ असानीति, ॐ अपोऽशानेत्युक्ते ॐ अश्नानीति; ॐ कर्म कुर्वित्युक्ते ॐ करवाणीति; ॐ मा दिवा सुषुप्था इत्युक्ते ॐ न स्वपानीति, ॐ वाचं यच्छेत्युक्ते ॐ यच्छानीति, ॐ समिधमाधेहीत्युक्ते ॐ आदधानीति, पुनः ॐ अपोऽशानेत्युक्ते ॐ अश्नानीति।

तत्र ब्रह्मचार्यसीत्यादि प्रैषवाक्यानामयमर्थः—ब्रह्मकर्म चरतीत्येवं शीलो ब्रह्मचारी असि भवसि, अपोऽशान पिब, कर्म स्ववर्णाश्रमविहितं कुरु, दिवा दिवसे मा सुषुप्थाः मा स्वाप्सीः, वाचं गिरं यच्छ स्मृत्युक्तकाले नियमय, समिधमाधेहि वक्ष्यमाणप्रकारेण वह्नौ प्रक्षिप। अपोऽशान पिबेति। अत्र प्रथममपोऽशानेत्यभिधानं भोजनादावाचमनाभिप्रायकं द्वितीयं च भोजनान्ते। तथा च श्रुतिः—

"अशिष्यन्नाचामेदशित्वा चाचामेत्" इति।

सुषुप्था इत्यत्र सम्प्रसारणात्मनेपदे छान्दसे।

पारस्करः—"अथास्मै सावित्रीमन्वाहोत्तरतोऽग्नेः प्रत्यङ्मुखायोपविष्टायोपसन्नाय समीक्षमाणाय समीक्षिताय"।

अथाचार्योऽस्मै ब्रह्मचारिणे सावित्रीं सवितृदेवताकां तत्सवितुरित्यृचम्, अन्वाह उपदिशेत्। किं भूताय अग्नेरुत्तरत उत्तरस्यां दिशि उपविष्टाय आसीनाय, प्रत्यङ्-

मुखाय पश्चिमाभिमुखाय उपसन्नाय पादोपसंग्रहणादिना भजमानाय समीक्षमाणाय आचार्यमालोचमानाय समीक्षिताय आचार्येणावलोकितायेत्यर्थः।

शातातपः—

तत्सवितुर्वरेण्यमिति सावित्री ब्राह्मणस्य।

श्रुतिः—

तस्मादेतां गायत्रीमेव सावित्रीमनुब्रूयादिति।

पक्षान्तरमाह पारस्करः—दक्षिणतस्तिष्ठत आसीनाय वैके। दक्षिणतोऽग्नेर्दक्षिणस्यां दिशि तिष्ठते ऊर्ध्वीभूताय अथवा आसीनाय तत्रैवोपविष्टाय सावित्रीमन्वाहेत्येके आचार्या मन्यन्त इत्यर्थः। एकग्रहणाद्विकल्पः।

यथा—पच्छोऽर्द्धर्चशः सर्वां च तृतीयेन सहानुवर्तयन्। सावित्रीदानेऽयं प्रकारः प्रथमं पच्छः पादं पादम्, ततोऽर्द्धर्चशः अर्धं चं मर्धं च पदद्वयं पदं चेति यावत्। ततस्तृतीयेन वारेण सह वटुना सार्द्धं सर्वां च सावित्रीमनुवर्त्तयन् आवर्त्तयन्नुपदिशेदित्यर्थः। पादक्रमेऽर्द्धर्चक्रमे चाचार्यः स्वयमुक्त्वाऽनन्तरं वाचयीत। तृतीयवारे तु तेन सहैव सर्वां सावित्रीं स्वयमुच्चारयेदिति भावः। पादादिक्रम एव फक्किकादिक्रम उच्यते।

लौगाक्षिः—

ॐ भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह पच्छोऽर्द्धर्चशः सर्वामन्तत इति। तां वै पच्छोऽन्वाहेत्युपक्रम्याथार्द्धर्चशोऽथ कृत्स्नामिति श्रुतेः।

यदि च फक्किकादिक्रमेणापि मन्दतरः कश्चिद् नाध्येतुं शक्येत तर्हि यथाशक्त्यध्यापनीयः। तथा चाश्वलायनगृह्यम्—यथाशक्ति वाचयीतेति। यदि ब्रह्मचारी पादं पादं वक्तुं न शक्नोति, ततस्तेन यथाशक्ति वाचयीत। एवमर्द्धर्चशः, एवं सर्वामिति तद्भाष्यकृतः।

सावित्रीप्रदानस्य कालविकल्पानाह पारस्करः—

'संवत्सरे षण्मास्ये चतुर्विंशत्यहे द्वादशाहे षडहे त्र्यहे वा'।

उपनयनदिनमारभ्य संवत्सरे पूर्णे, षण्मास्ये मासषट्के वा, चतुर्विंशत्यहे वा, द्वादशाहे षडहे त्र्यहे वा सावित्रीमनुब्रूयादाचार्य इत्यर्थः। एते च कालविकल्पा गुरुशुश्रूषादिशिष्यगुणतारतम्यापेक्षाः।

एवं सामान्येन सावित्रीप्रदानस्य कालविकल्पानभिधाय सम्प्रति ब्राह्मणस्य विशेषमाह स एव "सद्यस्त्वेव गायत्रीं ब्राह्मणायानुब्रूयादाग्नेयो वै ब्राह्मण इति श्रुतेः"। तुशब्दः पक्षव्यावृत्तौ। एते कालविकल्पाः क्षत्रियवैश्ययोरेव, ब्राह्मणाय तु सद्य एव गायत्रीं गायत्रीच्छन्दस्कां सावित्रीमनुब्रूयादुपदिशेत्। कुतः? 'आग्नेयो वै ब्राह्मणः' इति श्रुतेः। आग्नेयो वै ब्राह्मणः सद्यो वा अग्निर्जायते। तस्मात्सद्य एव ब्राह्मणायानुब्रूयादिति श्रुतिदर्शनादित्यर्थः। आग्नेयोऽग्निदेवताकः।

वर्णभेदेन सावित्रीं व्यवस्थापयति स एव—त्रिष्टुभं राजन्यस्य। ब्राह्मणाय गायत्रीमनुब्रूयादित्युक्तं राजन्यस्य क्षत्रियस्य तु त्रिष्टुभम्, त्रिष्टुप्छन्दस्कां 'देव सवितः' इत्यादिकां सावित्रीमनुब्रूयादित्यर्थः।

तथा—

जगतीं वैश्यस्य। जगतीं जगतीच्छन्दस्कां 'विश्वा रूपाणि' इत्यादिकाम्।

तथा—

'सर्वेषां वा गायत्रीम्'। निगदव्याख्यातम्। वाशब्दः पक्षान्तरे।

अथ संक्षेपेण गायत्रीव्याख्या।—तत् तस्य सवितुः सूर्यस्य देवस्य दीप्तिमतः तं भर्ग तेजो धीमहि चिन्तयामः। य इति यच्छब्दप्रयोगात् तमिति लभ्यते।

तथा च योगियाज्ञवल्क्यः—

"तच्छब्देन तु यच्छब्दो बोद्धव्यः सततं बुधैः" इति।

किं भूतं भर्गं यो भर्गो नोऽस्माकं धियो बुद्धीः प्रचोदयात् प्रेरयति धर्मार्थकाममोक्षेषु नियोजयतीति यावत्।

तथा च योगियाज्ञवल्क्यः—

चिन्तयामो वयं भर्गं धियो यो नः प्रचोदयात्।
धर्मार्थकाममोक्षेषु.....॥ इति।

पुनः किं भूतं भर्गं वरेण्यं वरणीयं जन्ममृत्युभीरुभिरुपासनीयमिति यावत्।

तथा च योगियाज्ञवल्क्यः—

वरेण्यं वरणीयं च जन्मसंसारभीरुभिरिति।

पुनः किं भूतोऽसौ भर्गः भूर्भुवः स्वः भूरादिलोकत्रयस्वरूपः।

तथा च सूर्यमुपक्रम्य भविष्यपुराणम्—

शक्रः प्रजापतिः सर्वो भूर्भुवः स्वर्दिशस्तथेति ।

इह भर्गशब्देन सवितृमण्डलमध्यगतादित्यदेवतास्वरूपः पुरुष उच्यते ।

तथा च योगियाज्ञवल्क्यः—

भृजिः पाके भवेद्धातुर्यस्मात् पाचयते ह्यसौ ।
भ्राजते दीप्यते यस्माज्जगच्चान्ते हरत्यपि ॥
कालाग्निरूपमास्थाय सप्तार्चिः सप्तरश्मिभिः ।
भ्राजते तत् स्वरूपेण तस्माद्भर्गः स उच्यते ॥

तथा—

भेति भाजयते लोकान् रेति रञ्जयते प्रजाः ।
ग इत्यागच्छतेऽजस्रं भरणाद्भर्ग उच्यते ॥ इति दिक् ।

अथोपनयनाङ्गभूतं समिदाधानमाह पारस्करः—'अत्र समिदाधानम् ।' अत्रास्मिन् प्रकृतेऽग्नौ समिदाधानं समिधां तिसृणाम् आधानं प्रक्षेपो ब्रह्मचारिणा कर्त्तव्यमित्यर्थः । अत्रास्मिन्नवसर इति केचित्, तन्न पाठादेव तत्सिद्धेः ।

समिदाधानस्येति कर्त्तव्यतामाह स एव—"पाणिनाऽग्निं परिसमूहयत्यग्ने सुश्रवः सुश्रवसं मा कुरु, यथा त्वमग्ने सुश्रवः सुश्रवा अस्येवं मा ँ सुश्रवः सौश्रवसं कुरु यथा त्वमग्ने देवानां यज्ञस्य निधिपा अस्येवमहं मनुष्याणां वेदस्य निधिपो भूयासम्" इति ।

ब्रह्मचारी पाणिना दक्षिणहस्तेनाग्निं प्रकृतमुपनयनाङ्गहोमाधिकरणवह्निं परिसमूहयति इन्धनप्रक्षेपेण संधुक्षयेदनेन सुश्रव इत्यादिभिः पञ्चभिर्मन्त्रैरित्यर्थः । मन्त्राणां पञ्चत्वात् परिसमूहनान्यपि पञ्च । तदुक्तं कर्कैः 'प्रतिमन्त्रं प्रतिसमूहनम्' इति ।

इन्धनानि च घृताक्तानि शुष्काण्यादेयानि संधुक्षणार्थत्वात् । पाणिनेत्येकवचनं पाणिभ्यां परिसमूहनव्युदासार्थम् । उभाभ्यामपि हि लोके सन्धुक्षणं दृश्यते । एतच्चाग्नेः पश्चादुपविष्टेन ब्रह्मचारिणा विधेयम्, वह्निसांमुख्यपूर्वाभिमुखत्वासीनत्वानुरोधात् । मन्त्रार्थस्तु—

हे अग्ने ! हे सुश्रवः ! शोभनकीर्त्ते ! शोभनश्रवणेति वा मा मां सुश्रवसं शोभनकीर्त्तिं शोभनश्रवणं वा कुरु, किञ्च, हे सुश्रवोऽग्ने ! यथा येन प्रकारेण त्वं

सुश्रवा असि एवमनेन प्रकारेण मा मां सुश्रवः सौश्रवसं सुश्रवःसु मध्ये सौश्रवसं सुश्रवसं कुरु, स्वार्थेऽण्। यद्वा सुश्रवा गुरुः तस्यायं सौश्रवसः सुश्रवश्चासौ सौश्रवसश्च स तथा, तादृशं कुरु ममाचार्यमपि सुश्रवसं कृत्वा तदीयत्वेन मां सौश्रवसं कुर्विति यावत्। किञ्च, हे अग्ने! यथा त्वं देवानामिन्द्रादीनां यज्ञस्य यज्ञसम्बन्धेन निधिपा निधिरक्षकोऽसि भाण्डागारिको भवसि, एवमहं मनुष्याणां वेदस्य निधिपो भूयासं वेदस्य भाण्डागारिको भवानीति।

तथा—"प्रदक्षिणमग्निं पर्युदयोत्थाय समिधमादधाति अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवमहमायुषा मेधया वर्चसा प्रजया पशुभिर्ब्रह्मवर्चसेन समिन्धे जीवपुत्रो ममाचार्यो मेधाव्यहमसान्यनिराकरिष्णुर्यशस्वी तेजस्वी ब्रह्मवर्चस्वन्नादो भूयासꣳ स्वाहा" इति।

ततो ब्रह्मचारी प्रदक्षिणं यथा भवति तथाऽग्निं पर्युदय दक्षिणहस्तगृहीतोदकेनाभिषिच्योत्थायोदूर्ध्वस्थितो भूत्वा समिधमादधाति ब्रह्मौ प्रक्षिपेदग्नये समिधमिति मन्त्रेणेत्यर्थः। समिल्लक्षणन्तु कुशण्डिकाप्रकाशे समिधोऽभ्याधायेति सूत्रव्याख्याने विस्तरेण प्रदर्शितमस्माभिः।

मन्त्रार्थस्तु—हे अग्ने! इमां समिधमग्नये तुभ्यमाहार्षमाहृतवानस्मि किं भूताय बृहते महते जातवेदसे जातान् वेत्तीति जातवेदाः तस्मै। हे अग्ने! यथा त्वं समिधा समिध्यसे दीप्यसे, एवमहमायुषा मेधया धारणावद्बुद्ध्या वर्चसा प्रजया पशुभिः गवादिभिः ब्रह्मवर्चसेन च समिन्धे दीप्तो भवानि। किञ्च, ममाचार्यो जीवपुत्रो जीवदपत्योऽस्तु। किञ्चाहं मेधावी असानि भवानि तथा अनिराकरिष्णुः गुरूपदिष्टाविस्मरणशीलो यशस्वी तेजस्वी ब्रह्मवर्चस्वी अन्नादश्च भूयासं भवेयं स्वाहा सुहुतमस्त्विति।

तथा—'एवं द्वितीयां तथा तृतीयाम्' एवमनेनैव मन्त्रेण द्वितीयां समिधमादध्यात् तथा तृतीयामपीत्यर्थः। तिस्रः समिध आदधातीत्युच्यमाने मन्त्रान्ते युगपत् तिसृणामाधानं प्राप्नोति तन्निवृत्त्यर्थं पृथक् सूत्रम्।

तथा—'एषात इति वा।' अथवा 'एषात' इत्यादिना मन्त्रेण समिधमादध्यादित्यर्थः। अत्रापि मन्त्रावृत्तिः।

तथा—'समुच्चयो वा'। अथवा 'अग्नये समिधम्', 'इत्येषा ते अग्ने समित्' इत्यनयोर्मन्त्रयोः समुच्चय ऐक्यं समिदाधाने स्यादित्यर्थः। इत्थं चात्र त्रयो मन्त्र-

विकल्पाः। समुच्चयपक्षे च मन्त्रद्वयान्ते समित्प्रक्षेपः। प्रतिसमिदाधानं मन्त्रद्वयावृत्तिश्च।

तथा—'पूर्ववत्परिसमूहनपर्युक्षणे।' परिसमूहनं 'अग्ने सुश्रव' इत्यादिमन्त्रकरणकेन्धनप्रक्षेपैः सन्दीपनम्, पर्युक्षणं सर्वतो जलेनाभिषेचनम्। ते पूर्ववत् प्राग्वदग्नेः कर्त्तव्ये इत्यर्थः।

तथा—"पाणी प्रतप्य मुखं विमृष्टे तनूपा अग्नेऽसि तन्वं मे पाह्यायुर्दा अग्नेऽस्यायुर्मे देहि वर्चोदा अग्नेऽसि वर्चो मे देहि अग्ने यन्मे तन्वा ऊनं तन्म आपृण। मेधां मे देवस्सविता मेधां मे देवी सरस्वती मेधां मे अश्विनौ देवावाधत्तां पुष्करस्रजौ" इति।

पर्युक्षणानन्तरं ब्रह्मचारी पाणी हस्तौ प्रतप्य तूष्णीमग्नौ तापयित्वा 'तनूपा अग्नेऽसि' इत्यादिभिः सप्तभिर्मन्त्रैः प्रतिमन्त्रं मुखं विमृष्टे पाणिभ्यां प्रोञ्छयेदित्यर्थः। वाक्यभेदात्प्रतिवाक्यं पाणी प्रतप्य मुखविमार्जनमिति कर्कादयः। सकृदेव पाणिप्रतपनं मुखविमार्जनं तु प्रतिमन्त्रमिति हरिहरादयः। मेधां मे देवस्सविता मेधां मे देवी सरस्वतीत्यनयोर्मन्त्रयोरादधात्वित्यध्याहारः साकाङ्क्षत्वात्। तनूपा इत्येतस्य स्वशाखीयत्वेऽपि मन्त्रवाक्यचतुष्टयस्योपयोगात् सर्वपाठः। मन्त्रार्थस्तु—हे अग्ने तनूपा असि शरीररक्षको भवसि, अतो मे मम तन्वं तनूं पाहि, एवं द्वितीयोऽप्यूह्यः, चतुर्थवाक्यार्थस्तु हे अग्ने मे मम तन्वाः शरीरस्य यत् ऊनं न्यूनं तन्मे आपृण आपूरयेति। 'मेधां मे' इत्यादि निगदव्याख्यातम्, तत्र पुरष्करस्रजाविति च पद्ममालाधारिणावित्यर्थकम् अश्विनावित्येतद्विशेषणम्।

तथा—'अङ्गान्यालभ्य जपयत्यङ्गानि च म आप्यायन्ताम्। वाक् प्राणश्चक्षुः श्रोत्रं यशो बलम्' इति। अङ्गानि शिरःप्रभृतिगात्राण्यालभ्य स्पृष्ट्वा स्पृशन्नेवाङ्गानि च म आप्यायन्तामित्यादिमन्त्रान् जपेदित्यर्थः। आप्यायन्तामिति क्रियापदमेकवचनान्ततया विपरिणमय्य वागित्यादौ सर्वत्र योजनीयम्, 'च म' इति पदद्वयञ्चानुषञ्जनीयम्, साकाङ्क्षत्वात्। अत्रेदमवधेयम्—अङ्गानि च म आप्यायन्तामित्यनेन सर्वगात्राणाम्, वाक् च म आप्यायतामित्यनेन मुखस्य, प्राणश्च म इत्यनेन नासापुटयोः, चक्षुश्च म इत्यनेन चक्षुषोः, श्रोत्रञ्च म इत्यनेन श्रोत्रयोः स्पर्शनम्, यशो बलञ्च म आप्यायतामित्यस्य च पाठमात्रम्, औचित्यादिति। एवमेव हरिहरादयः, आचारोऽप्येवम्। स्पर्शनं च दक्षिणपाणिनैव।

यत्रोपादिश्यते कर्म कर्तुरङ्गं न चोच्यते।
दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः॥

इति कात्यायनवचनात्। मन्त्रास्तु निगदव्याख्याताः।

तथा—'त्र्यायुषाणि करोति भस्मना ललाटे ग्रीवायां दक्षिणेऽसे हृदि च त्र्यायुषमिति प्रतिमन्त्रम्'। अनामिकागृहीतेन भस्मना ललाटग्रीवादक्षिणबाहुमूल-हृदयेषु चतुर्षु त्र्यायुषमित्येतैश्चतुर्भिर्मन्त्रपादैः प्रतिमन्त्रं प्रतिपादं क्रमेण त्र्यायुषाणि कुर्यादित्यर्थः। एते चाङ्गालम्भनत्र्यायुषकरणविधायकसूत्रे ऋष्यन्तरीये, न तु पारस्क-रीये। तस्माच्छिष्टाचारादेव पारस्करीयैरेतयोरनुष्ठानमिति गदाधरादयः। मन्त्रोऽय-मधस्ताद्व्याख्यातः।

अत्र त्र्यायुषकरणानन्तरं सूत्रकारानुक्तमपि वैश्वानरवरुणाचार्याणामभिवादनं कर्तव्यम्, आचारात्। तत्प्रकारमाह याज्ञवल्क्यः—

ततोऽभिवादयेद् वृद्धानसावहमिति ब्रुवन्।

ततः अग्निकार्यानन्तरम्। असावित्येतन्नामस्थानीयम्, तथा च नारदीयम्—

अदःपदं हि यद्रूपं यत्र मन्त्रे हि दृश्यते।
साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्॥ इति।

मन्त्र इत्युपलक्षणम्। तेन देवदत्तशर्माहमित्यादिरूपः प्रयोगः।

अभिवादनोपक्रमे ब्रह्मपुराणम्—

असौ नामाहमस्मीति स्वं नाम परिकीर्तयेत्।

मनुः—

भोःशब्दं कीर्तयेदन्ते स्वस्य नाम्नोऽभिवादने।
नाम्नां स्वरूपभावो हि भोःशब्द ऋषिभिः स्मृतः॥
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने।

वसिष्ठः—'आमन्त्रिते स्वरोऽन्त्यः प्लवते'। प्लवते प्लुतो भवति, त्रिमात्रो भवतीति यावत्। गौतमः—'स्वनाम प्रोच्याहमभिवादय इत्यभिवदेत्'।

शङ्खायनः—असावहं भो इत्यात्मनो नामादिशेत्।

यत्तु—आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः॥

इत्यादिनिषेधवचनम्, तदभिवादनव्यतिरिक्तविषयमिति न कश्चिद्विरोधः। गौडनिबन्धे गृह्यान्तरम्—गोत्रनामनी प्रोच्याभिवादयेत्।

विष्णुः—

जन्मप्रभृति यत्किञ्चिच्चेतसा धर्ममाचरेत्।
तत्सर्वं निष्फलं याति एकहस्ताभिवादनात्॥

अयं च एकहस्तेनाभिवादननिषेधो विद्वद्विषयः, न तु मूर्खविषयः। तथा च स एव 'अजाकर्णेन विदुषां मूर्खाणामेकपाणिना' इति।

अजाकर्णेन अजाकर्णवत् सम्पुटितकरद्वयेन।

मनुः—

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम्।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः॥

प्रत्यभिवादनं प्रत्यभिवादनप्रकारम्।

यमः—

अभिवादे तु यो विप्र आशिषं न प्रयच्छति।
श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः॥

शातातपः—

पाखण्डं पतितं व्रात्यं महापातकिनं शठम्।
सोपानत्कं कृतघ्नं च नाभिवादेत् कदाचन॥
धावन्तं च प्रमत्तं च मूत्रोच्चारकृतं तथा।
भुञ्जानमाचामन्तं च नास्तिकं नाभिवादयेत्॥
वमन्तं जृम्भमाणं च कुर्वन्तं दन्तधावनम्।
अभ्यक्तं शिरसि स्नानं कुर्वन्तं नाभिवादयेत्॥

बृहस्पतिः—

जपयज्ञस्थलस्थं च समित्पुष्पकुशानलान्।
उदपात्रार्घभिक्षान्नं वहन्तं नाभिवादयेत्॥
उदक्यां सूतिकां नारीं भर्तृघ्नीं गर्भघातिनीम्।
अभिवाद्य द्विजो मोहादहोरात्रेण शुद्ध्यति॥

जमदग्निः—

देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा त्रिदण्डिनम् ।
नमस्कारं न कुर्याच्चेत् प्रायश्चित्ती भवेन्नरः ।

मनुः—

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् ॥

पारस्करः । 'अत्र भिक्षाचर्यचरणम्' । अत्रास्मिन् काले भिक्षाचर्यचरणं भिक्षाचर्यानुष्ठानं कर्तव्यमित्यर्थः ।

तथा—'भवत्पूर्वां ब्राह्मणो भिक्षेत भवन्मध्यां राजन्यो भवदन्त्यां वैश्यः' । भवच्छब्दः पूर्वो यस्याः सा भवत्पूर्वा तां भवत्पूर्वां भिक्षां ब्राह्मणो भिक्षेत अनुतिष्ठेत् । एवं भवच्छब्दो मध्ये यस्यास्तां भवन्मध्यां राजन्यः क्षत्रियो भिक्षेत । तथा भवच्छब्दोऽन्ते यस्यास्तां भवदन्त्यां वैश्यो वर्णतृतीयो भिक्षेतेत्यर्थः ।

भवत्पदं च स्त्रीप्रत्ययान्तम्, तिस्र इत्युत्तरसूत्रदर्शनेन स्त्रीणामेवात्र भवत्पदवाच्यत्वावगमात् ।

हारीतः—

सप्ताक्षरां चरेद्भिक्षां क्षां च हिं च न वर्जयेत् ।

क्षां च हिं चेत्यनेन भिक्षां देहीति पदयोः प्रयोगोऽप्यावश्यक इत्युक्तं भवति । तथा चायमत्र प्रयोगो भवति—भिक्षां देहीति ब्राह्मणस्य, भिक्षां भवति देहीति क्षत्रियस्य, भिक्षां देहि भवतीति वैश्यस्येति द्रष्टव्यम् ।

कति का वा भिक्षेतेत्यपेक्षायामाह पारस्करः—"तिस्रोऽप्रत्याख्यायिन्यः षड्द्वादशापरिमिता वा" । अप्रत्याख्यायिन्य इति प्रथमा द्वितीयार्थे, भिक्षेतेति क्रियापदं पूर्वसूत्रादनुषज्यते, न प्रत्याख्यातु निराकर्तुं शीलं यासां ता अप्रत्याख्यायिन्यः, ताः तिस्रः षड् वा द्वादश वा अपरिमिता असंख्या वा स्त्रियो भिक्षेतेत्यर्थः । एते भिक्षाविकल्पा आहारपर्याप्त्यपेक्षयेति हरिहरादयः । तथा—मातरं प्रथमामेके । एके आचार्या मातरं स्वजननीमेव प्रथमां भिक्षां भिक्षेतेत्याहुरित्यर्थः । अयं च प्रथमाहर्द्धर्मः ।

भविष्यपुराणम्—

मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्।
भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेत्॥
सुवर्णं रजतं रत्नं सा पात्रेऽस्य विनिःक्षिपेत्।

निजां सोदर्याम्, प्रथमं उपनयनकालीनभिक्षायाम्।

शौनकः—

अप्रत्याख्यायिनमग्रे भिक्षेत, अप्रत्याख्यायिनीं वा।

याज्ञवल्क्यः—

ब्राह्मणेषु चरेद् भैक्षमनिन्द्येष्वात्मवृत्तयः।

आत्मवृत्तय इत्यनेनैतदुक्तम्—स्वशरीरोपयोगार्थमेव भिक्षेत नाधिकमिति। ब्राह्मणेषु चरेदिति च ब्राह्मणविषयम्।

अत एव व्यासः—

ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहम्।
सजातीयगृहेष्वेव सार्ववर्णिकमेव वा॥ इति।

मनुः—

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम्।
प्रदक्षिणं परीत्याग्निं चरेद् भैक्षं यथाविधि॥

उपस्थाय अभिमुखमवस्थाय।

यमः—

हस्तदत्ता च या भिक्षा सलिलं व्यञ्जनानि च।
भोक्ता त्वशुचितां याति दाता स्वर्गं न गच्छति॥

पारस्करः—"आचार्याय भैक्षं निवेदयित्वा वाग्यतोऽहःशेषं तिष्ठेदित्येके"। आचार्यायोपनेत्रे भैक्षं लब्धां भिक्षां निवेदयित्वा निवेदनं कृत्वा वाग्यतो मौनी अहः-

---

१. शूद्रादामं ग्राह्यं न तु पक्वम्—
"तस्मादामं ग्रहीतव्यं शूद्रादप्यङ्गिराब्रवीत्"
इत्यङ्गिरःस्मृतेः। एतच्चापद्विषयम्। "चातुर्वर्ण्यं चरेद् भैक्षमलाभे कुरुनन्दन"
इति भविष्यपुराणोक्तेः।

शेषं भिक्षानिवेदनप्रभृति यावदस्तमयं तिष्ठेदित्येके आचार्या वदन्ति। अपरे तु नेत्यर्थः। अतो विकल्पः।

मनुः—

समाहृत्य तु तद् भैक्षं यावदर्थममायया।
निवेद्य गुरवेऽश्नीयादाचम्य प्राङ्मुखः शुचिः॥

यावदर्थममायया यावानर्थजात उपात्तः तदनपह्नवेन। एवं चाचार्याय दृष्टार्थमिदं निवेदनमात्रं न तु दानमेवेति द्रष्टव्यम्। निवेदनप्रकारश्च भैक्षं भो इति। तथा च गृह्यान्तरम्—"भैक्षं भो इत्याचार्याय निवेद्य तदुक्तं प्रतिगृह्णीयादिति"। आचार्येण तद्दानं च भुङ्क्ष्वेत्यनुज्ञानरूपमिति द्रष्टव्यम्। अत्र च प्राप्तावसराणि प्रणीताविमोकादीनि कर्त्तव्यानि।

तथा—"अहिंसन्नरण्यात् समिध आहृत्य तस्मिन्नग्नौ पूर्ववदाधाय वाचं विसृजते।" अहिंसन् हिंसामकुर्वन् अच्छिन्दन्निति यावत्। स्वयं भग्नाः समिधोऽरण्याद्यनान्न तु ग्रामादाहृत्यानीय तस्मिन् यत्रोपनयनाङ्गहोमः कृतस्तत्रैवाग्नौ पूर्ववत् पाणिनाऽग्निं परिसमूहतीति पूर्वोक्तरीत्या आधाय समिदाधानं कृत्वा वाचं विसृजते यदि वाग्यमो गृहीतस्तदा तं त्यजेदित्यर्थः।

मनुः—

दूरादाहृत्य समिधः संनिदध्याद्विहायसि।
सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः॥

हारीतः—

पुरा जग्राह वै मृत्युर्हिंसन् वै ब्रह्मचारिणम्।
अग्निस्तं मोचयामास तस्मात् परिचरेत् सदा॥
ब्रह्मचारी यदा त्वग्नावादध्यात् समिधं नहि।
गृह्णीयात्तं तदा मृत्युरादध्यात् समिधं ततः॥

दक्षः—

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु।
यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत्॥

इत्थं च सन्ध्यामुपास्य सायं प्रातः प्रतिदिनमग्नौ समिदाधानं ब्रह्मचारिणा कर्तव्यमिति स्थितम्।

पारस्करः—

"अधःशाय्यक्षारालवणाशी स्यात्"

अधः शयितुं शीलमस्यासावधःशायी। तथा अक्षारं चालवणं चाक्षारलवणं तदश्नातीत्येवं शीलोऽक्षारालवणाशी तादृशः स्याद् भवेदित्यर्थः। तथा—"दण्ड-धारणमग्निपरिचरणं गुरुशुश्रूषा भिक्षाचर्या।" एतानि कर्त्तव्यानीत्यर्थः। दण्डपदं चाजिनादीनामप्युपलक्षणम्। "दण्डाजिनोपवीतानि मेखलां चैव धारयेत्" इतिस्मृतेः। तेषां धारणं च सर्वदा, अग्निपरिचरणं समिदाधानम्। तच्च सायं प्रातरुभयोरपि, 'उभय-काल्मग्निं परिचरेत्' इति स्मृत्यन्तरात्। गुरुशुश्रूषा च प्रत्यहं कर्त्तव्या, स्वाध्याया-नुरोधात्। भिक्षार्थं चर्या भिक्षाचर्या भैक्षचरणमिति यावत्, सा च स्थित्यर्था।

तथा—

"मधुमांसमज्जनोपर्यासनस्त्रीगमनानृतादत्तादानानि वर्जयेत्।"

मधु क्षौद्रम्, मांसं पललम्, मज्जनं नद्यादावाप्लवनम्, उपर्यासनमुपरि खट्वादावासनमुपवेशनम्, आसनस्योपरि मसूरिकाद्यासनं वा, स्त्रीगमनं स्त्रीणां मध्येऽवस्थानम्, अभिगमनवर्जनस्योपरिष्टाद्वक्ष्यमाणत्वात्। अनृतमसत्यभाषणम्, अदत्तादानं परद्रव्याणामदत्तानां स्वयं ग्रहणम्, एतानि वर्जयेन्न कुर्यादित्यर्थः।

गोभिलः—

"त्रिरात्रमक्षारालवणाशी भवति।"

पारस्करः—

"अष्टाचत्वारिंशद्वर्षाणि वेदं ब्रह्मचर्यं चरेत्।"

अष्टाभिरधिका चत्वारिंशदष्टाचत्वारिंशत् तानि वर्षाण्यब्दात्यष्टाचत्वारिंश-द्वर्षाणि तानि वेदब्रह्मचर्यं वेदग्रहणार्थमुक्तलक्षणम् ब्रह्मचर्यव्रतं चरेदनुतिष्ठेदित्यर्थः। अस्मिन् पक्षे चतुर्णामपि वेदानामेक एक व्रतादेशः, सर्ववेदाहुतिहोमश्च। तथा—"द्वादश द्वादश वा प्रतिवेदम्।" अथवा प्रतिवेदं वेदे वेदे द्वादश द्वादश वर्षाणि ब्रह्मचर्यं चरेदित्यर्थः। एतदुक्तं भवति—एकवेदग्रहणार्थं द्वादशवर्षाणि ब्रह्मचर्यं चरित्वा तं च वेदं समाप्य समावर्त्तनं कृत्वा पुनर्द्वितीयवेदग्रहणार्थं द्वादशवर्षाणि ब्रह्मचर्यं चरित्वा स्नात्वा तथैव वेदान्तरेऽपि ब्रह्मचर्यं चरेदिति। अत्र च पक्षे यदा यद्वेदव्रतादेशस्तदा तद्वेदाहुतयः।

तथा—"यावद् ग्रहणं वा।" अथवा यावद्वेदस्य वेदयोर्वेदानां वा ग्रहणमध्ययनं तावद् ब्रह्मचर्यं चरेन्न तु वर्षनियम इत्यर्थः।

अथ वर्णक्रमेण व्यवस्थितानि ब्रह्मचारिणो वस्त्रादीन्याह पारस्करः—"वासांसि शाणक्षौमाविकानि।" ब्राह्मणक्षत्रियविशां ब्रह्मचारिणां यथासंख्यं शाणक्षौमाविकानि वासांसि परिधेयवस्त्राणि भवन्तीत्यर्थः।

तत्र शाणं शणमयम्, क्षौमं क्षुमा अतसी तद्विकारमयम्, आविकं मेषरोमनिर्मितम्। गौतमः—"सर्वेषां कार्पासमविकृतम्।" सर्वेषां ब्राह्मणक्षत्रियविशाम्।

वशिष्ठः—"शुक्लमहतं वासो ब्राह्मणस्य, माञ्जिष्ठं क्षौमं क्षत्रियस्य, पीतं कौशेयं वैश्यस्य"। कौशेयं पट्टविशेषः।

पारस्करः—

"ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य।"

एणी कृष्णसारमृगी, तस्या इदमैणेयमजिनं चर्म ब्राह्मणस्य ब्रह्मचारिण उत्तरीयं भवतीत्यर्थः। यत्तु—ऐणस्येदमैणेयमिति केषाञ्चिद् व्याख्यानं तदसत्, ढप्रत्ययानुपपत्तेः। अत एव—

ऐणेयमेणयाश्चर्माद्यमेणस्यैणमुभे त्रिषु।

इति कोषोऽपि। एवमेव हरिहरगदाधरमुरारिमिश्रादयः। तथा—"रौरवं राजन्यस्य।" स्पष्टम्। रुरुर्गौरमृगः, झंखार इति प्रसिद्धः। तथा—"आजं गव्यं वा वैश्यस्य।" सुगमम्। अजस्येदमाजम्।

तथा—

"सर्वेषां वा गव्यमसति प्रधानत्वात्।"

असति यथोदिते चर्मण्यविद्यमाने सर्वेषां वर्णानां गव्यमेव वा चर्मोत्तरीयं भवति। कुतः? प्रधानत्वात्, गव्यस्य चर्मणः पुरुषप्रधानत्वात्, पुरुषप्रधानं हि गव्यं चर्म श्रूयते। "तेऽवच्छाय पुरुषं गव्येतां त्वचमादधुः" इति। ते देवाः पुरुषमवच्छाय उत्कृत्य एतां त्वचं गवि आदधुः धृतवन्त इति तदर्थः।

मनुः—

कार्ष्णरौरववास्तानि चर्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च॥

कृष्णः कृष्णसारः। रुरुरुक्तः। वस्तश्छागः। यमः—"सर्वेषां वा रौरवाजिनम्।" इतरासम्भव इति शेषः।

शुभकर्मनिर्णये स्मृतिः—

मेखला सप्तहस्ता स्यादजिनं च द्विहस्तकम्।
वहिर्लोमत्र्यङ्गुलं चाखण्डं वापि त्रिखण्डकम्॥
चतुर्विंशाष्टषोडशाङ्गुलैः खण्डानि कारयेत्।

विकल्पः शक्त्यपेक्षया, कुलकल्पापेक्षया वा।

पारस्करः—

"मौञ्जी रशना ब्राह्मणस्य॥" मुञ्जः शरस्तन्मयी मौञ्जी रशना मेखला ब्राह्मणस्य ब्रह्मचारिणो भवतीत्यर्थः। तथा—"धनुर्ज्या राजन्यस्य।" स्पष्टम्। धनुर्ज्या चापस्य गुणः। तथा—"मौर्वी वैश्यस्य।" मूर्वा वल्लीविशेषः 'दुधमरु' इति प्रसिद्धस्तन्मयी मौर्वी। तथा—"मुञ्जाभावे कुशाश्मन्तकबल्वजानाम्।" मुञ्जाभावे मुञ्जादीनां स्वस्ववर्णविहितानामलाभे ब्राह्मणादीनां यथाक्रमं कुशाश्मन्तकबल्वजानां मेखला भवन्तीत्यर्थः। मुञ्जपदं धनुर्ज्यादीनामप्युपलक्षणम्।

मनुः—

मौञ्जी त्रिवृत् समा श्लक्ष्णा कार्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणसम्भवा॥
मुञ्जाभावे तु कर्त्तव्या कुशाश्मन्तकबल्वजैः।
त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा॥

त्रिवृद् नवगुणीकृता। श्लक्ष्णा मसृणस्पर्शा। मौर्वी ज्या मूर्वानिर्मितधनुर्गुणः। तस्यै वसतो मेखलायां विनियोग इत्याशयः। मुञ्जाभावे मुञ्जाद्यलाभे अश्मन्तकः कुशसदृशं तृणम्। बल्वजाः 'सावय' इति प्रसिद्धाः। ग्रन्थौ प्रवरसाम्येन व्यवस्थितो विकल्पः।

पारस्करः—

"पालाशो ब्राह्मणस्य दण्डः।" पलाशोद्भवः पालाशो दण्डो ब्राह्मणस्य भवतीत्यर्थः। तथा—"बैल्वो राजन्यस्य", "औदुम्बरो वैश्यस्य।" निगदव्याख्याते एते।

तथा—"सर्वे वा सर्वेषाम्।" सुगमम्। मुख्यालाभे यथालाभमुपादेयाः।

मनुः—

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः॥

ललाटोर्ध्वकेशजन्मस्थानस्यान्तः केशान्तः, ऊर्ध्वस्थितस्य पुरुषस्य भूमितस्तत्पर्यन्तः तत्प्रमाणतो ब्राह्मणस्य दण्डः कार्यः। ललाटसम्मितो भ्रूमध्यदेशसम्मितः। नासान्तिको घ्राणसम्मितः। यत्तु केशान्तिकः कर्णसमीपकेशमूलपर्यन्त इति कस्यचिद्व्याख्यानम्, तन्न; तथा सति ब्राह्मणक्षत्रिययोस्तस्य तुल्यपरिमाणत्वेन पृथगुपदेशानर्थक्यापत्तेः। एवमेव मुरारिमिश्रप्रभृतयः।

तथा—

ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः।
अनुद्वेगकरा नृणां सत्वचा नाग्निदूषिताः॥

ऋजवः सरलाः। ऋजुत्वं चाग्रभागातिरिक्तभागे ग्राह्यम्, 'यूपवक्राः' इति गौतमेन नताग्रत्वस्य विहितत्वात्। अव्रणा अच्छिद्राः। सौम्यदर्शना अतिस्थौल्यादिना अभयानकाः। अनुद्वेगकराः स्वरूपतोऽभीषणाः।

ब्रह्मचारिधर्मानाह याज्ञवल्क्यः—

मधुमांसाञ्जनोच्छिष्टं शुक्तस्त्रीप्राणिहिंसनम्।
भास्करालोकनाश्लीलपरिवादांश्च वर्जयेत्॥

शुक्तं परुषं वचः पर्युषितान्नं च, अश्लीलं व्रीडाकरं वचः। परिवादः परदोषाख्यानम्।

कूर्मपुराणम्—

आदर्शं नैव वीक्षेत नाचरेद् दन्तधावनम्।

प्रचेताः—

ताम्बूलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम्।
यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्॥

यमः—

मेखलामजिनं दण्डमुपवीतं च नित्यशः।
कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत्॥

त्रुटितेषु मेखलादिषु यत्कर्तव्यं तदाह—

मनुः—

मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवत् ॥

प्रास्य निःक्षिप्य ।

मरीचिः—

ब्रह्मसूत्रं विना भुङ्क्ते विण्मूत्रे कुरुते तथा ।
गायत्र्यष्टसहस्रेण प्राणायामेन शुद्ध्यति ॥

आश्वलायनः—"अत ऊर्ध्वमक्षारलवणाशी ब्रह्मचार्यधःशायी त्रिरात्रं द्वादशरात्रं संवत्सरं वा ।" अत ऊर्द्धम् उपनयनोत्तरम् ।

सति कारणे द्विजातीनां पुनरुपनयनमाह बौधायनः—

सिन्धुसौवीरसौराष्ट्रान् तथा प्रत्यन्तवासिनः ।
अङ्गवङ्गकलिङ्गाश्च गत्वा संस्कार[1]मर्हति ॥

संस्कारमुपनयनम् ।

मनुः—

अज्ञानात् प्राश्य विण्मूत्रं सुरासंसृष्टमेव च ।
पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥

हेमाद्रौ पद्मपुराणम्—

प्रेतशय्याप्रतिग्राही पुनः संस्कारमर्हति ।
लशुनं गृञ्जनं जग्ध्वा पलाण्डुं च तथा शुनम् ॥

शातातपः—

उष्ट्रमानुषकेभाश्वरासभीक्षीरभोजनात् ।
उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः ॥

मिताक्षरायां पराशरः—

यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः ।
अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति ॥

---

१. तीर्थयात्रार्थमङ्गादिगमने तु न दोषः—"अङ्गवङ्गकलिङ्गांश्च सौराष्ट्रमगधांस्तथा । तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति ॥" इति गौतमोक्तेः ।

स चरेत् त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च।
जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात्॥

त्रिस्थलीसेतौ—

कर्मनाशाजलस्पर्शात् करतोयाविलङ्घनात्।
गण्डकीबाहुतरणात् पुनः संस्कारमर्हति॥

ज्योतिर्निबन्धे—

यो न मन्त्रैः स्वशाखोक्तैः संस्कृतो नाधिकारिणा।
नासौ द्विजत्वमाप्नोति पुनः संस्करणं विना॥

वृद्धमनुः—

जीवन् यदि समागच्छेद् घृतकुम्भे निमज्य तम्।
उद्धृत्य स्थापयित्वास्य जातकर्मादि कारयेत्॥

यस्य मृतत्वभ्रान्त्या श्राद्धादि कृतं स यदि जीवन् समागच्छेदित्यर्थः। पुनः संस्कारे विशेषमाह मनुः—

वपनं[1] मेखला दण्डो भैक्षचर्या व्रतानि च।
न कर्त्तव्यं द्विजातीनां पुनः संस्कारकर्मणि॥

षण्ढमूकादीनामुपनयने विशेषमाह पारिजाते ब्रह्मपुराणम्—

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स इति श्रुतिः।
तस्माच्च षण्ढवधिरकुब्जवामनपङ्गुषु॥
जडगद्गदरोगार्तशुष्काङ्गविकलाङ्गिषु।
मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये॥
ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम्।
मत्तोन्मत्तौ न संस्कार्याविति केचित् प्रचक्षते॥

---

१. "पराशरः—अजिनं मेखला दण्डो भैक्षचर्या व्रतानि च। निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि"॥ इति।

कर्मस्वनधिकाराच्च पातित्यं नास्ति चैतयोः।
तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा॥
संस्कारमन्त्रहोमादीन् करोत्याचार्य एव तु।
उपनेयांश्च विधिवदाचार्यः स्वसमीपतः॥
आनीयाग्निसमीपं वा सावित्रीं स्पृश्य वा जपेत्।
कन्यास्वीकरणादन्यत् सर्वं विप्रेण कारयेत्॥
एवमेव द्विजैर्जातौ संस्कार्यौ कुण्डगोलकौ।

अन्यद् विवाहाङ्गम्। कन्यास्वीकरणरूपो विवाहस्तु स्वयमेव कार्य इति भावः।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
उपनयनप्रकाशः॥

अथ वेदारम्भप्रकाशः

अथ वेदारम्भः । तस्य च—

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्वकम् ।
वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् ॥

इति वचनेनोपनयनानन्तरं गुरोर्वेदाध्यापनविधानादुपनयनोत्तरः कालः । इतिकर्त्तव्यता चोपाकर्मोक्ता, "एतदेव व्रतादेशनविसर्गेषु" इति पारस्करेण वेदारम्भे तदतिदेशात् । व्रतादेशनं वेदारम्भः । तामितिकर्त्तव्यतां प्रदर्शयति उपाकर्मप्रकरणे पारस्करः—

"आघाराज्यभागाविष्ट्वा आज्याहुतिर्जुहोति ।" भूसंस्कारादिपूर्वकमाज्यभागान्तहोमचतुष्टयं विधाय वक्ष्यमाणा आज्याहुतीराचार्यो जुहुयादित्यर्थः । आज्यभागाविष्ट्वेत्यभिधानं वक्ष्यमाणाज्याहुत्यवसरविधानार्थम् ।

ता एवाहुतीः प्रदर्शयति स एव—"पृथिव्या अग्नय इत्यृग्वेदे, अन्तरिक्षाय वायव इति यजुर्वेदे, दिवे सूर्यायेति सामवेदे, दिग्भ्यश्चन्द्रमस इत्यथर्ववेदे ॥"

ऋग्वेदेऽधीयमाने 'पृथिव्यै अग्नये' इति द्वे आहुती, यजुर्वेदेऽधीयमाने 'अन्तरिक्षाय वायवे' इति द्वे, सामवेदे 'दिवे सूर्याय' इति द्वे, अथर्ववेदे 'दिग्भ्यश्चन्द्रमसे' इति द्वे जुहुयादित्यर्थः । तथा—'ब्रह्मणे छन्दोभ्यश्च' इति सर्वत्र । सर्वत्र ऋग्वेदादौ यस्मिन् कस्मिंश्चिदप्यधीयमाने ब्रह्मणे छन्दोभ्यश्चेति द्वे आहुती जुहुयादित्यर्थः । तथा—"प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतयेऽनुमतये" इति च । प्रजापतये इत्यादिकाः सप्ताज्याहुतीरपि सर्वत्र जुहुयादित्यर्थः । एताः सर्ववेदसाधारण्यात् सामान्या इत्युच्यन्ते ।

अत्र यदि चतुर्णामपि वेदानां तन्त्रेणोपाकर्म व्रतादेशनं वा तदा ब्रह्मणे छन्दोभ्यश्चेति प्रतिवेदमाहुतिद्वयमावर्तयेत् । 'प्रजापतये' इत्यादिकास्तु तन्त्रेणैव, योगविभागसामर्थ्यादिति विवेकः । कर्कादयोऽप्येवम् । इत्थमतिदिष्टा एता आहुतीर्हुत्वाऽवशिष्टं महाव्याहृत्यादिस्विष्टकृदन्तमाहुतिदशकं विधाय प्राप्तावसरं संस्रवप्राशनादिबर्हिर्होमान्तं कर्म विदध्यात् ।

ततो वेदारम्भं कारयेत्। तत्प्रकारमाह पारस्करः—

"प्रत्यङ्मुखेभ्य उपविष्टेभ्य ओङ्कारमुक्त्वा त्रिश्च सावित्रीमध्यायादीन् प्रब्रूयात्" प्रत्यङ्मुखेभ्य आसीनेभ्यः शिष्येभ्यः स्वयं प्राङ्मुख उपविष्ट ओङ्कारं प्रणवमुक्त्वा उच्चार्य तत्सवितुरित्यादिकां सावित्रीं त्रिरुक्त्वा मन्त्रब्राह्मणयोरध्यायादीन् प्रब्रूयादध्यापयेदित्यर्थः।

बहुवचनमुपाकर्मणि शिष्यबहुत्वाभिप्रायेण। मनुः—

ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा।

तथा—

ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा।

ब्रह्म वेदः। ततोऽवसरप्राप्तं पूर्णाहुत्यादिकं विदध्यात्।

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
वेदारम्भप्रकाशः॥

अथ समावर्त्तनप्रकाशः

अथ समावर्त्तनाख्यं कर्माह पारस्करः—"वेदं समाप्य स्नायात्"। स्नानपदं समावर्त्तनसंस्कारमभिदधाति, वेदं मन्त्रब्राह्मणात्मकं समाप्य सम्यक् पाठतोऽर्थतश्चान्तं नीत्वा स्नायाद् वक्ष्यमाणविधिना स्नानं कुर्यादित्यर्थः। स्नानं द्वितीयाश्रमप्रतिपत्तिस्तदनुष्ठानयोग्यता वेति कर्कादयः।

तथा—

"ब्रह्मचर्यं वाऽष्टाचत्वारिंशकम्।"

अथवा अष्टचत्वारिंशकम् अष्टचत्वारिंशद्वर्षनिर्वर्त्यं ब्रह्मचर्यव्रतं समाप्य स्नायादित्यर्थः।

तथा—"द्वादशकेऽप्येके।" एके आचार्याः पुनर्द्वादशके द्वादशवार्षिके ब्रह्मचर्यव्रतेऽनुष्ठिते सति स्नानमिच्छन्तीत्यर्थः। अत्रेदं बोध्यम्—"वेदं समाप्य" इति प्रथमसूत्रेणासमाप्तेऽपि ब्रह्मचर्यव्रते वेदसमाप्त्युत्तरं स्नानमित्येकः पक्षोऽभिहितः। ब्रह्मचर्यमिति द्वितीयसूत्रेण ब्रह्मचर्यसमाप्त्युत्तरमसमाप्तेऽपि वेदे स्नानमिति द्वितीयः पक्षो दर्शितः। द्वादशकेऽपीति तृतीयसूत्रं तु ब्रह्मचर्यव्रतप्रकारान्तरप्रदर्शकमात्रम्। यथोक्तमधस्तात्—"अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यव्रतं चरेद् द्वादश द्वादश वा प्रतिवेदम्" इति। वेदं ब्रह्मचर्यं च समाप्य स्नानम् इति तृतीयः पक्षः पुनरत्र सूत्रकारा-प्रदर्शितोऽपि ग्राह्यः। अत एव स्नातकप्रभेदकथने पारस्कर एव—"त्रयः स्नातका भवन्ति—विद्यास्नातको, व्रतस्नातको विद्याव्रतस्नातकः" इति। "समाप्य वेदमसमाप्य व्रतं यः समावर्त्तते स विद्यास्नातकः, समाप्य व्रतमसमाप्य वेदं यः समावर्त्तते स विद्यास्नातकः, उभयं समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इति" इति।

पारस्करः—"कामं तु याज्ञिकस्य।" यज्ञं वेत्तीति याज्ञिकः। तुशब्दः पक्षव्यावृत्तौ, याज्ञिकस्य तु सम्पूर्णं वेदमनधीत्यापि काममिच्छयापि स्नानं भवतीत्यर्थः। स्नायादित्युक्तम्, तत्र कथं स्नायादित्यपेक्षायामाह पारस्करः—"उपसंगृह्य गुरुम्।" गुरोः पादोपग्रहणं कृत्वेत्यर्थः। एतन्मूलकमेव रामदत्तपद्धतावुक्तम्—"नम्रीभूय" इति।

तथा–'गुरुणानुज्ञातः ।" गुरुणा आचार्येणानुज्ञातः स्नाहीति लब्धानुज्ञः स्नायादित्यर्थः । ब्रह्मचारिणानुज्ञालाभार्थम् 'आचार्य! स्नास्यामि' इत्याचार्योऽभ्यर्थनीयः ।

यद्यप्युपदर्शितसूत्रपाठे पौर्वापर्यवैपरीत्यमस्ति । तथा हि—"गुरुणानुज्ञातः", "कामं तु याज्ञिकस्य", "उपसंगृह्य गुरुम्" इति; तथाप्यर्थक्रमानुरोधेनान्यथा योजितमस्माभिरिति द्रष्टव्यम् । अयं च रामदत्ताद्यनुसारी पन्थाः । हरिहरस्तु "उपसंगृह्य गुरुं समिधोऽभ्याधाय" इति यथाश्रुतपाठानुसारेण बहिर्होमान्तकर्मानुष्ठानानन्तरं समिदाधानात् प्राग् गुरुपादोपग्रहणमादद्रे । गदाधरस्तूभयत्रापीत्यालोचनीयम् ।

आचार्येणोपाकर्मोक्तरीत्या वेदाहुतयो विधेयाः, एतदेव 'व्रतादेशनविसर्गेषु' इति समावर्त्तने तदतिदेशात् । तत्र विसर्गः समावर्त्तनम् । वेदाहुतयश्च वेदारम्भप्रकाशेऽस्माभिः प्रदर्शिताः ।

तथा चैवं प्रयोगः—आचार्य स्नास्यामीति सविनयं ब्रह्मचारिणाऽभ्यर्थित आचार्यः स्नाहीति तमनुज्ञाय स्वदक्षिणात उपवेश्य भूसंस्काराद्याज्यभागान्तं विधाय अन्तरिक्षाय १, वायवे २, ब्रह्मणे ३, छन्दोभ्यः ४, प्रजापतये ५, देवेभ्यः ६, ऋषिभ्यः ७, श्रद्धायै ८, मेधायै ९, सदसस्पतये १०, अनुमतये ११ चाज्याहुतीर्हुत्वा भूरादिस्विष्टकृदन्ताहुतीर्विधाय संस्रवप्राशनादिबर्हिर्होमान्तं विदध्यादिति । पारस्करः—समिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात् स्थित्वाऽष्टानामुदकुम्भानां "येऽप्स्वन्तरग्नयः प्रविष्टा गोह्य उपगोह्यो मयूषो मनोहाऽस्खलो विरुजस्तनूदूषुरिन्द्रियहा तान् त्रिजहामि यो रोचनस्तमिह गृह्णामि" इत्येकस्मादपो गृहीत्वा तेनाभिषिञ्चते—"तेन मामभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय" इति ।

आचार्येण बहिर्होमान्ते कर्मण्यनुष्ठिते ब्रह्मचारी समिधोऽभ्याधाय पूर्वोक्तलक्षणास्तिस्रः समिधः परिसमूहनादि त्र्यायुषकरणान्तेनोपनयनप्रदर्शितेन विधिना समावर्तनाङ्गहोमाधिकरणाग्नौ प्रक्षिप्य, परिश्रितस्य परिवेष्टितस्य सर्वतः प्रच्छादितस्य समावर्त्तनाङ्गहोमसाधनाग्निस्थापनप्रदेशस्य उत्तरत उत्तरस्मिन् पार्श्वे स्थापितानामष्टानामुदकुम्भानां पुरस्तात् पूर्वस्यां दिशि प्रागग्रेषु कुशेष्वास्तीर्णेषु स्थित्वा ऊर्द्ध्वीभूय येऽप्स्वन्तरग्नय इति मन्त्रेणैकस्मात् प्रथमादुदकुम्भादपो गृहीत्वा जलमानीय तेन जलेनाभिषिञ्चति, "आत्मानमभ्युक्षेत् तेन मामभिषिञ्चामि" इति मन्त्रेणेत्यर्थः । समिदा-

धानानन्तरमत्रापि वैश्वानरादीनामभिवादनमाचारादेवेति स्मर्त्तव्यम्। उदकुम्भाश्च दक्षिणोत्तरक्रमेण स्थापनीयाः, तेभ्यो जलग्रहणमपि तत्क्रमेणैव, "सर्वाश्चावृतो दक्षिणा-प्रवृत्तयः उदकसंस्था भवन्ति" इति शाङ्खायनसूत्रात्। आवृतः प्रक्रियाः। जलादानं चाम्रपल्लवेन आचारात्। कुम्भानां कुशोपरि स्थापनमप्याचारादेव, कुशेष्वित्यस्योभ-यान्वयित्वाद्वा। अङ्गानां शिरः प्रधानमित्यभिषेकः शिरसि कर्त्तव्यः, "अव्यक्तं प्रधान-गामि" इति न्यायात्।

मन्त्रार्थस्तु—

अप्सु जलेषु अन्तर्मध्ये ये गोह्यादयोऽष्टावग्नयः प्रविष्टाः कारणत्वेन स्थिताः "अङ्गयोऽग्निः" इति श्रुतेः, तान् गोह्यादीनष्टावग्नीन् विजहामि अमेध्यत्वादशुभाव-हत्वाच्चैताभ्योऽङ्गयः पृथक्करोमि त्यजामि, यश्च रोचनो रोचननामाग्निस्तमिहाप्सु विषये इह कर्मणि वा गृह्णामि मेध्यत्वाद् दीप्तिकरत्वाच्चाददामीति। गूहति संवृणोति प्राणिन इति गोह्यः, उरगोह्योऽङ्गतापनः, मयूषः सूर्यमयूषवत् सन्तापकः, मनो हन्तीति मनोहा, न स्खलतीत्यस्खलः अप्रतिकार्यः, विविधं रुजतीति विरुजः, तनूं दूषयतीति तनूदूषुः। तनूदूषिरिति क्वचित् पाठः। इन्द्रियाणि हन्तीति इन्द्रियहा, एतानष्टाव-शुभावहान् निरस्य मङ्गलं रोचनमनेन जलेन सह गृह्णामीति तात्पर्यार्थः। गोह्यादीनां दोषप्रदर्शनपुरस्सरं रोचनस्य गुणान् प्रदर्शयति वृद्धमनुः—

गोह्यादयोऽग्नयो ह्यष्टावमेध्यास्त्वशुभावहाः।
शुभकृद्रोचनस्त्वेको मेध्यो दीप्तिकरश्च सः॥ इति।

अभिषेकमन्त्रार्थो यथा—

तेन रोचनाधिष्ठितेन मङ्गलजलेनाहं मामात्मानमभिषिञ्चामि किमर्थम्? श्रियै सम्पत्तये यशसे कीर्त्यै ब्रह्मणे वेदतदर्थज्ञानार्थं ब्रह्मवर्चसाय ब्राह्मतेजोलाभायेति। क्वचित्तेनेममिति पाठः। तत्रापीममात्मानमिति व्याख्येयम्।

तथा—"येन श्रियमकृणुतां येनावमृशताꣳसुराम्। येनाक्षावभ्यषिञ्चतां यद्वान्तदश्विना यशः॥" इति। एवं प्रथमोदकुम्भेनाभिषेकं विधाय द्वितीयस्मादाम्रपल्ल-वेन जलमादाय येन श्रियमिति मन्त्रेणात्मानमभिषञ्चेदित्यर्थः। अत्राभिषेकमात्रे मन्त्रविशेषाभिधानाज्जलग्रहणं येऽप्स्वन्तरित्यनेनैव। एवमुत्तरत्रापि।

मन्त्रार्थस्तु—हे अश्विना ! अश्विनौ येन जलेन भवन्तो श्रियं सम्पदं शोभां वा अकृणुतां कृतवन्तौ विकरणव्यत्ययश्छान्दसः। येन च सुरामसृतमवमृशतां प्राप्तवन्तौ सुरां मद्यजनितदोषमवमृशतां मार्जितवन्ताविति वा। अड्भाव आर्षः। येन चाक्षौ नेत्रगोलके अभ्यषिञ्चतामभिषिक्तवन्तौ, यच्च जलं वां युवयोर्यशः कीर्तिहेतुस्तत् तेन अभिषिञ्चामीत्यनुषङ्गः। यद्वा यज्जलं तत्प्रसिद्धं वां यशस्तेनाभिषिञ्चामि, अथवा यदेवं भूतं वां यशस्तदस्त्विति व्याख्येयम्। अश्विना इति डादेशः।

तथा—"आपो हिष्ठेति प्रत्यृचं त्रिभिः।" एवं द्वितीयकुम्भेनाभिषेकानन्तरं आपो हिष्ठेति तिसृभिर्ऋग्भिः प्रत्यृचं प्रत्येकया ऋचा त्रिभिरुदकुम्भैरात्मानमभिषिञ्चेदित्यर्थः। एतदुक्तं भवति—आपो हिष्ठेति तृतीयेन, यो वः शिव इति चतुर्थेन, तस्मा अरमिति पञ्चमेनोदकुम्भेनाभिषेक इति। व्याख्यातोऽयं मन्त्र उद्वाहप्रकाशे।

तथा—"तूष्णीमितरैः"। इतरैरवशिष्टैस्त्रिभिरुदकुम्भैस्तूष्णीममन्त्रकमेवाभिषिञ्चेदित्यर्थः।

तथा—"उदुत्तममिति मेखलामुन्मुच्य निधाय वासोऽन्यत् परिधायादित्यमुपतिष्ठते—उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात् प्रातर्यावभिरस्थाद्दशसनिरसि दशसनिं मा कुर्वाविदन्मा गमयोद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थादिवा यावभिरस्थाच्छतसनिरसिशतसनिं मा कुर्वाविदन्मा गमयोद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्थात् सायं यावभिरस्थात् सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मागमयेति।"

अभिषेकानन्तरमुदुत्तममिति मन्त्रेण मेखलां रशनामुन्मुच्य ऊर्ध्वभागेन निःसार्य निधाय भूमौ निःक्षिप्य वासोऽन्यत् परिधाय वस्त्रान्तरं परिहितं कृत्वा उद्यन् भ्राजभृष्णुरित्यादिना आदित्यं सूर्यमुपतिष्ठते उपतिष्ठेदित्यर्थः।

"मेखलानिधानोत्तरं दण्डकृष्णाजिनयोरपि तूष्णीं भूमौ निधानम्" इति जयरामरेणुकरामदत्तादयः। तयोर्मेखलासाहचर्यनियमान्मेखलापरित्यागानन्तरं परित्यागः समुचित इति तेषामाशयः। क्वचित्तु "मेखलामुन्मुच्य दण्डं निधाय" इत्यपि पाठो दृश्यते। "उदुत्तमम्" इति व्याख्यातं कुशण्डिकाप्रकाशे। उपस्थानमन्त्रार्थस्तु—हे सूर्य ! यथा इन्द्रो देवराजो मरुद्भिर्देवविशेषैः सेवितोऽस्थात्तिष्ठति तथा भवान् प्रातः प्रातःकाले उद्यन् उदयं गच्छन् यावभिर्गमनशीलैर्ऋष्यादिभिः सेवितोऽस्थात्तिष्ठति। छान्दसो व्यत्ययः। किं भूतो भवान् ? भ्राजभृष्णुः भ्राजन्ते दीप्यन्ते ये ते भ्राजाः, तान्

बिभर्त्ति पुष्णातीति तथा। किञ्च, यतस्त्वं दशसनिरसि दशगाः सनोति ददातीति दशसनिः, तथाभूतोऽसि। षणूदाने। अतो मामपि दशसनिं दशगोदक्षिणादातारं कुरु। अनुक्तौ गौः सर्वत्रेति कात्यायनेन परिभाषितत्वात् संख्येयानुक्तौ गावः प्रत्येतव्याः। किञ्च, आविदन् आसमन्ताद्वेत्ति तथाभूत, हे सर्वज्ञ! मा मां गमय सर्वज्ञत्वं प्रापय। एवमुत्तरत्रापि व्याख्येयमिति।

हलायुधस्तु—"इन्द्र आदित्य उद्यन् उदयं कुर्वन्नस्थात् स्थितो बभूव। किं भूतः? भ्राजभृष्णुः भ्राजान् रश्मीन बिभर्त्ति धारयतीति तथा। प्रातः प्रत्यूषे। मरुद्भिर्देवैः सहास्थात्। किम्भूतैः? यावभिः यावद्भिः, यावन्तो देवास्तैः सर्वैः स्थितो बभूवेत्यर्थः। यतो हे विदन्! हे विद्वन्नादित्य! त्वं दशसनिरसि बहुधनो भवसि, अतो मां दशसनिं बहुधनं कुरु, किञ्च मा मां ब्रह्मचर्यादुत्तीर्णमागमय जानीहि। द्वितीयतृतीयपाठयोरप्येवमूहनीयम्" इति व्याख्यातवान्। यावभिरित्यत्र दकारलोप आर्षः। कुर्वाविदन्नित्यत्र स्थितस्याङो गमयेत्यत्र संबन्धः।

तथा—"दधितिलान् वा प्राश्य जटालोमनखान् संहृत्यौदुम्बरेण दन्तान् धावेत "अन्नाद्याय व्यूहध्वमुसोमो राजाऽयमागमत्। स मे मुखं प्रमार्ष्टयते यशसा च भगेन च॥" इति। दधितिलान वा प्राश्य दधितिलयोरन्यतरं भुक्त्वा जटालोमनखान् संहृत्य अपनीय वापयित्वा औदुम्बरेण उदुम्बरकाष्ठेन दन्ता धावेत शोधयेत्। अन्नाद्याय व्यूहध्वमिति मन्त्रेणेत्यर्थः। अत्र जटालोमनखवपनान्निमित्तादुत्तरत्र पुनः स्नात्वेति पुनःशब्दश्रवणाच्च स्नानमापद्यते, अतो वपनानन्तरं स्नात्वा दन्तधावनं कुर्यादिति सिद्धमिति हरिहरादयः। रामदत्तादिपद्धतिरप्येवम्। समाचारोऽप्येवमेव। अन्ये तूत्तरत्र पुनः स्नात्वेत्यस्याङ्गोद्वर्तनरूपमलापकर्षस्नानानन्तरं पुनः स्नानं कृत्वेत्यर्थमङ्गीकुर्वाणा नैतन्मन्यन्ते।

अत्र प्राशनदन्तधावनयोरनन्तरं तन्निमित्तकमाचमनम्, स्नानोत्तरं तन्निमित्तकं द्विराचमनं च विधेयम्। मन्त्रार्थस्तु—हे दन्ता! यूयमन्नाद्याय अन्नभक्षणाय अन्नादिवस्तुने वा व्यूहध्वं एकीभवत निर्मला भवतेति वा।

यतोऽयं राजा सोमश्चन्द्रः काष्ठरूपेणागमद् आगतः। अतः स एव सोमो मे मम मुखं प्रमार्ष्टयते शोधयिष्यति। केन? यशसा कीर्त्या भगेन भाग्येनेति। चद्वयं मिथः समुच्चये।

तथा—"उत्साद्य पुनः स्नात्वाऽनुलेपनं नासिकयोर्मुखस्य चोपगूह्णीते प्राणापानौ मे तर्पय चक्षुर्मे तर्पय श्रोत्रं मे तर्पयेति ।" उत्साद्य अङ्गोद्वर्त्तनं कृत्वा पुनः स्नात्वा पुनरपि स्नानं कृत्वाऽनुलेपनं चन्दनकुङ्कुमादि नासिकयोर्नासापुटयोर्मुखस्य चोपगूह्णीते आदद्यात चन्दनादिना नासिकाद्यालभते "प्राणापानौ" इति मन्त्रेणेत्यर्थः । मन्त्रार्थस्तु—हे अनुलेपनाधिदेवते ! मे मम प्राणापानौ वायू तर्पय प्रीणय, तथा मे चक्षुरिन्द्रियं तर्पय, तथा मे श्रोत्रं श्रवणेद्रियं च तर्पयेति ।

तथा—"पितरः शुन्धध्वमिति पाणयोरवनेजनं दक्षिणानुषिच्यानुलिप्य जपेत् सुचक्षा अहमक्षीभ्यां भूयासꣳसुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम्।" इति । ततः पाणयोर्हस्तयोरवनेजनं प्रक्षालनोदकं दक्षिणा दक्षिणास्यां दिशि पितरः शुन्धध्वमिति मन्त्रेण अनुषिच्य प्रक्षिप्य चन्दनेनात्मानमनुलिप्य "सुचक्षा अहम्" इति मन्त्रं जपेदित्यर्थः । दक्षिणापदं लुप्तसप्तम्यन्तम् । पितृतर्पणे पितृकर्मनियतं दक्षिणाभिमुखत्वादिकमनुसन्धेयम् । अवनेजननिषेकानन्तरंचोदकस्पर्शः पितृमन्त्रोच्चारणनिमित्तकः । मन्त्रार्थस्तु हे पितरः ! यूयं पाणयोरवनेजनेन शुन्धध्वं तृप्ता भवतेति। सुचक्षा अहमिति मन्त्रार्थो यथा—हे सवितः! अहमक्षीभ्यां नेत्राभ्यां सुचक्षाः सुदर्शनो भूयासं भवानि, तथा मुखेन सुवर्चाः सुतेजा भूयासमिति पूर्वेण सम्बन्धः । तथा कर्णाभ्यां सुश्रुत् सुश्रवणो भूयासमिति ।

तथा—"अहतं वासो धौतं वाऽमौत्रेणाच्छादयीत परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतञ्च जीवामि शरदः पुरूची रायस्योषमभिसंव्ययिष्ये ॥" इति । अहतं नवीनं सदृशं वासो वसनं अथवाऽमौत्रेणारजकेण धौतं वास आच्छादयीत परिदधीत 'परिधास्यै' इति मन्त्रेणेत्यर्थः । मन्त्रोऽयं व्याख्यातः कन्यादानप्रकरणे ।

तथा—"अथोत्तरीयं यशसा मा द्यावा पृथिवी यशसेन्द्रा बृहस्पती । यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम्" इति । अथ परिधानानन्तरं यशसामेति मन्त्रेण अहतं वास उत्तरीयमाच्छादयीतेत्यर्थः । अयमपि मन्त्रस्तत्रैव व्याख्यातः । अत्र वासः परिधाननिमित्तकं द्विराचमनम् ।

तथा—

"एकं चेत्पूर्वस्योत्तरवर्गेण प्रच्छादयीत ।"

चेद्यदि एकं वासो भवति द्वितीयं न भवति तदा पूर्वस्य परिधानीयस्यैव वासस उत्तरवर्गेणोत्तरभागेन प्रच्छादयेदेत्यर्थः । तत्रापि यशसामेति मन्त्रो भवत्येव, क्रियान्तर-

त्वात्। अत्र "वैणवीं धारयेद्यष्टिमन्तर्वासस्तथोत्तरम्। यज्ञोपवीतद्वितयम्" इति स्मृतेः सूत्रकारानुक्तमपि यज्ञोपवीतद्वयधारणं कार्यम्। हरिहरादयोऽप्येवम्।

तथा—"सुमनसः प्रतिगृह्णाति या आहरज्जमदग्निः श्रद्धायै कामायेन्द्रियाय ता अहं प्रतिगृह्णामि यशसा च भगेन च॥" इति। प्रतीत्युपसर्गबलाद् गुरुणा समर्पिताः सुमनसः पुष्पाणि प्रतिगृह्णाति प्रतिगृह्णीयाद् या आहरदिति मन्त्रेणेत्यर्थः। मन्त्रार्थस्तु—याः सुमनसो जमदग्निर्ऋषिविशेषः श्रद्धायै एवमेवेति प्रत्ययः श्रद्धा तदर्थम्, कामाय अभिलषितसिद्ध्यर्थम्, इन्द्रियाय इन्द्रियपाटवाय च आहरत् आददौ, ताः सुमनसो यशसा कीर्त्या भगेनैश्वर्येण च निमित्तेनाहं प्रतिगृह्णामीति। चद्वयं मिथः समुच्चये।

तथा—"अथावबध्नीते यद्यशोऽप्सरसामिन्द्रश्चकार विपुलं पृथु। तेन संग्रथिताः सुमनस आबध्नामि यशोमयि॥" इति। अथ सुमनोग्रहणानन्तरं अवबध्नीते ता एव ग्रथिताः सुमनसः परिदध्याद्यशोऽप्सरसामिति मन्त्रेणेत्यर्थः। मन्त्रार्थस्तु—हे सुमनसः! इन्द्रो देवराजोऽप्सरसामुर्वशीप्रभृतीनां कुसुमावबन्धनेन यद्यशश्चकार रूपवत्तया यद्यशः कृतवान्। किं भूतम्? विपुलं विशालं पृथु बहुतरं तेन यशसा निमित्तभूतेन संग्रथिताः सम्यक्तन्तुना स्यूताः सुमनसः पुष्पाणि आबध्नामि तद्यशो मयि तिष्ठत्विति।

तथा—

"उष्णीषेण शिरो वेष्टयते युवा सुवासा" इति।

उष्णीषेण शिरोवेष्टनवस्त्रेण शिरो मस्तकं वेष्टयते वेष्टयेत 'युवा सुवासा' इति मन्त्रेणेत्यर्थः। व्याख्यातोऽयं मन्त्र उपनयनप्रकाशे।

तथा—

"अलङ्करणमसि भूयोऽलङ्करणं भूयादितिकर्णावेष्टकौ।"

अलङ्करणमसीति मन्त्रेण कर्णावेष्टकौ कुण्डले परिदध्यादित्यर्थः। मन्त्रार्थस्तु—हे कुण्डलदेवते! त्वमलङ्करणमलङ्कारसाधनमसि, अतस्त्वां धारयतो मम भूयो बहुवारमलङ्करणं भूयादिति।

तथा—"वृत्रस्येत्यङ्क्तेऽक्षिणी।" वृत्रस्येत्यादि मन्त्रेणाक्षिणी नेत्रेऽङ्क्ते अञ्जनेन संस्कुर्यादित्यर्थः। मन्त्रो यथा—वृत्रस्यासि कनीनकश्चक्षुर्दा असि चक्षुर्मे देहीति। अस्यार्थः—हे अञ्जन! वृत्रस्य वृत्रनाम्नः सातिशयशक्तिशालिनोऽसुरविशेषस्य कनीनकः कनीनिका अक्षितारका असि भवसि तदुत्पन्नोऽसीति यावत्। अतस्त्वं चक्षुर्दा असि चक्षुर्दायको भवसि तस्मान्मे मह्यं चक्षुर्नेत्रं देहीति।

तथा—

"रोचिष्णुरसीत्यात्मानमादर्शे प्रेक्षते।"

निगदव्याख्यातम्। मन्त्रार्थस्तु-हे आदर्श! त्वं रोचिष्णुः प्रकाशनशीलोऽसीति।

तथा—"छत्रं प्रतिगृह्णाति बृहस्पतेश्छदिरसि पाप्मनो मामन्तर्द्धेहि। तेजसो यशसो मामन्तर्द्धेहि" इति। सुबोधम्। प्रतीत्युपसर्गबलादाचार्येण समर्पितस्तस्यैव दानम्। मन्त्रार्थस्तु-हे छत्र! त्वं बृहस्पतेर्देवगुरोश्छदिर्घर्मादिनिवर्तकोऽसि। तस्मात्पाप्मनः पापान्मामन्तर्द्धेहि व्यवहितं कुरु। यथा मे पापसंबन्धो न भवेत्तथा कुर्विति यावत्। न केवलं पापादपि तु तेजसः सूर्यादितापादिरूपादपि मामन्तर्द्धेहि। किमर्थम्? यशसो यशसे इति।

तथा—"प्रतिष्ठेस्थो विश्वतो मा पातमित्युपानहौ प्रतिमुञ्चते"। प्रतिमुञ्चते परिदध्यात्। मन्त्रार्थस्तु—हे उपानहौ! युवां प्रतिष्ठे स्थितिहेतूस्थः भवथः, अतो विश्वतः सर्वस्मादहिकण्टकादेर्मा मां पातं रक्षतमिति।

तथा—"'विश्वाभ्यो मा नाष्ट्राभ्यस्परिपाहि सर्वत इति वैणवं दण्डमादत्त'। स्पष्टम्। मन्त्रार्थस्तु—हे दण्ड! विश्वाभ्यः सर्वाभ्यो नाष्ट्राभ्यो नाशकारणीभ्यो राक्षससर्पादिप्रजाभ्यो मा मां सर्वतः सर्वास्ववस्थासु परिपाहि सर्वभावेन रक्षेति। नाष्ट्राभ्यस्परीति सत्त्वमार्षमित्यनन्तादयः। हलायुधादयस्तु सविसर्गमेव पठन्ति। शुभकर्मनिर्णये स्मृतिः—

वैण[1] वीं धारयेद्यष्टिमन्तर्वासस्तथोत्तरम्।
यज्ञोपवीतद्वितयं सोदकं च कमण्डलुम्॥
छत्रं चोष्णीषममलं पादयोश्चाप्युपानहौ।
रौक्मे च कुण्डले चैव कृत्तकेशनखो द्विजः॥

अथ पूर्णाहुत्यादिप्राप्तावसरं कर्माचार्योऽनुतिष्ठेत्।

---

१. समावर्तनानन्तरं स्नातको व्रतानि संकल्पयेत्। तानि च स्वसूत्रोक्तानि स्मृत्युक्तानि चेति द्विविधानि। सर्वाण्यपि पुरुषार्थान्येव न तु समावर्तनाङ्गानि। तत्राशक्तः स्वसूत्रोक्तान्येव व्रतानि कुर्यात्। शक्तस्तु स्मृत्युक्तान्यपि। तानि यथा—निमित्तं विना न नक्तं स्नास्यामि। न नग्नः शयिष्ये। न नग्नां स्त्रियमीक्षिष्येऽन्यत्र मैथुनात्। वर्षति न धाविष्ये। न वृक्षमारोहिष्ये। न कूपमवरोहिष्ये। न बाहुभ्यां नदीं तरिष्ये। न प्राणसंशयमभ्यापत्स्ये। इति सूत्रोक्तानि। अथ स्मृत्युक्तानि। नित्यं यज्ञोपवीतद्वयं धारयिष्ये। सोदककमण्डलुं छत्रमुष्णीषं पादुके उपानहौ सुवर्णकुण्डले दर्भमुष्टिं च धारयिष्ये। नित्यमध्ययनरतः

द्विगगनगजचन्द्रैः (१८०२) संमिते शाकवर्षे
तपसि धवलपक्षे चन्द्रवारे दशम्याम्।
सुविदितशकराढीवंशजो ग्रन्थमेतं
बुधजनमहितः श्रीहर्षनाथश्चकार॥
मिथिलान्तर्गतोद्यानग्रामान्तः सारदापुरे।
वसता व्रजनाथस्य तनयेन यशस्विनः॥
श्रीहर्षनाथकृतिना निर्मितोऽयं प्रयत्नतः।
प्रीतये श्रीसरस्वत्या भूयात् संस्कारदीपकः॥

इति श्रीहर्षनाथशर्मविरचिते संस्कारदीपके
समावर्त्तनप्रकाशः॥

। शुभमस्तु।
॥ समाप्तश्चायं ग्रन्थः॥

स्याम्। स्वशरीरादुद्धृतं स्वनिर्माल्यं पुष्पचन्दनादि पुनर्न धारयिष्ये। शुक्लाम्बरधरः स्याम्। सुगन्धिप्रियदर्शनः स्याम्। विभवे सति जीर्णवासा मलवद्वासाश्च न स्याम्। रक्तं वासः शरीरपीडावहं वा वस्त्रं न धारयिष्ये। गुरुं विनान्यैर्धृतं वस्त्रमलङ्कारं स्रजं च न धारयिष्ये। अशक्तौ त्वन्यधृतमपि वस्त्रादि प्रक्षाल्य धारयेत्। अन्यधृतोपवीतमुपानहौ च न धारये। कन्यां न धारयिष्ये। न स्वरूपमुदके निरीक्षिष्ये। न भार्यया साकमेकपात्रे एककाले वाश्नीयाम्। एतद्विवाहभिन्नविषयम्। शूद्राय धर्मज्ञानं नीतिज्ञानं व्रतकल्पं च नोपदिशाम। एतत् साक्षादुपदेशपरम्, "कृत्वा ब्राह्मणमग्रतः" इति ब्राह्मणद्वारकोपदेशे दोषाभावात्। गृहमेधि शूद्राय स्वोच्छिष्टं न दास्ये। शूद्राय होमशेषं न दास्ये। उद्धृतोदकेन तिष्ठन्नाचमनं न करिष्ये, जानुमात्रे तदधिके वा जले तिष्ठदाचमने दोषाभावात्। अशुचिना एक हस्तेन वा आनीतजलैर्नाचमिष्ये। पादेन पादधावनं न करिष्ये। अकल्पां स्त्रियं न गमिष्यामि। न प्रावृतमस्तकोऽहनि पर्यटिष्यामि। रात्रौ मलमूत्रोत्सर्गे च प्रावृतशिराः स्याम्। सोपानत्कोऽशनाभिवादननमस्कारांश्च न करिष्ये। पादेनासनं नापकर्षिष्यामि। एवमन्यान्यपि स्मृत्युक्तानि ज्ञेयानि। एतेषु व्रतेषु यानि कर्तुं शक्नुयात्तावन्त्येव संकल्पयेत्। अत्र संकल्पितव्रतोल्लङ्घने मत्या कृते त्र्यहमभोजनम्। अमत्या कृते एकरात्रमभोजनं प्रायश्चित्तम्। अशक्तस्त्रीनेकं वा विप्रं भोजयेत्। इति स्नातकव्रतानि।

संस्कारदीपकोल्लिखितग्रन्थानां नामानि

अग्निपुराणम् ११७

आदित्यपुराणम् २१, ६८, ११७, १३४, १४६

आदिपुराणम् १६७

आश्वलायनगृह्यम् १५६, २०६

आश्वलायनभाष्यकारः २५०, ६३

आश्वलायनगृह्यपरिशिष्टम् ३८, ४१

उद्वाहतत्त्वम् १००

कर्मकौमुदी ५४, १६०

कर्मप्रदीपः ३६

कल्पतरुः ३, १३, ७६, ७८

काठकगृह्यपरिशिष्टम् २६

कात्यायनश्रौतसूत्रभाष्यम् ३६, ४२

कात्यायनश्रौतसूत्रम् ४०, ४४, ५४

कालादर्शः १४

कालिकापुराणम् ३८

कारिका ३५, ४०, ४२, ४३, ४४, ४७

कूर्मपुराणम् २, ८१, १४१, २८३

कृत्यचिन्तामणिः २१, २३, २५, २८, ११८-११६, १८४, १८६, २१०, २१५, २२२, २२८-२२६, २३१-२३२, २३६-२३७

कोषः २६१

गदाधरभाष्यम् ४७

गरुडपुराणम् ५२

गर्गः २४

गर्गोच्चयः २०६

गर्भोपनिषद् ७६

गुणिसर्वस्वम् २३०

ग्रहयागपद्धतिः ४४, ४५

गृह्यसूत्रम् १२४

गृह्यान्तरम् ४२, ३८, ६०, १२४, १३५, १४६, १५६, १६०, १६२, २४२, २४४

गृह्यकारिका ११, १५६, १५८, १५६, १६२, १६५, १६७, १७२, १७३, १८४ १८६, २०५

गृह्यपरिशिष्टम् ३५, १३४

गृह्यासंग्रहः ३२, ३७-३८, ४०, ४५, ४६, ५६, १२२-१२३, १२६, १३५, १६१

गोभिलगृह्यसूत्रम् ६१

गौडनिबन्धः ६५, १३६, २३५, २५६

छन्दोगपरिशिष्टम् १, १२, १३, १४४, २४५

ज्योतिषम् १८३, १६२, २१५, २३२, २३४, २३६, २४२

ज्योतिर्निबन्धः २०८, २६५

त्रिशङ्कुपाख्यानम् ६४
त्रिस्थलीसेतुः २६५
दाक्षिणात्यनिबन्धः १११
दानरत्नाकरः २४
दानवाक्यावली १११
दानोद्योतः ४
दीपिका २३, २७, २३८
दुर्गादित्यग्रन्थशतकम् ११६
देवीपुराणम् २१, ३६, ३८, ४८,५०, ५४
धर्मकोशः ३६
नरसिंहपुराणम् २३०
नारदस्मृतिः ६८, ६६
नारायणपद्धतिः १६७, २०८, २१०
निर्णयप्रदीपः २३७
पद्मपुराणम् २६४
पराशरभाष्यम् ७८
पराशरमाधवीयम् १६४
परिभाषासूत्रम् १६७
परिशिष्टप्रकाशः १०३
परिशिष्टम् १३७
परिशिष्टान्तरम् ४४,१४७
पितृगीता १४२
पितृभक्तितरङ्गिणी १३
पृथुयशोनिबन्धः २०६
पृथ्वीचन्द्रोदयः १३
प्रयोगपारिजातः २१४, २६५
बह्वृचकारिका २७
बह्वृचपरिशिष्टम् ३
बृहद्दक्षोच्चयः २०, २२
ब्रह्मपुराणम् ६, ११, १२, १४, १५, ४७, ४८, ६८, ७३, १००, १४५, १४७, १६६, १६६, २२४, २५५
भट्टभाष्यम् ५३, २०५
भविष्यपुराणम् ४, १८, ६१, ७८, ८६, ६०, ६१, १०५, १३६, १४०, २०५, २५२, २५८
भविष्योत्तरम् १४१
भारतम् ६७
भुजबलभीमः २३, १२१, २१०, २१६
मत्स्यपुराणम् ५, १५, १६, ४६, ५२, ६१ ८२, १४१, १४३, २३०, २३१
मत्स्यसूक्तम् ८३, ८४
मदनरत्नम् १४, १८६, २०५, २०८
महादाननिर्णयः २४, ११३, ११४, १४६
मार्कण्डेयपुराणम् ६, १८, ८४, २०४
मिताक्षरा ७२, ७७, १०६, १८६
मुहूर्त्तचिन्तामणिः २२६
मुहूर्त्तदीपिका १८७
यज्ञपार्श्वसंग्रहः ३८, ३६, ४२, ४३, ४४, ७८
रत्नकलापः ११८
रत्नकोशः १८६
रत्नशतकम् २८, ११६
रत्नाकरः ७२, ७३, ७६, ७८, ८२, ८३, ६४, १००, १०२, १०३ १११
रत्नावली २०, २२

रत्नमाला २२, १६६, २१४, २३८
राजमार्त्तण्डः २१, २२, २३, ६५, ११७, ११८, १२१, २१५, २३०, २३७, २३८, २३६
रामदत्तपद्धतिः २६६
रामायणम् ११३
रूपनारायणपद्धतिः १५७
रूपनारायणपारिजातः १४
लाट्यायनसूत्रम् १४६
लिङ्गपुराणम् १, १४१ १४२
वराहपुराणम् १६६
वराहसंहिता १२०
वामनपुराणम् ७८, १८३
वामनभाष्यम् ३४, ५६
वायुपुराणम् ६, ३४, ५६, १४५
विद्याधरीविलासः १२०,
विधानपारिजातः १६६
विधिदर्पणम् १६७
विधिरत्नम् २०६,
विवाहपटलम् ११६, १२०
विश्वरूपनिबन्धः ८०
विष्णुधर्मोत्तरम् ५२, १११, ११२, ११७, १४२, १४४, १४७, १८६, १६६
विष्णुपुराणम् ११, १४, ८८, ८६, १४१, १८१, १८२, १८३, १६५, २३३
विष्णुस्मृतिः १३
व्यवहारसमुच्चयः २५, २८, १८८, २०८, २१० २२१, २३७
शान्तिदीपिका ३८
शाबरभाष्यम् १३४, १४२
श्राद्धकल्पः १३,
श्राद्धविवेकः ८
श्रीधरसमुच्चयः २५
श्रीपतिनिबन्धः २८
श्रीपतिरत्नमाला ११८
श्रीपतिसमुच्चयः २५, २८, १२१
श्रुतिः ३६, ५५, ६१, ६४, ६६, ६७, ७६, १३३, १५३, १५५, १६६, २०१, २०५, २५०, २५१, २६१
श्रौतसूत्रम् ४५
षट्त्रिंशन्मतम् २२४
संख्यापरिमाणम् २६
संग्रहकारिका ४२
सांख्यायनसूत्रम् ४१
साम्बपुराणम् १२३
सुधाकरनिबन्धः १६१
सोमशेखरनिबन्धः १६, २१, ११६, १८३
स्कन्दपुराणम् ५३, ८७, १४६
स्मृतिकौमुदी २८
स्मृतिचन्द्रिका ८२, १७५, १७७
स्मृतिरत्नम् १७६
स्मृतिसमुच्चयः २३८
स्मृतिसारः ८५, ८६
स्मृतिसुधाकरः ४४
स्मृतिसंग्रहः १६७
स्मृत्यर्थसारः ४६, ४७
स्मृत्यालोकः ७६, १७१, २३३
हिरण्यकेशीसूत्रम् १६६
हेमाद्रिः १३, १६७

संस्कारदीपकोल्लिखितग्रन्थकाराणां नामानि

अङ्गिराः ३४, ३६, ४६, ५६, ६७, १०५, १०६, १२७, १४१, २५८।

अत्रिः १०५, १०६

आपस्तम्बः ४४, ७५, ७६, ८५, १४२, १४४, १७७, १८२, १८३, २२६, २२८।

आशादित्यः ४, १०, ५०

आश्वलायनः ११, १६, ५५, ५६, ६६, ७३, ७६, ८६, ६४, ६६, १२०, १२४, १४३, १४६, १५५, १६२, १८७, २१७, २२८, २५०, २६४।

उशनाः १०३, १७८

ऋष्यशृङ्गः ११५, १४३।

कर्कः १२६

कल्पतरुकारः ६

कश्यपः ३१, ६३, ६७, ७५, ७८, ६५, १०६, १०६, १३५, १४०, १८६।

कात्यायनः १, ३, ४, ५, ६, ७, ६, १०, १२, १३, १५, १८, १६, ३२, ३५, ३६, ३७, ३८, ३६, ४०, ४१, ४२, ४३, ४४, ४६, ४७, ४८, ५०, ५३, ५४, ५६, ५६, ६०, ६६, ८८, १०१, १०६, ११०, १११, ११४, ११६, १२६, १२५, १३८, १४३, १४७, १४६, १६२, १६६, २२७, २४६, २५५।

कुल्लूकभट्टः ८१

कौडिन्यः १८६

कौमुदीकृत् ८४

क्रतुः ६६

गदाधरः ५५, १२६

गर्गः २६, ८२, १७५, १६७, २१५, २२१, २३०

गालवः २५, १८७

गोभिलः ३३, ३७, ४०, ४७, १७६, २०५, २०७, २१७, २२५, २४६, २६०

गौडाः २४, ८३

गौतमः ३०, ८१, १०२, १४४, १७६, १८३, २२४, २५५, २६१, २६४

चण्डेश्वरः २२८

जमदग्निः २५७

जातूकर्ण्यः २४५

जैमिनिः १६६

तडागलताकृत् १४५

दक्षः ७८, १११, ११३, ११४, १७७, २२४, २५६

दाक्षिणात्याः ८५

देवनाथठक्कुरः २५, ८०, ८६, ८७

देवलः ३१, ७२, ७६, ७८, १००, १०१, ११४, ११८, १४०, १४६, १७६, १७८, १८४, १८८, १६१, १६६, २२३, २२५
धर्मकरः ३६
नन्दः २०
नव्यवर्द्धमानः २५
नारदः ६४, ६८, ६६, ७२, ७६, ८८, ६७, ६६, १०४, १०५, १०८, ११०, १११, ११८, १२१, १३८, १७५, २२०, २२६, २३८, २४१ ।
नारायणः ४७
नारायणभट्टः ३८
पराशरः १७, ६७, ११६, १७७, २६४, २६५ ।
पशुपतिः ३६, ११२
पाणिनिः ६३
पारस्करः ६, १०, १२, ३३, ५४, ५६, ११८, १२०, १२१, १३०, १३२, १३५, १३७, १४७, १५० १५३, १५५, १५७, १५६, १६१, १६३, १६८, १७१, १७३, १७५, १८०, १८४, १८५, १८८, १६५, १६७, १६६, २००, २०३, २०५, २१२, २१४, २१६, २२२, २२५, २२७, २४१, २४३, २४८, २६२, २६७, २७६
पैठीनसिः ७२, ७६, ८२, ८३, ८७, ६८, १०५, १८२
पौलस्त्यः २२६, २४१
प्रजापतिः १६१
प्रदीपकृत् ८
बादरायणः २३, २४०
बृहस्पतिः २६, ७०, १०६, ११५, ११६, ११७, १७६, १८६, १६०, १६७ २५६
बौधायनः ४६, ६६, ६७, ६६, ७२, ७३, १०४, १०६, १०७, २६४
भागुरिः २०८
भारद्वाजः ३२
भोजराजः २५, २७, २८, ११६, १२०, २०६, २१४, २१५
मदनसिंहः १२७
मधुसूदनठक्कुरः ८२
मनुः ६, १६, ३०, ३२, ४६, ६२, ६४, ६६, ७१, ७३-७७, ७६, ८२, ८६, ८८, ६६-१०४, १०७, ११०, ११६, १२२, १३६, १४५, १४६, १५८, १७६, १८०, १८२, २०७, २१४, २२४, २२६, २४५, २५५, २५६, २६१, २६४, २६८
मरीचिः ४७
महेशठक्कुरः ८५
माण्डव्यः २२२, २२६, २४०
मार्कण्डेयः २१२
मुरारिमिश्रः २५, ३२, ४५, ५१, ८२, ८३, १०२

मेघातिथिः २२०
यमः २५, ३२, ७२, ७७, ६७, ६८, १०८, १४१, १८१, २४२, २५६, २[illegible]८, २६१, २६३
याज्ञवल्क्यः ३१, ३२, ४७, ४६, ५२, ५३, ५७, ७२, ७४, ७८, ८२, ६६, ६८, १०३, १०४, १०८, १०६, ११३, ११५, ११७, १२३, १३२, १३७, १५८, १८३, १८६, २२५, २२७, २३५, २४२, २४५, २५१, २५२, २५५, २५८, २६३
यास्कः १५८
रघुनन्दनः ३६, ८१, ८३
रत्नाकरकृत् ८३, ८४
रामदत्तः ३६, ४४, १२४, १२६, १२७, १२६
रामाचार्यः २४१
रुद्रधरः ६, ८
रेणुः १६३, २०३
रेणुकः ३७, ४२, ४३, ४७, ५५, ५६, ६०, १६१, २४४
लक्ष्मीधरः ७३
लघुहारीतः ६, १७, ४८, ६६, ७०
लल्लः २४६
लौगाक्षिः २५०
वराहः १८४, १८५, २३६
वर्द्धमानोपाध्यायः ८, ८०, १२४, १२६
वशिष्ठः ६५, ६६, ६७, ७७, १०२, १०३, १०४, १०८, १२१, १४१, १७६, १७७, १८२, १८७, २२१, २२४, २२८, २३२, २५५, २६१
वाचस्पतिः ७६
वामदेवोपाध्यायः १६
विज्ञानेश्वरः ८६, ८७
विष्णुः १३, २६, ७४, ७६, ६६, १०७ ११४, १३७, १८२, २२६, २५६
वृद्धगर्गः २२८, २२६, २३१, २३५
वृद्धगार्ग्यः २१६
वृद्धमनुः २६५, २७१
वृद्धयाज्ञवल्क्यः ११२
वृद्धवशिष्ठः १४४
वृद्धशातातपः ७६, ८८, १८२, १८३, २२४
वैजवापः २०४
व्यासः २७, ८३, ८६, ६७, ११४, ११६, ११८, ११६, १२०, १२१, १४४, १४६, १८०, १८१, १८८, १६६, २०६, २२१, २३०, २३१, २४०, २५८
शङ्खः १३, ८१, १४३, १६६, २१०
शङ्खलिखितौ १३५, १४६, १८०, २०७, २१४, २४१
शाङ्खायनः २५५
शाट्यायनः ३४
शातातपः २, ५, १६, १७, ६८, ६८, १०१, १०२, २५०, २५६, २६४

शौनकः ३४, ३६, ४१, ५३, ६१, १६२, १६६, १७०, २२८, २५८
श्रीकीर्त्तिः २२२
श्रीदत्तः ६७८
श्रीधरः १८४
श्रीपतिः १६७
सत्यः २६, २७, २४०
संवर्त्तः ७३, ७७, १०६, १४०, १६६
साङ्खायनः ३४, ३८, ३६, ५६
सुमन्तुः ३०, ८३
स्मृतिसारकृत् ११
हरिशर्मा ३६, ५५
हरिहरः १२३, १२६, १२७, १२६
हलायुधः ८३, २४५
हारीतः ४८, ७२, ७४, ७६, १००, १०२, ११६, १५६, १६१, २३३।

संस्कारदीपके

प्रमाणवचनानामक्षरानुक्रमणी

अ			
अकृत्वा मातृकायागं	२	अङ्गुष्ठपर्ववृत्तास्यः	४४
अक्षारालवणौ भवेताम्	१६६	अङ्गुष्ठस्योत्तरतो रेखा	४८
अक्षौरिमेऽपि कर्त्तव्यं	२१६	अच्छिन्ननाड्यां यद्दत्तं	१६६
अगम्भीरैरसंश्लिष्ट	६२	अच्छिन्नाग्रे अनन्तर्गर्भे	४१
अग्निः सोमस्तथा सूर्यः	५२	अजाकर्णेन विदुषां	२५६
अग्निना चैव मन्त्रेण	४५	अजिनं मेखला दण्डः	२६५
अग्निमभिमुखः	३७	अज्येष्ठकन्यका यत्र	११६
अग्निरैतु प्रथमः	१५३	अज्ञातदोषैणोढा या	६२
अग्निशिष्टादिशुश्रूषां	११४	अज्ञातश्च द्विजः	६६
अग्निष्टोमातिरात्राणां	१४०	अज्ञानसन्तति	१
अग्निस्तु नामधेयादौ	३६	अज्ञानात्प्राश्य विण्मूत्रं	२६४
अग्नौकरणमर्घं च	१४	अञ्जनाभ्यञ्जने स्नानं	१७७
अग्नौ प्रास्ताहुतिः सम्यक्	१२६	अत ऊर्ध्वं त्रिरात्रौ तौ	१६६
अग्न्यम्बुशून्ये च तथा	२०४	अत ऊर्ध्वं पतन्त्येते	३१
अग्न्याधेयमपाकयज्ञा	१२२	अत ऊर्ध्वं पतन्त्येते	२२७
अग्रजोऽस्य यदानग्निः	१०३	अत ऊर्ध्वं पतितसावित्रीकाः	२२७
अग्रेणाग्निं परीत्य	३७	अत ऊर्ध्वमक्षारलवणाशी	२६४
अङ्गमुखेन प्रधानविधानात् (टि०)	१५	अतः परं प्रवक्ष्यामि	८
अङ्गवङ्गकलिङ्गांश्च	२१४	अतः परं समावृत्तः	६२
अङ्गान्यालभ्य जपयति	२५४	अतिप्रौढा च या कन्या	१२१
अङ्गारभस्मास्थिकपाल-	१८५	अतीचारगते जीवे	२३
अङ्गुलस्य प्रमाणं तु	३५	अतीचारगते जीवे	२३
अङ्गुल्यः संहता वृत्ताः	८६	अतीचारगते जीवे	२४
		अतीचारगतो जीवः	२३

अतो द्रव्यविनाशादौ	१७३	अथास्यै दक्षिणं हस्तं	१५७
अत्यन्तकुञ्चितै रूक्षैः	६२	अथास्यै दक्षिणांसं	१०५
अत्यन्तपिङ्गला नारी	६३	अथास्यै दक्षिणांसं	१७३
अत्युच्चमतिह्रस्वं च	६७	अथास्यै सावित्रीमन्वाह	२४६
अत्र भिक्षाचर्यचरणं	२५७	अथाह वीणागाथिनौ	१६३
अत्र समिदाधानं	२५२	अथैनं वासः परिधापयति	१३५
अथ कर्णवेधः	२२१	अथैनां वासः परिधापयति	२४३
अथ खलूच्चावचजनपदधर्मः	७३	अथैनं भूतेभ्यः परिददाति	२४८
अथ गाथां गायति	१५६	अथैनं संशास्ति	२४६
अथ दिवसत्रयमध्ये	२८	अथैनमभिमृशति	२०१
अथ परिक्रामतः	१६०	अथैनमभिमृशति	२०१
अथ पश्चात्त्र्यायुषं	२१८	अथैनमाह	२४८
अथ पुंसवनं	१८८	अथैनां मूर्द्धन्यभिषिञ्चति	१६४
अथ पूर्णाहुतिं दद्यात्	६१	अथैनां सूर्यमुदीक्षयति	१६५
अथ प्रवृत्तिरागच्छेत्	११०	अथैनां स्थालीपाकं प्राशयति	१०३
अथ भिन्द्यात्	२२३	अथैनामभिमन्त्रयते	१६५
अथ यद्युत्सिसृक्षेत्	१३३	अथैनामश्मानमारोहयति	१५६
अथवा द्वादशाहानि	१६६	अथैनामुदीचीं सप्तपदानि	१६३
अथ सीमन्तोन्नयनं	१६१	अथैनौ समञ्जयति	१३७
अथ हविर्निक्षिपति	४२	अथैनौ समीक्षयति	१४८
अथात्र नवनीतपिण्डं	२१७	अथोत्तरतो येन भूरिः	२१६
अथावबध्नीते	२७५	अथोत्तरीयं	२७४
अथावरापतनं	१६५	अदः पदं हि यद्रूपं	२५५
अथास्य दक्षिणं हस्तं	२४८	अदीयमाना भर्त्तारं	१०७
अथास्य मातरं	२०१	अद्भिरेव द्विजाग्र्याणां	१४५
अथास्य मातरमभिमन्त्रयते	२०१	अद्भिर्वाचा च दत्तायां	६६
अथास्यायुष्यं करोति	१६७	अधःशय्यश्चारालवणाशी	२६०
अथास्यै दक्षिणं स्तनं	२०१	अधना स्त्री कृशग्रीवा	६१

अधिविन्ना तु भर्त्तव्या	१०४	अन्नपर्याय वा	२१२
अधिविन्ना तु या नारी	१०४	अन्नप्राशनकाले वा	२०८
अघौतं काकघौतं च	१४६	अन्नस्य प्राशनं कार्यं	२१०
अनड्वहां सहस्राणां	१४०	अन्यत्रापि तृणार्थे	४०
अनध्याये ऽपि कुर्वीत	२३०	अन्यथा दोषमाप्नोति	१६६
अनन्तर्गर्भिणं	४१	अन्यदत्ता तु	६७
अनन्यपूर्विकां कान्तां	८२	अन्यस्त्रिः प्राह	१२४
अनभ्यासेन वेदानां	१२८	अन्ये वाऽयुक्तत्वात्	४०
अनयोर्देवताग्निः स्यात्	२०३	अन्यो भ्रातुरभावे स्यात्	१५६
अनवाप्तरजा गौरी	१०५	अन्वष्टकासु वृद्धौ च	६
अनाथां कन्यकां दत्वा	१४२	अन्वारब्ध आघाराज्यभागौ	५४
अनादिदेवतां दृष्ट्वा	२२	अन्वारब्ध आज्याहुतीः	२१६
अनामाङ्गुष्ठसंयोगेन	३५	अन्वारब्ध आज्याहुतीर्हुत्वा	२४६
अनामिकया सुवर्णान्तर्हितया	१६७	अन्वारम्भो भवेत्तेषु	५६
अनामिकाङ्गुष्ठेन	१२६	अपः कृत्वा ताभ्याम्	४१
अनाश्रमी न तिष्ठेत्तु	७८	अपः कृत्वा प्रणीताभिः	४१
अनिन्दितैः स्त्रीविवाहैः	७२	अपः प्रणयति	३८
अनिवर्त्ती यथा योनौ	१०६	अपस्मारिकुलं चैव	६७
अनुकूलामवाग्दुष्टां	१०४	अपिङ्गाक्षीमकपिलां	८७
अनुगुप्तमेतं सकेशं	२१६	अपि च काठके प्रवचने	१८२
अनुज्ञात उत्तरेणाहवनीयं	३८	अपीनहस्तपादां च	८६
अनुपृष्ठं पतिः परिक्रम्य	१५६	अप्रजायां तु कन्यायां	११७
अनुप्रविश्य जातभूतं	२०४	अप्रत्तानां तथा स्त्रीणां	८१
अनुराधोत्तराषाढा	२२१	अप्रत्तानां स्त्रीणां	८१
अनेकेभ्योऽपि दत्तायां	१०६	अप्रत्याख्यानियमग्रे	२५८
अनेन नारीवृत्तेन	११६	अप्राप्तरजसा गौरी	१०५
अन्तर्वेदीं समानीय	७३	अभयं सर्वदैवत्यम्	१४४
अन्तेवास्यर्थीस्तदर्थेषु	१४२	अभिगम्य परं नारी	६७

अभिवादनशीलस्य	२५७	अवशिष्टान् वधू लाजान्	१६२
अभिवादे तु यो विप्रः	२५६	अविज्ञातसुरा मन्त्राः	५३
अभिशिरोग्रा निदधाति	२१७	अवेक्षिता गृहे रुद्धाः	११३
अमन्त्रिका तु कार्येयं	३२	अव्यङ्गाङ्गीं सौम्यनाम्नीं	८७
अमा रिक्ताष्टमी षष्ठी	१७५	अशिष्यन्नाचामेत्	२४६
अमावास्यासु रिक्तायां	१२०	अशौचे तु समुत्पन्ने	१६७
अमेध्यसेविनी बन्ध्या	३४	अश्वपृष्ठेन सदृशः	६०
अयने विषुवे चैव	२३०	अश्वयुक् शुक्लनवमी	२३०
अयुग्दान्तं स्त्रीणां	२०७	अश्विनीमृगचित्रा च	२३७
अयुग्मे दुर्भगा नारी	११७	अश्विनीरेवतीपूर्व	२२१
अयुजाक्षरं	२०६	अष्टचत्वारिंशदब्दं	७८
अरिक्तायां तिथौ शुक्ले	१८८	अष्टमी द्वादशी षष्ठी	२०८
अरिष्टे त्रिविधोत्पाते	२७	अष्टमी हन्त्युपाध्यायं	२२६
अर्केन्दुकालाशुद्धौ च	२१५	अष्टम्या सप्तमीविद्धा	२३१
अर्घ्यशाखया मधुपर्कः	१३४	अष्टम्यां स्यादथाल्पायुः	२२६
अर्थलोपेन तद्बाधः	१३४	अष्टवर्षं ब्राह्मणं	२२५
अर्थस्य संग्रहे चैनां	११३	अष्टवर्षा भवेद् गौरी	१४१
अर्द्धश्मृतं चरुं ज्ञात्वा	४४	अष्टाचत्वारिंशत्	२६०
अर्द्धेन्दुप्रतिमा भोगाः	६२	अष्टादशेऽह्नि च तथा	२०५
अलङ्करणमसि	२७५	अष्टौ दश द्वादशवर्षाणि	१०२
अलङ्कारं नाददीत	१०७	अष्टौ पिण्डान् कृत्वा	६४
अलभ्यमाने सदृशे	१०७	अष्टौ वर्षाण्युदीक्षेत्	६८
अलाभे कन्यकायाश्च	६८	अष्टौ विवाहा ब्राह्मणानां	७२
अलाभे चैव कन्यायाः	७६	असञ्चरः प्रणीताग्न्योः	४२
अलाभे पुरुषाणां च	११३	असपिण्डा च या मातुः	७६
अल्पप्रणीतो विच्छिन्नः	३६	असमानप्रवरैर्विवाहः	८१
अवक्रमुल्बणं पृष्ठं	६०	असमानार्षेयीं कन्यां	८२
अवनेजनवत्पिण्डान्	१०	असम्बद्धा भवेद्या तु	८२

असमानार्षयीं कन्यां	८७	आजं गव्यं वा	२६१
असम्बद्धा भवेद्या तु	८२	आज्ञासंपादिनीं दक्षां	१०४
असावहं भोः	२५५	आज्यं द्रव्यमनादेशे	५१
असाविति नाम	१७४	आज्यमधिश्रयत्यन्ये	४२
असौ नामाहमस्मीति	२५५	आज्यस्थाली तु कर्त्तव्या	४३
अस्तंगतस्य सौम्यस्य	२३८	आज्यस्थाल्याः प्रमाणं तु	४२
अस्तंगते भृगुसुते	२२	आज्यस्योत्पवनं	४१
अस्तं प्रयाते च	२२	आतुरे स्नान उत्पन्ने	१७
अस्तमिते ध्रुवं दर्शयति	१६५	आत्मनाम गुरोर्नाम	२५५
अस्तमिते भृगुपुत्रे	२१	आदर्शे नैव वीक्षेत	२६३
अस्ते शुक्रघनुर्मीने	२०	आदाय गेहान्निःष्क्रम्य	२०८
अस्थिभिस्ते	७६	आदित्यतिष्यश्रवणश्रविष्ठाः	२०६
अस्वतन्त्राः स्त्रियः	११२	आद्यां शारदकान्तिचन्द्रवदनां	१
अहतं यन्त्रनिर्मुक्तं	१३५	आद्येऽब्दे कुर्वते केचित्	२१४
अहतं वासो धौतं वा	२७४	आद्याविंशाद्राजन्यस्य	२२७
अहतेन वसनेन पतिः	१३५	आधाने होमयोश्चैव	१६
अहमस्मै ददानीति	१४४	आनीयाग्निसमीपं वा	२६६
अहिंसन्नरण्यात्	२५६	आपो हिष्ठेति	२७२
आग्नेयो वै ब्राह्मणः	२५१	आभ्युदयिके प्रदक्षिणमुपचारः	१०
आघारावाज्यभागाविष्ट्वा	२६७	आभ्युदयिके युग्मा ब्राह्मणाः	११
आघारौ नासिके ज्ञेयौ	५६	आमन्त्रिते स्वरोऽन्त्यः	२५५
आचम्य प्राणान्	१३०	आयुष्मान् भव सौम्येति	२५५
आचान्तोदकाय शासमादाय	१३२	आयुष्याणि च शान्त्यर्थं	५
आचामत्यामागन्	१२७	आरम्भणीया न्यायः (टिप्पणी)	३१
आचार्य ऋत्विक्	१२२	आरम्भानन्तरं यत्र	२३१
आचार्याय भैक्षं निवेदयित्वा	२५८	आरम्भो वरणं यज्ञे	२६
आचार्याय वरं ददाति	२२०	आरभ्य दिशमाग्नेयीं	५५
आच्छाद्य चार्चयित्वा तु	७३	आर्त्तवाभिप्लुता नारी	१७७

आर्त्तार्त्ते मुदिता	११६	उत्करं गृह्य रेखाभ्यः	३५
आर्द्राद्ये भक्तुष्टये	१२०	उत्कृष्टायाभिरूपाय	६७
आर्षस्तथैव दैवश्च	७२	उत्कृष्टायाभिरूपाय	१३६
आर्षे गोमिथुनादानं	७६	उत्तमः श्रोत्रियागारात्	३६
आवपत्यखिलांल्लाजान्	१६२	उत्तरतः	४४
आवपनहोमतर्पणानि	४८	उत्तरत इति	४२
आवपनहोमतर्पणानि	१५६	उत्तरतोऽग्नेर्दर्भेषु निधाय	३८
आषाढे धनधान्य	११८	उत्तरत्रितययाम्यरोहिणी	२१५
आषोडशाद्वर्षात्	२२६	उत्तरमाग्नेयं दक्षिणं	५६
आषोडशाद्वार्विंशाच्च	२२७	उत्तरवर्त्मनि सवितरि	२१५
आसनमाहार्याहं	१२२	उत्तरे आग्नेयं	५६
आसने शयने दाने	१११	उत्तानेन तु हस्तेन	३५
आसीन ऊर्ध्वः प्रह्वो वा	५३	उत्तिष्ठन् समिधः सर्वत्र	४६
आसीन ऊर्ध्वः प्रह्वो वा	१२५	उत्पातदर्शने कर्म	२७
आसुरो द्रविणादानात्	७५	उत्सवानन्दसन्ताने	१५
आहरन्ति विष्टरं	१२३	उत्साद्य पुनः स्नात्वा	२७४
इच्छयान्योन्यसंयोगः	७६	उदकस्पर्शिता या च	६५
इतरयोश्चोन्दनादि	२१८	उदक्यां सूतिकां नारीं	२५६
इतरेष्ववशिष्टेषु	७७	उदगग्रे विष्टरे	१२४
इत्याशङ्क्य द्वयोर्मध्ये	२२२	उदगयन आपूर्यमाणपक्षे	११८
इत्युक्त्वा चरतीं धर्मं	७४	उदगयन आपूर्यमाणपक्षे	२२८
इत्येतत्कश्यपमतं	७८	उदञ्चं विष्टरं	१२४
इत्येताः कश्यपेनोक्ताः	६७	उदन्वतोऽम्भसि स्नानं	१८६
इत्येताः कश्यपेनोक्ताः	६५	उदपात्रं शिरस्तो निदधाति	२०२
इन्द्रेण वज्राभिहतः	३४	उदुत्तममिति मेखलां	२७२
ईषदापाण्डुगण्डा ये	६२	उद्वहेत्पितृमात्रोस्तु	८४
उक्ते नवांशके वापि	२१०	उद्वहेद्वयसा न्यूनां	८२
उच्चैर्ऋचा क्रियते	३१३	उद्वहेत्सप्तमादूर्ध्वं	८५

उन्मत्तः पतितः क्रूरः	६७	ऋतौ तु गर्भशङ्कित्वात्	१८२
उन्मत्ती किल्विषी कुष्ठी	१०२	ऋतौ नोपैति यो भार्यां	१७६
उपनयनं गोदानं	२०	एकं गोमिथुनं	७४
उपनीय गुरुः शिष्यं	२६७	एकं चेत् पूर्वस्य	२७४
उपनीय तु यः शिष्यं	१२२	एकं प्राशनान्ते	१५५
उपयमनं नाम	६३	एकः कर्मनियुक्तः स्यात्	३७
उपलिप्त उद्धतावोक्षिते	१३५	एक एव पतिर्नार्याः	६७
उपसंगृह्य गुरुं	२६६	एकत्वमागता यस्मात्	७६
उपाद्यमः स्वकरणे	६३	एकदेशमुपाध्यायः	२४२
उभयकालमग्निं	२६०	एकद्रव्ये कर्मावृत्तौ	५
उभयस्यापि पक्षस्य	२१	एकयानसमारोहे	१६६
उल्कापाते च निर्घाते	२७	एकरात्रं परित्यज्य	२७
उल्कापाते त्रितयं	२७	एकादशवर्षं राजन्यं	२२५
उल्मुकं निरस्य	४४	एकादशी द्वितीया च	११६
उष्णीषेण शिरो वेष्टयते	२७५	एकादशे द्वादशे वा	२०५
ऊढायाः पुनरुद्वाहं	६८	एकादश्यामधर्म्या स्त्री	१८०
ऊर्ध्वं तु त्रिवृतं कार्यं	२४६	एकैकदिनं त्याज्यं	२८
ऊष्ट्रामानुषके	२६४	एतत्खाट्कौशिकं शरीरं	७६
ऋग्वेदाधिपतिर्जीवः	२३८	एतदेव त्रिरुच्चार्य	१४३
ऋजवस्ते तु सर्वे स्युः	२६३	एतदेव पुरा गर्भं	१६०
ऋतावभिगमः शस्तः	१८३	एतदेव व्रतादेशनविसर्गेषु	२६७
ऋतावुपेयात्सर्वत्र	१७६	एतन्नित्यं सर्वत्र	५६
ऋतुः स्वाभाविकः स्त्रीणां	१७६	एतान् सशुल्कान् सामान्यान्	७२
ऋतुकालाभिगमनं	१७६	एतानि लोकगुप्त्यर्थं	१३४
ऋतुकालाभिगामी स्यात्	१८१	एतान्येव तु कर्माणि	१४५
ऋतुत्रयमपाकृष्य	१०७	एतेनैव कल्पेन छत्रं	३७
ऋतुपुंसवने दैवात्	१८४	एते विवाहाश्चत्वारः	७२
ऋतुस्नातां तु यो भार्यां	१७७	एतैरेव गुणैर्युक्तः	६

एभ्यः पूर्वतरा ये च	१२	कन्यया सह दत्तं हि	१४०
एवं गच्छन् स्त्रियं त्वामां	१८३	कन्यां चैवानपत्यानां	१४१
एवं द्वितीयां	२५३	कन्यां वरयमाणानां	१४३
एवं द्विरपरं	२१८	कन्यां वरयमाणानां	१२३
एवं द्विरपरं कर्म	१६१	कन्या ऋतुं समावेक्ष्य	१०५
एवं द्विरपरं लाजादि	१६१	कन्यादोषेऽप्ययं धर्मः	११०
एवं लक्षणसंयुक्तं	५४	कन्यादोषेऽफलं दानं	११०
एवमाधारयेदेतौ	५५	कन्या द्वादशवर्षाणि	१०८
एवमुक्तप्रकारेण	८०	कन्यानामसवर्णानां	१३४
एवमेव द्विजैर्जातौ	२६६	कन्यापुत्रविवाहेषु	१४
एष धर्मः समाख्यातः	७७	कन्यामलङ्कृतां	१४१
एषां चत्वारो पूर्वे	७२	कन्यामनुधनादाने	७६
एषां तु धर्म्याश्चत्वारः	७२	कन्यामिथुनमीनेषु	२२२
एषा त इति वा	२५३	कन्यायां दत्तशुल्कायां	११०
एषामेकतमेनोढं	७२	कन्यायां प्राप्तशुल्कायां	१०६
ऐणेयमजिनम्	२६१	कन्यालिमीनसिंहेषु	१८८
ऐणेयमैष्या	२६१	कन्यावृश्चिकमेषेषु	२४
ऐशान्यामाहरेद्भस्म	६२	करालो धूमिनी श्वेता	४६
ओंकारमुच्चरन् प्राज्ञः	१४६	करालो रक्षांस्यश्नन्ति	४६
ओं भुर्भुवस्वरित्युक्त्वा	२५०	करालैरतिनिर्मांसैः	८६
ओजे संवत्सरे प्राहुः	२२१	करिकुलवैरिणि घनवान्	२३८
ओमिति वा	१४६	करे गृह्य तथा कन्यां	१४७
औदुम्बरो वैश्यस्य	२६२	कर्णवेधव्रतं कुर्यात्	२२१
कटुतीक्ष्णकषायाणि	१८६	कर्णवेधं रविच्छाया	२२३
कण्डनं पेषणं चैव	३४	कर्मण्यथाभ्युदयिके	१४
कनिष्ठाङ्गुलिमानेन	५२	कर्मनाशाजलस्पर्शात्	२६५
कनिष्ठादेशिन्यङ्गुष्ठ	४७	कर्मस्वनधिकाराच्च	२६६
कनिष्ठायाः पश्चात्	१६५	कर्मादिषु च सर्वेषु	१

कर्मावृत्तौ तु मन्त्रस्य	१२६	कूपारामप्रपाकारी	१४१
कर्मावृत्तौ तु मन्त्रस्य	१२६	कृतप्राशनमुत्सङ्गात्	२१३
कपालैर्भिन्नपात्रैर्वा	३६	कृताकृतावेक्षणार्थं	३७
कामं तु याज्ञिकस्य	२६६	कृते विवाहे वर्षं तु	१६६
काममामरणात्तिष्ठेत्	६७	कृतोत्तरीयको नित्यं	१४७
कामोद्देशेन कर्मैव	१४२	कृत्तिकास्थं रविं त्यक्त्वा	११६
कांस्यवानस्पत्यमार्त्तिकैः	३६	कृत्वा पवित्रे आसिच्य	४१
कार्पासमुपवीतं स्यात्	२४५	कृत्स्नं हि जाया	६६
कालाग्निरूपमास्थाय	२५२	कृत्वा प्रदक्षिणं गेहं	२०८
काष्णैरौरववास्तानि	२ १	कृष्णपक्षे द्वितीयायां	२३०
कीटिका विविधाः सन्ति	३४	कृष्णादिमत्रिकलवेऽपि	२२६
कुड्यलग्नां वसोर्धारां	४	कृष्णार्चिषि सुदुर्गन्धे	४८
कुञ्जमद्रोणिकं पृष्ठं	६२	कृष्णे बलवती तारा	१२०
कुमारप्रसवे	१६६	केन्द्रत्रिकोणगाः सौम्याः	२०६
कुमारस्य मधुरं	२२२	केन्द्रत्रिकोणनिधनव्यय	१८६
कुमार्या भ्राता	१५५	केशवमानर्त्तपुरं	२१०
कुर्यान्निष्क्रमणं शिशोः	२०६	केशसंस्कारकवरी	१८६
कुलदेवनक्षत्रादिसम्बद्धं	२०७	केशान्तिको ब्राह्मणस्य	२६२
कुलमग्रे परीक्षेत	६६	कोमलं मांसलं चापि	६१
कुलर्त्विजमधीयानं	६०	क्रियां यः कुरुते मोहात्	१२३
कुलालचक्रघटितं	४३	क्रीता द्रव्येण या नारी	७५
कुलीरवृषचापान्त्य	१७५	क्लीबे देशान्तरगते	१०१
कुलोत्पन्नां जाताचारां	८३	क्षत्रविट्शूद्रकन्यासु	१००
कुशकण्टकसोमांशुं	१६०	क्षत्रियस्यानुपूर्व्येण	६८
कुशैः संमार्ज्जयेद् भूमिं	३२	क्षत्रियस्यापि कथिता	७८
कुशैराच्छादिता अपः	३८	क्षत्रिया षट् समाः	६८
कुशौ समावप्रशीर्णौ	४०	क्षुत्त्रिट्क्रोधत्वरायुक्तः	४८
कूपारामतडागेषु	२१	क्षौरं शवानुगमनं	१८७

खञ्जवामनकुब्जेषु	१०१	गृहस्थो विनीतक्रोधः	७७
खादिरं तु स्रुवं विद्यात्	४४	गृह्याभ्यन्तरतस्तत्स्यात्	१७२
खादिरं स्फ्यं प्रकल्प्य	३४	गृह्णन् शुल्कञ्च लोभेन	७५
खादिरो हस्तमात्रः	४४	गृह्योक्तकर्मणा येन	२२५
गणशः क्रियमाणेषु	१६	गोत्रनामनी प्रोच्य	२५६
गण्डयोः कूपकौ यस्याः	८६	गोमयेन सवारिणा	३४
गन्धमाल्यैरलङ्कृत्य	१६४	गोमयेनोपलिप्याथ	३५
गम्भीरैः पिङ्गलैश्चैव	६२	गोरक्षकान् वाणिजनिकान्	१०१
गम्यं त्वभावे दातृणाम्	१०८	गोह्यादयोऽग्नयो ह्यष्टौ	२७१
गर्भं धेहि सिनीवाली	१८४	गौरीं ददद्विष्णुलोकं	१४१
गर्भाधानं पुंसवनं	३०	गौरी पद्मा शची मेधा	३
गर्भाम्बुपानदोषाणां	१६५	ग्रहणोद्वाहसंक्रान्ति	१६६
गर्भाष्टमे गर्गपराशराद्यैः	२२८	ग्रहशुद्धिमब्दशुद्धिं	१२१
गर्भाष्टमेऽष्टमे वाब्दे	२२५	ग्रहे रवीन्द्वोरवनिप्रकम्पे	२६
गर्भाष्टमेऽब्दे कुर्वीत	२२५	ग्राममध्ये च वृद्धिश्च	१७६
गर्भाष्टमेषु ब्राह्मणं	२२५	ग्रामवचनं च कुर्युः	१६७
गर्भिणी कुञ्जराश्वादि	१८६	ग्रामाद् बहिःपरग्रामे	१७६
गान्धर्वः समयान्मिथः	७६	घटाभैरध्वगा नार्यः	८६
गान्धर्वेण विवाहेन	१४०	घृतं वा यदि वा तैलं	४५
गार्भैर्होमैर्जातकर्म	३०	चतुरङ्गुले च तन्मध्ये	५२
गार्हस्थ्यमुचितं	७८	चतुरस्रं स्थण्डिलं	३४
गुरुणानुज्ञातः	२७०	चतुरो ब्राह्मणस्याद्यान्	७०
गुरुवासमनुज्ञाय	७७	चतुर्थीहोममन्त्रेण	७०
गुरूणां संनिधौ दाने	४६	चतुर्थे मासि कर्त्तव्यं	२०८
गुरोर्वक्रातिचारे च	२४	चतुर्थे मासि निष्क्रमणिका	२०८
गुर्वादित्ये गुरौ शुक्रे	२२	चतुर्थे मासि षष्ठे वा	१८६
गृभ्णामि ते	६४	चतुर्थेऽहनि संप्राप्ते	१७८
गृहमेधा भवेन्नित्यं	११५	चतुर्थ्यां तौ याजयेतां	१७०

चतुर्थ्यामपररात्रे	१७१	जन्मर्क्षे जन्ममासे च	२१५
चतुर्दशकुलानीमानि	६७	जन्मर्क्षोदयमासेषु	२२१
चतुर्दश्यष्टमी चैव	१८१	जन्माष्टमारिसहजोपगतः	२४०
चतुर्मुष्टिर्भवेत्कुक्षिः	५६	जपयज्ञस्थलस्थं च	२५६
चतुर्विंशाष्टषोडशाङ्गुलैः	१६२	जपे होमे तथा दाने	१७८
चत्वार आश्रमाश्चैव	७८	जयाभ्यातानाश्च	५०
चत्वारिंशद्वत्सराणां	७८	जातकर्मकरणं स्थिरलग्ने	६६७
चन्द्रं सौरिं बुधं त्यक्त्वा	१८८	जातमात्रः शिशुस्तावत्	२२४
चमसानां तु वक्ष्यामि	३६	जातश्रद्धेन दद्यात्तु	१६६
चमसेन ह वा	६१	जातस्य कुमारस्याच्छिन्नायां	१६५
चरोरानीय पूर्वेण	४६	जातिर्विद्यावयः शीलं	६७
चर्मण्युत्तरलोमानि	१६७	जातेऽथ जातकर्म स्यात्	१६७
चातुर्मास्यनिवृत्तौ च	२३०	जाते पुत्रे पिता श्रुत्वा	१६६
चिन्तयामो वयं भर्गं	२५१	जाते पुत्रे पितुः स्नानं	१६५
चूडाकर्म द्विजातीनां	२१४	जाते पुत्रे पितुः स्नानं	१६६
चैत्यचत्वरतीरेषु	१८१	जानुभिश्चैव	८६
चौले च व्रतबन्धे च	२२०	जामयो यानि गेहानि	११२
छत्रं चोष्णीषममलं	२७६	जायाहृदयमालभ्य	१८५
छत्रं प्रतिगृह्णाति	२७६	जिह्वा तनुतरा वक्रा	६१
जगतीं वैश्यस्य	२५१	जीवन्तमतिदद्याद्वा	१३
जडगद्गदरोगार्त्त	२६५	जीवन् यदि समागच्छेत्	२६५
जडमूकान्धबधिर	१०१	जीवार्केन्दूडुशुद्धौ	२३८
जननाद्दशरात्रे व्युष्टे	२०५	जुहूषंश्च हुते चैव	५०
जन्मतो गर्भाधानाद्वा	१३६	ज्ञातिभ्यो द्रविणं दत्वा	७४
जन्मनोऽनन्तरं कार्यं	१६७	ज्येष्ठा मूला मघा श्लेषा	१८३
जन्मप्रभृति यत्किञ्चित्	२५६	ज्येष्ठायां यद्यनूढायां	१०३
जन्मभूगोत्रमग्निं च	५३	ज्येष्ठे निविष्टे	१००
जन्ममासे च पुत्राढ्या	११८	ज्येष्ठोत्तरकरान् युग्मान्	६

ज्येष्ठो भ्राता यदा तिष्ठेत्	१०३	तस्मात्सङ्गोपयेन्मूलं	५२
ज्यैष्ठे गहननीतिज्ञः	२२८	तस्मात्समिद्धे होतव्यं	४८
ज्वराभिभूता या नारी	१७८	तस्मात्सर्वप्रयत्नेन	३१
तच्छब्देन तु यच्छब्दः	२५१	तस्मादव्यञ्जनोपेतां	१०६
तण्डुलांस्त्रिर्देवेभ्यः	४२	तस्मादस्याधिकारोऽस्ति	३२
तण्डुलाश्च तथा शुभ्रा	४२	तस्मादामं गृहीतव्यं	२५८
तत आदाय दक्षिणं	२१७	तस्मादुद्वाहयेत्कन्यां	१०६
तत एव बर्हिषः	६०	तस्मादेतां गायत्रीमेव	१५०
ततः प्राच्यामुदीच्यां वा	१६७	तस्मादेताः सदा पूज्याः	१०६
ततः सूर्यमुदीक्षस्व	१६५	तस्मान्नग्निका	१०६
ततोऽखिलजगत्पद्म	२३३	तस्मिन्नेव दिवा आदित्यं	१८४
ततोऽनामिकया कुर्यात्	६२	तस्य त्रिः प्राश्नाति	१२६
ततोऽभिवादयेद्वृद्धान्	२५५	तस्यां तु होमयेन्नित्यं	४६
ततो ब्राह्मणभोजनं	१६३	तां दत्वा तु पिता कन्यां	१४०
ततो ब्राह्मणभोजनं	२१२	तां दृढपुरुष उन्मथ्य	१६७
ततो ब्राह्मणभोजनं	२२३	तां विवर्जयतस्तस्य	१८०
ततो मातामहानां च	५	तादृशाय मुदा कन्यां	७३
ततो मातामहानां च	१६	ताः स्थानं तयोः	४२
ततो विनीतां कल्याणीं	७३	तानो वा नित्यत्वात्	१२३
तत्कुलसरसीरुहदिवसेशः	१	तान् जुहोति	१५६
तत्रोल्मुकं च संगृह्य	४३	तान्येव दक्षिणाञ्चैव	११
तत्सवितुर्वरेण्यं	२५०	तामुदूह्य यथर्क्षुप्रवेशनम्	१७५
तथा मलिम्लुचे मासि	२१	ताम्बूलाभ्यञ्जने चैव	२६३
तथा हि शूर्पेण	१६२	ताम्रपात्रे शरावे वा	३६
तथैव काम्यं यत्कर्म	१७	ताम्राभः किञ्चिदानम्रः	६१
तन्मध्ये निखनेत्कूपं	४५	तासां हि विपुलं सौख्यं	६३
तस्माच्छुक्लविवृद्ध्यर्थं	१०६	तिर्यगूर्ध्वसमिन्मात्रा	४२
तस्माच्छुभेन पात्रेण	३६	तिलमुद्गमिश्रं	१६२

तिलोऽसीति पदस्थाने	११	त्रिरात्रामक्षारालवणाशिनौ	१६८
तिष्ठन्त्यास्तिष्ठता पत्या	१५६	त्रिरात्रामक्षारालवणाशिनौ	१६६
तिस्रः कन्या यथान्यायं	१४०	त्रिविवाहं कृतं येन	१११
तिस्रोऽप्रत्याख्यायिन्यः	२५७	त्रिवृतमात्रध्नाति	१६२
तीर्थे विवाहे यात्रायां	११७	त्रिवृत्ता मेखला कार्या	२४४
तुलापुरुषदाने च	१४३	त्रिषु त्रिषु	१२०
तूष्णीमितरैः	२७२	त्रिष्टुभं राजन्यस्य	२५१
तूष्णीमेताः क्रियाः स्त्रीणां	३२	त्रीणि कुशपिञ्जलानि	२१७
तृतीयवर्षे चूडाकरणं	२१४	त्रीणि वर्षाण्यृतुमती	१०६
तृतीयां वा चतुर्थीं वा	८५	त्रीणि वर्षाण्यृतुमती	१०७
तृतीये वा चतुर्थे वा	२०८	त्रीणि वर्षाण्यृतुमती	१७६
तृतीये वाऽप्रतिहते	२१४	त्रेण्या शलल्या विनीय	२१७
तेऽवच्छाय पुरुषं	२६१	त्र्यायुषमिति	१६६
तेन कन्याप्रदानेन	१४०	त्र्यायुषाणि करोति	२५५
तेषामारब्धभूतं तु	६	त्वाष्ट्रं विश्वरूपञ्जघान	१८२
तेषामारम्भेऽर्थतो व्यवस्था	१२४	दक्षिणतस्तिष्ठतः	२५०
तौ परिक्रामतस्तुभ्यं	१६०	दक्षिणतः पाणिग्राहस्य	१४६
त प्रतीतं स्वधर्मेण	१२२	दक्षिणं पातयेज्जानुं	५३
तं सोपस्तीर्णाभिघारितं	१५६	दक्षिणाद्युत्तरापवर्गं	४
त्यक्त्वा चतुर्थीमपि	२२८	दक्षिणाभिरुपेतं	१४६
त्यक्त्वा चैत्रमुदक्प्रचारिणि	११६	दक्षिणां दिशमाश्रित्य	१६१
त्रयः स्नातका भवन्ति	२६६	दक्षिणेन पाणिना	१८४
त्रयोदशी च शेषास्तु	१७६	दक्षिणे स्थापयेद् ब्रह्मा	३८
त्रिःक्षुरेण शिरः	२१६	दण्डधारणमग्निपरिचरणं	२६०
त्रिः परिणीतां प्राजापत्यं	१६३	दण्डाजिनोपवीतानि	२४५
त्रिः प्रदक्षिणं	२४४	दण्डाजिनोपवीतानि	२६०
त्रिकामेकां परिदध्यात्	२४५	दण्डापूपन्यायः (टि०)	२५
त्रिरात्रमक्षारालवणाशी	२६०	दत्तायाश्चैव कन्यायाः	१००

दत्तां कन्यां हरन् दण्ड्यः	१०६	दारान् सर्वप्रयत्नेन	३१
दत्तां न्यायेन यः कन्यां	७०	दारान् सर्वप्रयत्नेन	६३
दद्यात् त्रिभ्यः परेभ्यस्तु	१३	दासीदासासनाद्यं च	१४१
दद्यादुत्थाय पूर्णां वै	६१	दाहे दिशां चैव	२७
दद्याद् गुणवते कन्यां	६८	दिक्षु सर्वासु	३६
दद्याद् गुणवते कन्यां	१०४	दिग्दाहे दिनमेकं	२७
दद्यान्नान्दीमुखेभ्यस्तु	१२	दिनकरशशिजीवे	२३६
दधाति न चिरादेव	६४	दिवस्परीतेत्यस्य	१६६
दधितिलान् वा प्राश्य	२७३	दिवस्पर्याग्नेयं	१६६
दधिपयोयवागूभिः	४७	दीपैर्नीराजनं कुर्यात्	१७७
दध्यक्षतैः सबदरैः	११	दीयमानमथात्मानं	१११
दम्पती रोहिणीसोमौ	१७०	दीर्घकालं ब्रह्मचर्यं	१३४
दम्पत्योर्गच्छतोस्तत्र	१६१	दीर्घकुत्सितरोगार्त्ता	८८
दर्शनाद्दर्शनाद्राहोः	२८	दीर्घं तु चिबुकं यस्याः	६१
दशद्वादशकृत्वो वा	१७८	दुर्भगा जीर्णवस्त्रा स्यात्	१७६
दशपूरुषविख्यातात्	६६	दुष्टः शशधरो लग्नात्	२१०
दशमैकादशत्रिस्थाः	१८८	दूरादाहृत्य समिधः	२५६
दशम्यामुत्थाप्य	२०५	दृश्यते सिंहिकासूनुः	२७
दशाहेन सपिण्डास्तु	७६	दृषदश्मानं प्रतिष्ठाप्य	१५६
दहनं वपनं चैव	१८७	देवताग्रे तु विन्यस्य	२१३
दाता ग्रन्थिं तु पातयेत्	१३७	देवतानां नमस्कारः	७८
दात्रगोहलगोबन्धः	६४	देवता पुरतस्तस्य	२१२
दानं प्रतिग्रहो होमः	१४५	देवताप्रतिमां दृष्ट्वा	२५७
दानं विक्रयधर्मश्च	७५	देवदत्तां पतिर्भार्यां	६४
दानात् प्रभृति या तु स्यात्	११६	देवदत्तां पतिर्भार्यां	११४
दाराग्निहोत्रसंयोगं	१००	देवरेण सुतोत्पत्तिः	६६
दाराग्निहोत्रसंयोगं	१०३	देवरेण सुतोत्पत्तिः	१००
दाराधीनाः क्रिया	७८	देवं गुरुं गुरुस्थानं	१४४

देवीं वाचं	२११	द्वितीयमेके प्रजनं	६६
देशान्तरस्थक्लीबैक	१०१	द्विरावृत्त्याथ मध्ये वै	३८
देशेऽशुचावात्मनि च	२३५	द्विसूर्यं वा त्रिसूर्यं वा	२७
दैवेन तीर्थेन च	४८	द्व्यक्षरं चतुरक्षरं वा	२०६
दैवेन तु विवाहेन	१४०	द्व्यक्षरं प्रतिष्ठाकामः	२०६
दोहदस्याप्रदानेन	१८६	द्वौ ज्यैष्ठौ मध्यमौ प्रोक्तौ	११६
दौर्भाग्यं बहुमांसैश्च	६०	धनवार्द्धुषिकं	१०१
द्यूते च व्यवहारे च	३७	धनवृद्धिप्रसक्तांश्च	१०१
द्यौस्त्वा ददातु	१४७	धूमकेतौ समुत्पन्ने	२७
द्रव्यस्य नाम गृह्णीयात्	१४४	ध्रियमाणे तु पितरि	१३
द्वयोः सकामयोः	७६	न कश्चिद्योषितः शक्तः	११३
द्वात्रिंशद्वर्षपूर्णेन	१६६	नखदशनक्षतानि	१८४
द्वादशकेऽप्येके	२६६	नखानां कृन्तनं	१७७
द्वादश द्वादश वा	२६०	न चातिच्छिद्रदशनां	८६
द्वादशवर्षाणि ब्राह्मणस्य	१०२	न चाश्नत्सु जपेदत्र	६
द्वादशी सप्तमी नन्दा	२१०	न जन्ममासे	२२१
द्वादशैव तु वर्षाणि	१०२	न तु नामापि गृह्णीयात्	६६
द्वादश्यां श्रुतिशास्त्रज्ञः	२२६	न दत्वा कस्यचित्कन्यां	१०८
द्वारदेशे सूतिकाग्निं	२०२	न द्वितीयश्च साध्वीनां	६७
द्वारमेव हि द्रव्याणां	३४	न नखेन न काष्ठेन	३५
द्वारमेव हि द्रव्याणां	६०	न नाभिं दर्शयेत्	१३५
द्वारमेव हि द्रव्याणां	१२७	न निष्क्रयविसर्गाभ्यां	६३
द्वारोपवेशनं नित्यं	११६	न ब्राह्मणक्षत्रिययोः	६६
द्वावप्येतौ पररतां	६०	न मिथुनीभूय	१८३
द्वावेतावशुची स्यातां	१८३	न मुक्तकेशो जुहुयात्	४८
द्विगगनगजचन्द्रैः	२७७	नमोन्ते न नमो दद्यात्	५३
द्विजस्य भार्या शूद्रा तु	६६	नम्रीभूय	२६६
द्वितीयञ्च तृतीयञ्च	१०	न याचते तावदेव	१०६

न योषिद्भ्यः पृथग् दद्यात्	२३१	नान्दीमुखाः पितरः	१२
नर्क्षवृक्षनदीनाम्नीं	८८	नान्दीमुखे विवाहे च	१२
नव पञ्चमोदयगते	१८४	नान्दीमुखे विवाहे च	१४३
नव यज्ञे च यज्ञज्ञाः	१६	नान्ययोनावयोनौ च	१८१
न वस्त्रपीडनं कुर्यात्	१७८	नापसव्यकरणं	८
न विवाहविधावुक्तं	६७	नाभिव्याहारयेद् ब्रह्म	२२४
न शूद्रायाः स्मृतः कालः	६६	नामकर्म करणं स्थिरलग्ने	२०६
न श्मश्रुव्यञ्जनवतीं	८६	नामगोत्रे समुच्चार्य	१४४
न श्राद्धं भुक्त्वा	१८२	नामधेयं दशम्यां तु	२०५
न श्वः सदुपासीत	२०५	नामसंकीर्त्तनं विष्णोः	११२
नष्टे मृते प्रव्रजिते	६६	नार्थहीनं नचास्पष्टं	२०६
न सर्वे कामाः	१४२	नाविशुद्धां सरोषां वा	८८
न सूर्यमवलोकेत	५०	नाष्टकासु भवेच्छ्राद्धं	१६
न स्नातमात्रगमनोन्मुख	२४२	नासंवृतमुखः कुर्यात्	११२
न स्नायादुत्सवेऽतीते	११७	नास्नातां तु स्त्रियं गच्छेत्	१८१
न स्यादितरथावृत्तिः	१६६	नित्यं धनकथासक्ता	१७६
न स्वेऽग्नावन्यहोमः स्यात्	३६	निधनभवनसंस्था	२३६
नह्यस्य विद्यते कर्म	२२४	निनयन्नभिमन्त्रयते	१२७
नाग्नयः परिविन्दन्ति	१०२	निपातो न हि सव्यस्य	८
नाग्निस्तृप्यति काष्ठानां	११३	नियुक्तामप्येके	१६३
नाङ्गुष्ठादधिका ग्राह्या	४६	निरस्यत्यन्यत्	४५
नाडीजङ्घः सुरगुरुमुनिः	२६	निर्घातोल्काभूमिं	२५
नातिकेशामकेशां वा	८८	निर्मथ्य यज्ञियात्काष्ठात्	३६
नादक्षिणान्नान्यकामान्	१८१	निर्मन्थ्यमेके	१३५
नादुष्टां दूषयेत्कन्यां	१११	निषेककाले सोमे च	१८
नानिरुद्धे क्षणां	८६	नीचस्थः सिंहगो वा	२०
नानिष्ट्वा तु पितॄन् श्राद्धे	१६	नीलोत्पलदलप्रख्यैः	६२
नान्तरेण गच्छेयुः	४२	नृपाज्ञया ब्राह्मणसम्मतेन	२१६

नेष्टं गर्हर्क्षं	२३७	पतिलोकं न सा याति	११७
नैनानुपयेयुः	२२७	पतिं या नातिचरति	११६
नैमित्तिकमथो वक्ष्ये	१८	पयोधरभरानम्रः	६०
नैयग्रोधाश्चमसाः	३६	पयोधरैश्छन्नतरं	२३४
नैर्ऋतिं दिशमाश्रित्य	५५	पयोयवाग्वामिक्षा	२४१
नैवाङ्गनानां दयितः	११३	परगृहरथ्याचत्वर	११६
नोद्वहेत्कपिलां	८८	परसम्बोधनार्था निगदाः	१३४
नोपगच्छेत्प्रमत्तोऽपि	१८०	परं मृत्यविति च	१५५
नो मार्जनीं	१८५	परिगृह्य तु यः कन्यां	६६
नो मुक्तकेशी	१८६	परिविक्तिः परिवेत्ता च	१००
नो सन्ध्यागर्जिते	२३१	परिसमुह्योपलिप्य	३३
पक्षो दशाहानि	१२४	परिस्तरणादिकमपि	३६
पक्षोऽर्द्धर्चशः	२५०	पर्यायो योगसिद्धिः	१४२
पञ्च कृष्णलको माषः	१४६	पलाशाश्वत्थन्यग्रोध	४७
पञ्चमात् सप्तमादूर्ध्वं	७६	पवित्रयोर्मार्जयन्ते	६०
पञ्चमात् सप्तमादूर्ध्वं	८३	पवित्रं चाङ्गुरीयञ्च	४५
पञ्चमे षष्ठवर्षे तु		पवित्रं चास्मै प्रयच्छति	२४५
पञ्चसु बहिः शालायां	१२१	पवित्राभ्यामाज्यस्य	४५
पञ्चानां तु त्रयो धर्म्याः	७१	पवित्राभ्यामेताः	४२
पञ्चाशत्पत्रको ब्रह्मा	१२४	पशुमण्डूकनकुल	२३५
पञ्चाशद्भिः कुशैर्ब्रह्मा	३८	पश्चादग्नेमर्द्रपीठे	१६२
पञ्चाशद्भिः कुशैर्ब्रह्मा	१२३	पश्चादग्नेरवस्थाप्य	२४३
पणवाभैर्मृदङ्गाभैः	६०	पश्चादग्नेरुपविशतः	१४६
पतन्ति निरये घोरे	७५	पश्चादग्नेस्तेजनीं	१४६
पतिन्यायः(टि०)	१६	पश्चादुत्तरतो वा	४०
पतिपुत्रवती या स्त्री	१२२	पश्चादुत्तरतो वा स्यात्	४०
पतिप्रियहिते युक्ता	११५	पश्चाद्धरेण यद्दत्तं	१०६
पतिमुल्लङ्घ्य मोहात्	११६	पश्चिमाभिमुखो भूत्वा	११

पाकयज्ञेष्ववत्तस्य	५६	पिता पितामहो भ्राता	१३७
पाखण्डं पतितं व्रात्यं	२५६	पितामहस्वसुः पुत्राः	८१
पाणिग्रहणमन्त्राणां	६४	पिता वा यदि वा भ्राता	१०६
पाणिग्रहणसंस्कारः	१५८	पितुः पितृभ्यो वा दद्यात्	१३
पाणिग्रहणिका मन्त्राः	६८	पितुः प्रमादात्तु यदीह	१०८
पाणिग्रहणिका मन्त्राः	६७	पितृगेहे तु या कन्या	१०५
पाणिग्राह्यः सवर्णासु	१५८	पितृभिर्भ्रातृभिश्चैताः	११२
पाणिनाग्निं परिसमूहयति	२५२	पितृवेश्मनि या नारी	१०७
पाणिभ्यां संहताभ्याञ्च	१६६	पितृव्यपुत्रान् सापत्नान्	१०३
पाणी प्रतप्य	२५४	पितृस्वसृसुतां	८३
पाण्याहुतिः	४७	पितॄणां रूपमास्थाय	१७
पादयोरन्यं विष्टरः	१२५	पितॄनिति पदात् पूर्वं	११
पाद्यं तु पादयोर्दद्यात्	१२७	पितृन्नान्दीमुखान्नाम	१४
पानं दुर्जनसंसर्गः	११६	पितैवोपनयेत् पुत्रं	२२८
पानाटनदिवास्वप्नं	११६	पित्रा प्रत्तामादाय	१४७
पापाख्या च त्रिविधा	१२०	पित्रा भर्त्रा सुतैर्न स्त्री	११५
पालाशो ब्राह्मणस्य	२६२	पित्रे न दद्याच्छुल्कं तु	१०७
पावकः सर्वमेध्यत्वं	१४८	पित्र्यमन्त्रवर्जं जपः	६
पावकस्य मुखं वक्ष्ये	४६	पित्र्यमन्त्रानुहरणे	५३
पिण्डनिर्वपनं कुर्यात्	१४	पुत्रस्तस्य	१
पिण्डार्थे ये स्तृताः	४०	पुत्रायान्तेवासिने	१३०
पिण्डांस्तु दधिमध्वक्तान्	६	पुत्रो वै वीरः	१५५
पितरः शुन्धध्वम्	२७४	पुनर्वचनेन भूयांसं	१५८
पितरि जीवति यः श्राद्धं	१३	पुरा जग्राह वै मृत्युः	२५६
पितरि पितामहे च जीवति	१३	पुरा स्पन्दत इति	१८८
पिता दद्यात् स्वयं कन्यां	१३८	पुष्पैर्धूपैः सनैवेद्यैः	२
पिता पितामहश्चैव	१२	पुष्येन्दुचित्रा	२२१
पिता पितामहो भ्राता	२२८	पुंसवनवत्	१६१

पूजयेतां महादेवीं	१७०	प्रतिगृह्येप्सितं दण्डं	२५८
पूरयेत्त्रिर्जलेनैव	४२	प्रतिदिशं पञ्च ब्राह्मणान्	२००
पूर्णपात्रो दक्षिणा	५६	प्रतिपदि मदिरासक्तः	२२६
पूर्णाहुतिञ्च मूर्द्धानं	६१	प्रतिमहाव्याहृतिभिर्वा	१६२
पूर्णाहुतौ च मूर्द्धानं	६१	प्रतिमासु च शुभ्रासु	३
पूर्वमेव रहो गच्छेत्	११५	प्रतिष्ठिततलाः सम्यक्	८६
पूर्वराशिं यदा त्यक्त्वा	२३	प्रतिष्ठे स्थो विश्वतः	२७६
पूर्ववत् परिसमूहनं	२५५	प्रतिसंवत्सरानर्हयेयुः	१२२
पूर्वं स्त्रियः सुरैर्भुक्ताः	१४८	प्रत्यङ्मुखेन यजमानेन	१२३
पूर्वाह्णे	२२१	प्रत्यङ्मुखेभ्य उपविष्टेभ्यः	२६८
पूर्वोत्थानपरा दक्षा	११४	प्रत्याह मातारुद्राणां	१३२
पृथक् पृथग्वा मिश्रौ वा	७१	प्रथमगर्भे मासे षष्ठे	१६१
पृथिव्य अग्नये	३६७	प्रथमर्त्तौ तु पुष्पिण्याः	१७७
पौषादिचतुरो मासान्	२३	प्रथमा धर्मपत्नी तु	१४४
पौषान्मासात् प्रभृति मुनयः	२६	प्रथमेऽहनि चाण्डाली	१८०
पौषेऽपि कुर्यात्	११८	प्रदाय शुल्कं गच्छेद्यः	११०
पौष्णमूलमघास्त्याज्याः	१८४	प्रधानस्य क्रिया यत्र	६६
पौष्णाश्विपुष्यवसु	२१५	प्रधानस्याक्रिया यत्र	१३८
प्रजापतये देवेभ्यः	२६७	प्रधानारम्भेणैव (टि०)	१६८
प्रजापतिं ध्यायेत्तूष्णीं	५५	प्रधानावृत्तौ गुणावृत्तिः (टि०)	३१
प्रजायते चतुर्दश्यां	१८०	प्रमाद्यदि गृह्णीयात्	६५
प्रणवादिनमोन्तं च	५२	प्रयच्छेन्नग्निकां कन्यां	१०४
प्रणीतमुदकं	४२	प्रवृत्तं मलमासात्प्राक्	२६
प्रणीता द्वादशाङ्गुल्या	३६	प्रस्थमात्रोदकग्राही	३८
प्रणीता निनयति	६०	प्राक्पक्षमेव गदितः	२२
प्रणीतासु पवित्रे ते	५५	प्रागुद्गतः शिशिरहा	२२
प्रतापयेत्ततो वह्नौ	४४	प्राक्चूडाकरणात्	२२४
प्रतिगृह्य च यः कन्यां	११०	प्राक्शस्तेषां	४४

प्रागग्राः समिधो देयाः	४७	प्रोक्षणीपात्रमादाय	४२
प्रागग्रान् कुशानास्तीर्य	३७	प्रोक्षणीपात्रमुद्धृत्य	४१
प्रागग्रेष्वथ दर्भेषु	१२	प्रोषितं यद्यशृण्वानः	१०१
प्रागुदक्प्रवणं देशं	३३	प्रोष्ठपदाद्वयं प्रोक्तं	१८८
प्रागुपनयनात्	२२४	फलचमसन्यायः (टि०)	६
प्राग्वासश्चरे	१३०	फलं समभिसन्धाय	१४४
प्राङ्नाभिवर्द्धनात्	१९६	फलिनी रोचना होम	९३
प्राङ्नीचं ब्रह्मवर्चस्यं	३२	फाल्गुनस्य त्वमावास्या	२३०
प्राङ्महाव्याहृतिभ्यः	५३	बध्नीयात् त्रिगुणां	२४४
प्राङ्मुखायाभिरूपाय	१४३	बन्धुजीवारुणैः	९३
प्राचीमुखः सौम्यमुखोऽपि	२१५	बन्ध्याष्टमे	१०४
प्राजग्राहमुदग्राहं	१६१	बर्हिष्यासादयति	४४
प्राजापत्येन तीर्थेन	१५६	बलाच्चेत् प्रहृता कन्या	६६
प्राञ्चं प्राञ्चमुदगग्नेः	४०	बलायुर्दाररेखासु	४८
प्राञ्चामाघारौ	५५	बलिहीने तु दुर्भिक्षं	४
प्राञ्च्युदञ्चि च कर्माणि	४	बहिः किञ्चिद्विभिन्नाः स्युः	४५
प्राञ्च्युदञ्चि च कर्माणि	३९	बहिर्वेणेषु चारिक्यात्	१००
प्रादेशमात्रे पवित्रे	४०	बहुकाष्ठैः समिन्धीयात्	५५
प्रादेशान्नाधिका नोना	४६	बालया वा युवत्या वा	११५
प्रायश्चित्तविधानं च	१३४	बालस्य बलहीनोऽपि	२४१
प्रार्थितप्रदानं प्राजापत्यः	७४	बालभृगौ परिणीता	२१
प्राशनान्ते सर्वान्नसान्	२१२	बाले च दुर्भगा नारी	२१
प्रासादच्छत्रमुकुटैः	९४	बाले च विधवा नारी	२२
प्रीतिर्जन्मसु	१२०	बाले वृद्धे च संध्यांशे	२३
प्रे को चै चि द्वितीया	२३०	बाले वेश्यापदं याति	२२
प्रेतशय्याप्रतिग्राही	२६४	बाले शुक्रे वृद्धे शुक्रे	२१
पैशाचः कन्यकाछलात्	७७	बालो दशाहाभ्युदितः	२३
प्रोक्तपर्वसु शेषेषु	१८१	बाल्ये पितुर्वशे तिष्ठेत्	११५

बुद्धिरूप···सम्पन्नां	८६	ब्राह्मप्राजापत्यार्षदैवौ	७२
बुधे च जायां न समाचरेत	१८३	ब्राह्मादिषु विवाहेषु	७७
बैल्वो राजन्यस्य	२६२	ब्राह्मादिषु विवाहेषु	१०८
ब्रवीम्यद्य विवाहाङ्गं	१७२	ब्राह्मेण तु विवाहेन	१४०
ब्रह्मक्षत्रविशः शूद्राः	३२	ब्राह्मो दैवस्तथैवार्ष	७१
ब्रह्मचर्यं वा	२६६	ब्राह्मो विवाह आहूय	७२
ब्रह्मचारी यदा स्वप्ना	२५६	भगः शुभकरः स्त्रीणां	६०
ब्रह्मचारिण एकं स्यात्	२४५	भगोऽर्यमा सविता	६४
ब्रह्मणः प्रणवं कुर्यात्	२६८	भयभागे त्यजेन्मूलम्	५२
ब्रह्मणे छन्दोभ्यश्च	२६७	भवत इत्युच्यमाने	२४८
ब्रह्मणे दक्षिणा देया	५६	भवत्पूर्वां ब्राह्मणः	२६७
ब्रह्मवर्चसकामस्य	१३६	भवन्ति चास्मिन् भूतानि	५७
ब्रह्मवचसकामस्य	२२६	भवन्ति भूयो लोकानि	५७
ब्रह्मवर्चसानीति च	२४३	भवेत् संध्यागतः पश्चात्	२३
ब्रह्मसूत्रं विना भुंक्ते	२६४	भारद्वाजी मांसेन	२१२
ब्रह्म ह वा	५५	भार्यायाश्च स्वजात्यायाः	६८
ब्रह्माणं वृणीते	३७	भिन्नकांस्यस्वरा नारी	६३
ब्रह्मारम्भेऽवसाने च	२६८	भुञ्जीत व्यञ्जनः सोमः	१०६
ब्रह्मोदने च सोमे च	१६४	भूतं भव्यायोपदिश्यते (न्यायः)	७
ब्राह्मणक्षत्रियविशः	२५८	भूरादिनवसु	५५
ब्राह्मणक्षत्रियविशां	३०	भूराद्यास्तिस्र एवैताः	५५
ब्राह्मणक्षत्रियविशां	६६	भृगुसुतशशिपुत्रे	२३६
ब्राह्मणादिहते ताते	४	भृजिः पाके भवेद्धातुः	२५२
ब्राह्मणान् भोजयित्वा	२१६	मेति भाजयते लोकान्	२५२
ब्राह्मणान् भोजयेत् तं च	२४१	मैत्रं भो इत्याचार्याय	२५६
ब्राह्मणेषु चरेद्धैत्रं	२५८	भोः शब्दं कीर्त्तयेदन्ते	२५५
ब्राह्मण्यां ब्राह्मणाज्जातः	२६५	भ्रातरं वा स्वसारं वा	२५८
ब्राह्मदेयां तु यः कन्याम्	१३६	भ्राता वा भ्रातृपुत्रो वा	१७

भ्राता भ्रातृस्थानो वा	१५५	माघे द्रविणशीलाढ्यः	२२८
भ्रातृस्थानः पितृव्यस्य	१५५	माघे पञ्चदशी शुक्ला	२३१
मकरस्थो यदा जीवः	२४	माङ्गल्यानि च वाद्यानि	१४१
मङ्गलार्थं स्वस्त्ययनं	६५	मातरं प्रथमामेके	२५७
मद्यपाऽसत्यवृत्ता च	१०३	माता त्वभावे सर्वेषां	१३८
मधुपर्के च सोमे च	१२६	मातापितृविहीनं तु	१११
मधुमतीभिर्वा	१२६	मातामहानामप्येवं	१३, २२४
मधु मध्विति यस्तत्र	६	मातुः पितुः स्वसुः पुत्राः	८२
मधुमांसमज्जन	२६०	मातुर्मातुः स्वसुः पुत्राः	८२
मधुमांसमज्जनोच्छिष्टं	२६३	मातुः सपिण्डा यत्नेन	८३
मध्यरात्रे तु मध्यं स्यात्	१७६	मातुः सपिण्डा यत्नेन	८६
मध्ये चरुश्रपणं	४२	मातुर्यदग्रे जायन्ते	३२
मध्वाज्यकनकोपेतं	२१२	मातुर्यन्नाम गुह्यं स्यात्	६५
मन्त्रान्तैः कर्मादिसांनिपात्यः	७	मातृनाम्नी यदा कन्या	६५
मन्त्रान्तैः कर्मादिः	१२५	मातृपितृसम्बन्धाः	८३
मन्त्रेण सकृदाचामति	१२७	मातृश्राद्धं तु युग्मैः स्यात्	६
मन्त्रेणोङ्कारपूतेन	५२	मातॄणां प्रथमं श्राद्धं	५
मन्दगतिगर्तचित्तः	२२६	मातॄः संपूजयित्वा तु	२
मन्वन्तरादयस्त्वेताः	२३१	मात्रा सहोपनीतौ स्यात्	१६६
मलिनाम्बरतो नारी	१७६	मानक्रियायामुक्तायां	३२
मलिम्लुचगुरुशुक्ल	२४	मानुषेऽथ खग	११८
महान्त्यपि समृद्धानि	६६	मार्गशीर्षे तथा ज्यैष्ठे	११६
महाप्रस्थानगमनं	१००	मार्गशीर्षे भवेद् भ्रष्टः	२२८
महालोहितां च गन्धर्वाः	४६	मार्गस्य पौर्णमास्यादौ	२६
महासत्त्वसमाकीर्णान्	११७	मार्गे च फाल्गुने चैव	२३०
महेन्द्रभवनं याति	१४६	मार्जनं स्यात्पवित्राभ्यां	६०
माघफाल्गुनवैशाखे	११८	मार्जारमूषिकास्पर्शे	५४
माघादिमासषट्के तु	२०४	मालतीबकुलाम्भोज	६१

मासत्रयादूर्ध्वं	११	य एवं विद्वान् १८
मासपक्षतिथीनां च	१४४	यद्दयमाणार्त्विजः १२२
मासे षष्ठेऽष्टमे वा	१६१	यज्ञवास्तुनि मुष्ट्यां च ३८
मिथिलान्तर्गतोद्यान	२७७	यज्ञस्य ऋत्विजे दैवः ७४
मुखेनैव धमेदग्निं	५०	यज्ञस्य दक्षिणा पत्नी ६२
मुख्यकाले यदा नाम	२०५	यज्ञे पुंसवने चैव १८
मुख्यक्रमः	३६	यज्ञे तु विततें सम्यक् ७३
मुख्यालाभे विधिज्ञेन	१६७	यज्ञोपवीतं कुरुते २४६
मुण्डनं पिण्डदानं च	१८६	यज्ञोपवीतं परमं २४५
मुञ्जाभावे तु कर्तव्या	२६२	यज्वा वसन्तसमये २३७
मुसलोदूखले वार्थे	१६२	यत्किञ्चिद्दीयते तत्र १४२
मूर्द्धानि मृदुरोमाणि	६३	यत्प्रीतिपात्रं १
मूलानुराधाश्रवणाश्च	२०८	यत्र दिङ्नियमो नास्ति ५२
मूले हानिकरं प्रोक्तं	५२	यत्र नार्यस्तु पूज्यन्ते ११२
मृगाजरहिते लग्ने	१६२	यत्र पित्र्यादयस्त्रयः १३
मृताशौचस्य मध्ये तु	१६७	यत्र मन्त्रा न विद्यन्ते ५३
मृदुध्रुवक्षिप्रचरेषु	१६७	यत्र यत्र भवेच्छ्राद्धं १
मेखलामजिनं दण्डं	२६३	यत्रैकः स्पृशति २३२
मेखलामजिनं	२६४	यत्रोपदिश्यते कर्म ५३
मेखलां बध्नीते	२४३	यत्रोपदिश्यते कर्म २५५
मेखला सप्तहस्ता स्यात्	२६२	यथामङ्गलं २१६
मेधा भानुदिने	२३७	यथामङ्गलं वा २१४
मेषे भवति शुचार्त्तः	२३८	यथामङ्गलं वा २२५
मेषोच्चवृश्चिकं	११८	यथा युक्तो विवाहः ७६
मौञ्जी त्रिवृत्समा	२६२	यथा लाजाञ्जलिर्ध्वा १६२
मौञ्जी रशना ब्राह्मणस्य	२६२	यथा सीमन्तिनी नारी ४५
मौनयुक्तस्त्रैविद्यवृद्धैः	४६	यथा सिंहस्थिते जीवे २१
मौर्वी वैश्यस्य	२६२	यथोक्तवस्त्वसंपत्तौ ४२

यदयुतान्न विन्देत	२००	यस्याः पाणितले रेखा	९४
यदहः पुंसा नक्षत्रेण	१८९	यस्याश्च न भवेद् भ्राता	८८
यदहरुपैष्यन् माणवकः	२४२	यादृग्गुणेन भर्त्रा स्त्री	११३
यदा ऋतुमती भवति	१७६	यां नदीमुपावसिता भवति	१९३
यदा गर्भाष्टमे वर्षे	२४१	यां वै काञ्चिद् यज्ञे	११९
यदा तु दक्षिणे पार्श्वे	१८२	यावता बहुभोक्तुश्च	५९
यदा तु नैव कश्चित् स्यात्	१०८	यावतो होमनिर्वृत्तिः	४३
यदापत्यद्वयं तिष्ठेत्	२२२	यावत्कालं सुते जाते	१९६
यदाम्बुवृष्टिः कुलिशं	२४	यावत्संनिपात	१८३
यदि कुमार उपद्रवेत्	२०३	यावद् ग्रहणं वा	२६०
यदि चाग्रे वरो गच्छेत्	१६०	यावद्धविरुत्तरार्द्धात्	५६
यदि दिवा मैथुनं	१८०	यावन्ति सन्ति रोमाणि	१४१
यदि संयोगकाले तु	१८१	यावन्न छिद्यते नालं	१९६
यदि स्युः सुखमाप्नोति	९४	यावन्न लज्जयाऽत्यर्थं	१०५
यदेकस्मिन्	६७	या वा क्लीबं	६७
यद्देवा अभ्यातानेव	१५३	यासां नाददते शुल्कं	७५
यद्येकजाता बहवः	८१	युग्मानेव स्वस्तिवाच्यः	१२
यन्नाम्नातं स्वशाखायां	१३२	युग्मानेव स्वस्तिवाच्यः	१२
यमरुद्रपितॄणां च	५५	युग्माष्टकेषु	११८
यवैर्वा व्रीहिभिः पूर्णं	६०	येन कर्मणोत्सेंत्	१५०
यस्तत्र प्रकरोऽन्नस्य	९	येनेच्छेद्विपुलां प्रीतिं	११७
यस्तु तां वरयेत्कन्यां	१०५	योऽधीते नार्थतत्त्वज्ञः	५७
यस्तु देशानुरूपेण	८५	यो न मन्त्रैः स्वशाखोक्तैः	२६५
यस्ते स्तनः	२०२	योऽनर्चिषि जुहोत्यग्नौ	४८
यस्मै दद्यात् पिता	६७	यो न वेत्त्यभिवादस्य	२५६
यस्मै दद्यात् पिता	६३	यो यस्य धर्म्यो वर्णस्य	७१
यस्मिन् भावोऽर्पितः स्त्रीणां	१८०	यौगपद्ये तु तीर्थानां	१८४
यस्य जातस्य यमयोः	१०१	यौवने वर्त्तमानानां	११३

यः प्रत्यवसितो विप्रः	२६४	लग्नशुद्धिर्यदा नास्ति	१२१
यः स्वदारानृतुस्नातान्	१७८	लग्ने सौरिदिवाकरावनिसुताः	२३६
रक्तस्रावे तथा शस्त्र	२३५	लाजानाज्यं स्रुवं कुम्भं	१६१
रक्ताक्षी विषमाक्षी च	६२	लुप्ते कर्मणि सर्वत्र	२२७
रक्षेत्कन्यां पिता विन्नां	११३	वक्रातिवक्रौ	२४
रजसाभिप्लुतां नारीं	१८०	वटुकन्याजन्मराशेः	२४१
रत्नवस्त्रमहीयान	१४२	वधूपादं तु दक्षिणं	१५६
रविदग्धं दिनत्रयं	२३३	वधूसंस्कार एवायं	१७३
रविसंक्रमणे पुण्ये	२३२	वध्वा वरस्य वा तातः	८०
राक्षसो युद्धहरणात्	७६	वध्वा सहैव कर्तव्यः	१६६
राजग्रस्ते तथा युद्धे	१२१	वपनं मेखला दण्डः	२६५
राजत्खण्डबला	१	वपनं मैथुनं तीर्थं	१८७
रात्रौ चतुर्थ्यां पुत्रः	१८०	वमन्तं जृम्भमाणं च	२५६
रात्रौ दानं न शंसन्ति	१४६	वरगोत्रं समुच्चार्य	१४३
रात्रौ स्नानं न कुर्वीत	१६६	वरदोषमनाख्याय	११०
राशौ पञ्चमके स्थितः	२४०	वरश्चेत्कुलशीलाभ्यां	६८
राष्ट्रभृत इच्छन्	१५०	वरस्य दक्षिणे भागे	१४६
राहुदर्शनसंक्रान्ति	१४६	वरस्य या भवेच्छाखा	१३४
रूपसत्त्वगुणोपेता	७७	वरेण्यं वरणीयं च	२५१
रेखा कनिष्ठिका मूलात्	६३	वरो वरयितव्योऽर्थी	६८
रेतोमूत्रसकृन्मोक्षे	१३१	वरः पूर्वमुखस्तिष्ठेत्	१४३
रेवत्युत्तररोहिणी	१२०	वर्षे तृतीये	२२१
रोगी पतिव्रता दुःखी	१७५	वर्ष्मोऽस्मि समानानां	१२४
रोचिष्णुरसि	२७६	वशिष्ठोक्तो विधिः कृत्स्नः	६
रोमकाले तु संप्राप्ते	१०६	वसन्ते ब्राह्मणं	२२८
रौद्रपित्र्यासुरान् मन्त्रान्	५३	वसवः पितरो ज्ञेयाः	१७
रौद्रं राक्षसमासुरं	५४	वस्त्रे स्युर्विषमा	१७७
रौरवं राजन्यस्य	२६१	वस्वादित्यगुरूत्तरादिति	२०६

वह्नेर्दक्षिणदिग्भागे	४२	विशिष्टफलदा कन्या	१४१
वानप्रस्थाश्रमस्यापि	१३४	विशीर्णा विदला ह्रस्वा	४६
वापीकूपतडागयाग	२१	विश्वाभ्यो मा	२७६
वारणे भौमार्क	१६१	विश्वेदेवविहीनं तु	६
वारुण्यां भोजनगृहं	१८७	विष्णुं जामातरं मन्ये	११७
वारेषु जीवभृगु	२०८	विष्णुपादपराक्रान्ता	३४
वासश्चाप्यहतं तत्र	११	विष्णुपूजासमं पुण्यं	१४०
वासांसि शाणाक्षौमाविकानि	२६१	विंशत्यब्दा यदा कन्या	१६६
विक्रमेण प्रसह्य स्यात्	७६	वीथ्यापणतुलामानैः	६४
विधिर्यो निश्चितः पूर्वं	६६	वृत्तेऽप्यकालवर्षे	२५
विधिवत्प्रतिगृह्यापि	१११	वृत्रस्येत्यङ्क्तेऽक्षिणी	२७५
विधीनामत्र विषयः	२३३	वृद्धां वन्ध्यामसद्वृत्तां	१८१
विध्यनुवादवैयर्थ्यापत्तिः	२५	वृषलग्ने च मीने च	२१०
विनर्तुना वसन्तेन	२२६	वृषलीफेनपीतस्य	६६
विपर्यस्य बर्हिर्मूलैः	४४	वेदं वेदौ च वेदान् वा	७७
विरोधेऽर्थस्तत्परत्वात्	१२५	वेदं समाप्य	२६६
विवाहमन्त्रसंस्कारं	३२	वेदस्याध्ययनं सर्वं	५६
विवाहस्त्वष्टवर्षायाः	१०६	वेदाध्ययनसंपन्न	२४२
विवाहादिः कर्मगणो	१७	वेदी वैवाहिकी कार्या	१२२
विवाहादिक्रियाकाले	१११	वेद्यन्ते गोमिथुनं	७४
विवाहे चैव निर्वृत्ते	७१	वैकङ्कतं पाणिमात्रं	४२
विवाहे दम्पती स्यातां	१६६	वैकङ्कत्यग्निहोत्रहवणी	४४
विवाहे दुहितृमते	७६	वैणवीं धारयेद्यष्टिं	२७५
विवाहे विततेतन्त्रे	११२	वैणवीं धारयेद्यष्टिं	२७६
विवाहो नैव कर्तव्यः	२४	वैदिकैः कर्मभिः पुण्यैः	३०
विविक्ते स्वयमन्योन्यं	७६	वैवाहिकप्रदानं वा	१४६
विशालजघनां	८७	वैवाहिको विधिः स्त्रीणां	३२
विशालनेत्रां सुमुखीं	८७	वैवाहिको विधिः स्त्रीणां	१३६

व्यञ्जनं वाससीशुभ्रे	४६	शिशोर्मातरि गर्भिण्यां २२०
व्यञ्जने तु कुलं हन्यात्	१०६	शिशोरभ्युक्षणं प्रोक्तं २२४
व्यञ्जनेषूपजातेषु	१०६	शीतोष्णवृष्टितेजांसि ५७
व्यतीपाते तथा साध्ये	२०६	शुक्लपक्षे सुशीला स्यात् १७५
व्यभिचारात्तु भर्तुः स्त्री	११६	शुक्लमहतं वासः २६१
व्याघातो वैधृतो योगे	१८८	शुद्धा भर्तुश्चतुर्थेऽह्नि १८०
व्रतबन्धे विवाहे च	२२६	शुभं चैव तु पूर्वाह्णे १७६
व्रतबन्धो द्विजातीनां	२४०	शुभं पात्रं तु कांस्यं स्यात् ३६
व्रतयज्ञविवाहेषु	२६	शुभं भवनमासाद्य २४
व्रताद्विपूर्वसंध्यायां	२३३	शुभप्रदानि व्रतबन्धकार्ये २३७
व्रात्याचार्यस्य भुक्त्वान्नं	२२७	शुल्कं गृह्णन् हि कुरुते ७५
शक्रः प्रजापतिः सर्वः	२५२	शुल्कं प्रदाय कन्यायाः ७५
शङ्खकुन्देन्दुधवलैः	६२	शुल्केन ये प्रयच्छन्ति ७५
शतभिषावसुसंयुक्ता	२३७	शुल्कसंज्ञेन मूल्येन ७५
शतरात्रे व्यतीते वा	२०५	शूद्रः स्वजातिं विन्देत ६८
शनैश्चरदिने चैव	१२०	शूद्रां शयनमारोप्य ६६
शमयन्त्यासमाहात्	२६	शूद्राणां मासिकं कार्यं ८६
शमीपलाशमिश्राणां	१५६	शूद्रावेदी पतत्यत्र ६६
शरः क्षत्रियया ग्राह्यः	१५८	शूद्रैव भार्या शूद्रस्य ६८
शर्म ब्राह्मणस्य	२०७	शूद्रोऽप्येवंविधः कार्यः ३२
शशकाक्षी मृगाक्षी च	६२	शोचन्ति यामयो यत्र ११२
शशाङ्कतारयोः शुद्धिः	२३८	श्रद्धायुक्तो शुचिर्दान्तः १४६
शशाङ्कलग्नोपगतैः	१८४	श्रावणस्याष्टमी कृष्णा २३१
शाखाधिपे बलिनि	२३८	श्रीहर्षनाथकृतिना २७७
शातकुम्भमयी सूची	२२१	श्रीहर्षनाथोक्ति १
शाल्यन्नं दधिमध्वक्तं	११	श्रुतिशीले विज्ञाय ७३
शिरोहस्तौ च पादौ च	५६	श्रुतिः स्मृतिः सदाचारः १३२
शिवो नामेति	२१७	श्रुत्वा पुत्रस्य वै जन्म १६६

श्रेष्ठं पक्षमुशन्ति	११६	सकामायां तु कन्यायां	६८
श्वक्रोष्टगर्दभोलूक	२३६	सकृच्च कृतसंस्काराः	१६१
श्वश्रृगालगतिर्या स्यात्	६३	सकृच्च संस्कृता नारी	३१
श्वित्रिकुष्ठिकुलादीनां	६७	सकृच्च संस्कृता नारी	१६१
षट्कर्णोत्पत्तिमाशङ्क्य	२२२	सकृत्प्रदीयते कन्या	१०६
षडब्दमध्ये नोद्वाह्या	१३६	सकृदंशो निपतति	६६
षडर्घ्यो भवन्ति	१२२	सकृद्धौते नवं श्वेतं	१३५
षडानुपूर्व्या विप्रस्य	७१	सख्यं सप्तपदीनं स्यात्	१६४
षष्ठे च द्वादशे मासि	२१४	स गुरुर्यः क्रियां कृत्वा	२४२
षष्ठेऽह्नि रात्रिजागरणं	२०४	सगोत्रे खलु सापिण्ड्यं	८५
षष्ठे तु धनकामस्य	२२६	सगोत्रं मातुरप्येके	८३
षष्ठे मासि निशाकरे	२१०	संक्रान्तौ तरणेः	२३२
षष्ठे मासेऽन्नप्राशनं	२१०	स चरेत्त्रीणि वर्षाणि	२६५
षष्ठ्यष्टमीं पञ्चदशीं	१८४	सत्यवाग् धृतिमान्	२४२
षष्ठ्यमीचतुर्थीषु	२१४	सत्वचः समिधः कार्याः	४६
षष्ठ्यामशुचिरभार्यः	२२६	सदा निशायां	१८२
षोडशारत्निके कुर्यात्	१२१	सदोपवीतिना भाव्यं	२४५
संयतोपस्करा दक्षा	१५५	सद्यस्त्वेव गायत्रीं	२५७
संवत्सरं न मिथुनम्	१६८	सन्तानो भिद्यते यस्मात्	८०
संवत्सरे प्राशनं	२१०	सन्तुष्टो भार्यया भर्ता	११४
संवत्सरे षण्मास्ये	२५०	सन्ध्ययोरुभयोर्जप्यः	४६
संवृत्ताः समपर्वाणः	६३	सन्ध्यागर्जनभूकम्प	२३५
संवेष्टितं कटमेवं	१४६	सन्ध्यासूपप्लवे विष्ट्यां	१७५
सांवत्सरिकस्य	२१४	सन्ध्याहीनोऽशुचिर्नित्यं	२५६
संसृजेथास्तेजो वैश्वानरः	१८०	संनिकर्षेऽपि कर्त्तव्यं	८२
संस्कारमन्त्रहोमादीन्	२६६	सपवित्रेण हस्तेन	४७
संस्रवार्थं तु तत्पात्रं	४७	सपिण्डानिषेधः सार्ववर्णिकः	८६
स कन्यायाः प्रदानेन	७३	सपिण्डीकरणादूर्ध्वं	१३

स पितुः पितृकृत्येषु	१३	स यदि कामयेत	१६६
सप्तजिह्वा भवन्त्येता	४६	स यस्मिन् देशे	२०१
सप्त पौनर्भवाः	६५	सरस्वत्यादिकां तिष्ठन्	१५६
सप्तभिर्नवभिर्वापि	३८	सर्पाश्वमघमूलासु	१८३
सप्तमीञ्च तथा षष्ठीं	८५	सर्पिषा मधुना दध्ना	१२४
सप्तमे ब्रह्मवर्चसकामं	२२६	सर्वकामसमृद्ध्यर्थं	१४
सप्तम्यामप्रजा योषित्	१८०	सर्वत्र प्राङ्मुखो दाता	३७
सप्तवर्षा भवेद् गौरी	१०५	सर्वत्र कर्मणामन्ते	६२
सप्तवर्षा भवेद् गौरी	१०६	सर्वत्र कर्मणामन्ते	१७०
सप्तविधा पुनर्भूः	६७	सर्वत्रानुषजति	१५३
सप्तसंवत्सरादूर्ध्वं	१३६	सर्वत्रैव स्थितः श्रेष्ठः	२२
सप्ताक्षरां चरेद्भिक्षां	२५७	सर्वे वा प्राश्नीयात्	१३०
सभूषणौ भागयुगे	४५	सर्वप्रायश्चित्त	१५०
समां तथा चतुर्दिक्षु	१२१	सर्वमन्त्रप्रयोगेषु	५२
समाच्छिद्य तु	६८	सर्वमन्त्रप्रयोगेषु	१२३
समानप्रवरा वापि	८४	सर्वाश्चावृत्तयः	२७१
समापयेत्ततः पश्चात्	१४७	सर्वाश्चावृतः	३४
समाहृत्य तु तद्भैक्षं	२५६	सर्वाश्चावृतः	३६
समित्पवित्रं वेदञ्च	४०	सर्वाण्युदकपूर्वाणि	१४४
समित्पवित्रं वेदञ्च	४७	सवस्मादन्नमुद्धृत्य	१०
समिधोऽभ्याधाय	२७०	सर्वेषामेव दानानां	१४१
समिष्टयजुर्जुहोति	६०	सर्वेषां वा रौरवाजिनं	२६१
समुच्चयो वा	२५३	सर्वे वा सर्वेषां	२६२
समुद्रयात्रास्वीकारः	१००	सर्वेषां वा गायत्रीं	२५१
सम्पन्नमिति तृप्ताः स्थः	१०	सर्वेषां वा गव्यं	२६१
सम्मार्जनान्यपास्यति	४४	सर्वेषां कार्पासं	२६१
सम्मार्जनीकाष्ठ	१७६	सर्वैरलङ्कारः	१४६
सम्मृष्टदर्पणाम्भोज	६१	सवर्णमनुरूपं च	१०८

सवर्णाग्रे द्विजातीनां	६८	सुरापी मद्यपा धूर्त्ता	१०३
सवर्णासु बर्हांषु	१४४	सुरूपां लक्षणोपेतां	८७
सव्ये कृत्वा दक्षिणेन	४२	सुवर्णं रजतं रत्नं	२५८
सव्ये पाणौ कृत्वा	१२८	सुवृत्तमुन्नतं पीनं	६०
सव्यं पादं प्रक्षाल्य	१२६	सुव्यावृत्तं समं चारु	६०
सव्यः सोपग्रहः कार्यः	४६	सूक्ष्माः कृष्णा मूर्द्धस्निग्धाः	६३
सहानुगमनं कुर्यात्	६७	सूक्ष्मैरतिकृशैश्चैव	६२
सहितौ चरतां धर्मं	७४	सूतकान्ते नामकर्म	२०५
साङ्गुष्ठहस्तमुत्तानं	१५८	सूतके तु मुखं दृष्ट्वा	१६७
सा च यौधिष्ठिरी सेना	२३०	सूर्यमुदीक्षयति	२०६
सा जाता हारिणी नाम	२४०	सूर्ये दक्षिणमार्गगामिनि	२१५
साध्वी पतिव्रता नित्यं	६७६	सूर्ये पशुविनाशस्तु	५२
सामगानां चतुर्थेऽह्नि	१७१	सूर्यो व्रतोपकरणे	२४०
सामिधमशनं यत्नात्	१८५	सूर्यः षट् त्रिदशस्थितः	२४०
सा यदि गर्भं न दधीत	१८५	सोत्तरीयस्ततः कुर्यात्	१४५
सा यदि न पश्येत्	१६६	सोदर्याणां तु सर्वेषां	१०२
सायं सन्ध्या पितृप्रसूः	२३४	सोमप्रकृतिरेषा हि	१५६
सार्वकालिकं	१२०	सोमो ददद् गन्धर्वाय	६६
सालश्च देवदारुश्च	४७	सोष्यन्तीमद्भिरभ्युक्षयति	१६५
सिंहगुरौ परिणीता	२२	स्तृतेभ्यो न विप्रचिनुयात्	४०
सिंहसंस्थं गुरुं शुक्रं	६६	स्थालीपाकं श्रपयित्वा	२११
सिन्धुसौवीरसौराष्ट्रान्	२६१	स्थालीपाकस्य जुहोति	२११
सीमन्तोन्नयने चैव	१४	स्थूले कलहशीला स्यात्	६१
सुपुत्रा चैव दुःपुत्रा	१७५	स्नातकस्य यमान्	७६
सुप्तां मत्तां प्रमत्तां वा	७६	स्नातस्य वरुणस्तेजः	४६
सुभगा चैव दुःशीला	१७५	स्नातः सुगन्धिधृक् प्रीतः	१८२
सुभगा श्वेतवस्त्रा स्यात्	१७६	स्नात्वा पीत्वा क्षुते सुप्ते	१२७
सुमनसः प्रतिगृह्णाति	२७५	स्नानं रजस्वलायास्तु	१७७

स्नानं सचैलं	११७	स्वल्पे रूक्षे सस्फुलिङ्गे	४८
स्नापयित्वा तु तां कन्यां	११२	स्वशाखोक्तविधिः स्विन्नः	४२
स्पष्टं रेखात्रयं यस्याः	६१	स्वातन्त्र्याद्धि प्रणश्यन्ति	११२
स्फीतादपि न संचारि	६६	स्वातीशक्रधनाश्विं	२३६
स्मृतिभूक्ताननाध्यायान्	२२६	हंसकोकिलवीणानां	६२
स्युस्तिस्रस्तिथयो वारे	२३२	हंसगोवृषचक्राङ्कं	६३
स्त्रिय एताः श्रियो नाम	११४	हंसस्वनांमेघवर्णां	८८
स्त्रीणां पुनर्विवाहस्तु	६८	हत्वा छित्वा च	७६
स्त्रीपुंसोस्तु	६४	हत्वा छित्वा च शीर्षाणि	७६
स्त्रीशूद्रपतितांश्चैव	४६	हन्तेति वा	२१२
स्यात्कामचारभक्षो-पि	२२४	हरिद्रापुष्पगन्धादीन्	१७७
स्रुवं प्रतप्य पूर्ववत्	४४	हरिद्रां कुङ्कुमं चैव	१८६
स्रुवं प्रतप्य संमृज्य	४४	हविष्पात्रं स्वाग्यृत्विजां	१६०
स्रुवखाते च ये सन्ति	४६	हस्तत्रये दैत्य	२३६
स्रुवाग्रे वसते वह्निः	५२	हस्तदत्ता च या भिक्षा	२५८
स्वकाम्ये वर्तमानानां	११३	हस्तिहस्तनिभैर्वक्त्रैः	६०
स्वगोत्राद्भ्रश्यते नारी	७०	हस्तोच्छ्रितां चतुर्हस्तां	१२१
स्वच्छन्दगा च या नारी	१४४	हस्तो निकुब्जाङ्गुलिकः	४५
स्वच्छन्दव्यभिचारिण्या	१४४	हस्तो मूलं श्रवणः	१८६
स्वतन्त्रोऽपि हि यत्कार्यं	१३८	हीनक्रियं निष्पुरुषं	६६
स्वदक्षिणतः स्रुवधारणं	४४	हुतावशिष्टं लाजानां	१६२
स्वदारांस्त्यजतो मोहात्	१४४	हुते पतिर्यथेतं	१६०
स्वनाम प्रोच्याहं	२५५	हुत्वा हुत्वैव सर्वासां	५६
स्वपितृभ्यः पिता दद्यात्	१५	हृताधिकारां मलिनां	११५
स्वयं कन्या वरयते	७६	हृष्टिः पुष्टिस्तथा तुष्टिः	३
स्वयं वा कुर्यात्	२००	ह्रस्वासु जीवितं ह्रस्वं	८६

Library IIAS, Shimla
S 294.538 J 559 S
00007298